राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५४
ISSN - 2231-0452

# उत्कर्षदीपिका

## (महस्विनी-विशेषसञ्चिका)

प्रधानसम्पादकः
आचार्यः गुल्लपल्लि श्रीरामकृष्णमूर्त्तिः



सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीश के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयाविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५३

ISSN : 2231-0452

# उत्कर्षदीपिका

(उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमाना महस्विन्याः विशेषसञ्चिका)

प्रधानसम्पादकः
आचार्यः जि.एस.आर्. कृष्णमूर्तिः
कुलपतिः

सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के. एस्.
डा. उदयन हेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(स्केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७५०७
2023

# उत्कर्षदीपिका

(उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमाना महस्विन्याः विशेषसञ्चिका)

**ISSN : 2231-0452**

प्रकाशकः

**कुलसचिवः**

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः।

संयोजकः

**अनुसन्धानप्रकाशनविभागः**

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

प्रकाशनवर्षम् : २०२३

प्रतिकृतयः : ३००

NS University Publication Series No. - 354 **ISSN : 2231-0452**

# Utkarṣadīpikā

(Special Volume of 'Mahasvinī'
published on the occassion of 'Utkarṣa Mahotsava' 2023)

General Editor
**Prof. G.S.R. Krishna Murty**
**Vice - Chancellor**

Editors
**Prof. K. Suryanarayana**
**Prof. Sateesha K.S.**
**Dr. Udayana Hegde**

**NATIONAL SANSKRIT UNIVERSITY**
**(Central University)**
**TIRUPATI - 517 507**
2023

# Utkarṣadīpikā

(Special Volume of 'Mahasvinī'
published on the occassion of 'Utkarṣa Mahotsava' 2023)

**ISSN : 2231-0452**

Publisher :
**REGISTRAR**
National Sanskrit University, Tirupati

© National Sanskrit University, Tirupati - 517507, A.P.

Co-ordinator :
**Research and Publications Department**
National Sanskrit University, Tirupati

Year of publication : 2023

Copies printed : 300

**Disclaimer** : The views expressed in the Research papers are those of the authors and not of the editors.

राष्ट्रियसंस्कृतविश्वविद्यालय:
(संसद: अधिनियमेन प्रतिष्ठापित: केन्द्रीयविश्वविद्यालय:)
तिरुपति: -५१७५०७, आं.प्र.

आचार्य: जि.एस.आर्. कृष्णमूर्ति:
कुलपति:

NATIONAL SANSKRIT UNIVERSITY
(A Central University established by an Act of Parliament)
TIRUPATI-517507, A.P.

Prof. G.S.R. KRISHNA MURTY
Vice-Chancellor

E-mail : vice_chancellor@nsktu.org
Ph.: 0877-2287680 ; Mobile : 9440626551
Website : https://nsktu.ac.in

# सारस्वतं निवेदनम्

**“ओं धेनुर्वा वागस्मान् उपसुष्ठुतैतु”**

वैशाख-शुक्लसप्तम्यां भगीरथस्य तपसा विष्णुपदी स्वर्णदी आकाशात् हरजटाजूटात् हिमनगमवतीर्य जनान् यथा पुनाति तथैव ब्रह्मण: मुखात् नि:सृता वेदमन्दाकिनी अमरभारती ऋषिभि: शास्त्रमयी अवतारिता क्रान्तदर्शिभि: सरसवचसा रूपान्तरिता भुवि व्यवहृता राराज्यते। राजतन्त्रे भोजविक्रमादिभि: परिपोषिता वैदेशिकाक्रमणे क्रमेण परिक्षीयमाणा अपि स्वतन्त्रभारते पुनरुद्धारिता इयं गैर्वाणी अन्तर्वाणीनां वदनारविन्देभ्य: मधु स्रवन्ती पुनरुज्जीविता पावयति बुधान्। वैशाखमासि एप्रैल 2020 तमे वर्षे केन्द्रियसंस्कृतविश्वविद्यालयाधिनियमानुसारं लोकसभया विश्वविद्यालयत्रयी प्रोन्नतिं गता। तामेव पावनीं गङ्गावतरणतिथिमेवोपलक्ष्य त्रयाणां विश्वविद्यालयानां प्रोन्नयनमहोत्सव: उत्कर्षदिवसरूपेण समायोज्यते। गतवर्षे केन्द्रियसंस्कृतविश्वविद्यालयस्य आध्वर्य्वे अयं महोत्सव: समाचर्यत । अस्मिन् वर्षे श्रीपतिगिरिपदसन्निधापिते राष्ट्रियसंस्कृतविश्वविद्यालये महोत्सवोऽयमैषम: अनुष्ठीयते।

विबुधानां समावेशे चर्चा: चेक्रीयन्ते। परं चर्चिता: अंशा: लिपिबद्धा: भवन्ति यदि नूनं संस्कृतभाषाया: उत्कर्ष: सुस्थापितो भवतीति संकल्प: कृत: प्रस्तावितश्च कुलपतिसन्निधौ आमोदितश्च आचार्यै:। तत्सङ्कल्पबलेन केन्द्रीयसंस्कृतविश्वविद्यालयानां त्रयाणामुत्कर्षदीपनाय त्रिंश: शोधलेखा: संगृह्य चतुर्मुखमुखाम्भोज कलहंसवधूसरस्वती-समाराधने **उत्कर्षदीपिका** अन्वर्था उद्दीपिता नीराजनीयते।

गतवर्षापेक्षया अयमेव उत्कर्षः उत्कर्षदीपिकासमुद्भवः। आशास्महे इयं पत्रिका आचन्द्रतारारुणं विराजताम्। ऐषमः अनेन विश्वविद्यालयेन प्रकाश्यते। क्रमशः पर्यायेण येन येन विश्वविद्यालयेन महोत्सवः परिपाल्यते तेन तेन उत्कर्षदीपिका उद्दीप्यतामिति समयः सम्भूय स्वीकृतः। प्रतिवर्षमियं पत्रिका अवश्यं प्रकाश्यते इति त्रिभिः विश्वविद्यालयैः एककण्ठेन अङ्गीकृतमिति महान् प्रमोदः।

**उत्कर्षदीपिकायाः** शोधलेखान् ये ये प्रेषितवन्तः ते ते नितराम् अभिनन्दनीयाः। त्रयाणां विश्वविद्यालयानाम् आचार्याणां सकाशात् ये संगृह्य प्रकाशितवन्तः ते आचार्यः के. एस्.सतीशः, डा.उदयन हेगडे , तत्तद्विश्वविद्यालयप्रतिनिधयश्च साधुवादैः सभाज्यन्ते। अत्र टङ्कनादिसंशोधनकार्यं कुर्वन् महस्विनीविशेषाङ्कतया प्रकाशयन् शोधप्रकाशनविभागः कृतकृत्यः। तद्विभागीयाः अध्यापकाः धन्यवादार्हाः। विशेषतः शोधसहायकः डा.दिलीपकुमारमिश्रः।

सा हि श्रीः अमृता सताम् । ओम् ।

तिरुपतिः
दिनाङ्कः - ०३.०५.२०२३

इत्थम्
सुबुधबुधजनविधेयः



**(आचार्यः श्रीगुल्लपल्लि रामकृष्णमूर्तिः)**

**प्रो. श्रीनिवास वरखेड़ी**
कुलपतिः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्,
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

**Prof. Shrinivasa Varakhedi**
**Vice-Chancellor**
**Central Sanskrit University**
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)


के.सं.वि./कुलपति-002/2022-23/ 73

दिनाङ्कः - 02.05.2023

# संदेशः

अथ ' उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः' इति दर्पणकारोक्तिः। काव्यस्यात्मा रसः तद्धर्माश्च गुणाः, तदतिशयहेतवस्त्वलङ्काराः, रीतयो अवयवसंस्थानरूपाः इति काव्यप्रपञ्चे प्रतिपाद्यते।

एतदनु संस्कृतप्रपञ्चे तु संस्कृतस्य जीवातुर्नाम संस्कृतविश्वविद्यालयः एव। तत्र गुणस्थानीयाः गुरवः। अलङ्कारस्थानीयाः शिष्याः। रीतयोऽत्र शिक्षाप्रणाल्यः। एवं जीवातुभूतस्य विश्वविद्यालयस्य अभिन्नाङ्गभूतैः गुरुशिष्यशिक्षाप्रणालीभिः विश्वविद्यालयाख्यः आत्मा ससुखं तिष्ठति। विश्वविद्यालयस्य उत्कर्षः नाम अमीषां त्रयाणाम् अङ्गानाम् उत्कर्षः।

तत्र हि उत्कर्षप्रकर्षस्य प्रकटीकरणाय प्रकाशनानि उपकुर्वन्ति। अतोऽत्र उत्कर्षमहोत्सवप्रसङ्गे 'उत्कर्षदीपिका' इत्येषा पत्रिका प्राकाश्यतां यातीति प्रमोदस्थानम्। पुरा गद्यपद्यप्रकाशनावसरे कवयः गौडीं वैदर्भीं पाञ्चालीं वा रीतिम् अनुप्रयुञ्जते स्म।

काव्यलोके यथा तिस्रः देशजाः रीतयः प्रसिद्धाः तथैव संस्कृतलोके केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिस्थः राष्ट्रियसंस्कृतविश्वविद्यालयः इत्येते स्तरोन्नताः संस्कृतविश्वविद्यालयाः सुप्रसिद्धाः सन्ति। संस्कृतस्य विश्वतोमुखत्वख्यापनाय एव उत्कर्षमहोत्सवाचरणपरम्परा त्रिभिः सम्भूय समारब्धा।

एतदनु प्रथमः उत्सवः 'उत्कर्षमहोत्सवः - 2022' नाम्ना अस्माभिः गतवर्षे नवदेहल्यां समायोजितः। अधुना द्वितीयः 'उत्कर्षमहोत्सवः - 2023' तिरुपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन समायोज्यते। अग्रिमे वर्षे श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयेन 'उत्कर्षमहोत्सवः - 2024' समायोजयिष्यते इत्यतः अमृतवाण्याः गुणप्रकर्षः प्रतिवर्षं वर्धतेतमाम् इति आशास्महे।

(प्रो. श्रीनिवासवरखेडी)
कुलपतिः


56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली - 110058
56-57, Institutional Area, Janakpuri, New Delhi - 110058 (INDIA)
**Ph. No.:** **(O)** 011-28523949, **EPABX** : 28524993, 28521994, 28524995
**EMAIL** : vicechancellorcsu@gmail.com / vc@csu.co.in, **WEBSITE** : www.sanskrit.nic.in

**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
**Prof. Murlimanohar Pathak**
Vice-Chancellor

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
(केन्द्रीयविश्वविद्यालयः)
'ए' ग्रेड (नैक)
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110 016 (भारत)

**Shri Lal Bahadur Shastri National Sanskrit University**
(Central University)
'A' Grade (NAAC)
B-4, Qutub Institutional Area, New Delhi-110 016 (INDIA)

**पत्र सं-ला.बा.शा./वी.सी./2023/08** **दिनांक** 27.04.2023

**श्रीहरिः**

## धेनुर्वै दुदोह सर्वम्

प्रशस्तेयं भारतीयज्ञानपरम्परा यदाधारं सकलार्थपदमुप्तबीजमिव स्वकीयं सम्भूतिप्रयोजनं प्रस्फुरन् मणिरिव विद्योतते। तदेव सकलमपि वाङ्मयं शब्दराशिसमन्वितं नितान्तमनादित एव विराजमानं कूटस्थाचारेण साम्प्रतमपि स्वीयमजस्रमजरञ्च रूपं वरयते। स्मरामि च श्रुतिवाक्यम् -

वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वाः पशवो मनुष्याः।
वाचीमा विश्वा भुवनान्यर्पिता, स नो हवं जुषतामिन्द्रपत्नी॥ (तै.ब्रा. 2/8/8)

तदेव सकलमपि ब्रह्माण्डं स्वकीयेन ज्ञानमहिम्ना चर्कर्ति, बर्भर्ति, जर्हर्ति च। यथापूर्वमकल्पयत् इति सदुद्घोषेण यङ्र्थोऽपि समर्थितः। तदेव परम्परया यथासम्प्रदायमनादित अद्यापि अयातयाममिव आत्मानमुपस्थापयत् विश्वकल्याणमाधत्ते। आह च ऋक् अभिप्रायममुम्।

इमां धियं शिक्षमाणस्य देव, क्रतुं दक्षं वरुण संशिशाधि।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं सहेम॥ (ऋग्वेद 8/42/3)

तदेव परम्परामनतिक्रम्य सर्वानपि उपकर्तुं सततं समुत्केयं स्वानुरूपं योग्यतासम्भरितं प्रतीक्षते।

दुरतिक्रमोऽयं कालः यत् निजजनितभावविकाराक्रोशे सर्वमपि कलयति। कदाचित् सतोऽनुरोधेन ज्ञानस्य स्फीतिः, कदाचित् तमसोऽनुरोधेन ज्ञानाऽवर्णताऽपि दृष्टिमुपगता। अत एव 'लोकः विचित्र' इति कथनमपि सङ्गतिं लभते। कष्टायेदं मलाऽच्छादनं, तेनैव सङ्कोचः, तदेव कार्पण्यं, तदुद्धर्तुमेव भारतीयज्ञानपरम्परायां "कार्पण्यदोषोऽपहतस्वभाव" इत्यादि अनुनयोऽपि विधीयत एव। सोऽनुनयः विद्याग्रहणे जीवातुभूतोऽनवद्यतया सर्वेषामभिमत एव। तस्यैव परम्परया संरक्षणाय पत्रिकाप्रकाशनरूपः कश्चिदुपायान्यतमः प्रशस्ततरो मन्येऽहमिति। अत्र कृतप्रयासाः सफलीभवन्तु, इति मेऽभिरुचिः। तदेव प्रतिजाने -

Ph. : 011-26851253, 26564003
E-mail : profmpathak@gmail.com, vcslbsrsv@yahoo.co.in, vc@slbsrsv.ac.in

ससंस्कृतं संस्कृतिमाश्रयन्ती।
प्राङ्नव्यविद्यामिह पोषयन्ती॥
चेतो हरन्ती विदुषामजस्रम्।
भायात् सदोत्कर्षसुदीपिकेयम्॥५॥

विद्वद्वृन्दश्लाघ्यभावं प्रपन्ना।
हृद्याद्दूष्यैर्वाग्विलासैः सुजुष्टा॥
उत्कर्ष्योद्दीपिका दीपतुल्या।
ध्वान्तं सर्वं कृत्स्नशो वै निरस्येत्॥६॥

**अकम्पामनुकम्पां ते प्राप्य गीर्वाणभारती।**
**समिद्धवैभवैः दीप्ता भायाद् भारतमण्डले॥७॥**

**भावगाम्भीर्यमहिता सुवर्णपदभूषिता।**
**उत्कर्षदीपिका भायात् सदोत्कर्षवती सती॥८॥**

27.04.2023
*(मुरलीमनोहरपाठकः)*

## महस्विनीसम्पादकमण्डली

**प्रधानसम्पादकः**

**आचार्यः जि.एस.आर्.कृष्णमूर्तिः**

कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सम्पादकः**

**आचार्यः के.सूर्यनारायणः**

विभागाध्यक्षः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सदस्याः**

**आचार्यः ए.वि.नागसम्पिगे**

निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

**आचार्यः के.प्रतापः**

आचार्यचरः, श्रीवेङ्कटेश्वरविश्वविद्यालयः, तिरुपतिः

**आचार्यः टि.वि.राघवाचार्युलु**

दर्शनसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आचार्या सि.ललिताराणी**

साहित्यसंस्कृतिसङ्कायप्रमुखा, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. शिवरामभट्टः**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. राजेशमीना**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. सोमनाथदाशः**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा.सीहेच्. नागराजु**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. दिलीपकुमारमिश्रः**, शोधसहायकः

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी–जुलाईमासयोः भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध–दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्कः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते, समालोचना–पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः–५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **सम्पादकः, महस्विनी–शोधपत्रिका, राष्ट्रियसंस्कृतविश्वविद्यालयः, आन्ध्रप्रदेशः, तिरुपतिः–५१७५०७** इति सङ्केतेन विधेयः।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतारः यथाकालं स्वकीयान् संस्कृताङ्गलभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम्

संस्कृतवाङ्मयम् अत्यन्तं विस्तृतमिति विदितमेव हि समेषामस्माकम्। संस्कृतभाषायाम् उपनिबद्धानां शास्त्राणाम् अध्ययनम्, अध्यापनम्, अनुसन्धानं च अस्माकं कर्तव्यकर्मसु प्राध्यान्यं भजते। अनुसन्धानस्य क्षेत्रं तु अत्यन्तं व्यापकं विद्यते । आधुनिके अस्मिन् काले तन्त्रज्ञानमपि अनुसन्धानम् उपकरोति। अस्मत्पूर्वजैः महर्षिभिः प्रतिपादितेषु सिद्धान्तेषु नवीनतत्त्वान्वेषणम् उत प्रसङ्गानुसारं नवीनपदार्थस्य प्रतिपादनम् अनुसन्धानस्य द्वारमुद्घाटयति। संस्कृतवाङ्मयस्य विस्तारकारणात् व्याख्यानरूपम् अनुसन्धानम् अतीव व्यापकं स्थानमावहति। अभियुक्तैः प्राचीनकालादारभ्य अद्य यावत् नवीनतथ्यप्रतिपादकं व्याख्यानात्मकम् अनुसन्धानकार्यं विहितमस्ति। अतः, ततोऽप्यधिकं नवीनं किं वा अवशिष्टमस्तीति केषाञ्चन शोधलेखकानां मनस्सु नूतनविषयमधिकृत्य लेखनावसरे अनुयोगरू जागर्ति। परन्तु कस्यापि विषयस्य गभीरावलोकनेन वारं वारम् अधिगमनेन च विद्यमाने विषये नवीनचिन्तनं स्फुरति आहोस्वित् अवशिष्टं नवीनं तत्त्वं वा प्रादुर्भवति। अतः शोधलेखनात् पूर्वं कस्यापि विषयस्य कूलङ्कषमध्ययनम् अवश्यं क्रियते। येन समाजोपयोगि नवीनशोधकार्यं समेषां पुरस्तात् समायायात् इति।

तिरुपतौ राष्ट्रियसंस्कृतविश्वविद्यालयेन **समायोज्यमाने**ऽस्मिन् उत्कर्षमहोत्सवे, त्रयाणामपि केन्द्रीयसंस्कृतविश्वविद्यालयानां विद्वद्वरेण्यानां विशिष्टैः शोधलेखैः सहिता **उत्कर्षदीपिका** इत्याख्या **शोधपत्रिका** प्राकाश्यं नीयते। समयाभावं मनसि निधाय इयम् उत्कर्षदीपिका, **महस्विनी**शोधपत्रिकायाः विशेषसञ्चिकारूपेण प्रकाश्यते। एतदर्थं त्रयाणामपि केन्द्रीयसंस्कृत-विश्वविद्यालयानां कुलपतयः शुभसन्देशप्रदानेन अस्याः **उत्कर्षदीपिकायाः** शोभां वर्धितवन्तः। तेभ्यः आधमर्ण्यं प्रकटीक्रियते। अल्पीयसि एव काले

स्वीय-शोधलेखनानि प्रदाय उपकृतवद्भ्यः त्रयाणामपि केन्द्रीयसंस्कृत-विश्वविद्यालयानां विद्वद्धौरेयेभ्यः कार्तज्ञ्यं विनिवेद्यते । अस्मिन् उत्कर्षदीपिकाख्ये ग्रन्थे विभिन्नशास्त्रेषु आहत्य त्रिंशल्लेखाः प्रकाश्यमानाः सन्ति । तत्र व्याकरणम्, साहित्यम्, वेदः, न्यायवैशेषिकम्, अद्वैत–जैनादिदर्शनानि, मीमांसा, साङ्ख्यम्, आगमः, ज्यौतिषं, विज्ञानं, शिक्षाशास्त्रम्, Indian Knowledge Systems इत्यादिषु प्राधान्यविषयेषु नवीनचिन्तनधारामाश्रित्य लिखिताः लेखाः विलसन्ति।

एतेषां शोधलेखानाम् एकत्रीकरणे, संवहने, टङ्कने च डा. उदयन हेगडे नितान्तम् उपाकरोत् । पुस्तकरूपेण सज्जीकरणे साह्यमनुसन्धान-प्रकाशनविभागद्वारा प्राप्तमस्ति । अतः, तद्विभागाध्यक्षेभ्यः तत्सहवर्तिभ्यश्च धन्यवादाः। विश्वविद्यालयस्य **कुलपतीनां महामहोपाध्याय आचार्य गुल्लपल्लि श्रीरामकृष्णमूर्तिमहोदयानां** प्रेरणया प्रोत्साहनेन च इयम् **उत्कर्षदीपिका** प्राकाश्यमेति। अस्याः प्रकाशने सहकृतवद्भ्यः विश्वविद्यालयस्य प्राशासनिक–अधिकारिभ्यः, प्रत्यक्ष–परोक्षरूपेण सहकृतवद्भ्यः समेभ्यः धन्यवादान् वितनोमि ।

शोभन वैशाख–शुक्ल–तृतीया, रविवासरः

**(आचार्यः सतीशः के.एस्.)**
सम्पादकः, उत्कर्षदीपिका

# उत्कर्षदीपिका
## शोधलेखानुक्रमणी


1. भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि 1
   – प्रो.रामसलाहीद्विवेदी
2. कालिदासीयाः केचनापत्यप्रत्ययान्ताः 5
   – प्रो. जयकान्तसिंहशर्मा
3. सांख्यदर्शने मोक्षस्यावधारणा 15
   – प्रो.सुजातात्रिपाठी
4. ईश्वरस्वरूपमीमांसा 21
   – प्रो.मारकण्डेयनाथतिवारी
5. विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम् 34
   – डॉ. दयाल सिंह पंवार
6. न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः 38
   – प्रो. बिष्णुपदमहापात्रः
7. शिक्षाशास्त्रे नवीनाः विचाराः 46
   – आचार्य. के. भरतभूषणः
8. वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे 52
   – प्रो.प्रभाकरप्रसादः
9. वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः 58
   – प्रो. प्रेम कुमार शर्मा

10. भारतीयजैनज्ञानपरंपरा 67

– प्रो.अनेकांतकुमारजैनः

11. अभिहितान्वयबोधः 78

– आचार्यः का.ई. देवनाथन्

12. श्रीपाञ्चरात्रशब्दनिर्वचनानि 115

– आचार्यः टि.वि. राघवाचार्यः

13. ऋतुसंहारे वसन्तवर्णनम् 125

– आचार्या सि. ललिताराणी

14. **Curriculum Development for Sanskrit students in the light of IKS and NEP-2020** 131

– Prof. R.J. Rama Sree

15. यजुर्वेदीयहस्तसञ्चालनविधिः 144

– डा. निरञ्जनमिश्रः

16. विहगेन्द्रसंहितायां प्राणायामविधिः 156

– डा. पि. टि. जि रङ्गरामानुजाचार्युलु

17. संस्कृतवाङ्मये रसशब्दविचारः 162

– डा. का. लीनाचन्द्रा

18. **Musical References in Pancharatra Agama** 168

– Dr. Vyzarsu Balasubrahmanyam

19. धातुकाव्यस्य व्याकरणवैशिष्ट्यम् 184

– डा. उदयन हेगडे

20. ज्योतिषशास्त्रे पञ्चमहापुरुषयोगेषु व्यक्तित्वविकासः 194

– डा.नारायणन् नम्पूतिरि न.त

21. महाभाष्ये लौकिकन्यायानां समादरः 198
– प्रो. सुबोध शर्मा
22. अपूर्वसद्भावमीमांसा 208
– प्रो.सूर्यनारायणभट्टः
23. गण्डान्ताद्यशुभजन्मविचारः 214
– प्रो. हंसधर झा
24. अयनांशविमर्शः 240
– डॉ. पुनीतागुप्ता
25. संस्कृत–विज्ञान–वैभवम् 247
– प्रो. बनमाली बिश्वालः
26. व्याकरणनये लिङ्गविमर्शः 258
– डा. मधुकेश्वरभट्टः
27. स्वातन्त्र्यसङ्ग्रामे संस्कृतनाटकानां योगदानम् 265
– डा. राघवेन्द्रभट्टः
28. शाब्दिकदृष्ट्या लक्षणाविवेचनम् 272
– विद्यावाचस्पति डा. सदानन्द झा
29. विंशकं ज्ञानं ज्ञानसाधनम् 284
– डा. गणेश ति. पण्डितः
30. वाल्मिकीयरामायणानुगुणं करुणरससमीक्षणम् 292
– डा. दीपिका दीक्षित

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि

**प्रो.रामसलाहीद्विवेदी** *

धन्यं हि भारतं यत्र अनादितो बहब ऋषयः स्वकीयं ज्ञानं विश्वमुद्दिश्योपदिष्टवन्तः, येन विश्वस्य प्रजाः समेधेरन्नित्यभिलाषोऽपि तेषां परिपूर्णताङ्गतः। इदं तु ध्येयं यदस्माकमाचार्याः मनसैव सर्वं प्रकल्पितवन्तः। मनस एव सामर्थ्यमासीदित्थं येन सति प्रयोजने सर्वेऽपि स्थूलपदार्थाः प्रकटिताः जाताः। तदेवोक्तं शुक्लयजुर्वेदे शिवसङ्कल्पसूक्ते-

**'येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।**
**येन सप्तहोता तन्मे मनः शिवशङ्कल्पमस्तु'** ॥ इति।

अत्रात्यन्तं स्पष्टं यत् भूतं भविष्यमाणञ्च यत् तत्सर्वमपि मनसोऽधीनमेव। अत एव **"ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति"** इत्याकारकं कथनं प्राप्यते। परं कालान्तरे एवम्भूतानां मनीषिणां समर्थानां तिरोधानं जातम्। वेदस्यापि तथाविधं विज्ञानं ये जानन्ति स्म तथाभूतानां विदुषां ह्रास एव परिलक्षितः। तदर्थं कर्मपरा अस्माकमाचार्याः ब्राह्मणारण्यकोपनिषदानां निरूपणं चक्रुः। ततोऽप्यनन्तरे काले मेधायाः ह्रासं वीक्ष्य भासनप्रक्रियाया आचार्याः स्मृतीः, पुराणानि तथा चान्यदपि साहित्यजातं प्रकल्पितवन्तः। तत्र सर्वत्र भारतीयं ज्ञानं प्रतिपदमाप्लावितं गृहीतं वर्तते।

सर्वत्र काले प्रजानां सुखमेव सर्वेषां लक्ष्यं भवति। तच्च सुखं सामाजिकव्यवस्थया समृद्ध्या च सम्पन्नं भवतीति परिलक्ष्यते। तदर्थं राज्यशासनं पतिकल्पितम्। अत एव महाभारते उक्तम् - **'राजा कालस्य लक्षणम्'** इति। इतिहासेऽपि पृथुराजस्य वर्णनमुपलभ्यते येन प्रजानां सुखसमृद्ध्यर्थं पृथिव्याः दोहनं कृतम्।

तात्पर्यमिदं यत् पुरग्रामादिकल्पनां कृत्वा प्रकृतेरनुकूलतां चासाद्य सर्वेषामभीष्टमपि तेन समुत्पादितम्। पृथोः प्राक् पुरग्रामादिकल्पना नासीत्। तेन पृथुना दोहवत्सादिभेदेन क्षीरभेदः कृतः। क्षीरशब्दस्य व्याख्यानन्तु एवमवगन्तव्यम् - 'घस्यते

---

* आचार्योऽध्यक्षश्च व्याकरणविभागे, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

अद्यते इति क्षीरम्', अत्र घस्यते इति व्युत्पत्त्या विषयमात्रमवबुध्यते। यथा आहारशब्दस्य 'आह्रियते' इति व्युत्पत्त्या विषयमात्रमर्थः प्रसिद्धो भवति तथैव अत्रापि क्षीरशब्देन सर्वेऽपि भोग्यपदार्था अन्वर्थेन विज्ञेयाः। तेन हि प्रकृतिसंरक्षणद्वारा सर्वं लब्धुं शक्यत इति सूचितम्।

अस्माकं शास्त्रेष्वियं वास्तुकला बहुत्र स्थले वर्णितास्ते। अस्याः प्रथमं दर्शनं श्रीमद्भागवते एवमुपलभ्यते - **गंगायमुनयोर्नद्योः अन्तराक्षेत्रमावसन्**। इति।

अमुं सिद्धान्तमाधुनिका अपि मन्यन्ते, यथा -

**"ऐसा माना जाता है कि गंगा और यमुना के बीच दोआब का उपनिवेश करते समय इस प्रणाली को पहली बार राजा पृथु द्वारा पेश किया गया था"**

(पृष्ठ सं. 14, 'पंचायती राज' प्रताप चन्द्र स्वैन)

अत एव अद्यापि उत्खनने एतत्क्षेत्रे बह्व्यः स्मृतय अवशेषाश्च उपलभ्यन्ते।

एवम्प्रकारेण सर्वत्रापि प्रजानां सुखाय राज्यव्यवस्थायाः पुरग्रामादिस्थापनायाः वेदेषु शास्त्रेषु पुराणादिषु च सर्वत्रापि महत्तरं वर्णनं वर्तते।

तत्र प्रजानां संरक्षणार्थं राजव्यवस्था सम्पादिता, तदनुसारमेव प्रजायाः सुखसमेधनमपि प्रकल्पितम्। तत्र भारतीयवाङ्मये राजशास्त्रेऽस्य बृहत्तरं वर्णनमुपलभ्यते। तस्या एव किञ्चिदत्र सङ्केतः क्रियते -

**सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः।**

(श्रीमद्भागवतम् 3/16/5)

अयमभिप्रायो यथा – आमयः - कुष्ठरोगः, त्वचं हन्ति - अन्यथा करोति। तथैव राज्ञः परिजनाः मन्त्रिसचिवादयो रक्षकाश्च यदि सम्यक् न भवन्ति तदा तेषामसद्व्यवहारेण धर्मात्मापि राजा अपयशसा दूषितो भवति। अद्यत्वेऽपि अयं सन्देशो ग्राह्यः यत् यस्य शासकस्य परिवेशिजनाः सम्यक् न भवन्ति तदा सः शासकः सद्य एव ग्लानिं लभते। एतेन भारतीयं ज्ञानं सर्वथापि हृदयेऽवधारणीयम्। अत्रेदं "शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते" इति धिया प्रथमं राजा सत्पात्रोऽनुष्ठेयः। तदेवोक्तं मनुस्मृतौ श्रीमद्भागवते च -

सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ॥ इति।

(मनु. 12.100, भाग. 4.12.45)

तेन राज्ञः इमे सिद्धान्ताः भवेयुः -

तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः।
लोकाः स्युः कामसन्दोहा यस्य तुष्यति दिष्टदृक् ॥
य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन्।
प्रजानां शमलं भुङ्क्ते भगं च स्वं जहाति सः ॥ इति।

(श्रीमद्भागवतम् 4/2/23,24)

अद्यापि एते गुणाः राज्ञां शासकानाञ्च अपेक्षिताः स्युः। ततः सम्वर्द्धिते राष्ट्रे वैज्ञानिकं चिन्तनमवश्यमेव प्रकल्पनीयम्।

**तत्रादौ सृष्टिप्रक्रियादिविमर्शः**

तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ॥
कालमायांशयोगेन भगवद्वीक्षितं नभः।
नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥
अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः।
ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ॥
अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम्।
आधत्ताम्भो रसमयं कालमायांशयोगतः ॥
ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम्।
महीं गन्धगुणामाधात्कालमायांशयोगतः ॥

(श्रीमद्भागवतम् 3.3.32-36)

अत्र सर्वत्रापि शब्दरूपरसादीनां समन्वयक्रमेण सृष्टेः सूक्ष्मतत्त्वानां निर्देशः कृतः। अद्यतने प्राप्ते परमाणुलक्षणे यत्परमाणोः तिस्र अवस्थाः विज्ञापिताः भवन्ति तस्य दिग्दर्शनं प्रागेव कृतमास्ते।

**चरमः सद्विशेषाणामनेकोऽसंयुतः सदा।**
**परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः॥**

(श्रीमद्भागवतम् 3.11.1)

किञ्च बहवोऽपि विषयाः अस्माकं शास्त्रेषु निहिताः वर्तन्ते। यथा गुरुत्वाकर्षणसिद्धान्तः विकारसाजात्यसिद्धान्ताश्च ग्रन्थेषु निरूपिताः वर्तन्ते। तद्यथा व्याकरणमहाभाष्ये –

"अचेतनेष्वपि - लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः॥ तथा - या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः। स धूम आकाशे निवाते नैव तिर्यग्गच्छति, नार्वागवरोहति। अब्विकारोऽप एव गच्छत्यान्तर्यतः॥ तथा - ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति, नार्वागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः॥

(**प्रदीपः** - अचेतनेष्वपीति। न्यायस्य व्याप्तिप्रतिपादनपरमेतत्॥ अब्विकार इति। अन्तरिक्षे सूक्ष्मः समुद्रोऽस्तीति तद्विकारः सर्वा आप इति काष्ठादिस्थानामपामग्निसंयोगात् धूमो विकारः॥ सूर्यविकारोऽर्चिः सूर्यमेव गच्छति।

(**उद्योतः** - अन्तरिक्षे इति। अन्तरिक्षे भवा आन्तरिक्ष्यः॥ अत एव निदाघे निशि निरावरणे शयानानां शैत्योपलम्भः॥ तस्यैव च रविकिरणसंपर्केण मेघरूपतया वायुयोगाद्दृष्टिः॥ आन्तरिक्ष्याणामपां परम्परया धूमो विकार इति दर्शयति - तद्विकारः सर्वा इति। सूर्यविकार इति। अत एव दावाग्नेर्मध्याह्नादौ सूर्यकरसंपर्कात् क्रौर्यातिशयो दृश्यते।)" (स्थानेऽन्तरतमसूत्रे महाभाष्यम्)

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# कालिदासीयाः केचनापत्यप्रत्ययान्ताः

**प्रो. जयकान्तसिंहशर्मा** *

रससिद्धानां कवीनां वाचि तात्पर्यानुकूलाश्शब्दाः स्वयमहमहमिकया समवेता भवन्ति। तत्र यथायथं कृदन्ततद्धितान्ताख्याताव्ययादयो भाषाप्रवाहे स्वयं प्रवहन्ति। नवनवोन्मेषशालिनी बुद्धिः प्रतिभा, अनुकूलशब्दार्थोपस्थिति: प्रतिभेति प्रतिभावतां काव्यानि दृष्ट्वा प्रतिभालक्षणद्वयमतः कृतमलङ्कारशास्त्रे। अत एव प्रतिभैव काव्यकारणम्, सा स्वाभाविकी आहार्या च, तत्र द्वितीया देवादिप्रसादलभ्या व्युत्पत्त्यभ्यासजन्या चेति द्विविधेत्युक्तम्। काव्यपरिशीलकैर्भावकैःकृदन्ततद्धितान्तादिशब्दप्रयोगसौष्ठवं समालोच्यते। रमणीयार्थप्रतिपादकः शब्दः काव्यमस्तु रसात्मकं वाक्यं वा अन्यदपि किमपि तल्लक्षणं भवतु सर्वत्रानुकूलशब्दार्थोपस्थितिरपेक्ष्यते, अन्यथा काव्यत्वहानि: स्यात्, काव्यत्वे नष्टे कुतस्तत्प्रयोजनावाप्तिः? किञ्च काव्यस्य यन्मुख्यं प्रयोजनद्वयं यच्च तत्काव्यमन्येभ्य-श्शास्त्रेभ्यो व्यतिरेचयति, विगलितवेद्यान्तरसम्पर्कशून्यानन्दरूपं कान्तासम्मितोपदेशरूपञ्च यत् तादृशोचितानुकूलतात्पर्यप्रतिपादनासमर्थात्काव्यात् कथमपि न शक्यते लब्धुम्। तथाशब्दार्थोपस्थिति: कविशक्तिं द्योतयति काव्यञ्च तदात्मानन्दसम्पृक्तं साधयति। अत एव शास्त्रे दोषाः गुणाश्च काव्यानां विविच्यन्ते । उदाहरणाय कालिदासस्य श्लोकोऽयं काव्यशास्त्रिभिः समालोचितः "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया **पिनाकिनः**[1]" इह या शोचनीयता प्रतिपाद्यास्ति सा पिनाकिशब्दादिन्नन्तान्न सिद्ध्यति पिनाकधारिणः शिवस्यारिष्टशमनार्हतया स्पृहणीयत्वात्। **'कपालिनः'** इति पदात्तु सिद्ध्यति, अपूतकपालधारिणस्तस्य काकतालीयस्पर्शोऽपि शोच्यतां नयति प्रार्थनालभ्यसमागमस्तु नितराम्। 'कपालिनः' इति पदस्यानुगुणत्वम्। इत्थम्भृतो विचारः काव्यशास्त्रेषु सर्वत्र लभ्यते प्रत्ययव्यञ्ज्यता चोद्धाट्यते। पिनाकिना भग्नमनोरथा सती[2]त्यत्र

---

* **व्याकरणाचार्यः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली**

[1] कुमारसम्भवम् ५.७१

[2] तत्रैव ५.१
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

तु पिनाकिशब्दस्यानुगुणत्वम्, पार्वती भग्नमनोरथा कामदहनाज्जाता, दहनं यद्यपि नेत्राग्निना जातम्, तथापि पिनाकिसमक्षं गतस्य कामस्य नाशस्तु निश्चित एवेत्याद्यर्थस्तेन पदेन ध्वन्यते। इत्थं काव्यशास्त्र उपसर्गकर्मप्रवचनीयप्रातिपदिकधातुकारकतिङ्कालप्रत्ययादीनां प्रयोगविशेषेण व्यञ्जकता वक्रता रसाद्यनुगुणता च प्रतिपादिताः। मयात्र निबन्धे केषाञ्चनापत्यप्रत्ययान्तानां कालिदासेन प्रयुक्तानां वैशिष्ट्यमाविष्कर्तुं प्रवृत्तम्।

**तद्धितान्तप्रयोगाः दिनानुदिनं क्षीणाः जाताः,** इदानीन्तनानां जनानां प्रवृत्तिः कृदन्ते सुबन्ते कदाचित्तिङन्ते। रचनापि कृदन्तबहुला, विततमपि तत्प्रकरणं साम्प्रतमुपेक्षितम्, विरल एव तदधीते तद्वेद । तत्प्रत्ययस्यार्थबाहुल्यं क्षेत्रं च विततं को न स्तवीति। बहवो भावास्तत्प्रयोगं विना न यथायथं प्रतिपाद्यन्ते, समांसमीना धेनुरुपास्या मुक्तिश्च त्याज्येति ललितप्रयोगस्तु तदधीन एव। **कान्दिशीका** इमे भवन्तीत्यस्य स्थाने वाक्यप्रयोगेण कथङ्कारं निर्वाहः स्यात्। अथ किं तल्लक्षणमिति चेत् उच्यते **तद्धिताः** (४.१.७६) इत्यधिकारेऽष्टाध्याय्यां विहिताः प्रत्ययास्तद्धिता इति। **तद्धिताधिकारपठितत्वे सति मुनित्रयसङ्केतसम्बन्धेन प्रत्ययपदवत्त्वमिति** वा तल्लक्षणमस्तु। अयमधिकारो **यूनस्तिः** (४.१.७७) इत्यत आरभ्यापञ्चमाध्यायसमाप्तिं यावद्वर्तते, तथैव व्याख्यानात्स्वरितत्व-प्रतिज्ञानाच्च। पाणिनिना पृथक् सञ्ज्ञामकृत्वाधिकारेणैव ते सूचिताः। तद्धिता इति महासञ्ज्ञाकरणन्तु तेभ्यः प्रयोगेभ्यो हिता इत्यन्वर्थलाभाय, तेन यथाप्रयोगमेव स्युः। अतो दाशरथिः दाशरथ इत्युभयं साधु वासुदेवस्तु प्रयोक्तव्यः न तु वासुदेविरिति तथाप्रयोगादन्यथा चाप्रयोगात्। कियन्मात्रं जल विप्रेति प्रश्ने मात्रचः प्रयोगं श्रुत्वा साधारणो जनस्तमेव प्रत्ययं प्रयुञ्जीत। किन्तु उरुदघ्नं नराधिपेति विप्रस्य दघ्नचः प्रयोगात् तस्य महावैयाकरणत्वमनुमाय भोजेन लक्षं मुद्राणां दत्त्वा स समादृतः। एतेन ज्ञायते यत्तत्कालेऽपि तद्धितप्रयोक्तारोऽल्पीयांसोऽभवन्निति। **कठिनश्च तद्धितप्रयोगः**, पटुपटुर्देवदत्त इत्यत्र धर्मलुप्ता तद्धितगोपमा, प्रकारे गुणवचनस्येति सादृश्ये द्विर्भावविधानादि-त्यपय्यदीक्षितः। जगन्ना[1]थस्तु अत्र वाचकोऽपि लुप्त इति वाचकधर्मलुप्ताया

---
[1] रसगङ्गाधरः पृ. २२४
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इदमुदाहरणम्। न चात्र वाचकस्य द्विर्भावस्यैव सत्वान्नास्ति लोप इति धर्ममात्रस्येति वाच्यम् द्विर्भावस्य सादृश्यवाचकत्वोक्तेर्महाभाष्यकैयटादिविरुद्धत्वात्। द्विर्भावः सादृश्यस्य द्योतको न वाचकः। एवञ्च पटुपटुः (पटुसदृशः) इति धर्मवाचकलुप्तोदाहरणं न धर्मलुप्ताया इत्याह। रूपयौवनलावण्यस्पृहणीयतराकृतिः पुरतो हरिणाक्षीणामेष पुष्पायुधीयतीत्यत्र पुरतः इति तद्धितप्रयोगोऽपय्यदीक्षितकृतोऽपशब्द इति जगन्नाथ;[1] नगरवाचिनः पुरशब्दात्तसिलि हरिणाक्षीणां नगरादित्यर्थस्यासङ्गतेः। न हि पूर्ववाचकः पुरशब्दः क्वापि श्रूयते, पूर्वशब्दात्तु 'पूर्वाधरावराणामसिपुरधवश्चैषामित्यसौ पुरादेशे पुर इति भाव्यम् न तु "पुरतः" इति। अत एव '**अमुं पुरः पश्यसि देवदारु**[2]मिति कालिदासः। इत्थं जगन्नाथेन पुरत इति प्रयोगस्यासाधुत्वं प्रदर्शितम् परन्तु नागेशोऽत्राह- नात्र तसिल् किन्तु आद्यादित्वात्तसिः। पुरत इति निपातोऽप्यस्ति अतो नात्र प्रमादो दीक्षितस्य। अत एव इयञ्च तेऽन्या पुरतो विडम्बनेति[3] कालिदासः '**पश्यामि तामित इतः पुरतश्च पश्चात्**' इति भवभूतिश्चेति केचित्। अन्ये तु दक्षिणोत्तराभ्यामतसुच् इत्यत्र तसुचैव पुंवद्भावेन सिद्धेऽतसुज्विधानमन्यस्मादपीति ज्ञापनायेति तेन पचाद्यजन्तात्पुर शब्दात्तस्मिन्निष्ट-सिद्धिरित्याहुः। वस्तुतस्तु **पुर अग्रगमने** इति चौरादिकाण्णिजभावे इगुपधलक्षणे के सार्वविभक्तिस्तसिरिति बोध्यम्। इत्थं यत्र तद्धितप्रत्ययोऽसाधुरित्येकेनोक्तं तत्रान्यैः साधुत्वं दर्शितमिति तद्धितप्रयोगस्य काठिन्यं स्पष्टम्। अयमपि तत्प्रयोगे हासहेतुः।

सत्स्वपि नामान्तरेषु प्रत्यासन्नप्रकृतिमहिम्नापत्यप्रत्ययप्रयोगेण न केवलं तत्र कश्चिद्विशेषश्चमत्कार आविष्कृतो भवति अपितु तादृशेष्वन्यतमप्रयोगद्वारा किञ्चिद्विलक्षण-मेवानुगुण्यमुन्नीयते। तद्यथा इक्ष्वाकोरपत्यानि तु **इक्ष्वाकवः** - एकत्वे पुनरैक्ष्वाक इति। बहुत्वेऽपत्यप्रत्ययस्य लुक्, एकत्वे निपातनाट्टिलोपः। जनपदशब्दात्क्षत्रियादञित्यञ्। कालिदासेनोभयमप्युपन्यस्य प्रयोगभेदः प्रादर्शि इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धय

---

[1] रसगङ्गाधरः पृ.२२६

[2] रघुवंशम्, २.३६

[3] कुमारसम्भवम् २.७०
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इत्यत्र[1] वसिष्ठस्य कुलगुरुत्वमामूलादिति स्फोरयता ककुत्स्थप्रभृतीनां सङ्ग्रहायोपन्यस्तम्। तेषु सर्वेषु विशेषतोऽनुगृहीत इक्ष्वाकुरेवेति तदुल्लेखः, यश्च वसिष्ठप्रसादाच्छतं पुत्राणां लेभ इति तादृशसामर्थ्यवति भवति विद्यमाने ममैकोऽपि नेति स्वात्मवेदनावेदनं तद्वश्यत्वञ्च पुरस्कृत्य दयनीयत्वमुपक्षिप्तम्। एवमेव गलितवयसामिक्ष्वाकूणामित्यत्र सदाचारानुवर्तन-स्यापरिहार्यत्वबोधनाय तत्पदम्। ननु इक्ष्वाकुरघुपदयोर्जनपदवाचित्वाभावात्प्राग्दीव्यतीयेऽ-णि तद्राजत्वाभावात्तस्य कथं बहुषु तस्य लुगिति चेच्छृणु अत्र तदपत्ये लक्षणया प्रयोगः। ददर्श कश्चि**दैक्ष्वाक**स्तपस्यन्तमधोमुखमित्यत्रैक्ष्वाकपदेन रामस्येक्ष्वाकोरिव वर्णाश्रमधर्मपालनाभिसन्धिर्ध्वन्यते तद्यथा इक्ष्वाकुः स्वतनयं धर्मभ्रष्टं विज्ञायाचिरेण तत्याज तदपत्यत्वेनासावपि कथं कमप्यतिमर्यादं सहेतेति व्यज्यते। यथोक्तं श्रीमद्भागवते

**ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाभिहितं नृप।**
**देशान्निस्सारयामास सुतं त्यक्तविधिं रुषा॥**[2]

राघवपदगम्यार्थस्तु नितरामस्माद्भिन्न एव। लङ्धति ज्ञानसीमानमिति गत्यर्थकाद्धातोः रघुपदनिष्पत्तिः। यथोक्तं स्वयं कविना-

**श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः।**
**अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्॥**[3] इति।

एवमाप्तवचनात्स पौरुषं काकपक्षधरेऽपि राघव[4] इत्यादिषु **राघव**पदप्रयोगेण रघोरपत्यतया धैर्यवीर्यप्रतापत्यागास्तिक्यादिधर्मसहस्रं बोध्यते तद्यथा रघुर्देवेन्द्रस्य महीधरेष्वसह्यं वज्रं स्ववक्षसि मोघीकृत्येन्द्रपदाभिलाषिणं स्वपितरं स्वर्गाद् मोक्षाय प्रवर्तयति तद्वत्तदपत्यभूतेषु रामादिष्वपि तथात्वस्फोरणाय राघवपदोपन्यासः। राघवाय तनयामयोनिजामित्यत्र तु सत्क्षत्रियकुलप्रसूतत्वं रामस्य विज्ञाप्य तादृशकन्या-परिणययोग्यतां सूचयति कविः। यथास्य पूर्वजः ककुत्स्थो देवेन्द्ररूपवृषांसे स्थितो बभौ

---

[1] रघुवंशम् १.७२

[2] श्रीमद्भागवतमहापुराणम् ९.६.२०

[3] रघुवंशम् ३.२१

[4] तत्रैव ११.४२

तथासाविदानीमित्यपि लक्ष्यते। ककुदि वृषांसे तिष्ठतीति व्युत्पत्त्या लोकोत्तर-पराक्रमधारणात्पुरञ्जयो नाम राजा तत्पदेन गीयते। अतः कालिदासोऽप्याह - **काकुत्स्थ**शब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्रा[1] इति। एवमेवायोध्यां प्रत्यागच्छन्नामोऽपि परिदृश्यमानस्तेनैव पदेन वर्ण्यतं काकुत्स्थः स्तिमितजवेन पुष्पकेणेति। अत्रापि विमानमारूढस्य तस्य स्वर्गादवतरता दैत्यजयिना ककुत्स्थेन रूपगुणक्रियादिभिः साम्यात्काकुत्स्थपदं कामप्यपूर्वां चमत्कृतिं भजते। नातः परमिक्ष्वाकुवंश्यानां गौरवाधायि पदमिति विमृश्य रामरावणयुद्धवर्णनावसरे **दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः**[2] इत्यत्रापि तदेव पदमुपन्यस्तम्। दाशरथ्यादि-पदबोद्धव्यास्तु तद्व्यतिरिक्ताः। दशसु दिक्षु प्रस्थितो रथो यस्येति व्यधिकरणेन बहुव्रीहिणा तन्निष्पत्तिः। एतादृशार्थवत्तायां रघुवंशस्थं यशसा दिक्षु दशस्वपि श्रुतमिति पद्यमेव[3] मानम्। यद्वा दशेन्द्रियाणि नियाम्यतया रथो यस्येति व्युत्पत्त्या तस्य विजितेन्द्रियत्वेनात्मवत्त्वं सूच्यते। असावपि भावः समधिगम्य समाधिजितेन्द्रिय इत्यादिना समर्थितः कविना। तस्यापत्यमित्यर्थेऽत इञ् इतीञ्। सोऽहं **दाशरथि**र्भूत्वेति[4] पद्ये दाशरथिपदेन गुणाधिक्यात्तस्य परमात्मपितृत्वयोग्यता सूचिता यथोक्तं स्वयं कविना-

**अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः।**
**प्रसूतिं चकमे तस्मिन् त्रैलोक्यप्रभवोऽपि यत् ॥**[5]

एतेन तदानीं मर्त्यलोके दशरथस्य विद्यमानत्वात्स्वावतरणे क्षिप्रतां प्रकाश्य भगवतः परदुःखप्रहाणेच्छाप्राबल्यं ध्वनितम्। अतोऽत्रैक्ष्वाकादिपदैरपि नेष्टार्थलाभः। दाशरथिर्भूत्वेति स्वस्मिन्मानवत्वमारोप्यावतरिष्यामीति गम्यते भूत्वेति गर्भवासादिकं सर्वं

---

[1] रघुवंशम् ६.११
[2] तत्रैव, १२.७२
[3] तत्रैव, ८.२९
[4] तत्रैव, १०.४४
[5] तत्रैव, १०.४३

प्रातीतिकं न तु पारमार्थिकमिति बोधनाय। दाशरथिराददे धनुरिति[1] दाशरथिपदं यो दशरथो देवैरर्थितो दैत्यानवधीत् युधि दुर्जयस्तदपत्यतया रामेऽपि विलक्षणधन्वित्वं द्योतयितुम्। अत एव एको दाशरथिः कामं यातुधानाः सहस्रश इत्यत्रापि तत्प्रयोग एवौचितिं बिभर्ति। साक्षाज्जमदग्निपुत्रस्य परशुरामस्य कृते गोत्रापत्यप्रत्यययोगेन निष्पन्नस्य **भार्गव**पदस्य प्रयोगोऽपि यथाप्रसङ्गमेव सौष्ठवं धत्ते। तद्यथा बालसूनुरवलोक्य भार्गवं स्वां दशाञ्च विषसाद[2] पार्थिव इत्यत्र भार्गवपदं सर्वथा युज्यते। सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृत इतिवचनाद् भृज्जतीति क्विपि भृक् ज्वाला तया सहोत्पन्न इत्यु इति निर्वाचनाच्च यः परमकोपनो भृगुर्निदोषस्यापि वक्षो विष्णोर्निदयं प्रजहार पादेन तदपत्यमित्यसावपि तथैव स्याद्दुरतिक्रम इति व्यज्यते । अतस्तेन चण्डत्वं दुर्निवारत्वञ्च लभ्यते, अतो बालसुनोस्तस्य विषादोऽपि सङ्गच्छते। हनुमदादिपदमुपेक्ष्य **मारुति**पदप्रयोगेण कविः शब्दार्थचमत्कारविशेषमलौकिकं पुरस्करोति। तत्रेयं कालिदासपदधोरणी - **मारुतिः सागरं तीर्णः संसारमिव निर्ममः**[3] इति। मरुत्पदात्प्रज्ञादित्वात्स्वार्थेऽणि मारुतो वायुस्तदपत्यं पुमान् मारुतिर्हनूमान्। अत्रात्मा वै जायते पुत्र इति पितृतुल्याप्रमेयबलादिसूचनाय मारुतिरिति पदमुपात्तम्। यथोक्तं रामायणे-

**त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः।**
**पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर**[4] **॥**

इति मारुतिः सागरं तीर्ण इत्यत्र मारुतो यथा स्वतन्त्रस्तथैवायमपि अप्रतिहतगतिरिति ध्वन्यते । अत्र हि सीतादिदृक्षया प्रस्थितस्य तस्य विघ्नभूतसिंहिकादीनां संहारपूर्वक-स्वाभीष्टसाधनमेव निदर्शनम्। स मारुतिसमानीतमहौषधिहतव्यथ इत्यत्राप्ययमेव भावः। म्रियते प्राणी यस्याभावादिति व्युत्पत्या मृङ् धातोरुति प्रत्यये निष्पन्नस्य मरुच्छब्दस्य शरीरिणां प्राणरूपत्वं सिद्ध्यति अत एव यया प्राणिनः प्राणवन्त इति कविवचनं

---

[1] रघुवंशम् ११.४४

[2] तत्रैव, ११.६७

[3] तत्रैव, १२.६०

[4] श्रीमद्वाल्मीकिरामायणम् ५.१.१२०

सङ्गच्छते, अतस्तदपत्यतयात्र मारुतेरपि जीवप्राणरक्षकत्वं ज्ञाप्यते। यथोक्तं वाल्मीकीये अस्मिञ्जीवति वीरे तु हतमप्यहतं बलम्। हनुमत्युज्झितप्राणे जीवन्तोऽपि मृता वयमिति[1]। वस्तुतस्तु मारुतस्य स्वभावः प्रकृत्यैवानुष्णाशीतः। स सर्वदा दुःखादिरहितस्तिष्ठति। अत एव तादृशसीतान्वेषणकार्यं राक्षसादीनां वधं लंकादहनं च कृत्वा वानराणां समक्षं वर्णनकाले राघवस्य प्रसादेन मयैतदुपकल्पितमित्याह। किञ्च मारुतो यथान्यस्य प्रभावं नीत्वा प्रवहति तथैव मारुतिरन्यैरुत्साहितो भूत्वा कार्ये प्रवर्तत इति लोकप्रसिद्धम् इति गुरवो मिश्रचरणाः[2]। अतो मारुतिपदप्रयोगेण पितुः सर्वे गुणा अत्र सन्निकृष्टा इति स्पष्टम्! एकस्यैव शब्दस्योभयथा प्रयोगस्य चमत्कारविशेषं मनसि निधायोभयार्थसाहचर्यकौतुकं प्रस्तौति कविः, **ऐन्द्रिः** किल नखैस्तस्या विददार स्तनौ[3] द्विज इति। अत्रैन्द्रिः काकजयन्तयोरिति कोषादुभयार्थयोरेकत्रान्वयो दर्शितः। एतेनेन्द्रापत्ये काकरूपे जयन्ते कामित्वपरोन्नत्त्यसहमानत्वाद्यनेके भावा व्यज्यन्ते। यदा-कदा योगरूढपदप्रयोगेऽपि तच्छक्तेरवयवार्थमात्र एव नियन्त्रितत्वादुक्तार्थप्रतीतये समुदायार्थवाचकरूढपदमेवोपन्यस्यते, अत एव ऐन्द्रिपदेनैव काकार्थबोधसम्भवेऽपि तदर्थबोधाय द्विज इति विशेषणं पृथगुपात्तम्। कः पौरवे वसुमतीमि[4]त्यभिज्ञानपद्ये पौरवपदं तथैव गौरवं धत्ते। पुरोरपत्यत्वेन दुष्यन्तोऽत्र **पौरवः**। अत्र मयीत्यनुक्त्वाऽविकत्थनत्वं द्योतयता तेन पुरुवंश्यानां रक्षणकलाविचक्षणत्वं ज्ञाप्यते, तच्च पिपर्त्तीति पुरुरिति व्याकृत्यापि समर्थ्यते। पौरव! रक्ष विनयमित्यत्र तत्पदलभ्यार्थं भावयन् राघवभट्ट इत्थमाह रतेरनिर्वाहात्पौरवेति सम्बुद्धिरिति, पुरुप्रभृतीनां चारित्र्येण शौर्येण दानेन पावित्र्येण रूपेण स्यादिति। पश्य ते कुलव्रतम्, क्व च प्रवर्तनं ते। तथा पुण्यचरितानामपकीर्तिर्न ते केवलमिति ध्वन्यते। एतेन शकुन्तलायास्तद्वंशवेतृतया स्वात्मानुरूपता सूचिता। अत एव, "पौरव असंशयं मम शरीरवृत्तान्तोपलम्भायार्या

---

[1] श्रीमद्वाल्मीकिरामायणम् ६.२२.७४

[2] आचार्यश्रीहर्षनाथमिश्राख्यगुरुचरणाः

[3] रघुवंशम् १२.२२

[4] अभिज्ञानशाकुन्तलम् – १.२१

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

गौतमीत एवागच्छतीत्यत्रापि तत्पदसम्बुद्धिः। सुरभेरपत्यं स्त्री सौरभेयी। स्त्रीभ्यो ढक्। इयं सागरमन्थनोद्गतायाः सुरभेः पुत्री वसिष्ठहोमधेनुर्नन्दिनी। तां **सौरभेयीं** सुरभिर्यशोभि[1]रित्यत्र सौरभेयीपदेन गन्धवत्या गोरूपधरया पृथिव्योपमयन् चतुःसमुद्रसारभूतानि रत्नान्यपि दोग्धुमलमिति व्यञ्जयन् अस्या रक्षणं पृथिवीपालनवद् दुष्करमेवेति ज्ञापयन् उर्वीरक्षणमिवात्युग्रं व्रतान्तरमित्युपदिशति महाकविः। मातृतुल्यतान्त्वाह स्वयं नन्दिनी - न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नामिति। अत्र वाक्यभेदेनान्वये सुरभिरिव सौरभेयीं जुगोपेतिबोधाद्राज्ञो ऽप्रमत्तता ध्वन्यते।

एवमेव पर्यायतया प्रतीयमानेषु तात्पर्यविन्यासवैदग्ध्यदृशान्यतरप्रयोगेण किमपि भाववैचित्र्यजनितं रहस्यमाकलितं भवति। **इत्याख्याते पवनतनयं मैथिलीवो[2]न्मुखी** सेति मेघदूतपद्ये मैथिलीपदगम्यं भावं स्फोरयन्पूर्णसरस्वती आह - मैथिलीपदेन न तावत् सीरध्वजस्यैवापितु मिथिलाभवानामतीतानागतानां राजर्षीणामतिपवित्रेण निजचरित्रेण पावनी अलङ्कारभूतेति ध्वन्यते। मैथिलीव वीक्ष्येति यथा सीतादेवी वातात्मजं हर्षविस्मयबहुमानविश्वासोत्कण्ठासंवलितहृदयमवलोकितवती तथा त्वां मद्गेहिनीति व्यज्यते। पुरमविशदयोध्यां मैथिलीदर्शनीना[3]मित्यत्र सीतेतिनाम्नोऽज्ञानात्कन्याजनिभुव एव प्रथमोपस्थितत्वात्प्रत्यासत्त्या तत्सम्बन्धिनाम्न उल्लेखः कवेः प्रतिभां व्यनक्ति, तेन च न दिदृक्षामात्रं, व्याजेनानेन प्रथमतस्तत्रागताया मिथिलागतसौशील्यादिभावसहस्रजिज्ञासुत्वं तासां गम्यते महाभिजनत्वेन निष्कलङ्कचरित्रत्वं सुतरां बोध्यते। जानकीपगम्यार्थस्त्वतो नितरां भिद्यते यद्यप्येषाऽयोनिजा तथापि जनकस्य देवयजनलाङ्गलपद्धतावाविर्भूतत्वादेवमुक्तिः, तेनाचिन्त्योदयस्थितिलया या सैव देवैः स्वकार्यसिद्ध्यर्थमाविर्भावितेति लभ्यते। राजर्षेर्जनकस्य ज्ञानितयात्मारामतया चास्या अपि तत्स्नेहपरिपालितत्वेन ब्रह्मरूपता, अत एव कालिदासोऽपि इदमेव पदमुपन्यस्य स्वस्य

---

[1] रघुवंशम्, २.३

[2] उत्तरमेघः, ३७

[3] रघुवंशम्, ११.१३
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

स्वार्थवैचित्र्याकलननदीष्णत्वं प्रख्यापयति - **जानकी विषवल्लीभिः परीतेव महौषधिरिति**[1]। अत्र लङ्केश्वरवैभवमपि तुच्छमिव गणयन्ती विविधत्रासप्रलोभनादिकं सोढ्वापि स्वधर्मं पालितवतीति स्वयं कविरस्या इदमेव स्वरूपं महतादरेण वन्दमान आह - **लङ्केश्वरप्रणतिभङ्गदृढव्रतं यद्वन्द्यं युगं चरणयोर्जनकात्मजाया** इति[2]। अत्र हि प्रस्तुतपदं वृत्तशीले कुले जातामाचारवति परमधार्मिके वंश आविर्भूतां सीतां लक्षयति, तां विहाय का वान्या राक्षसीभि: परीतापि महौषधि: स्यात् एतेनास्या योग आस्थितत्वं मनोनिग्रहादियोगिसुलभकर्मपरत्वं व्यज्यते। महौषध्युपमानेन न केवलं राक्षसीविहित-दारुणकष्टापरामृष्टता अपितु तदुपासनस्य प्रकारान्तरेण भवरोगमहौषधप्रतिमत्वमपि ध्वन्यते। इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिरित्यत्र दुष्टाचरणस्यात्यन्तासंभावनीयत्व-ध्वननेनाश्रमोचितधर्मवेत्तृतया स्वाश्रमानयनयोग्यता तस्या उक्ता। यदासौ महाकविरस्या देहाध्यासराहित्यमाविष्कर्तुमीहते तदार्थविषयिणीं सूक्ष्मेक्षिकामनुसन्धायान्यत्पदमपहाय **वैदेही**पदमुपादत्ते। तद्यथा - **रामोऽपि सह वैदेह्या वने वन्येन वर्तयन्निति**[3]। एतेनेयं स्वसुखाभिलाषं देहभावं परित्यज्यानुव्रजति न तु क्षणसौहृदेनेति गम्यते। अत एव भगवान् वाल्मीकिरप्येवं स्तौति - सर्वान् भोगान् परित्यज्य भर्तृस्नेहबलात्कृता, अचिन्तयित्वा कष्टानि प्रविष्टा निर्जनं वनम् इति। यत्रायोनिजत्वेन दिव्यत्वं प्रदर्शितव्यं भवति तत्र **पार्थिवी**पदमेव शब्दरहस्योन्मीलनकौशलप्रदर्शनमुखेन प्रयुज्य स्ववैदग्ध्यं प्रस्तौति कविः - **पार्थिवमुदवहद्राम**[4] इत्यत्र मानुष्या व्यावर्तनात् ब्रह्मणा सह परिणययोग्यतोच्यते, पृथिवीवत्क्षमाशीलता च। तद्यथा पृथिव्यां जनाः स्वसुखसाधनाय कर्षणखननाद्युपद्रवान् कुर्वते तान् ज्ञात्वापि सा किमपि प्रतिकारधिया कर्तुं नेहते प्रत्युत स्वव्यथामपि न प्रकटयति, तथैवेयमपि क्षमाविग्रहा जयन्तादिकृताक्षम्यापराधान् क्षाम्यति। तेन रत्नगर्भात्वं

---

[1] रघुवंशम् १२.६१
[2] तत्रैव १३.७९
[3] तत्रैव १२.२०
[4] तत्रैव ११.५४
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

तु ध्वन्यत एव। उमाभवान्यादिपदमतिरिच्य प्रयुक्तं **पार्वती**पदमपि यथा प्रसङ्गमतितरां सौष्ठवं भजते। निनिन्द रूपं हृदयेन पार्वतीत्यत्र सुखदुःखाद्य-नुभववैकल्यात्पर्वतो जडः, तज्जन्यतया तथात्वमारोपितापीयं पार्वती स्वात्मरूपं निनिन्देति तस्या दुःखस्यानन्त्यं ध्वन्यते, अदम्यधैर्यादिकं तु सम्बन्धिशब्दमहिम्ना गम्यत एव हिमवानित्युक्तेः। एवमेवात आहर्तुमिच्छामि पार्वतीमात्मजन्मन इत्यत्र तादृशपुत्ररत्नोपादनक्षमत्वं सूच्यते, अत उक्तं कविना अनन्तरत्नप्रभवस्य तस्येति। किञ्चैतेन रुद्ररेतोधारणक्षमतापि बोध्यते। **दौष्यन्तिरप्रतिरथं तनयं निवेश्येति**[1] दौष्यन्तिपदेन स्वस्य सर्वज्ञत्वं द्योतयन् कण्वः तव कुक्षिगतं सत्त्वं दुष्यन्तप्रयुक्तमिति शकुन्तलां प्रति स्वात्मनिश्चयं ध्वनयति, तेन विदिताखिलरहस्योऽपि प्रसीदामीति व्यज्यते । राघवभट्टस्तु दौष्यन्तिपदेन महीधारक्षमत्वं ध्वन्यत इत्याह।

इदञ्च न विस्मर्तव्यं सहृदयैर्यदस्य कालिदासीयशब्दसौष्ठवस्य सन्ति बहवः पक्षा विमर्शयोग्याः। विमृष्टाश्च भूम्ना केचित्सम्बन्धिनोऽपि पक्षा विद्वद्भिरिति चर्वितचर्वणं परिहरता मयात्रापत्यप्रत्ययान्तप्रयुक्तं वैशिष्ट्यं प्रकाशयितुमवलम्बितः कश्चिदात्मीय एव मार्ग। अत्र न शक्यन्ते सामग्र्येण भावाः सोपस्करं व्याख्यातुमिति दिङ्मात्रं प्रदर्शितम्। सङ्केतितञ्च ध्वनिकारेण तृतीयोद्योते - सुप्तिङ्वचनसम्बन्धैस्तथाकारकशक्तिभिः, कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचिदिति शम्।

❑❑❑

[1] अभिज्ञानशकुन्तलम् ४.२०

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# सांख्यदर्शने मोक्षस्यावधारणा

**प्रो. सुजातात्रिपाठी***

वाक्यार्थज्ञानाय पदार्थस्य ज्ञानं पूर्वमपेक्षितं भवति। तस्मात् सांख्यशब्दस्य दर्शनशब्दस्य मोक्षशब्दस्य च कोऽर्थः इति पूर्वं जिज्ञास्यं भवति। अतः प्रथमतः घटकपदानामर्थविवेचनं प्रस्तूयते।

(१) **दर्शनम्** - दृशधातोः करणेऽर्थे ल्युट्प्रत्यये सति दर्शनमिति शब्दो निष्पद्यते। एवं दृश्यतेऽनेनेति यत्तद्दर्शनमित्यर्थो जायते। दार्शनिकचिन्तनेनैव जीवनस्य वास्तविकं तत्त्वं ज्ञातुं वयं प्रभवामः। सतोऽसतश्च पदार्थस्य यथार्थतया ज्ञानमेव दर्शनं कथ्यते। केवलं शुष्कसिद्धान्तचर्चया भारतीयं दर्शनं न प्रारभ्यते, अपितु दुःखस्यात्यन्तिकी निवृत्तिः कथं, मोक्षप्राप्तिश्च कथं जायत इति विचारः दर्शनशास्त्रस्य मूलम्।

अत एव सांख्यकारिकायां सर्वादावुक्तम् –

**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥**

इत्थं प्रत्येकं दर्शने दुःखनिवृत्तिः मोक्षावाप्त्युपायश्च वर्णितौ भवतः।

भारतीयदर्शने आस्तिक-नास्तिकरूपेण भेदापेक्षया वैदिकावैदिकरीत्या भेदोक्तिः न्याय्या। वैदिकदर्शनेषु न्यायः, वैशेषिकम्, सांख्यम्, योगः, पूर्वमीमांसा, उत्तरमीमांसा चेति षड् दर्शनानि प्रसिद्धानि सन्ति। चार्वाकजैनबौद्धदर्शनान्यवैदिकदर्शनेषु प्रसिद्ध्यन्ति।

(२) **सांख्यम्** - महर्षिणा कपिलेन प्रतिपादितं सांख्यदर्शनमत्यन्तं प्राचीनं विद्यते। अयञ्च सांख्यशब्दः समुपसर्गपूर्वकात् ख्याधातोः निष्पद्यते। पदार्थानां सम्यक्तया परिज्ञानं यतस्तत् सांख्यमित्युच्यते। शास्त्रेऽस्मिन् पञ्चविंशतिः पदार्थाः प्रतिपादिताः। सांख्यशब्दस्य गणनं ज्ञानं चार्थः। सांख्यदर्शनज्ञानाय ईश्वरकृष्णप्रणीता सांख्यकारिका लब्धप्रचाराऽस्ति। एवं सांख्यसूत्रम्, सांख्यसारः, सांख्यप्रवचनभाष्यमित्यादयो ग्रन्थाः

* आचार्या व्याकरणविभागे, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

सांख्यतत्त्वं प्रतिपादयन्ति। इदं च द्वैतवादिदर्शनम्। अत्र प्रकृतेः पुरुषस्य च चर्चा चर्चिताऽस्ति। पुरुषस्त्वात्मा, सत्त्वरजस्तमसां गुणानां साम्यावस्थैव प्रकृतिरित्युच्यते।

(३) **मोक्षः** - मुच्धातोः घञ्प्रत्यये सति मोक्ष इति शब्दो निष्पद्यते। मुक्तिशब्दस्यैव पर्यायोऽयं मोक्षशब्दः। अमरकोषकारेण एतत्पर्यायत्वेन कैवल्यम्, निर्वाणम्, श्रेयः, अमृतम्, मोक्षः, अपवर्ग इतीमे शब्दाः प्रतिपादिताः सन्ति। पुरुषार्थचतुष्टयेषु धर्मार्थकाममोक्षेषु धर्मस्यार्थः नैतिकता मोक्षस्य चाध्यात्मिकं मूल्यमित्यर्थः। नैतिकजीवनमेव मोक्षसाधनम्। एवं धर्मः साधनं मोक्षश्च साध्यः। सर्वाण्यपि भारतीयदर्शनानि मोक्षं लक्ष्यीकृत्यैव प्रवर्तन्ते। अत्रेयं शङ्का जागर्ति यत् कस्मै मोक्षोऽपेक्षते? मोक्षपदार्थश्च कः? सांख्यदर्शनानुसारं च कः मोक्षः? इति। तत्रैवं विज्ञेयं यत् सांख्यमतानुसारं तापत्रयस्य समूलमुन्मूलनमेव मोक्षः। तच्च तत्त्वाभ्यासेनैव सम्भवति। तथा चोक्तम् -

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्॥**

तापत्रयस्य नाशः पूर्वं प्रतिपादितः। तच्च तापत्रयमस्ति –

**(१) आध्यात्मिकम्**
**(२) आधिभौतिकम्**
**(३) आधिदैविकम्**

तत्र आध्यात्मिकं दुःखं शारीरिकमानसिकभेदेन द्विविधं भवति। वातपित्तकफप्रकोपैः जायमानं दुःखं शारीरिकमित्युच्यते। कामक्रोधलोभमोहादिभिः समुत्पन्नस्तापः मानसिकदुःखमित्युच्यते। भूतेभ्यः प्राणिभ्यः मनुष्यपशुपक्षिसर्पादिभ्यः जायमानं दुःखम् आधिभौतिकमित्युच्यते। भूतप्रेतयक्षराक्षसग्रहादिभ्यः दैवीशक्तिभ्यश्चोत्पद्यमानं दुःखम् आधिदैविकदुःखमिति व्यवह्रियते।

लोके रथचक्रमिव सुखानन्तरं दुःखम्, दुःखानन्तरं सुखं परिवर्तते। मोक्षशास्त्रे चत्वारो व्यूहाः प्रदर्शिताः - हेयः, हेयहेतुः, हानं, हानोपायश्च। त्रिविधमपि दुःखं हेयम्। प्रकृतिपुरुषयोः सम्बन्धेन जायमाना अविद्यैव हेयहेतुः। त्रयाणामपि दुःखानामात्यन्तिकी

निवृत्तिः, अर्थात् अविद्याया अविवेकस्य वा सर्वथा नाश एव हानमित्युच्यते। विवेकख्यातिश्च हानोपाय इत्युच्यते।

सुखं मे भूयादुःखं मे माभूदित्यादिना दुःखस्यात्यन्तिकी निवृत्तिरेव जीवस्य लक्ष्यं भवति। दुःखनाशपुरस्सरं निरतिशयसुखावाप्तिमेव वाञ्छति सर्वोऽपि जनः।

मानवस्य बन्धस्य कारणमविद्यैव, अविद्यानिबन्धना चेयं सृष्टिः। जननमरणसंसरणमनादिकालतश्चलति लोके तथापि प्रकृतिः पुरुषस्य यथा मोक्षो भवति तथा प्रवर्तते। तत्र सोदाहरणं सांख्यकारिकायां प्रस्तुतम् -

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।**
**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥**

यथा अज्ञमपि क्षीरं वत्सविवृद्धिनिमित्तं प्रवर्तते तथैवेयं प्रकृतिरपि पुरुषविमोक्षनिमित्तमात्मानं व्यापारयति। कारिकायां विपर्यय इति शब्दोऽविद्यापर्यायत्वेन निर्दिष्टो विद्यते। तस्य च द्विषष्टि उपभेदाः प्रतिपादिताः। प्रकृतिपुरुषयोः कस्सम्बन्धः? किं च द्वयोः पार्थक्यम् ? इत्यादिविषयाणां यो विवेकस्तादृशविवेकराहित्यमेव बन्धः बन्धहेतुर्वा भवति। सांख्यमते सर्वेऽपि पदार्थाः त्रिगुणात्मका भवन्ति, तस्मादेव सुखदुःखमोहात्मकाः एवं सुखदुःखमोहात्मकं जगदेव च बन्धः। बन्धनं चेदं त्रिप्रकारकं भवति - प्राकृतिकबन्धः, विकासात्मकबन्धः, व्यक्तिगतबन्धश्चेति। उपास्य-पदार्थस्याधारेणेदं विभाजनं विहितमस्ति येन सह पुरुषस्य दोषपूर्णं तादात्म्यं संस्थापितं भवति तदैव बन्धः।

प्रकृतिरेवात्मेति मत्वा तदुपासनायां ये लीनाः ते प्राकृतिकबन्धनं प्राप्नुवन्ति। न च तत्त्वज्ञानानन्तरमपि शरीरसद्भावस्य दर्शनेन तत्त्वज्ञानाव्यवहितोत्तरं मोक्षः कथं सङ्गच्छत इति वाच्यम्, दण्डेन भ्राम्यमाणं चक्रं दण्डापाकरणेऽपि चलद् भवति पूर्वसंस्कारेण, तथैव तत्त्वज्ञानानन्तरमपि पूर्वसंस्कारस्यानपायाच्छरीरधारणं सङ्गच्छते। जीवन्मुक्तिदशायां संस्कारोऽवशिष्यते, विदेहमुक्तौ तु संस्कारस्यापि ध्वंसो जायते। दुःखस्यात्यन्तिको नाशो मोक्ष इत्युक्तम्, तच्च विवेकख्यातिद्वारैव सम्भवति। यथा जनाः स्वकीयेच्छापूर्त्यर्थं कर्मसु प्रवर्तन्ते तथैव प्रकृतिरपि पुरुषस्य मोक्षार्थं प्रवर्तते।

तथा चोक्तम् -

**औत्सुक्यनिवृत्यर्थं यथा क्रियासु प्रवर्तते लोकः ।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥**

यथा स्फटिकमणिरत्यन्तं स्वच्छो भवति जपाकुसुमादिसंसर्गवशात्तत्र रक्तादिगुणानां भानं जायते तथैव पुरुषो नितान्तं निर्मलः स्वच्छश्च तथापि बुद्धिसंसर्गद्वारा बद्ध इवावभासते। तत्त्वज्ञानानन्तरमहं कर्ता, अहं भोक्ता, अहं क्रियावान् इत्याद्याः सर्वेऽपि भ्रमाः निवर्तन्ते। प्रतिपादितं चेत्थम् -

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥**

तत्त्वसमासग्रन्थे मोक्षस्य त्रैविध्यं प्रतिपादितम्। प्राकृतिकं वैकारिकं दाक्षिणिकमित्येभिः त्रिभिर्बन्धनैः या मुक्तिः तदेव त्रिप्रकारको मोक्षः। यः खलु पुरुषः प्राकृतिकैः बन्धनैः मुक्तो भवति सः प्राकृतिकबन्धनमुक्त इत्युच्यते। यश्च प्रकृतेः विकारभूतानामिन्द्रियमन आदीनां वशे न जायते सो वैकारिकबन्धनान्मुक्त इत्युच्यते। यः पुरुष ईष्टापूर्तादिकर्मजन्यफलेष्वस्थायित्वबुद्ध्या तत्रासक्तो न भवति सः दाक्षिणिकबन्धनान्मुक्त इत्युच्यते।

यथा रज्जौ सर्पज्ञानं यदा निवर्तते तदा तस्मात् कथञ्चिद् भयं न जायते तथैव तत्त्वज्ञानानन्तरं जागतिकं सर्वमपि बन्धनं न प्रवर्तते। न च मोक्षानन्तरमपि पुरुषं प्रकृतिरुपबध्नीयादिति चेन्न, प्रकृतेः तादृशी सुकुमारता लज्जा च पुरुषेणाहं दृष्टेति यत्कारणात् पुनः पुरुषस्य सविधे न याति।

तथा चोक्तम् –

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।**
**या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥**

एवं सकृत् मुक्तस्य जीवस्य पुनः बन्धनयोगो न भवति। श्रुतौ मुक्तपुरुषस्यानावृत्तिः प्रतिपादिता “न मुक्तस्य पुनर्बन्धनयोगोऽप्यनावृत्तिश्रुतेः”

इत्यादिना। इत्थं मोक्षः सर्वथा नित्यः। स्वीये चेतनास्वरूपेऽवस्थितिः। तदर्थं प्रकृतेरुपरतिश्च मोक्षः।

**विवेकख्यातिः** – मोक्षसाधनेषु विवेकख्यातेः निरूपणं प्रतिपादितं प्रसङ्गवशात्तदिह किञ्चित् प्रतिपाद्यते। प्रकृतिपुरुषयोर्भेदः, प्रकृतेश्च महदादीनां समुत्पत्तिः इत्यादिविषयाणां यथार्थतो बोध एव विवेक इत्यभिधीयते। विवेकेनैव त्रिविधानामपि दुःखानां विनाशो जायते। सांख्यदर्शनानुसारं पुरुषोऽत्यन्तं शुद्धः चैतन्यस्वरूपश्च सः शरीराच्छरीरान्तरं न प्रयाति। बन्धनं मोक्षो जन्मान्तरमित्यादिकं निखिलमपि बुद्ध्यादिषु प्रकृतिपरिणामेषु भवति। पुरुषे बन्धनादिकं त्वारोपितं न तु वास्तविकम्। प्रकृतिरेव सप्तभी रूपैरात्मानमात्मना बध्नाति। एतत्सर्वं विषयं कारिकायां क्रोडीकृत्याहेश्वरकृष्णः -

**तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥**
**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**
**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥**

यथा सेनासु यौ जयपराजयौ तौ राजनि आरोप्येते, तथैव पुरुषेष्वपि बन्धनादेरारोपो वेदितव्यः। लिङ्गशरीरकोऽयं पुरुष अज्ञानकारणेन प्रकृतिं बुद्धिं च पृथग्भावेन नावगच्छति प्रत्युत तदीयान् धर्मान् स्वस्मिन्नारोपयति। सुखदुःखे बुद्धेः धर्मौ, तावपि स्वीयधर्मत्वेनाध्यवस्यति। व्यावहारिकरूपेण प्रकृतेरभिन्नमात्मानं मनुते। इदं मदीयमित्यादिज्ञानमपि भ्रमाधीनमेव। यदा च विवेकः समुत्पद्यते तदा यथार्थज्ञानादविवेकरहिततया पदार्थान् स्वीयं मत्वा नोपभुङ्क्ते। विवेकज्ञानप्राप्त्यनन्तरं सर्वस्मादपि बन्धनान्मुक्तो भवति। सर्वमिदं बुद्धेः धर्मरूपं प्रकृतेश्चेमे धर्मा इति ज्ञानानन्तरं तस्य अविद्यायाः सर्वथा विनाशो भवति। अस्यैव नाम विवेकख्यातिरिति। अनयैव प्रकृतिपुरुषयोर्भेदोऽवगम्यते। विवेकज्ञानान्तरमेव च स्वीयं शुद्धबुद्धचैतन्यस्वरूपं च परिलक्षितं भवति।

**सेश्वरं निरीश्वरं वा सांख्यम् -** सांख्यशास्त्रं सेश्वरं निरीश्वरं वेति विषये बहूनां विदुषां नैकानि मतानि समुपलभ्यन्ते। सांख्यशास्त्रविदां मतमेकमिदमस्ति यद्दर्शनमिदं

निरीश्वरमिति, अन्ये चाचार्याः सेश्वरमिदं दर्शनमिति ब्रुवते। ईश्वरवादिमते ईश्वरः सर्वेश्वरः सर्वव्यापकश्च तदीयकृपयैव ज्ञानावाप्तिः जायते, तदनु जीवः मुक्तः सन् सर्वदा परमानन्दमनुभवति। उपनिषदां सांख्यदर्शनं सेश्वरं प्रतीयते। उपनिषदि प्रकृतिपुरुषाभ्यां भिन्ना ब्रह्मणोऽपि सत्ताङ्गीक्रियते। स्मृतिषु महाभारते पुराणेषु च सेश्वर सांख्यं निरूपितमस्ति। कपिलमुनिप्रभृति वार्षगण्यपर्यन्तं सर्वेप्याचार्या ईश्वरवादिन आसन्। ईश्वरकृष्णप्रभृति निरीश्वरवादसांख्यं प्राचलदिति तेषामभिप्रायः। बौद्धानां निरीश्वरवादेन प्रभावितो भूत्वा तथा ईश्वरकृष्णस्य प्रवृत्तिरिति वदन्ति।

केचन विद्वांसः कपिलमुनिप्रवर्तितं सांख्यं निरीश्वरं महर्षिपतञ्जलिप्रणीतं च सांख्यं सेश्वरसांख्यमिति ब्रुवते। पतञ्जलिरचिते शास्त्रे पदार्थेषु एक ईश्वर अधिको भवति। कपिलानुयायिनः 'यः सर्वज्ञः सर्ववित्' इत्यादिश्रुतीनां प्रशंसामात्रमिति केवलं श्रुत्याधारेण ईश्वरो न सिद्ध्यतीति प्राहुः। सर्वमपि पदार्थजातं प्रकृत्यैव जायते चेत् पृथक्तयेश्वरकल्पनाया नास्त्यावश्यकतेति तेषामाशयः।

इत्थं संक्षेपतः सांख्यदर्शनानुसारं मोक्षस्यावधारणात्र प्रस्तुता। तत्तद्दर्शनानां मतान्यत्यन्तं युक्तितया तत्तच्छास्त्रेषु विचारितानि सन्त्यत्र तु सामान्यतः दिग्दर्शनमेव विहितम्। आधुनिकसमये दर्शनस्यातितरां महत्त्वं विद्यते। दर्शनज्ञानादेव सर्वस्मिन्नपि राष्ट्रे शान्तिः सद्भावश्च भवितुमर्हति। इदं चास्माभिरवधेयं यत् प्राचीनैः महता यत्नेन संरक्षितं दार्शनिकं ज्ञानमस्माभिः संरक्षणीयम्। आधुनिकपरिप्रेक्ष्ये यत्र जना आजीविकार्थमेव क्षुब्धाः दृश्यन्ते तेषां कृते मोक्षस्यावधारणायाः किमौचित्यम्? कथमिदानीं मोक्षेच्छा न दृश्यते जनानाम्? किं दुःखे दुःखित्वं सुखे सुखित्वमेव जनानां धर्मः? अतः मम विचारे सर्वप्रथमं नैतिकजीवनस्य प्रचारः तदनुकूलमाचरणञ्च परममावश्यकम्, तदनन्तरमेव जीवनसोपाने आरोहणं सम्भवति। मम दृष्टौ वीतरागतैव मोक्षः। जन्ममरणसंसरणादिना मोक्षो भवतु मा वा भवतु परं निर्लेपभावेन जीवनयापनं यदि क्रियेत तर्हि तदेव स्वकीयजीवनस्य मोक्ष इति भातीत्येवं प्रतिपाद्य विरमामि विस्तरात्।

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# ईश्वरस्वरूपमीमांसा

**प्रो.मारकण्डेयनाथतिवारी** *

सांख्यशास्त्रमाहात्म्यं तु सर्वथा शास्त्रेषु निरूपितमस्ति। स्मृतिपुराणादिष्वपि कपिलादि सांख्याचार्याणां प्रशंसा दरीदृश्यते। परं सांख्याचार्या ईश्वरं नैवाङ्गीकुर्वन्ति, अत एवैतन्मतखण्डनेऽपि न भवत्याचार्याणां संकोचः। ये आचार्या ईश्वरं न स्वीकुर्वन्ति, ते परलोकमपि नाङ्गीकुर्वन्ति, अत एवेश्वरविरुद्धमतखण्डनमेवैतस्य निबन्धस्य परमं प्रयोजनम्। ईश्वरोपासनां विना नानाविधप्रपञ्चासत्यजालादुद्धारो भवितुं नैव शक्नोति। युक्त्या वेदस्य शास्त्रस्य च प्रामाण्यमत्र यथामति प्रस्तूयते।

ईश्वरस्यानेकत्वखण्डनार्थं न्यायवार्तिककार उद्योतकरः कथयति - ईश्वरस्यानेकत्वे किं बाधकम्? विरुद्धेच्छासम्पन्नस्येश्वरद्वयस्य सद्भावे कस्मिन्नपि एकस्मिन् वस्तुनि प्रवृत्तिर्न स्यात्। यथा कस्मिन् वस्तुनि इदं भवतु, इदं न भवतु, इदं समीचीनं भवतु, इदं समीचीनं न भवतु, एतादृशविरुद्धेच्छाद्वयस्यानुसारं किमपि कार्यं न भवितुमर्हति। एकमेव वस्त्वेकस्मिन् समये नूतनं पुरातनं च न भवितुमर्हति। उभयेश्वरेच्छा प्रतिहता भविष्यतीति उभावप्यनीश्वरौ स्याताम् । अप्रतिहतैश्वर्याभावे ईश्वरो न भवितुमर्हति । यस्य ऐश्वर्यमप्रतिहतं भवति, स अनीश्वरो भवति। उभयोर्यदीच्छया कार्यं भवेत्, स ईश्वरोऽन्यश्च अनीश्वरः स्यात्।

वाचस्पतिमिश्रो व्यासभाष्यव्याख्यानावसरे कथयति अनेकेश्वरस्वीकारेऽपि काचित् क्षतिर्नास्ति, यत ईश्वरे रागद्वेषौ न स्त इति परस्परविरुद्धेच्छा न भविष्यति। अत्रेदं विचारणीयम्- यदि सर्वेषु ईश्वरेषु एकविधैव इच्छा सदा भविष्यति, तदा एकेनैव ईश्वरेण कार्यं चलिष्यति, अनेकेश्वरस्वीकारस्य का आवश्यकता? एकस्य ईश्वरस्य इच्छयैव कार्यं भविष्यति। ईश्वरस्य नित्या ईशाना इति एक एव ईश्वरः।

ईश्वरस्यानेकत्वं यदि स्वीक्रियते, तदा ईश्वरगोष्ठी स्वीकरणीया स्यात्। ईश्वरस्यैकत्वं न सिद्ध्यति, तदेश्वर सिद्धिरेवासम्भवा। अस्मिन् प्रसङ्गे उद्द्योतकरस्य

* सांख्ययोगविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

प्रयासः सर्वथा समीचीन एव " **अथानेकत्वे सति किं व्याघात इति? एकस्मिन् वस्तुनि व्याहतकामयोरीश्वरस्य प्रवृत्तिर्न प्राप्नोति। अथैकमितरोऽधिशेते, योऽधिशेते, स ईश्वरो नेतरः**" ।

पातञ्जलसूत्रे व्यासभाष्यः कथयति यत्' **तच्च तस्यैश्वर्य्यं साम्यातिशयविनिर्मुक्तम्। तावदैश्वर्यान्तरेण तदतिशय्यते। यदेवातिशयि स्यात्, तदेव तत्स्यात्। तस्माद् यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वर इति। न च तत्समानमैश्वर्यमस्ति, कस्मात्? द्वयोस्तुल्ययो-रेकस्मिन् युगपत् कामितेऽर्थे नवमिदमस्तु, पुराणमिदमस्तु इति एकस्य सिद्धावितरस्य प्राकाम्याविघातादूनत्वं प्रसक्तम्। द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात्। तस्माद् यस्य साम्यातिशयैर्विनिर्मुक्तमैश्वर्यम्, स एवेश्वरः**।'

अस्य भाष्यस्य टीकायां वाचस्पतिमिश्रो लिखति यत् '**अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्येरेकेनैवेशनायाः कृतत्वात्। सम्भूयकारित्वे वा न कश्चिदीश्वरः, परिषद्वत्। नित्येशनायोगिनाञ्च पर्यायायोगात् कल्पनागौरवप्रसङ्गाच्च**।'

अत्रेदं चिन्तनीयं यत् सर्वस्येश्वरस्य यदि समानरूपेव इच्छा भवति, न कदापि विरुद्धेच्छा, यत ईश्वरेषु रागद्वेषाभावात्सवदेवाविरुद्धेच्छा भवतीति ईश्वरस्यानेकत्वेऽपि का नो हानिः? तदेतद्वक्तव्यं यद् यद्यविरुद्धेवेच्छा सदा भवति, तदेकस्येवेश्वरस्येच्छया सर्वं कार्यं सेत्स्यति। का आवश्यकता भवेदनेकेश्वरस्वीकारस्य? परस्परसम्मतिपूर्वकमेक-रूपेच्छयैव सकलं कार्यं सेत्स्यतीति कथनेऽपि न निस्तारः, यतः परिषदः सदस्या ऐकमत्येन कार्यं कुर्वन्ति तदेकस्य कस्यापि सभ्यस्य कर्तृत्वं न सम्भाव्यते, अत ईश्वरस्य परिषदः सदस्यतायां न कोऽप्येक ईश्वरो भवेत्।

अनेकेश्वरवादे यदि नियतसमये कश्चिदेकः कार्यं करिष्यतीत्युच्यते, तदेश्वर-स्यैश्वर्यमेवानित्यं स्यात्। नित्येशनावतः क्रमिकक्रियाकारित्वं न सम्भाव्यते। नित्येशनायाः परदिवसे विरतौ पूर्वदिनेऽपि सा कार्यापाशया भवेत्। ईश्वरस्यानित्येशना स्वीकारोऽपि न साधु सङ्गच्छते, यतस्तथा सति क्रमिककार्यकारिण ईश्वरस्य सिद्धिरपि गगनकुसुमायनाना स्यात्। इमामाशङ्कां मनसिकृत्य ब्रूते नैयायिकप्रवरः श्रीवाचस्पतिमिश्रः यत् 'यदीश्वरस्य ऐश्वर्यं किं तन्नित्यमनित्यमिति ? यद्यनित्यं तस्य कारणं वाच्यम्। यस्य चानित्यमेश्वर्यं तस्य कारणभेदो भवति अनिषादेः। एवमन्येषामपि इत्यनेकेश्वरः प्रसज्यते।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अनेकेश्वरस्वीकारे च दोषाः समुद्धारिताः। उपनिषद्यपि न तत्समश्चाभ्यधिकश्च दृश्यते। अत ईश्वरस्यैकत्वमकामेनापि स्वीकर्तव्यमेव।

**ईश्वरस्य कारुणिकत्वम् -**

वेदशास्त्रस्य प्रामाण्यमाप्तपुरुषप्रणीतमेकत्वमेव। आप्तो यस्य कस्यापि पदार्थस्योपदेशं करोति, स आप्तसाक्षात्कृत एव पदार्थः। यं पुरुषं प्रति उपदिशति, तं प्रति तदनुकम्पैव कारणम्। एवमेव साक्षात्कृतयथार्थवस्तुनः प्रख्यापनेच्छापि वर्तत इति पूर्वोक्तत्रिविधविशेषणविशिष्ट एवाप्तः। वाचस्पतिमिश्रो द्वितीयाध्यायस्थप्रथमपादस्याष्टषष्टि-सूत्रे निर्दिशति तनुभुवनादिकार्यकर्ता सकलपदार्थतत्त्वज्ञः। एष सर्वज्ञः अविद्यास्मितारागद्वेषाभिनिवेशाख्यपञ्चविधक्लेशशून्यो भवति। पापपुण्यात्मकं कर्म, कर्मफलं जन्मायुर्भोगा न, भोगानुकूला वासना वा नास्तीति परमकारुणिक एवासौ। तस्यात्मानुग्रहाभावेऽपि लोभानुग्रह एव प्रयोजनम्, पितृस्थानीयस्य तस्य वात्सल्यं कारुण्यं च स्वाभाविकमेव। स्नेह एव वात्सल्यस्य स्थायिभावः। 'स्थायी वत्सलता स्नेहः पुत्रास्त्वालम्बनं मतम्।

मीमांसकमते ईश्वरप्रतिपादन एव वेदस्य तात्पर्यनिश्चयो नास्ति, अर्थवादरूपत्वात् तादृशवचनानामिति। ईश्वरस्याप्त कामत्वाद् जगत्सृष्टावीश्वरस्य प्रवृत्तेः किं कारणम्? तत्र प्रेक्षावतो बहुविधेषु कारणेषु करुणापरायणः सन् जगन्निर्माणे प्रवर्तत ईश्वरः।

अत्रेयं चिन्ता कारुण्यवशादेव सृष्टिः, तदा सृष्टिः कथं दुःखपरिपूर्णा कृता? अत्रेदं वक्तुं शक्यते यत् सृष्टि स्वेच्छा प्रणोदिता, तत्र प्राणिनामधर्मस्य कारणत्वमधर्मश्च दुःखावह इति। अधर्मस्य जगतो दुःखसाधनत्वेऽपि तस्य जडत्वमेव। ईश्वराधिष्ठित एवाचेतनोऽधर्मो दुःखजनको भवितुमर्हति। कारुणिकः सर्वज्ञश्चेश्वरः कथमेतादृशदुःखावह कार्याधिष्ठितृत्वमाधत्ते । चेतनानधिष्ठितस्याधर्मस्य दुःखसाधनत्वे ईश्वरस्यावश्यकतेव न स्यात्, यतोऽचेतनानधिष्ठितोऽपि परमाणुः कार्यजनकः स्यात्। न च तथा स्वोक्रियते, सत्यम्।

ईश्वरस्य कारुणिकत्वं जोवापेक्षयेश्वरस्यातिशयितमहिमत्वम्, तथापि वस्तुसामर्थ्यस्यान्यथाकरणसामर्थ्य तस्मिन् नास्ति। फलमुत्पाद्यैव धर्मोऽधर्मो वा

विनाशमेति। अधर्मस्य दुःखमेव फलम्, अधर्माख्यस्य वस्तुन एष एव स्वभावः। अधर्म सामर्थ्य लङ्घनपूर्वकम् ईश्वरस्याधर्माधिष्ठितृत्वं न सम्भवति। तथा च कारुणिकोऽपीश्वरः सहकारितया धर्माधर्मौ अङ्गीकृत्य विचित्रजगतः सृष्टि करोति। उपार्जितकर्मापेक्षां विनैव जगतः सृष्टि कुर्यात्, तदा ईश्वरः स्वेच्छाचारी स्यात्, तेन च जीवस्य जन्म, मृत्युः, भोगः, अपवर्गः - इत्येतस्य सर्वस्याकस्मिकत्वं स्यात्। अतो जीवधर्मस्य अधिष्ठातृत्वेऽपि परमकारुणिकत्वमीश्वरस्य नैव विहन्यते।

ईश्वरस्य स्वभाववशादेव सृष्टौ प्रवृत्तिरिति स्वोकारोऽपि ईश्वरस्य प्रेक्षावत्वं नोपहन्यते। उक्तञ्च न्यायवार्तिके 'तत्स्वाभाव्यात् प्रवर्तत इत्यदुष्टम्' पृथ्वी यथात्मीयस्वभाववशात् स्थावरजङ्गमात्मकं प्राणिषु धारयति, जलं यथा स्वीयस्वभावत एव क्लेदनं सम्पादयति, तेजः स्वभावत एव दाहं करोति, तथैवेश्वरोऽपि प्रवृत्तिस्वभावत एव कार्यसमूहस्योत्पादको भवति। तस्य क्रमिकोत्पत्तावपि नानुपपत्तिः, यत ईश्वरः प्रेक्षावान्। ज्ञानगुणस्य वर्तमानत्वाद् धर्माधर्मसापेक्ष एव सृष्टि कुरुते। सर्वोऽपि धर्मोऽधर्मो वा एकस्मिन् फलोन्मुखतां नाप्नोतीति युगपत् सकलकार्यापत्तिसम्भावना नास्ति। 'लोकवत्तु लीलाकैवल्यम् अस्य व्याख्यानप्रसङ्गे शङ्करोऽपि तथैव समादधाति 'एवमोश्वरस्यापि किञ्चित् प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति। अतः स्वभावत एव सृष्टिः गौडपादोऽपि 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ' इति।

**ईश्वरज्ञानस्यापरोक्षरूपत्वम् -**

ईश्वरस्य भूतभविष्यद्वर्तमानसकलवस्तुविषयकं ज्ञानमपरोक्षात्मकमेव। परोक्षज्ञानस्य संस्कारजन्यत्वमेवाव्याप्त्यनुभवजन्यसंस्काराद्वधाप्तिस्मृतिः, व्याप्तिस्मरणमेवानु-मानम्। व्याप्तिस्मरणात्तृतीयलिङ्गपरामर्शादनुमितिः। उपमानप्रमाणव्यापारातिदेशवाक्यार्थ-स्मरणासंस्कारजन्यमेवोपमानम् अतिदेशवाक्याच्छन्दानुभवः, एतदनुभवात् संस्कारः संस्कारादतिदेशवाक्यार्थस्य स्मृतिः। शाब्दबोधे पदज्ञानं प्रमाणम् पदार्थस्मृतिः प्रमाणव्यापारः। पदार्थस्मृतिः पदार्थानुभवजन्यसंस्कारादुत्पद्यते। स्मृतिरनुभवजन्यसंस्कारा-ज्जायते। एवं रीत्या चतुर्विधस्यापि परोक्षज्ञानस्य संस्कारजन्यत्वम्। ईश्वरज्ञानस्य नित्यत्वात्तत्र संस्कारजनकता नास्ति। कालान्तरे विषयज्ञानजन्यत्वार्थ-

मेवानित्यज्ञानात्संस्कार, संस्काराच्च स्मृतिः स्वीक्रियते। यस्य ज्ञानं सर्वदा तिष्ठति, तत्र संस्कारादीनामावश्यकतेव नास्ति विषयप्रकाशात्मकं ज्ञानं यस्य नित्यम्, तत्कृते विषयस्य नित्यसिद्धत्वात् संस्कारस्य स्मरणस्य चावश्यकता नास्ति। ज्ञानं संस्काररूपफलनाश्यमिति नित्यज्ञानं संस्कारजनकं न भवितुं नार्हति। जनकं ज्ञानं ज्ञानजन्यसंस्कारश्च एककालावच्छेदेन न भवितुमर्हति। अविनाशित्वान्नित्यज्ञानस्य तद्धि संस्कारजनकं न भवति। संस्कारत्वाभावात्स्मृतिर्न भवतीति अनुमितिः, उपमितिः शाब्दबोधो न भवितुमर्हति। ईश्वरज्ञानं नित्यमिति। अनुमितिरूपमितिश्च न नित्ये। ज्ञानस्याशुतरविनाशित्वस्वभावत्वमिति सर्वानुभवसिद्धिमितीश्वरस्य ज्ञानमपि अनित्यमेव भवेत्। शरीरिण आत्मना ज्ञानस्यानित्यत्वेऽप्यशरीरिण ईश्वरस्य ज्ञानं कथमिवानित्यं भवेत्? ज्ञानमात्रस्यानित्यत्वमिति व्याप्तिर्न भवितुमर्हति। यतः विपक्षवृत्तित्वबोधकस्तर्क एव नास्ति। ज्ञानविशेषस्य नित्यत्वे किमनिष्टं स्यात्? प्रदर्शितव्याप्त्यनङ्गीकारे नानिष्टप्रसङ्ग इति ज्ञानमात्रस्यानित्यत्वमिति व्याप्तिनिश्चयो न भवितुमर्हति। शरीरेन्द्रिययुक्त-जीवज्ञानस्यानित्यत्वेऽपि शरीरादिरहितस्येश्वरस्य ज्ञानं कथमिव नित्यं भवेत्?

प्रत्यक्षसिद्धहिमकरकादिजलीयद्रव्यस्यानित्यत्वं तद्रूपमप्यनित्यमिति सर्वानुभव-सिद्धत्वेऽपि हिमकरकाद्यारम्भकजलीयपरमाणोः रूपस्य नानित्यत्वमिति। जलीयद्रव्यमात्र-स्यानित्वे जलीयद्रव्यस्य रूपमात्रमध्यनित्यमित्येताद्दशव्याप्तेः सिद्धिर्न भवति, यतो जलीयपरमाणौ तदीयरूपे चोक्तव्याप्तेर्व्यभिचारात् एवमेवेश्वरज्ञानेऽपि व्यभिचारः स्यात्। ईश्वरस्य नित्यज्ञानमीश्वरधर्मग्राहकप्रमाणेन सिद्धमेव। "**सदकारणवन्नित्यम्**" एतत्सूत्रानुरूपं जलीयपरमाणुस्तदीयरूपञ्च नित्यमिति यथा सिद्धयति, तथैवेश्वरज्ञानस्यापि नित्यत्वं सिद्धयति। कारणशून्यं भाववस्तु नित्यमिति।

प्रतिगतमक्षमिति प्रत्यक्षमिति समासलभ्यार्थेन यद्धि ज्ञानमक्षमिन्द्रिय-प्रतिगतमिन्द्रियजन्यं न भवति, तत्र प्रत्यक्षमिति ईश्वरज्ञानस्येन्द्रियार्थसन्निकर्षजन्यत्वा-भावात्प्रत्यक्षत्वं न सम्भवति, ईश्वरज्ञानस्य नित्यत्वात् जन्यत्वन्नास्ति, ईश्वरस्य न मनो न वेन्द्रियाणि इति न जन्यत्वमिति प्रत्यक्षत्वं पराहतमेव। इन्द्रियार्थसन्निकर्षजन्यत्वस्य

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

प्रत्यक्षत्वमिति लौकिकप्रत्यक्षस्यजन्यप्रत्यक्षस्यैव लक्षणम्, न तु नित्यानित्य-साधारणप्रत्यक्षलक्षणम् ।

लक्षणावल्याम् "**ज्ञानकरणजन्यत्वरहितज्ञानत्वमपरोक्षत्वम्**" अनुमित्यादौ तु ज्ञानस्यैव करणत्वम्। तथा च यद्धि करणजन्यं न भवति, तत्सर्वं प्रत्यक्षमेव । अस्मिन् लक्षणे ज्ञानरूपकरणत्वमेवार्थः, न तु ज्ञानस्य करणमिति। तस्वचिन्तामणावप्येतदेव प्रत्यक्षलक्षणमङ्गीकृतम् ; परन्तु एतन्न विस्मरणीयं यदुदयन ईश्वरज्ञानस्य प्रत्यक्षपदेन न निर्दिशति, अपि तु अपरोक्षशब्देनैव। तथा च समासलभ्यप्रत्यक्षपदार्थासङ्घटनेऽपि न क्षतिरपरोक्षपदेनाभिधानात्। अत एव नु ज्ञानरूपकरणजन्यं यन्न भवति, तदपरोक्षमिति साधु संगच्छते। अत एव श्रुतावपि अनैन्द्रियकज्ञानस्यापरोक्षपदेन '**यत्साक्षादपरोक्षाद् ब्रह्मेति**' इत्युक्तम्। तथा चैतत्सिद्धयति यज्ज्ञानाजन्यं ज्ञानमेवापरोक्षम्। अप्पय्यदीक्षितेनापि "**स्वाविषयकज्ञानाजन्यज्ञानत्वं ज्ञानापारोक्ष्यमिति निर्वक्तव्यम्**" कारणत्वप्रवेशे गौरवतां प्रतिसन्धायैतल्लक्षणं निर्दिशति। "**पश्यत्यचक्षुः स श्रृणोत्यकर्णः**" इति श्रुत्या इन्द्रियसम्बन्धरहितस्येश्वरज्ञानस्यापरोक्षज्ञानत्वे न क्षतिः।

**ईश्वरस्य सर्वज्ञत्वम् –**

न्यायवैशेषिका आचार्याः कथयन्ति यदीश्वरो जगतः स्रष्टा, अत एवासौ सर्वज्ञ इति तस्य सर्वज्ञत्वसाधनार्थं प्रमाणस्य आवश्यकता नास्ति। न्यायवार्तिककार-श्चैतदेवाभिधत्ते - 'ईश्वरो यदि सर्वज्ञो न स्यात्, तदाऽसौ जगतः स्रष्टा न भवितुमर्हति' । तत्र वाचस्पतिमिश्रोऽपि कथयति कार्योपादानकारणाभिज्ञ एव कार्यस्य कर्त्ता भूत्वा भवतीति जगत्कर्ता ईश्वरो जगद्रूपकार्यस्योपादानकारणाभिज्ञ एवास्ते। अभिज्ञशब्देन प्रत्यक्षज्ञानमत्र संगृहीतम्, जगत उपादानं परमाणु ईश्वरोऽदृश्यपरमाणुव्रत्यक्षज्ञानवान्। "अदृश्यद्रष्टा सर्वज्ञः"। अदृश्यपदार्थं इन्द्रियैर्ज्ञातो न भवति, अतो य इन्द्रियापेक्षां विना दर्शने समर्थः। स एव सकलपदार्थज्ञानवान्।

विधिविवेके मण्डनमिश्रो न्यायवैशषिकमते सर्वज्ञत्वसाधकमनुमानं प्रदर्शितवान, "**सर्वकार्याणां कर्तृत्वादेव तर्हि सर्वशत्वम् उपादानोपकरणसम्प्रदानप्र योजनाभिज्ञा हि**

कुलालादयः कर्तारः । सर्वेपाथ कार्याणामीश्वरः कर्ता इति समस्त कार्यापादानाद्यभिज्ञः तथा च सर्वज्ञ इति"।

विधिविवेकटीकायां न्यायकणिकायां वाचस्पतिमिश्रः कथयति - "**सर्वकार्याणां तनुभुवनादीनामुपलब्धिमान् कर्ता प्रतीयमानोऽन्तर्भावितसर्वंशत्य एव प्रतीयते। ननु भवतु कर्तृता, सर्वज्ञता तु कस्मादित्यत आह - उपादानोपकरणसम्प्रदायप्रयोजनाभिज्ञा हि कुलालादयः कर्त्तारः। उपादानमिह परमाणुजातिचतुष्टयम्। उपकरणमसमस्त क्षेत्रज्ञसमवायिनौ धर्माधर्मौ। सम्प्रदानम् - क्षेत्रज्ञाः, यानयं भगवान् स्वकर्मभिरभिप्रेति। प्रयोजनम् सुखदुःखभोगः। एतदुक्तं भर्वात ये यत्कर्तारः, ते तदुपादानाद्यभिज्ञाः यथा गुलालादयः। सर्वेषाच कार्याणामीश्वरः कर्तेति समस्तोपादानाद्यभिज्ञः तथा च सर्वज्ञः**"।

एतत्सर्वं बौद्धाचार्यो ज्ञानश्री मित्र ईश्वरभङ्गकारिकायां पूर्वपक्षरूपेणोक्तत्वात्। न्यायमते ईश्वरस्य सर्वकार्यकर्तृत्वेन सर्वज्ञत्वं सिद्धयति। यः पुरुषो यस्य कार्यस्य कर्ता भवति स तस्य कार्यस्योपादानस्योपकरणस्य सम्प्रदानस्य प्रयोजनस्य च ज्ञाता भवति। यथा घटकार्यस्योपादानं मृत्तिका उपकरणं दण्डचकादिः सम्प्रदानं घटस्य ग्राहकः प्रयोजनं जलाहरणादिकम् । एतदुपादानादिकं ज्ञात्वेव कुम्भकारो घटस्य निर्माणं करोति। तथैव सकलकार्यकर्तुरीश्वरस्यापि समस्तकार्योपादानादेर्ज्ञानमस्ति इति वक्तव्यमिति तस्य सर्वज्ञताऽस्ति। जगन्निर्माण उपादानचतुविधपरमाणवः। द्रव्यारम्भकचतुर्विधपरमाणुषु पार्थिवपरमाणुर्जलीयपरमाणुः, तेजसी परमाणुः, वायवीयपरमाणुश्च। मनसोऽणुत्वेऽपि तन्न द्रव्यारम्भकम्।

**उपकरणम्** - जीवात्मनि समवेतो धर्माधर्मौ। सकलबद्धजीवात्मन्येव धर्माधर्मौ समवायसम्बन्धेनाश्रितो। जगत्सृष्टी सम्प्रदानं जीवात्मसमूहः। भोक्तृसृष्टिजीवानां भोगार्थमेवेश्वरो जगतः करोति।

**प्रयोजनम् -** सुखदुःखयोर्भोगः। जीवात्मनः सुखदुःखभोग एव सृष्टेः पर्यवसानम्। सृष्टि विना जीवस्य सुखदुःखभोगो न भवितुमर्हति। घटादिकर्ता कुलालादिर्यथा घटादिकार्यस्योपादानाद्यभिज्ञः, तथैव ईश्वरोऽपि सकलस्य कार्यस्य कर्ता इति कार्योपादानाद्यभिज्ञः सकलकार्योपादानाद्यभिज्ञश्चावश्यमेव सर्वज्ञो भविष्यति।

**ईश्वरेऽनुमानप्रदर्शनम् -**

न्यायवैशेषिकाचार्या ईश्वरसिद्ध्यर्थमनुमानप्रमाणप्रदर्शनं कृतवन्तः। वात्स्यायनः कथयति - अनुमानं प्रत्यक्षागमाविरोधि। प्रत्यक्षेणागमेन च प्रमाणेन निश्चितस्यार्थस्य अन्वीक्षाऽनुसन्धानमनुमानम्। प्रत्यक्षागमाधिगतस्यार्थस्यानुमानप्रमाणेनावधारणमन्वीक्षा। यत्रान्वीक्षाव्यापारप्रदर्शनं वर्त्तते, साऽऽन्वीक्षिकी। आन्वीक्षिकी न्यायविद्या न्यायशास्त्रं वा। प्रत्यक्षागमविरुद्धमनुमानं न्यायाभासः। न्यायशास्त्रं वेदानुकूलं न वेदविरोधि। उपपादनसापेक्षस्य वेदप्रतिपाद्यस्य सर्वस्यार्थस्य उपपत्तिप्रदर्शनमेव न्यायशास्त्रस्य कार्यम्। उपपत्तिसापेक्षवेदस्यार्थस्योपपत्तिप्रदर्शने न्यायशास्त्रस्य प्रवृत्तिः। शिक्षादिकं यथा वेदाङ्गम्, तथैव पुराणम्, न्यायः, मीमांसा, धर्मशास्त्रं च वेदस्योपाङ्गम्।

उक्तञ्च याज्ञवल्क्यस्मृतौ -

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥**

अत्र न्यायशब्देन न्यायवैशेषिकम्, सांख्यं पातञ्जलं चेति चतुर्विधदर्शनानां संग्रहो भवति, मीमांसाशब्देन पूर्वमीमांसायाः। उत्तरमीमांसायाश्च संग्रहो जायते। उक्तानि षड्दर्शनान्येव वेदस्योपाङ्गभूतानि।

वेदमन्त्रप्रतिपादितेश्वरस्यास्तित्वसिद्ध्यर्थं कतिपयाचार्यवर्गैरनुमानप्रमाणमपि प्रदर्शितम्। ईश्वरप्रतिपादकस्य वेदमन्त्रस्य बाहुल्यं वर्तते। वाचस्पतिमिश्रः कथयति यद् वेदस्यानुमानस्य च ईश्वरसाधकत्वेऽपि एतत्प्रमाणद्वयमीश्वरस्य जगत्कर्तृत्वं सर्वज्ञत्वं च परित्यज्य तत्स्वरूपं साधयितुं न कदापि शक्नोति। वेदे ईश्वरस्य जगत्कर्तृत्वादिप्रदर्शनेऽपि वेदविरुद्धस्य कस्यापि धर्मस्य सिद्ध्यर्थं प्रयासं नैव कृतवन्तः।

भगवान् वात्स्यायनो न्यायसूत्रस्य भाष्य उक्तवान् - प्रत्यक्षागमाश्रितमनुमानं सा अन्वीक्षा। न्यायविद्या न्यायशास्त्रम्। यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः, स इति। अयमभिप्रायः - अनुमानं प्रत्यक्षागमयोरविरोधि। प्रत्यक्षागमप्रमाणेनावधारण-मन्वीक्षा। यस्मिन् शास्त्रे अन्दीक्षाव्यापारप्रदर्शनम्, सा आन्वीक्षिकी। आन्वीक्षिकी एव न्यायविद्या न्यायशास्त्रं वा। प्रत्यक्षागमविरुद्धो न्यायाभासः। भाष्यकारस्यानया युक्त्या

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

एतदवगम्यते यन्न्यायशास्त्रं वेदानुकूलम्, न वेदविरोधि। वेदप्रतिपाद्यसमस्तार्थोपपादन-सापेक्षार्थस्योपपत्तिप्रदर्शनमेव न्यायशास्त्रस्य कार्य्यम्। उपपत्तिसापेक्षश्रीतार्थस्योपपत्ति-प्रदर्शनार्थमेव न्यायशास्त्रं प्रवर्त्तते। न्यायशास्त्रस्य वेदोपाङ्गत्वेन रूपेण गणना याज्ञवल्क्येन कृता। अत्र न्यायशब्देन न्यायवैशेषिकयोः, साङ्ख्यस्य, पातञ्जलस्य च ग्रहणं कृतम्।

वैशेषिकसूत्रे साक्षादीश्वरस्यालोचना नास्तीति वैशेषिकसूत्रात् साक्षाद् ईश्वरसाधकानुमानप्रदर्शनं न सम्भवति। प्रशस्तपादभाष्येऽपि सृष्टिसंहारविधिप्रकरणे ईश्वरकर्तृकाया जगत्सृष्टेः संहारस्य च क्रमः प्रदर्शितः; किन्तु साक्षाद् अनुमानप्रमाणेनेश्वरसिद्धिर्नैव प्रदर्शिता। व्योमवतीटीकायां सृष्टिसंहारविधिप्रकरणस्य व्याख्यायां व्योमशिवाचार्यः कथयति - "प्रशस्तपादभाष्य ईश्वरकर्तृका या जगतः सृष्टिः प्रदर्शिता, सा नैव सुसङ्गता, यतः ईश्वरास्तित्वेन किमपि प्रमाणम्। अग्रे कथयति - एतत्कथनं न समीचीनम्। अनुमानप्रमाणेनागमप्रमाणेन चेश्वरः सेत्स्यति। व्योमशिवाचार्यकथने नावगम्यते यत् प्रशस्तपादभाष्यम् ईश्वरसाधकं प्रमाणं नैव प्रदर्शितम्। प्रशस्तपादभाष्यस्य टीकायामुदयनाचार्येणोक्तम् - प्रशस्तपादभाष्ये यः सृष्टिसंहारप्रकार: प्रकाशितः, स ईश्वरास्तित्वसिद्धावेव सुसङ्गतो जायते। ईश्वरास्तित्वे किं प्रमाणम् ? एतस्मिन् प्रश्ने उदयनाचार्यः कथयति - ईश्वरसाधकानामनुमानानां सद्भावेऽप्यत्र तेषु किञ्चदुल्लिखामि। उदयनाचार्यादिलेखेनेदं सिद्धं यत् प्रशस्तपादभाष्ये ईश्वरानुमानं नास्तीति उदयनपरवर्तिनाम् उद्योतकरादीनामेव मतमादौ संक्षिपामि।

उद्योतक न्यायवार्तिक ईश्वरसाधकमनुमानद्वयं प्रदर्शितवान्-

१) क्षित्यप्तेजोवायुरूपमहाभूतचतुष्टयम्, स्वोचितधारणक्लेदनादिक्रियायां बुद्धिमत्कारणाधिष्ठितं सत् प्रवर्त्तते, उक्तमहाभूतवर्गस्याचेतनत्वात्। यद्यदचेतनं वस्तु स्वोचितक्रियायां प्रवर्तते तद् बुद्धिमत्कारणाधिष्ठितं सदेव प्रवर्त्तते यथा वास्यादिशात्रम्। वास्यादिकं काष्ठादिच्छेदनाक्रियायां बुद्धिमत्पुरुषकर्तृकाधिष्ठितं सदेव प्रवर्त्तते। एवमेव पृथिव्याद्यचेतनभूतसमूहः स्वोचितधारणक्रियायां बुद्धिमत्कारणाधिष्ठितं सदेव प्रवर्त्तते। अचेतनमहाभूतवर्गस्य यस्तावद् अधिष्ठाता, स एव बुद्धिमत्कारणमीश्वरः।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

२) तृणतरुपर्वतादि, तदुपादानाभिज्ञकर्तृकं (निमित्तं), तृणादेरुत्पत्तिमत्त्वात्, कार्यत्वात् यद्यत् कार्यम्, तदुपादानाभिज्ञकर्तृजन्यम्, यथा प्रासादादिकम्। तृणतरुपर्वतादेरुपादानाभिज्ञः कर्त्ता एवेश्वरः। अयमेव द्वितीयानुमानाभिप्रायः।

भाष्यकारवात्स्यायनः साक्षादीश्वरसाधकानुमानं नैव प्रदर्शयति। एतावन्मात्रमेव निर्दिशति- **'न तावदस्य बुद्धिं विना कश्चिदधर्मो लिङ्गभूतः शक्य उपपादयितुम्'**। अयमभिप्रायो बुद्धिं विना अन्यः कोऽपि धर्म ईश्वर उपपादयितुं न शक्यते, येनेश्वरस्य सिद्धिः स्यात्। भाष्यकारोऽत्र ईश्वरीयबुद्धिमेव ईश्वरसाधकलिङ्गरूपेण निर्दिशति। वार्त्तिककारः तदनुसारमेव 'बुद्धिमत्कारणाधिष्ठितानीत्यनुकथयति।

न्यायदर्शनस्य **'तत्कारितत्वादहेतुः'** एतेन सिद्धान्तसूत्रेणैवेश्वरो व्यवस्थापितः। एतत्सूत्रस्य वार्तिके वार्तिककारः कथयति - सूत्रकारस्तत्कारित्वाद् ईश्वरकारित्वादिति सूत्रकारो वदति, अत्र सूत्रकारस्य मते ईश्वरस्य निमित्तकारणत्वमेवाभिमतम्।

निमित्तकारणं समवायिकारणस्यासमवायिकारणस्य चानुग्राहकं भवति। न्यायवैशेषिकमते भावकार्यजातस्य त्रिविधं कारणं स्वीकृतम् -

**१) असमवायिकारणम्,**

**२) निमित्तकारणम्,**

**३) समवायिकारणञ्च।**

सूत्रकार ईश्वरस्य निमित्तकारणत्वं प्रतिपादयति। निमित्तकारणञ्चेतर-कारणद्वयस्यानुग्राहकं भवति। यथा वस्त्रस्य समवायिकारणं तन्तुः, असमवायिकारणं तन्तुसंयोगस्तुरीवेमादिकम्, वस्त्रस्य निमित्तकारणमुभयोरनुग्राहकञ्च। ईश्वरस्य निमित्तकारणत्वे जगत उपादानकारणं समवायिकारणं वा किम्? वार्तिककारः कथयति परमाणुरुपादानकारणम् ईश्वरश्च जगतो निमित्तकारणम्; किन्तु जगतो निमित्तकारणविषये वादिनो विप्रतिपत्तिरस्ति। केचित् कालं निमित्तकारणम्, केचन प्रकृतिं निमित्तकारणम्, केचन च ईश्वरमेव निमित्तकारणं कथयन्ति। यद्यपि वार्तिककारो जगतो निमित्तकारणविप्रतिपत्तौ प्रकृतेर्निर्देशं करोति परं प्रकृतिनिमित्तकारणतावादो न क्वापि प्रसिद्धः। प्रकृतिशब्द उपादानस्यैव प्रतिपादकः, अतः केवलं निमित्तकारणत्वस्य प्रकृती

प्रतिपादने प्रकृतिशब्दस्यैव वैयर्थ्यं स्यात्। यन्मते प्रकृतिः स्वतन्त्रा, तन्मते अन्यः कश्चित् प्रवर्त्तयिता नास्ति।

अग्रे वार्तिककारः कथयति जगतो निमित्तकारणविशेषे दार्शनिकानां विप्रतिपत्तिरस्तीति निमित्तकारणं किं भवेत्? ईश्वर एव निमित्तकारणम् इत्येव न्यायशास्त्रसम्मतम्। ईश्वरस्यास्तित्वासिद्धौ तस्य निमित्तकारणता कथमिव स्यात्? कालादेः निमित्तकारणतानिरसनपूर्वकमेवेश्वरस्य निमित्तकारणताऽवधृता स्यात्। एतत्प्रश्नोत्तरे वार्तिककारः कथयति अनुमानप्रमाणेनैवेश्वरस्य निमित्तकारणता सिद्धा भवति, अनुमानप्रमाणेनैव चेश्वरस्यास्तित्वमपि सिद्धो भवति।

ईश्वरास्तित्वसिद्ध्यर्थं पृथक् प्रमाणस्यावश्यकता नास्ति, यस्यास्तित्वमपि न सिद्धम्, स कथमपि निमित्तकारणं भवितुं नार्हति। ये अचेतनप्रधानाद् जगत उत्पत्तिं स्वीकुर्वन्ति, अथवाऽचेतनपरमाणुसमूहाद् उत्पत्तिं स्वीकुर्वन्ति, अथवा जीवस्य अशुभाशुभकर्मणो जगत उत्पत्तिं स्वीकुर्वन्ति, तैः सर्वैरपि स्वीकरणीयं यद् बुद्धिमत्कारणाधिष्ठितं सदेव प्रधानं परमाणुः शुभाशुभकर्म वा प्रवृत्तं भवति, यत एतत्सर्वमपि अचेतनम्। अचेतनं वस्तु बुद्धिमत्कारणमत्। यद्यद् रूपरसादिमत्, तद् बुद्धिमत्करणाधिष्ठितं सदेव प्राणिनां सुखदुःखादीनां निमित्तं भवति, यथा वस्त्रकारणं तुरीवेमादिकम्।

अचेतनो धर्मोऽधर्मश्च बुद्धिमत्कारणाधिष्ठित एव पुरुषस्योपभोगं सम्पादयति, यतो धर्मोऽधर्मश्च सुखदुःखरूपोपभोगस्य कारणम्। यद्यत् करणम्, तद् बुद्धिमत्कारणाधिष्ठितं सदेव फलस्य जनकं भवति, यथा वास्यादिकम्। जीवाश्रितधर्माधर्मयोरधिष्ठाता तयोराश्रयो जीव एव भवितुमर्हति ईश्वरस्य जीवाधिष्ठातृत्वेन स्वीकारस्य का आवश्यकता ?

न्यायमते ज्ञानोत्पत्तेः प्राग् जीवात्मा अचेतन - चेतन एव च अधिष्ठाता भवति। जीवात्मनो ज्ञानमनित्यम्। शरीरस्येन्द्रियाणां चोत्पत्तेः प्राग् जीवस्य ज्ञानं न भवितुमर्हति। अनुत्पन्नज्ञानो जीवात्मा स्वीयधर्माधर्मयोरधिष्ठाता न भवितुं शक्नोति ! यद्विषयकं ज्ञानं यस्य नास्ति स अधिष्ठाता तस्य कथमिव स्यात् ? जीवात्मनः सकलरूपरसादिविषयकं

ज्ञानमेव न सम्भाव्यते, धर्माधर्मविषयकज्ञानस्य तु का कथा ? यदि जीवात्मा स्वीयधर्माधर्मयोरधिष्ठाता स्यात्, तदा जीवात्मा कदापि स्वीयाधर्मस्याप्यधिष्ठाता भूत्वा स्वीयदुःखस्योत्पादको न स्यात्। जीवस्याधर्मेण चाधिष्ठितो भूत्वा परमाणुसमूहः प्रवृत्तो भवति, एवं तेन जगतः सृष्टिर्भवतीत्यपि नैव सुसङ्गतं जायते। यतो धर्मोऽधर्मश्चाचेतनः। अचेतनः पदार्थः स्वतन्त्ररूपेण अधिष्ठाता नैव भवितुमर्हति।

न्यायवार्तिककारोऽनुमानप्रमाणेनेश्वरसिद्धिं प्रदर्शितवान्। वार्तिककारप्रदर्शितानुमान-मेव वैशेषिकाचार्यस्य नैयायिकाचार्यस्य चोपजीव्यम्। न्यायसूत्रकारो न्यायसूत्रे तत्कारित्वादित्येवोक्तम्। ईश्वरकारित्वादित्येवास्यार्थः। अनेनेश्वरस्य निमित्तकारणता अभिहिता। एतस्यैव व्याख्यानक्रमे न्यायभाष्यकारः कथितवान् - 'न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उपपादयितुम्।' अनेन कथनेन भाष्यस्य किञ्चिद्विश्लेषणं जातम् अस्यैव च वार्तिके विस्तारो वर्तते। वाचस्पतिमिश्रो व्योमशिवाचार्य उदयनाचार्यश्च वार्तिकोक्तिमवलम्ब्यैव प्रतिभानुसारमीश्वरसाधकानुमानं प्रदर्शितवान्। उदयनाचार्यः कुसुमाञ्जलिग्रन्थस्य पञ्चमस्तबके, आत्मतत्त्वविवेकस्यानुपलब्धिवादे, प्रशस्तपादभाष्यस्य सृष्टिसंहारप्रक्रियाविवरणे, न्यायसूत्रे तात्पर्यटीकापरिशुद्धौ च विस्तृतरूपेणानुमानप्रदर्शनं कृतवान्।

ऋङ्मन्त्रेष्वीश्वरस्य जगतः स्रष्टृत्वं सर्वज्ञत्वञ्च प्रतिपादितम्। एवमेव न्यायवैशेषिकसिद्धान्तानुसारं जगत्स्रष्टृत्वं परमाणुकारणवादश्च प्रकाशितः। कुसुमाञ्जलिपञ्चमस्तबककारिकायाम् 'आयोजनम्' इत्यपि हेतुरूपेण प्रदर्शितम्। एतस्मिन्मन्त्रे ईश्वरस्य वेदप्रणेतृत्वं प्रकाशितम्, वैशेषिकाचार्यैर्युक्तम् – 'बुद्धिपूर्वा वाक्यकृतिर्वेदे'। अक्षपादसूत्रेऽपि मन्त्रायुर्वेदप्रामाण्याच्च तत्प्रामाण्यमाप्तप्रामाण्याद् न्यायवैशेषिकाचार्यैः प्रदर्शितमीश्वरानुमानं हि ऋङ्मन्त्रप्रदर्शितेश्वरस्वरूपमादायैव कृतम्।

तात्पर्यपरिशुद्धिव्याख्याने ईश्वरचर्चायां न कश्चिद्विशेषः अपितु संक्षिप्ता टीका लक्ष्यते। वाचस्पतिमिश्रव्याख्यानस्य तात्पर्योद्घाटनमेवेति संक्षेपः।

**ईश्वरस्यैकत्वम् -**

देवस्य नानात्वेऽपि ईश्वरस्य नानात्वं नास्ति। देवो मनुष्यश्च ईश्वरसृष्टेः जीवविशेषः। ईश्वरसदृशः कोऽपि पदार्थो नास्ति, येन प्रमाणेन ईश्वरः सिद्ध्यति[1]।

❑❑❑

[1] 'प्रलये परमाणुषु बेगकर्मणी तिष्ठतः। कथं विना कालावच्छेदकानुपपतौ तावन्तमेव कालमिति प्रलयपरिमाणोपपत्तेः। परमाणुक्रिया सत्त्वेऽपि संयोगविभागौ अपि नोत्पद्येते। तथा च प्रविभक्ताः संयोगरहिता इत्येव तत्त्वम्' (से० पु० २८९)।

# विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्

डॉ. दयाल सिंह पंवार*

## 1. भूमिका

भारतीय-शास्त्रीय-परम्परा भव्या सुदीर्घा विलक्षणा च वर्तते। विविधेषु शास्त्रेषु तद्विषयप्रतिपादनार्थं विशिष्टानां संज्ञानां, पारिभाषिकशब्दावल्याः प्रयोगो विधीयते। नैके शब्दा एवंविधा भवन्ति, ये विविधेषु शास्त्रेषु भिन्नार्थेषु प्रयुज्यन्ते। एवंविधेषु नानार्थकेषु शब्देषु गुण इति पदं नानाशास्त्रप्रयुक्तत्वादनेकार्थतया वैलक्षण्यमावहति।

लोकेऽप्ययं गुणशब्दो दयादाक्षिण्यशौर्यादिभावानां वाचकत्वेन, पदार्थानां वैशिष्ट्यप्रतिपादकधर्मतया, रज्जुपर्यायतया च प्रयुज्यते। अमरकोशकार आह "**मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः**" गुणशब्दस्यार्थविस्तरं द्रष्टुम्, अर्थविशेषेषु वास्यार्थसङ्कोचमालोचयितुं विविधशास्त्रेषु गुणशब्द उपरिष्टाद् विविच्यते।

## 2. व्याकरणशास्त्रे गुणपदप्रयोगः -

अष्टाध्यायीति लघुग्रन्थस्य महाशास्त्रस्य वा प्रणेता लक्ष्यैकचक्षुष्को भगवान् पाणिनिः "**अदेङ् गुणः**" इति सूत्रं प्रणीय अकार एकार ओकारे चेति स्वरत्रये गुणपदशक्तिं स्थापयामास। तस्मात् प्रक्रियायां गुण इत्युच्यमान एषामेव वर्णानामुपस्थितिर्भवति। अतो "**आद् गुणः**" इति सूत्रेण विहितः सन्धिरपि गुणसन्धित्वेन प्रसिद्धः। अत्रेदमप्युल्लेखनीयं यत् "**संख्याया गुणस्य निमाने मयट्**" इति सूत्रे गुणस्य भागमित्यर्थं चक्रुर्वैयाकरणाः। प्रक्रियेतरस्थलेषु तु पदार्थधर्मत्वेन, तद्विशेषतारूपेण वा गुणपदव्यवहारो भाष्यादौ दृश्यते। तद्यथा – स्फोटः शब्दः ध्वनिस्तद्गुणः।

## 3. वैशेषिकदर्शने गुणपदप्रयोगः -

वैशेषिकदर्शने सप्तपदार्थेषु द्वितीयः पदार्थो वर्तते गुणः। न्यायवैशेषिकदर्शनयोः या संयुक्ता धारा सम्प्रति दृश्यते, तत्रापि पदार्थनिरूपणं वैशेषिकदर्शनानुगुणं विद्यते। अत्र

---

* सहाचार्यः, व्याकरणविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

रूपरसादयः चतुर्विंशतिर्गुणास्तच्छास्त्रे प्रसिद्धाः। तर्कसंग्रहदीपिकाकारस्तत्र गुणं लक्षयन्नाह "द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान् वा।"

**4. साङ्ख्यदर्शने गुणपदप्रयोगः -**

व्यक्ताव्यक्तज्ञविज्ञानविदः सांख्या अपि गुणमुक्ता न तिष्ठन्ति। तन्मतानुसारेण तु सर्वा प्रकृतिरेव गुणमयी। तन्नये सत्त्वरजस्तमांसि गुणपदवाच्यानि सन्ति। एषां गुणानां साम्यावस्थैव प्रकृतिः। गुणानां वैषम्य एव संसारप्रपञ्चः। "**सत्त्वं लघु प्रकाशकम्**" "**उपष्टम्भकं चलं च रजः**" "**गुरुवरणकमेव तमः**" इति प्रत्येकं व्याचख्यौ सांख्यकारिकाकारः।

इदमपि वक्तुं शक्यते यद् गुणरूपैः रज्जुभिरेव पुरुषो बद्धो वर्तते। श्रीमद्भगवद्गीतादिषु ग्रन्थेषु इमे गुणाः सविस्तरं प्रतिपादिताः।

**5. काव्यशास्त्रे गुणपदप्रयोगः -**

काव्यरसिका गुणानुरक्ता दृश्यन्ते चेन्नाश्चर्यम्। काव्यपुरुषस्य यद् वर्णनं तदीये शास्त्र उपलभ्यते, तदनुसारेण रसस्योत्कर्षाधायका इमे गुणाः शौर्यादिवद् भवन्ति। काव्यादर्शे आचार्येण दण्डिनैवंभूतानां दशगुणानां चर्चा कृता। तथा हि –

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता;**
**अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः।**

तदनु भामहप्रभृतिभिः काव्यतत्त्वमर्मज्ञैः प्रामुख्येण त्रयो गुणा अङ्गीकृताः। साहित्यदर्पणकारैँ पण्डितवर्यो विश्वनाथो "माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा।" उक्त्वा गुणरूपेण माधुर्यमोजः प्रसादं चैतत्त्रयमेव निरूपयामास। तत्र तात्पर्यमिदमेवास्ति यद्यथा शौर्यादयो गुणा अस्माकं उत्कर्षमादधति, तथैवैते माधुर्यादयो गुणा काव्यपुरुषस्य तदात्मभूतस्य रसस्य वोत्कर्षं संवर्धयन्ति।

**6. राजनीतौ गुणपदप्रयोगः -**

अस्माकं शास्त्रीय-परम्परायां प्रायशो धर्मशास्त्रेऽर्थशास्त्रे वा राजधर्मरूपेण, दण्डनीतिरूपेण वा राजनयः समुपस्थापितः। तत्र मन्वादिशास्त्रेषु षड्गुणानां चर्चा कृता। एते गुणाः भवन्ति सन्धिविग्रहयानासनद्वैधीभावसंश्रया इति।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**सन्धिं च विग्रहं चैव यानमासनमेव च;**
**द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत् सदा।**

अत्रापीदं विचारणीयं यदेतेऽपि षड्गुणाः पाशाः सन्तिऽ यै राजा स्वशत्रुमित्रादीन् यथायथं बध्नाति।

**7. गुणपदमादाय श्लिष्टप्रयोगाः -**

लोकव्यवहारे शास्त्रेषु गुणपदस्यैवंविधानर्थआनवलोक्यैव काव्यरसज्ञाः कवयोऽपि विविधेषु स्थलेषु श्लिष्टप्रयोगैः स्वकाव्यान्यलञ्चक्रुः। किरातार्जुनीये महाकाव्ये द्रौपदी युधिष्ठिरमुपालभमाना वक्ति –

**गुणानुरक्तामनुरक्तसाधनः,**
**कुलाभिमानी कुलजां नराधिपः;**
**परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्।** १.३१ ॥

तत्र आत्मवधूस्तु शौर्यादिगुणैरनुरक्ता भवितुमर्हति परं राजश्रीस्तु राजोचितषड्गुणैरेवानुरक्ता भवितुमर्हति।

तथैव मुद्राराक्षसे नटो नटीं, चाणक्यो नीतिविद्यां, राजा शरदं चाह्वयन्नाह –

**गुणवत्युपायनिलये स्थितिहेतोः साधिके त्रिवर्गस्य;**
**मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि।** १.५ ॥

अत्र नटो यान् विशिष्टगुणानादाय गुणवतीं स्वकीयां नटीं संबोधयतिऽ ते गुणा उच्यन्ते –

**कार्येषु मन्त्री वचनेषु दासी,**
**भोज्येषु माता शयनेषु रम्भा;**
**धर्मानुकूला क्षमया धरित्री,**
**भार्या च षाड्गुण्यवतीह दुर्लभा।**

चाणक्योऽत्र स्वकीयां सन्धिविग्रहादिषड्गुणयुक्तां नीतिविद्यामाह्वयति। तत्रैव योद्धुकामो नृपोऽम्भःप्रसादादिगुणयुतां शरदमामन्त्रयते।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

एवमेव कश्चिज्जनः "गौरी स्पर्शसुखावहा गुणवती" इति बहुविधानि श्लिष्टपदानि प्रयुञ्जानः अन्विष्यति स्वकीयां यष्टिकां, परं तानि विशेषणानि स्त्रियामपि घटन्ते।

**या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा,**
**गौरी स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी;**
**सा केनापि हृता तया विरहितो गन्तुं न शक्नोम्यहम्,**
**रे भिक्षो! तव कामिनी नहि नहि प्राणप्रिया यष्टिकआ।**

तत्र गुणवती सूत्रवती यष्टिकापि भवितुमर्हति, तथैव माधुर्यादिप्रशस्तगुणयुक्ता प्रियतमापि भवितुमर्हा।

तथैव "धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि" इत्यादावपि श्लोके नैषधो नलो वैदर्भ्याः नाइकोचितैर्गुणैराकृष्टः। तथैव नैषधपदवाच्यो नैषधीयचरित-ग्रन्थो वैदर्भ्या रीतेः प्रसादादिगुणैः समाकृष्यत।

**8. उपसंहारः -**

इत्थमनेन विवरणेन स्पष्टं भवति यल्लोके, विविधेषु शास्त्रेषु च गुणशब्दो नैकेष्वर्थेषु प्रयुक्तः। व्याकर-संज्ञां विहाय अन्यत्र प्रयुक्तं गुणपदं रज्जुना सह वैशेषिकदर्शनस्य चतुर्विंशतिगुणैः सह संबद्धुं शक्यते न वेति तु विचारणीयमनुसन्धेयं च। एवंविधा नैके नानार्थकाः शब्दा विविधशास्त्रेषु पारिभाषिकतयाऽर्थविशेषेषु प्रयुक्ता दृश्यन्ते। तेऽपि यथाशास्त्रं यथाप्रसङ्गं परिशीलनीयाः सावधानतया च प्रयोक्तव्याः।

❑❑❑

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः

**प्रो. बिष्णुपदमहापात्रः***

मिथ्याज्ञानजन्यवासनात्मके संसारे जीवानाम् आत्यन्तिकदुःखनिवृत्तये परमसुखस्य च प्राप्यते महर्षिभिः गौतमकणादप्रभृतिभिः सूत्रग्रन्थः निर्मितः। तत्र गौतमैः प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसस्य प्राप्तिर्भवतीति सूत्रितम्। तथा च सूत्रम्- "**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**" इति। वैशेषिक-सूत्रकारैऽपि द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयासधिगम इति सूत्रितम्। तथा च सूत्रम् – "**धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां तत्त्वज्ञानान्निःश्रेयसम्**" इति। तत्र न्यायतन्त्रे प्रमाणादिषोडशपदार्थेषु प्रमेयपदार्थः आत्मशरीरादिभेदेन द्वादशविधो भवति। तथा च सूत्रम् – "**आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्**" इति। द्वादशप्रमेयेषु षष्ठप्रमेयं भवति मनः। तस्य मनसः किं स्वरूपं, तस्य सद्भावे किं प्रमाणमिति जिज्ञासायां न्यायसूत्रकारैरुच्यते "**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**" इति।

तत्रेदमवधातव्यं यत् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं भवति। प्रत्यक्षप्रमां प्रति इन्द्रियं करणं इन्द्रियार्थसन्निकर्षः व्यापारो भवति। इन्द्रियं तु वाह्य-आभ्यन्तरभेदेन द्विविधं भवति। वाह्येन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि, अन्तरिन्द्रियं तु मनो भवति। उक्तं च "**घ्राणरसनचक्षुस्त्वक्श्रोत्रणीन्द्रियाणि भूतेभ्यः**" इति। आत्मप्रत्यक्षे मनसः कारणत्वात् प्रत्यक्षलक्षणे तस्य मनसः अनुपादानात् या न्यूनता समापतति तस्याः न्यूनतायाः निराकरणार्थं भाष्यकारैः प्रतिपादितं प्रत्यक्षस्य यद्विशिष्टं कारणं इन्द्रियादिकं तस्यैवात्रोल्लेखः। आत्ममनस्संयोगस्य ज्ञानमात्रं प्रति कारणत्वात् अत्र तस्य नैवोल्लेखः। तथाहि – "**इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम् । न तर्हि इदानीमिदं भवति, आत्मा मनसा संयुज्यते , मन इन्द्रियेण इन्द्रियमर्थेनेति । नेदं कारणावधारणमेतावत्**

---

* आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**प्रत्यक्षे कारणमिति, किन्तु विशिष्टकारणवचनमिति । यत् प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते"** इति। एवञ्च संशयेऽतिप्रसक्तिवारणाय प्रत्यक्षसूत्रे व्यवसायात्मकमिति यत्पदमुपात्तं विद्यते तस्य व्याख्यानावसरे न्यायवार्तिककारः वदति - "**संशयस्योभयनिमित्तत्वात्। उभयन्तु संशयस्य निमित्तम् आत्माऽन्तःकरणसंयोग इन्द्रियार्थसन्निकर्षश्चेति"** इति। एतेन ज्ञायते न्यायवार्तिककारैः संशयस्य निमित्तत्वेन अन्तःकरणस्योल्लेखः प्रथमतया अभिहितः। वैशेषिकभाष्यकारैरपि मनसः पर्यायत्वेन अन्तःकरणशब्दस्य व्यपदेशः कृतः। तथाहि – बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तर-भावाच्चान्तःकरणम् इति। एतेन निश्चप्रचं वक्तुं शक्यते यत् मनः अन्तःकरणपर्यायभुतमेव। तादृशपर्यायभुतस्य मनसः किं लक्षणमिति जिज्ञासायां आचार्याः वदन्ति – सुखाद्युपलब्धिसाधनमिन्द्रियं मनः इति अर्थात् सुखदुःखादिसाक्षात्कार-कारणमिन्द्रियं मनो भवति। परन्तु एतादृशलक्षणस्वीकारे- "शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्व-मिन्द्रियत्वम्" इति इन्द्रियलक्षणे मनसः मनोलक्षणे च इन्द्रियस्य सापेक्षितत्वाद् भवति अन्योन्याश्रयः , अस्य अन्योन्याश्रयदोषस्य वारणाय शब्दशक्तिप्रकाशिकाकारः जगदीशः मनसो लक्षणं प्रतिपादयति – "**निस्पर्शं मूर्त्तिमन्मनः**" इति । अर्थात् स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणमिति। प्रशस्तपादाचार्यैस्तु – "**मनस्त्वयोगान्मनः**" इति मनसो लक्षणं प्रतिपादितम्। शंकरमिश्रैस्तु – "**स्पर्शात्यन्ताभाववत्त्वे सति मूर्त्तत्वं मनस्त्वं विशेषगुणासमानाधिकरणद्रव्यवृत्तिजातिमत्त्वं वा**" इति मनसो लक्षणं प्रतिपादितम्। कणादतर्कवागीशैस्तु – "**मनस्त्वजातिप्रवृत्तिनिमित्तकत्वात् मन इति संज्ञा साङ्केतिकी**" इति। अत्र साङ्केतिकीति शब्दस्यायमभिप्रायः पृथिव्यादिसंज्ञावदिति।

**मनस्त्वजातिसद्भावे प्रमाणप्रदर्शनम् -**

तत्र मनस्त्वयोगान्मन इति प्रशस्तपादाचार्यैः यन्मनसो लक्षणं प्रतिपादितं तत्र मनस्त्वजातिसद्भावे किं मानमिति जिज्ञासायां कणादतर्कवागीश इत्थं प्रवदति - मानसप्रत्यक्षजनकतावच्छेदकतया तत्सिद्धेः, मानसत्वावच्छिन्नं प्रति मनस्त्वेन हेतुत्वात् इति। अर्थात् मानसप्रत्यक्षत्वावच्छिन्नं प्रति मनसः कारणत्वात् कारणस्य
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

किञ्चिद्धर्मावच्छिन्नत्वनियमात् मानसत्वावच्छिन्नजनकतावच्छेदकस्य मनस्त्वस्य लाघवानुरोधेन जातिस्वरूपत्वमेवाङ्गीकर्तव्यमिति मनः संज्ञायास्तन्मूलकसाङ्केतिकत्वमुपपद्यते।

**मनसः सिद्धिप्रकारप्रदर्शनम् -**

मनसः सिद्धिः न जाता, किन्तु मनस्त्वजातिसिद्धप्रकारः प्रदर्शितः, यावत् धर्मिणः सिद्धिर्नसम्भवति तावत् जातेः सिद्धिर्भवितुं नार्हति इति मनसः सिद्धौ अनुमानं प्रदर्शितं न्यायसूत्रकारैः वैशेषिकसूत्रकारैश्च। तथाहि – "**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**" इति। अर्थात् स्वस्वविषयै रूपरसादिभिरिन्द्रियाणां संयोगे सत्यपि तैश्चेन्द्रियैरात्मनो सर्वमूर्तद्रव्यसंयोगित्वात् विभुत्वात् संयोगे सत्यपि रूपरसाद्यनेकविषयकाण्यनेकानि ज्ञानानि युगपत् नोत्पद्यन्ते तेन ज्ञायते खलु अस्ति किञ्चित् करणान्तरमपि येनात्मेन्द्रियविषयाणां संयोगे सत्यपि युगपत् ज्ञानानि नोत्पद्यन्ते, यदेव कारणान्तरं तदेव मनः इति। न्यायभाष्यकारै उच्यते – "**स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि**" इति।

अभिप्रायस्तु स्मृतिस्तु संस्कारमात्रजन्यज्ञानरूपा, आत्मन आन्तरज्ञानलक्षणा क्रियारूपा, सा च इन्द्रियलक्षणं करणमन्तरा नैव सम्भवति इत्यतः स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः। अनुमानस्थले व्याप्तिस्मृतिः साध्यस्मृतिश्च स्वीकृता विद्यते, सा च मनसः स्वीकृतिमन्तरा नैव सम्भवति इत्यतः तादृशानुमानसम्पादनाय मनसः लिङ्गत्वमभ्युपेयम्। आगमस्तु शब्दप्रमाणरूपं भवति, तज्जन्यान्वयबोधो भवति, अन्वयबोधार्थं शक्तिग्रहस्य स्मृतेः अपेक्षा भवति, सा च मनो विना नैव सम्भवतीति आगमोऽपि मनो लिङ्गं भवति। समानधर्मवद्धर्मिज्ञानं संशयस्य कारणं भवति । तथाच संशयो भवति – स्थाणुर्वा पुरुषो वा इति। एतादृशसंशयस्थले स्थाणुपुरुषयोः समानधर्माणां स्मृतिर्भवति तदनन्तरं संशयः स्मृतिश्च मनो अन्तरा नोपपद्यते इति संशयोऽपि मनोलिङ्गं भवति। श्वो मे भ्राताऽऽगन्ता इत्यादिरूपं प्रातिभं ज्ञानं तच्च स्वविषयस्य भ्रात्रादेः स्मृतिमन्तरा नैवसम्भवति स्मृतिश्च मनो विना नोपपद्यते इति प्रतिभापि मनो लिङ्गं भवति। अत्र प्रतिभाविषये इदमवधातव्यं –

इन्द्रियादिनिरपेक्षमानसज्ञानविशेषः प्रतिभा। प्रशस्तपादाचार्यैस्तु आर्षज्ञानस्य प्रातिभत्वं स्वीकृतम्। तच्च कदाचित् लौकिकेऽपि सम्भवति। यदि श्व मे भ्राताऽऽगन्ता इत्यादि वाक्यं यथार्थं स्यात्। तथाहि – "**आम्नायविधातृणामृषीणाम् अतीतानागतवर्तमानेष्व-तीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेषु अनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तद् आर्षम् इत्याचक्षते। तत् तु प्रस्तारेण देवर्षीणाम्, कदाचित् एव लैकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति**"। प्रतिभा एव प्रातिभमिति न्यायकन्दलीकारैः भाषितम्। योगदर्शने महर्षिणा उक्तं – "**प्रातिभाद्वा सर्वम्**" इति। अस्य सूत्रस्य व्याख्यानावसरे प्रातिभं नाम तारकमिति व्यासाचार्यैः भाषितम्। अर्थात् योगीनां प्रतिभाजन्यज्ञानविशेष एव प्रातिभं भवति।

एवञ्च सुखादिप्रत्यक्षं ह्यात्मनो मनः करणकमेव स्वकीयसुखादौ प्रमाणान्तरासंम्भवादिति यदेव सुखप्रत्यक्षकरणं तदेव मनः इति। आदिपदाच्च दुःखादिकं ग्राह्यं भवति। एतत्सर्वं मनसि निधाय वैशेषिकाचार्यैः कणादैरुच्यते – "**आत्मेन्द्रियार्थसन्निकर्षज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्**" इति। अस्य सूत्रस्य व्याख्यानावसरे प्रशस्तपादाचार्यो वक्ति – "**सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादिनाम् अभुत्वोत्पत्तिदर्शनात् कारणान्तरमनुमीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाद्, बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम्**" इति। अर्थात् आत्मेन्द्रियार्थसान्निध्ये कारणे सत्यपि ज्ञानसुखादीनां अभूतत्वं कारणान्तरविरहादेव, अनन्तरं तेषामुत्पत्तिश्च कारणान्तरप्राप्त्या इत्यतस्तत्कारणमन्यासम्भवात् मन एव कल्प्यते। अन्यासम्भवस्तु अन्यस्मिन् समस्ते सत्यपि तदनुत्पत्तिदर्शनाद् बोध्य इति सूक्तिकारः। एतत्सर्वमभिलक्ष्य परवर्तिभिः आचार्यैः इर्थं प्रतिपादितं – साक्षात्कारे सुखादीनां करणं मन उच्यते तथाहि– "**सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वाच्चाक्षुष-साक्षात्कारवदित्यनुमानेन मनसः करणत्वसिद्धिः। एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या**" इति मुक्तावलीकारः। अत्रानुमाने सुखसाक्षात्कारः पक्षः, अत्र पक्षे सुखपदस्यानुपादाने साक्षात्कारमात्रस्य पक्षत्वस्वीकारे सामानाधिकण्येन साध्यसिद्धेरुद्देश्यत्वे चाक्षुषादिसाक्षात्कारे चक्षुरादिकरणकत्वसिद्ध्या सिद्धसाधनम्, अवच्छेदकावच्छेदेन

साध्यसिद्धेरुद्देश्यत्वे तु ईश्वरप्रत्यक्षे बाध इति तद्वारणाय पक्षे सुखपदोपादानम् । तथासति सामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यता, सुखसाक्षात्कारस्य जन्यसाक्षात्कारतया तत्र पूर्वोक्तबाधो नास्तीति। यतः कुत्रापि सुखसाक्षात्कारेऽनुमानात् प्राक् सकरणकत्व-स्यासम्भवात् न सिद्धसाधनम्।

निरुक्तसकरणकत्वं साध्यं करणजन्यत्वरूपम् । निरुक्तहेतौ जन्यत्वपदानुपादाने ईश्वरप्रत्यक्षेऽतिप्रसक्तिः, तद्वारणाय जन्यत्वम्, प्रागभावादौ अतिप्रसक्तिवारणाय साक्षात्कारेति पदमिति। जगदीशाचार्यैस्तु – "मनसि प्रमाणं यथा – सुखादिप्रत्यक्ष-मिन्द्रियजन्यं जन्यप्रत्यक्षत्वात् घटप्रत्यक्षवत् । तथा चेन्द्रियान्तरबाधे मनसः सिद्धिः" इत्युक्तम्।

**मनसः एकत्वसिद्धिप्रकारप्रदर्शनम्**

मनस एकत्वमनेकत्वं वेति जिज्ञासायां न्यायसूत्रकारः प्रवदति – "**ज्ञानायौगपद्यादेकं मनः**" - अर्थात् यदि प्रतिशरीरं बहुनि मनांसि स्युस्तदा तेषामनेकैरिन्द्रियैयुगपदपि संयोगसम्भवाद् युगपदनेकज्ञानानि उत्पद्येरन् न चोत्पद्यन्ते किंत्वेकस्मिन् क्षणे एकमेव ज्ञानमुत्पद्यते तस्मात् निश्चप्रचं वक्तुं शक्यते एकस्मिन् शरीरे एकमेव मन इति। पुनः पूर्वपक्षी वदति – ज्ञानायौगपद्याद् मनसः एकत्वं नैव सिद्ध्यति, यतः युगपदनेकक्रियोपलब्धिदर्शनात्। तथा च सूत्रम् – "**न – युगपदनेकक्रियोपलब्धेः**" इति । तथाहि यथा ज्ञानं मनो विना नैव सम्भवति तथा क्रियापि मनो विना नैव सम्भवति तत्र युगपदनेकाः क्रिया उपलभ्यन्ते इति तदुपपत्त्यर्थं मनसोऽनेकत्वं स्वीकार्यम्। सूत्राशयं स्पष्टयति भाष्यकारः - "**अयं खल्वाध्यापकोऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति श्रृणोत्यारण्यजान् शब्दान् बिभेति व्याललिङ्गानि बुभुत्सते स्मरति च गन्तव्यं स्थानीयमिति क्रमस्याऽग्रहणाद् युगपदेताः क्रिया इति प्राप्तं मनसो बहुत्वमिति**"।

ये खलु मनसो वहुत्वं साधयन्ति तन्मतनिराकरणाय सूत्रकारो वक्ति – "**अलातचक्रदर्शनवत् तदुपलब्धिराशुसंचारात्**" इति। अर्थात् उभयोरग्रयोरग्निविशिष्टो दण्डोऽलातमित्युच्यते। यथाऽलातचक्रस्याशुतरसञ्चारात् शीघ्रभ्रमेः युगपत् नैरन्तर्येण दर्शनं जायते तत्र क्रमस्य सत्त्वेऽप्याशुसंचारात् क्रमो न गृह्यते तथोक्तस्थलेऽपि मनस

आशुसञ्चारादेव क्रियाणां यौगपद्योपलब्धिर्भवति। वस्तुतस्तु न क्रियाणां यौगपद्यं येन मनो बहुत्वं सिद्ध्येत् किं तु क्रमेणैव शीघ्रतरं क्रिया भवन्तीति क्रमो न गृह्यते इति न मनसो बहुत्वापत्तिरिति। वैशेषिकसूत्रकारैऽपि उक्तं-"**प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्**" इति।

**प्रतिशरीरभेदेन मनसो भिन्नत्वसाधनम्**

उपर्युक्तयुक्तिमनुसृत्य कणादतर्कवागीशः प्रवदति – "मनश्च प्रतिशरीरं भिन्नम्" इति। अर्थात् शरीरभेदेन मनसोऽपि व्यक्तिभेदः कल्पनीय एव, अन्यथा सकलशरीरसाधारणस्य एकस्य मनसः स्वीकारे देवदत्तात्मवृत्तिज्ञानसुखादीनां यज्ञदत्तात्मना ग्रहणप्रसङ्गः, एकस्य सुषुप्तौ सकलज्ञानाद्यभावप्रसङ्गश्च स्याताम्। व्यक्तिभेदे च एकैकेन मनसा एकैकज्ञानसुखादिप्रत्यक्षस्य स्वीकारेण एकस्य मनसः पुरीतति प्रवेशेऽपि व्यक्त्यन्तरस्य अप्रवेशेन नानिष्टपत्तिरिति। यदि च मनो भिन्नमेवास्तु प्रतिशरीरम्, किन्तु प्रतिशरीरमपि तस्य अनेकत्वमास्तां तत्र किं बाधकमित्यपि न युक्तं, यतः प्रतिशरीरमस्यानेकत्वे अनेकैरेव मनोभिः अनेकेषां विषयाणां योगसम्भवात् युगपदनेकप्रयत्ना अनेकज्ञानानि च उत्पद्येरन्, एकस्य मनसः पुरीतति प्रवेशेऽपि अपरस्य नियमेनाप्रवेशात् सुषुप्तिदशायां ज्ञानाभावस्य सर्वसिद्धस्यापि अपलापप्रसङ्गाच्च मनसः प्रतिशरीरभेदेन भिन्नत्वं स्वीकार्यमिति।

**मनसि गुणाः**

वैशेषिकतन्त्रे नवमं द्रव्यं भवति मनः। तत्र मनसि संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्वसंस्कारभेदात् अष्टौ गुणाः विद्यन्ते। परत्वापरत्वे इत्यत्र दैशिकत्वं बोध्यं न तु कालिकं यतः मनसः नित्यत्वात्। संस्कारपदेन वेगाख्यसंस्कारः वोध्यः, यत् तस्य उत्तरक्रियाजनकत्वादिति।

**मनसोऽणुत्वसाधनम्**

मनसः किं परिमाणमिति जिज्ञासायां नैयायिकैः वैशेषिकैश्च मनसः परिमाणं अणु इति साध्यते। मनसः मध्यमपरिमाणवत्त्वे अनित्यत्वप्रसक्तिः। कुमारिलाभिमतविभुत्व-स्वीकारे एकदा सकलेन्द्रियसन्निकर्षे युगपदनेकज्ञानादिप्रसक्तिः। अतः मनसोऽणुत्वं स्वीकार्यम्। तथाचोक्तं वैशेषिकसूत्रकारेण "**तदभावादणु मनः**" इति। अत्र तत्पदेन

वैभवं परामृष्टं वैभवाभावादणु इति सूक्तिकारैः जगदीशैः प्रतिपादितम्। न्यायसूत्रकारैस्तु "**यथोक्तहेतुत्वाच्चाऽणु**" इति सूत्रितम्। अर्थात् ज्ञानायौगपद्यादेव मनः अणु, यदि मनोऽणु न स्यात्तदा एकस्यापि मनस एकस्मिन् क्षणेऽनेकैरिन्द्रियैः संयोगसंभवाद् युगपदनेकज्ञानान्युत्पद्येरन् न चोत्पद्यन्ते तस्मादणु मनः, एकस्याणोश्च मनसो युगपदनेकैरिन्द्रियैः संयोगसंभवादेव युगपदनेकज्ञानापत्तिर्नास्ति किन्तु ज्ञानानां क्रम उपपन्न एव। न्यायभाष्यकारोऽपि वक्ति – अणु मन एकं चेति धर्मसमुच्चयः ज्ञानायौगपद्यात्, महत्त्वे मनसः सर्वेन्द्रियसंयोगाद् युगपद् विषयग्रहणं स्यादिति। एतत्सर्वं मनसि निधाय विश्वनाथोऽपि वक्ति – "अयौगपद्याज्ज्ञानानां तस्याऽणुत्वमिहेष्यते" इति।

एवञ्च मनसो विभुत्वे व्यासङ्गलक्षणाऽन्यमनस्कता चञ्चलता च श्रुतिस्मृत्युदिना नोपपन्ना स्यात्। तथाच बृहदारण्यकोपनिषत् "**अन्यत्रमना अभुवं नादर्शमन्यत्रमना अभुवं नाश्रौषं मनसा ह्येव पश्यति**" इति। श्रीमद्भगवद् गीतापि – "**चञ्चलं हि मनः कृष्ण**" इति। अतः मनसोऽणुत्वं स्वीकार्यम्।

वस्तुतः मनसो विभुत्वस्वीकारे आत्ममनः संयोगस्याऽसमवायिकारणस्या-भावाज्ज्ञानानुत्पत्तिः प्रसङ्गः स्यात्। विभुद्वयसंयोगस्य नित्यत्वात् सुषुप्त्यभावप्रसक्तिः, यतः पुरीतद्व्यतिरिक्तप्रदेशे आत्ममनः संयोगस्य सर्वदा विद्यमानत्वात्। तस्य मनसोऽणुत्वस्वीकारे च यदा मनः पुरीतति नाड्यां प्रविशति, तदा सुषुप्तिः, यदा निःसरति तदा ज्ञानोत्पत्तिरिति तस्य अणुत्वसिद्धिः। एवञ्च मनसोऽणुत्वे दीर्घशष्कुलीभक्षणादौ नानावधानभाजां कथमेकदाऽनेकेन्द्रियजं ज्ञानं स्यादित्याशंकायामित्थं वक्तुं शक्यते मनसोऽतिलाघवात् झटिति नानेन्द्रियसम्बन्धात् नानाज्ञानोत्पत्तेर्निराबाधात्, तत्र युगपत्प्रत्ययस्य भ्रान्तित्वमिति।

**दीधितिकारमतोपस्थापनं निराकरणञ्च**

तत्र पदार्थतत्त्वनिरूपणे दीधितिकारैः मनसो भुतत्वं साधितम्। तथाहि – "**मनोऽपि चासमवेतं भूतम्। अदृष्टविशेषोपग्रहस्य नियामकत्वाच्च नातिप्रसङ्ग इत्यावयोः समानम्**" इति। अभिप्रायस्तु भौतिका एव परमाणवो मनांसि, अनन्तधर्मिणाम् अतिरिक्तायाश्च जातेः कल्पनापेक्षया क्लृप्तानामेव धर्मिणां तद्रुपेण हेतुत्वस्य युक्तत्वात्,

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

ज्ञानक्रमनियमस्तु अदृष्टादिबलादुपपद्यते इति। एतदपि न युक्तं यतः तेषां मनसां परमाणूनां पार्थिवत्वे जलीयत्वे वा विनिगमकाऽभावात् । उभयकल्पने तु जातिसांकर्यात्। एवञ्च मनसः पृथक् स्वीकारे च मानसप्रत्यक्षं प्रति मनसः कारणत्वात् कारणतावच्छेदकत्वं मनस्त्वे सिद्ध्यतीति मनसः भूतत्वं नाङ्गीकार्यमिति तु विभावनीयमित्यलम्।

❏ ❏ ❏

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# शिक्षाशास्त्रे नवीनाः विचाराः

**आचार्यः के. भरतभूषणः***

नवीनविचारस्य नूतनचिन्तनस्य च प्रादुर्भाव: तत्कालस्य (वर्तमाने) आवश्यकतां मनसि निधाय उच्चस्तरचिन्तनस्य प्रभावेण क्रियात्मकदृष्ट्या जायते लोकव्यवहारेण, प्रयोगेण च यत् अनुभूतम्, अवलोकितं वा तत्सर्वं नूतनमेव। अत्र प्राप्तस्य अथवा अर्जितपूर्वज्ञानस्याधारेण नूतनज्ञाने प्रवेश: यदा भवति तदा प्राप्तस्य अवशिष्टस्य ज्ञानस्य क्रियान्वयने कालभेदेन, रुचिभेदे, वैयक्तिकभेदेन च विभिन्नपरिणामेण समाजे प्राय: सर्वत्र विशिष्टं ज्ञानं जायते। तत् शिक्षाया: क्षेत्रेऽपि पूर्णत: अंशत: वा अनुभूयते।

महर्षिवेदव्यासेन समस्तरूपवेदानां नूतनतया चिन्तनेन ऋक्-यजुस्-सामाथर्वणमिति विभक्तम्। तदपि नूतनप्रयासेन। तदाधारेण अद्यापि वेदाध्यायिन: स्वीयशाखानुगुणं वेदाध्ययनेन वेदानां संरक्षणमपि कुर्वन्तस्सन्ति। क्रमश: वेदोक्तविषयाणां सामान्यजीवने प्रसारणदृष्ट्या दृष्टान्तेन कथाद्वारा प्रकृतीनां समायोजनेन प्रतिपाद्यते।

ज्ञानस्य संरक्षणमेव अस्माकं मुख्यं लक्ष्यमस्ति। वैदिककालादारभ्य अद्यपर्यन्तं ज्ञानस्य संरक्षणदृष्ट्या वेदकालानन्तरं श्रुतिस्मृतिपुराणादिकालस्य स्मरणं क्रियते। वेदोक्तविचाराणाम् आत्मसात्करणार्थं प्रत्यक्षानुभवाय श्रुति-स्मृति-उपनिषत्पुराणकाले कथारूपेण, लोकप्रियरूपेण, सरलतया, समाजे सर्वेषामुपकाराय प्रयत्न: विहित:। तदपि नावीण्यमिति गण्यते। क्रमश: शास्त्रकाले पुन: वेदोक्तविचारा: वेदवाक्यानामाधारेण शास्त्ररूपेण समाजे दार्शनिकदृष्ट्या प्रतिपादिता:। तत्काले तदपि नवीनमेव। यद्यपि चिन्तनम् एकस्योपरि आसीत् तदाऽपि स्वीयभावानां प्रकाशने नवीनत्वं दरीदृश्यते। यथा धर्मलक्षणस्य प्रतिपादनवेलायां विभिन्न-कालेन धर्मलक्षणं विदितम्। वेदेषु उपनिषत्सु सूचितेषु, स्मृतिग्रन्थेषु, संहितायां, ऋषीणां मते, पुराणेषु निर्दिष्टस्य एकस्य शब्दस्य धर्मशब्दस्य प्रतिपादनम् अवलोकयाम:। तत् सर्वं नावीन्यमेव। एवमेव परिवर्तमानजगति मानवाधिकारादिविषयद्वारा अधिकाशब्देन (कर्तव्यार्थे) चिन्तनमागतम्। तत्रापि ईश्वरस्य,

---

* शिक्षापीठस्य प्राक्तनप्रमुख:, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

आत्मनः, नैतिकबौद्धिकस्वास्थ्यस्य विषये, परिवारविषये, सामाजिकार्थम्, राज्यार्थम्, देशार्थम्, पर्यावरणार्थम्, आहत्य मानवानां तदा विश्वे विद्यमानेषु वस्तूनां, जन्तूनां विषये, वैश्विकदृष्ट्या कर्तव्यबोधनमपि नावीन्यं स्मारयति। मानवसम्बन्धे चिन्त्यते तदा मानवस्य कर्तव्यविषये सामाजिकव्यवस्थायाः, सत्यस्य, चरित्रस्य, स्वतन्त्रतायाः, पुनः व्यक्तिगतजीवनस्य सम्माने, विशिष्य शिक्षायाम् अधिकाराः सर्वे नूतनत्वं भजन्ते।

अस्माकं पूर्वजाः पर्यावरणविषये अतीव (जागरूकाः) अभिज्ञातापूर्णाः आसन्, अद्य सर्वकारपक्षतः पुनः सम्पूर्णे विश्वे ज्वाजल्यमानविषयमिव अनुभवामः। जलस्य तीर्थक्षेत्रमिव धार्मिकदृष्ट्या रक्षिताः वनस्य, वृक्षाणां वनस्पति, देवतारूपेण पूजिताः, पशूनां विषये आसक्ताः आसन् (सर्वे भद्राणि पश्यन्तु) तादृशभावना इदानीं बलात् (अनुष्टाने) आनेतव्यमिति नियमेन बद्धाः स्मः।

भारतीयज्ञानपरम्परायां ज्ञानस्य संरक्षणं प्रसारः विकासश्च अनुभवे दृश्यते। संरक्षणदृष्ट्या सैद्धान्तिकपक्षान् व्यावहारिकपक्षे जीवने च आचरिताः। अतः पक्षद्वयेऽपि (सैद्धान्तिकः व्यावहारिकश्च) प्रबलाः आसन्। उदा :- पाताञ्जलयोगसूत्राणां ज्ञानं व्यवहारे नित्यजीवने प्रयोगश्च कृताः। क्रमशः शास्त्राणामपि संरक्षणम् अभवत्। तत्राऽपि उदाहरणत्वेन महाभाष्ये प्रथमे आह्निके पञ्चमुख्यप्रयोजनत्वेन आदौ रक्षाशब्देन प्रयुक्तम्। विशेषरूपेण कथ्यते चेत् शास्त्राणामवबोधाय (प्रवेशाय) वृत्तिग्रन्थाः लिखिताः। वृत्तिसमवायार्थम् उपदेशः इति अत्र वृत्तिः शास्त्रे प्रवृत्तिः, समवायः इत्युक्ते वर्णानाम् आनुपूर्व्येण सन्निवेशः, लाघवेन शास्त्रे प्रवृत्तिः इति।

वेदेषु स्वरस्यैव प्राधान्यम्। वेदरक्षकत्वेन आश्रितेषु पद-क्रम-जटा-घनादिपाठेषु स्वरस्यैव प्राधान्यम्। वर्णोच्चारणस्पष्टतायै तत्तद्वर्णोत्पत्ति-स्थान-प्रयत्नादयो अपि प्रातिशाख्यग्रन्थेषु वर्ण्यन्ते। शब्दानां साधुत्व-असाधुत्वप्रतिपादनमेव सूत्राणां परमं प्रयोजनम्। स्वल्पाक्षरघटितैः सूत्रैः बहूनां शब्दानां प्रक्रिया प्रदर्शयितुं शक्यते। यथा इको यणचि इत्यादीनां सहस्राधिकानां लक्ष्याणां साधनं दृश्यते।

एवमेव सूत्रकाराणां प्राचीनत्वात् तदनन्तरकाले प्रयुक्तानां शब्दानां विषये तैः अन्वातुमशक्यत्वात् वार्तिकग्रन्थानामुद्भवो जातः। संयोगान्तस्य लोपः इति
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पाणिनिसूत्रानुसारं यकारस्य लोपे प्राप्ते यण: प्रतिषेधो वाच्य: इति वार्तिकेन स: निषिध्यते। तत्र यथोत्तरं मुनीनां प्रामाण्यम् इति वार्तिककारमतमेव प्रबलं भवति। कालक्रमेण सूत्रार्था: वार्तिकार्थश्च सुलभतया न ज्ञात: जनै: तदा भगवता पतञ्जलिना महाभाष्यं प्रणीतम्। सूत्रार्थो वर्ण्यते यत्र वाक्यै: सूत्रानुसारिभि: स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु: इति एवं सूत्रेष्वेव हि च तत् सर्वं, यद् वृत्तौ यश्च वार्तिके इति। पतञ्जलिना क्वचित् सूत्राण्यपि प्रत्याख्यानानि यथा न धातुलोप आर्धधातुके इति।

गच्छति काले सूत्र-वार्तिक-भाष्यग्रन्थै: यद्यपि शब्दानां प्रक्रिया प्रदर्श्यते तथापि सुलभतया प्रक्रिया ज्ञातुं न शक्या इति मत्या वृत्तिग्रन्थानाम् उत्पत्तिरभवत्। वेदविदा भट्टोजिदीक्षितेन कश्चन नूतन: पन्था: आश्रित: येन अल्पीयसा कालेन बहूनां प्रक्रिया सुलभा। लोके सर्वे सर्वेष्वपि विषयेषु लाघवमेव अपेक्षन्ते। वृत्तिग्रन्थेषु, तदर्थो न सुलभमासीत्। तदर्थमेव व्याख्यानग्रन्था: उत्पन्ना:। एवमेव वेदकालात् अद्यपर्यन्तं काल-देश-वर्तमानानुगुणं नावीण्यं दृश्यते। मुख्यत: सरलीकरणप्रयासेन सूत्रकालस्य अनन्तरं वार्तिककाल: क्रमश: भाष्यकाल: तत: वृत्तिग्रन्थानां तत: व्याख्यानकाल: आगत:। इत्थम् अवगन्तुं शक्यते नवीकरणं कालक्रमेण शास्त्ररक्षणे प्रसारण-वितरणदृष्ट्या उपयुक्तमिति। एवमेव शिक्षणशास्त्रेऽपि नावीण्यं कालानुगुणं परिणमितो भूत्वा ग्रन्थरूपेण विद्यमानविषयान् यन्त्रारोपितरूपेण अनुभवाम:। विशिष्य शिक्षणशास्त्रद्वारा अधिकप्रविधीनां प्रयोगेन ज्ञानस्य संरक्षणे, प्रसारणे वितरणे च उपयुज्यते।

शिक्षाशास्त्रे नावीन्येन अनुभवेन पश्यामश्चेत् मिश्रिताधिगम: (**BLENDED LEARNING)** प्रबलरूपेण व्यवहारे विद्यते। तत्रापि द्विप्रकारेण विभाज्यं शक्यते।

**१) साम्प्रदायिकम्,**

**२) आधुनिकमिति।**

साम्प्रदायिकविषयेष्वपि आदावेव सिद्धान्तप्रायोगिकपक्षा: विद्यन्ते। यथा कर्मकाण्ड:, वेदाध्ययनं, योगाभ्यास:, ज्योतिषादिविषयेषु अनुभूयते। इदानीं प्रविधीनामाधारेण ज्योतिषशास्त्रे विशिष्य फलितज्योतिषे प्रयोगे अनुभवाम:। एवमेव आधुनिकविषयेषु सैद्धान्तिकज्ञानप्रात्यनन्तरं प्रयोगशालायाम् एवं कार्यक्षेत्रे
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**(APPRENTICESHIP)** भविष्ये व्यवसायसम्बन्धितज्ञानप्राप्ति: **(FIELD WORK EXPERIENCE)** प्रचारे एवं व्यवहारे विद्यते। कोविद्-महामार्या: सन्दर्भे विश्वे सर्वे प्राय: प्रविध्याधारेण निरविच्छिन्नरूपेण कार्यक्षेत्रे एवं विद्यार्जने प्रवृत्ता: इति जानीम:। प्रविधिद्वारा कार्यसम्पादनस्य समय: आगत:।

यथा विश्वे विभिन्नेषु विषयेषु (प्राय: सर्वत्र)प्रविधीनां प्रयोग: आरब्धा:। गणितविज्ञानादिपाठानामपि पाठनं प्रयोगशालानां माध्यमेन सञ्चाल्यमानविषयाणां पाठनं डिजिटल् -लाब्-माध्यमेन (यन्त्रारोपितरूपेण) प्रयोगे अनुभवाम:। एवमेव शिक्षाशास्त्रेऽपि नवीनचिन्तनानां प्रादुर्भाव: सञ्जात:। विशेषेण **(BLENDED METHOD)** मिश्रिताधिगम: इदानीम् अतीवप्रबलरूपेण दृश्यते। मिश्रितशब्दस्य एवमपि अर्थं स्वीकर्तुं शक्यते। सैद्धान्तिकेन साकं प्रविधीनां प्रयोगमपि इदानीं विश्वविद्यालयानुदानायोगपक्षत: अपि कतिपय प्रतिशतपर्यन्तं स्वतोध्ययनाय प्रेरयन्ति। तदर्थं **SWAYAM PORTAL** इत्यादय: उपयुज्यमाना: दृश्यन्ते। एवमेव Hybrid Learning इति प्रसिद्धमस्ति। विशिष्य शिक्षाक्षेत्रे प्रबलरूपेण व्यवहारे अनुभूयते।

हैब्रिड् **(Hybrid)** अधिगमे निर्बाधिताधिगमाय **(SEAMLESS)** डिजिटल् तथा साम्प्रदायिकपद्धतीनाम् उपागमानां समन्वयेन **(ONLINE AND OFFLINE)** अधिगमप्राप्ति: विश्वे व्यवहारे विद्यते।

एवमेव **(COLLOBARATE LEARNING)** सहयोगाधिगम: अपि प्रचारे विद्यते। सहयोगाधिगमे छात्रा: अन्यस्मिन् अध्ययनक्षेत्रे अथवा विश्वविद्यालये परिवर्तनदृशा कार्यक्रमेषु भागग्रहणेन अधिगच्छन्ति। **(EXCHANGE PROGRAMME)** एवम् आवश्यकतनां पूर्त्यर्थं सततज्ञानार्थं क्षेत्राधारिताधिगमाय अवकाशप्राप्तिरपि सम्भवति।

पुन: रिक्तरूपेण अधिगमस्य पूर्तिरपि मातृभाषाद्वारा, इतर तथा वैदेशिकभाषाद्वारा एवं सम्भवति **(Bridging the gap by mother tongue, other language and foreign languages)**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

क्षेत्रीयभाषाणां द्वारा उच्चस्तरचिन्तनं, **(Higher Order Thinking)** सक्रियाचिन्तनं **(Creative thinking)** विवेचनम् **(Analysing)** आदि कौशलानां विकास: भवितुमर्हति। ये छात्रा: अन्यभाषायां नैपुण्यत्वं नास्तीति संकुचिता: सन्ति तेषां प्रोत्साहनेन स्वीयभाषाद्वारा अभिव्यक्तीकरणेन आत्माभिप्रेरणेन (स्वीय) उत्तमचिन्तनस्य, विचाराणां, स्वीयशक्तीनां, क्षमताया: अवबोधनेन सक्रियलेखने प्रवृत्ता: भविष्यन्ति।

अध्यापकप्रशिक्षणेऽपि प्रविधे आधारेण प्रशिक्षणेन भाविजीवने समाजे जायमानस्य अथवा आकांक्षाया: पूर्तिरपि भवितुमर्हति।

क्रमश: **E-Content** लेखनस्य समय: आगत:। छात्रसमाजे प्राय: छात्रा: सर्वे ग्रन्थरूपेणाध्यापनापेक्षया यन्त्ररूपेण अध्ययने रुचिपूर्णा: दृश्यन्ते। रुच्याधारेण अधिगमनप्रबोधनमपि सार्थकमिति मनोवैज्ञानिकाधारेण प्रयोक्तव्यम्। **DIGITAL** माध्यमेन अथवा यन्त्रारोपितरूपेण विषयस्य शिक्षणमपि आवश्यकम्।

एवमेव **(A.B.C) Academic Bank Credits** नीते: क्रियान्वयनं कर्तव्यम्। जाज्वल्यमानविषय: वर्तते यत् ए.बि.सि अवश्यमेव व्यावहारिकपक्षे आनेतव्यमिति। पूर्वाङ्गरूपेण निर्दिष्टप्रशिक्षणक्षेत्रे विद्यमाना: सर्वे ऐक्यमत्या पाठ्यक्रमाणां निर्माणे,व्यवस्थापने संलग्ना: भवन्ति चेत् **Academic Bank Credits** नीति: शिक्षासमूहे लाभप्रद: भवितुमर्हति। छात्रसमूहे विद्यमानानां मृदुकौशलानाम् अवगमने तेषाम् आत्मबलस्य, समस्यासमाधानक्षमताया: अवबोधने उपबोधनं परामर्शा: अवश्यमेव कर्तव्यमस्ति। एवमेव **Leadership in Teaching and Environmental needs. (LTEN)** अपेक्ष्यते अध्यापनवृत्तमध्ये नेतृत्वगुणानां संवर्धनेन पर्यावरणसम्बन्धज्ञानस्य उन्मेषणं तथा जीवने प्रयोगे आनयने उत्साहवर्धनमपि कर्तव्यस्य समय: आगत:। शिक्षाक्षेत्रे विद्यमानानाम् आवश्यकतानां पूर्त्यर्थं **DIGITAL** अधारभूतसंरचनाया: आवश्यकताम् अनुभवाम:। तेन **First Generation** समाजे ये प्रथमतया क्षेत्रे प्रशिक्षणाय प्रविशन्ति तेषां लाभाय भविष्यति। एकलसमूहेन साम्प्रादायिकरूपेण अथवा Online यन्त्रारोपितरूपेण वा भवितुमर्हति, तेन वृत्तिमध्ये स्वातन्त्र्येन कौशलेन च अध्यापका: अथवा अध्यापिका: सर्वदा सिद्धा: भवितुमर्हन्ति।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

## सन्दर्भग्रन्थसूची

1. **प्राचीनभारत की शिक्षा पद्धति**- डा. कृष्णकुमार, मयंक प्रकाशनम्, लखनऊ ।
2. **प्राचीनभारतीयमनोविद्या** - श्रीदीनेशचन्द्रशास्त्रिणः, कोलकता विश्वविद्यालयः, कलकत्ता,१९७२ ।
3. **अर्वाचीनं मनोविज्ञानम्** - श्रीमामराजदत्तकपिलः, सम्पूर्णानन्दग्रन्थमाला, वाराणसी - १८८६ ।
4. **Educational Technology** - NeelKamal Publications Pvt. Ltd., Hyderabad.
5. **Advanced Educational Psychology** - Dr. Sitaram Jayaswal; Vinod Pustak Mandir, Agra, 2004.

❑ ❑ ❑

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे

**प्रो. प्रभाकरप्रसादः***

**गोकर्णाख्ये शिवक्षेत्रे धूर्जटेर्नित्यसन्निधौ ।**
**स्थितमारामविघ्नेशं सिद्धिदं प्रणमाम्यहम् ॥**

वेदप्रामाण्याभ्युपगमानभ्युपगमभेदेन द्वेधा विभक्तानि भारतीयदर्शनानीति प्रसिद्धानि। तत्र वेदप्रामाण्यमभ्युपगम्य प्रवृत्तानां न्यायवैशेषिकसाङ्ख्ययोगपूर्व-मीमांसोत्तरमीमांसादर्शनानां मध्येऽपि प्रपञ्चस्य सृष्टिविषये अर्थात् तत्स्वरूपविषये, प्रक्रियाविषये च नैकमत्यं दृश्यत इति विदितमेव। तत्र को हेतुः इति विमर्शे प्रमाणानां प्रामाण्यस्य स्वीकारे यो मतभेदः प्रसिद्धः तस्यापि हेतुत्वमस्तीति तन्मूलकः सृष्टिविवेचने कथं मतभेदः सञ्जातः इति लेखेनानेन प्रतिपादनाय यत्नो विधीयते।

षड्वैदिकदर्शनानां तन्त्रत्रये विभागः प्रसिद्ध एव। न्यायवैशेषिकयोः एकं तन्त्रत्वम्। साङ्ख्ययोगयोः एकं तन्त्रत्वम्। पूर्वोत्तरमीमांसयोरेकं तन्त्रत्वमिति त्रेधा विभागः। न्यायवैशेषिकदर्शनेऽसत्कार्यवादेन प्रवृत्ते। साङ्ख्ययोगदर्शने सत्कार्यवादे प्रवृत्ते। पूर्वोत्तरमीमांसे च वेदवाक्यविमर्शमुखेनैव प्रवृत्ते। तत्र न्यायवैशेषिकदर्शनयोः प्रवृत्तिः उद्देशलक्षणपरीक्षामुखेन भवति। नामसङ्कीर्यनमुद्देशः, आदौ न्यायदर्शने प्रमाणादयः षोडशपदार्थाः सन्तीति तेषां नामानि कथितानि। तदनन्तरं तेषामुद्दिष्टानां लक्षणानि कृतानि, तदनु तेषां परीक्षा कृता विस्तरेण। तत्र प्रथमाध्याये न्यायदर्शने पदार्थानामुद्देशलक्षणे समाप्ते। तदनु चतुर्थिरध्यायैः तेषां परीक्षा विधीयते। अतः इदं परीक्षाप्रधानं शास्त्रम्, प्रमाणानां प्रामाण्यं स्वतः इत्यङ्गीकारे परीक्षाया आवश्यकतैव नास्तीति, प्रमाणानां प्रामाण्यं परतः इत्यत्र स्वीक्रियते। तत्र यावज्ज्ञानग्राहक-सामग्रीग्राह्यत्वं स्वतस्त्वम्, यावज्ज्ञानग्राहकसामग्रतिरिक्तग्राह्यत्वं परतस्त्वम्। एतज्ज्ञप्तिगतं स्वतस्त्वम्, परतस्त्वम्। उत्पत्तिगतं स्वतस्त्वञ्च ज्ञानसामग्रीमात्रजन्यत्वम्। ज्ञानासामान्यकारणभिन्नकारणजन्यत्वम् उत्पत्तिगतं परतस्त्वम्। अयमाशयः – प्रामाण्यं

---

* अध्यक्षः, सर्वदर्शनविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

नाम याथार्थ्यम्, इदं ज्ञानं प्रमेति ज्ञानस्य याथार्थ्यं ज्ञानस्य ग्रहणं येन भवति तेनैव ज्ञायते, ज्ञानस्य कारणसामग्र्या एव प्रमात्वमपि उत्पद्यत इति स्वतःप्रामाण्यवादिनां मतम्। स्वतःप्रामाण्यवादिनः सर्वे मीमांसकाः। मीमांसकानां मतेऽपि प्रस्थानभेदेन मतत्रयं दृश्यते। भाट्टप्रस्थाने ज्ञानमतीन्द्रियं प्रत्यक्षं न भवति, ज्ञानेन विषये कश्चन अतिशयः प्राकट्याख्यः उत्पद्यते। ज्ञातता प्राकट्यमिति पर्यायशब्दौ। यथा घटे ज्ञाते घटः ज्ञातः इति व्यवह्रियते। तेन घटे ज्ञातता उत्पन्नेति निश्चीयते। ज्ञाततया ज्ञानमनुमीयते। अथवा ज्ञाततया अन्यथानुपपत्त्या ज्ञानं कल्प्यते। येनानुमानेनार्थापत्तिप्रमाणेन वा ज्ञानं गृह्यते तेनैव तत् प्रमात्मकं यथार्थमिति च गृह्यते। प्राभाकरप्रस्थाने ज्ञानं स्वप्रकाशम्, ज्ञानकाले ज्ञानस्य विषयस्याश्रयस्य च प्रत्यक्षं भवति, अतः प्राभाकराः त्रिपुटीप्रत्यक्षवादिनः इति प्रसिद्धिः। तत्र सर्वं ज्ञानं यथार्थमिति स्वीकारात् ज्ञानप्रत्यक्षकाले ज्ञाननिष्ठं प्रामाण्यमपि प्रत्यक्षं भवति। अतः प्रामाण्यस्य ज्ञानग्रहणेनैव गृहीतत्वात् प्रामाण्यं स्वतः गृह्यते इति सिद्धम्। अतः प्राभाकरमते 'अयं घटः' इति व्यवसायज्ञानम्, 'अहं घटज्ञानवान्' इति अनुव्यवसायज्ञानमिति भेदो नास्ति, सर्वमेव ज्ञानम् 'घटज्ञानवानहम्' 'पटज्ञानवानहम्' इति आश्रयविषयविषयकमेव भवति। तृतीये मुरारिमिश्रप्रस्थाने प्रथमम् 'अयं घटः' इति घटज्ञानम्, तदनु घटज्ञानवानहमित्यनुव्यवसायज्ञानमिति ज्ञानद्वयं स्वीक्रियते। तत्र द्वितीयेन अनुव्यवसायज्ञानेन प्रथमं व्यवसायज्ञानं साक्षात्क्रियते, व्यवसायज्ञानसाक्षात्कारे तज्ज्ञाननिष्ठं प्रामाण्यमपि गृह्यते। अतः प्रामाण्यं स्वतो ज्ञायत इति मतमुपपद्यते। भाट्टमते मुरारिमिश्रमते च भ्रमज्ञानानामपि यावद् बाधं तावत्प्रामाण्यं स्वीकार्यमेव। उक्तञ्च भट्टाचार्यैः-

**तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।**
**अर्थान्यतात्वहेतूत्थदोषज्ञानैरपोद्यते॥** इति

प्रमाणानां प्रामाण्यं स्वतः, अतः तस्य प्रामाण्यनिश्चयार्थं प्रामाणान्तरं नापेक्षते इति सर्वैरपि मीमांसकैः पूर्वमीमांसकैः वेदान्तिभिश्च स्वीकारात् वेदस्य प्रामाण्यं निर्विचिकित्सं सिद्ध्यतीति वेदे या सृष्टिप्रक्रियोक्ता सा तथैव मीमांसकैः स्वीक्रियते। वेदे

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

च 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' इति क्रमेण सृष्टिः श्रूयते। अनेनैव क्रमेणैव सृष्टिः वेदान्तिभिः स्वीक्रियते। यद्यपि पूर्वमीमांसकैः 'वेदा हि यज्ञार्थमिह प्रवृत्ताः' इति स्वीकारात् 'यजेत स्वर्गकामः' 'अग्निहोत्रं जुहुयात्' 'हिरण्यमात्रेयाय ददाति' इति यागहोमदानादीनां धर्माणां बोधन एव वेदस्य तात्पर्यं स्वीक्रियते तथापि।

**इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदाह युक्त्या।**
**दृढत्वमेतद्विषयप्रबोधः प्रयाति वेदान्तनिषेवणेन॥**

इति श्रीकुमारिलभट्टाचार्यैरुक्तदिशा वेदान्तदर्शने स्वीकृतैव सृष्टिप्रक्रिया, आत्मस्वरूपमपि वेदान्ते यथा निरूपितन्तथैव सर्वं स्वीकार्यमिति मीमांसकानामाकूतिः। यद्यपि च श्रीशङ्करभगवत्पादानुयायिभिः अद्वैतिभिः **'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः। अनेन वेद्यं सच्छास्त्रमिति वेदान्तडिण्डिमः॥'** इति [ब्रह्मज्ञानावलीमाला, २०] स्वीक्रियते तथापि सृष्टिप्रक्रिया तु पूर्वोक्तैव स्वीक्रियते, अतः ब्रह्ममीमांसादर्शने द्वितीयाध्याये तृतीयपादे आकाशस्यानुत्पत्तिमाशङ्क्य आकाशस्यापि ब्रह्मणः उत्पत्तिरस्तीति समाहितम्। आकाशाद् वायुः, वायोरग्निः इत्यादिना पूर्वोक्त एव क्रमः स्वीकृतः। सृष्टिप्रक्रिया या वेदे श्रूयते तस्याः निरूपणे वेदस्य तात्पर्यं नास्ति परमं तात्पर्यं तु 'एकमेवाद्वितीयम्' इत्युक्तस्याद्वितीयब्रह्मणः निरूपणे इति तु अन्या वार्ता। सृष्टिकारणत्वेनादौ ब्रह्म न निरूप्यते चेत् जगतः कर्ता अन्यः ब्रह्मणः इति निरूपितं स्यात्। यदस्य प्रपञ्चस्य कारणं ब्रह्म तत्रैवायं प्रपञ्चो नास्तीति निरूप्यते चेत् तदैव प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं सिद्ध्यति इत्येवाद्वितिनामाशयः। अन्यैरपि वेदान्तिभिः द्वैतिभिः विशिष्टादिभिश्च ब्रह्मणः आकाशादीनामुत्पत्तिः स्वीक्रियत एव।

**अचिन्त्याः खलु ये भावा न ताँस्तर्केण योजयेत्।**
**प्रकृतेभ्योऽतिरिक्तं यत्तदचिन्त्यस्य लक्षणम्॥**

इति सर्वैरपि स्वतःप्रामाण्यवादिभिः सृष्टिकारणविचारः वेदैकवेद्य इति स्वीक्रियते। न्यायदर्शनन्तु परीक्षाप्रधानं शास्त्रम्, अतः प्रमाणानां प्रामाण्यं स्वतः इत्यङ्गीकारे परीक्षायाः प्रसक्तिरेव नास्ति, अतः तत्र प्रामाण्यं परत इत्यङ्गीक्रियते। आदौ अयं घट
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इति व्यवसायज्ञानं भवति, तदनन्तरं 'घटज्ञानवानहम्' इत्यनुव्यवसायेन तस्य ग्रहणम् भवति, परन्तु अनुव्यवसायज्ञानेन व्यवसायज्ञानं प्रमात्मकमिति न निश्चीयते। किन्तु इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा ज्ञाननिष्ठं प्रामाण्यमनुमेयमिति स्वीक्रियते। अतः सत्कारणमपि किमित्यनुमानेनैव विचार्यते। तत्र लोके अल्पपरिमाणकद्रव्यद्वयसंयोगात् द्रव्याणां संयोगाद्वा यत् परिमाणकं द्रव्यमुत्पद्यते इति कपालद्वयमेलनेन घटोत्पत्तेः तन्तूनां मेलनेन पटोत्पत्तेः दर्शनात् कार्यद्रव्यं सर्वं त्रिभिः त्रिविधैः कारणैरुत्पद्यते इति निश्चीयते। समवायिकारणम्, असमवायिकारणम्, निमित्तकारणमिति त्रिविधानि कारणानि। तत्र घटस्य कपालद्वयं समवायिकारणम्, कपालद्वयसंयोगः असमवायिकारणम्, दण्डादिकं निमित्तकारणम्। पटस्य तन्तवः समवायिकारणानि, तन्तुसंयोगः असमवायिकारणम्, तुरीवेमादिकं निमित्तकारणमिति। एवञ्च सूक्ष्मात् स्थूलस्योत्पत्तिः स्वीक्रियते। आकाशस्य स्थूलस्य दिग्द्रव्यस्य आत्मनः मनसश्च परमाणूनाञ्च नित्यत्वमेव, एतेषामुत्पत्तिविनाशयोरुहितुमप्यशक्यत्वात्। 'न ह्याम्नायोऽपि घटं पटयितुमीशते' इति न्यायेन वेदोऽपि दृष्टन्यायविरुद्धं किमपि न प्रतिपादयति। यदपि तथा प्रतिपादयदिव श्रुतिवाक्यं श्रूयते तदपि गौण्या वृत्त्या व्याख्येयम्। जगत्कारणमपि अनेन प्रकारेण कार्यत्वहेतुनानुमेयम्- 'क्षित्यादिकं कर्तृजन्यं कार्यत्वाद् घटवदिति' तत्र क्षित्यादीनां कर्तृत्वस्यास्मदादिषु बाधात् तत्कर्तृत्वेनेश्वरः सिद्ध्यति, ईश्वरोक्ततया च वेदस्य प्रामाण्यं सिद्ध्यति। अतः परतः प्रामाण्यवादिनां न्यायवैशेषिकाणां राजमार्गः।

साङ्ख्यानां विषये प्रामाण्याप्रामाण्ययोः स्वतस्त्वं ते स्वीकुर्वन्तीति पूर्वोत्तरमीमांसाग्रन्थेषु निरूपितं दृश्यते। पदवाक्यप्रमाणप्रमेयभेदेन विद्यायाश्चातुर्विध्यं वैदिकवाङ्मये प्रसिद्धम्। तत्र पदशास्त्रं व्याकरणशास्त्रम्, वाक्यशास्त्रं पूर्वमीमांसाशास्त्रम्, प्रमाणशास्त्रं न्यायशास्त्रम्, प्रमेयशास्त्रं साङ्ख्ययोगवेदान्तशास्त्रम्, यद्यपि वेदान्तशास्त्र वेदान्तवाक्यानां विवेचनमुखेनैव ब्रह्मतत्त्वं प्रतिपादयतीति वाक्यशास्त्रमिति पूर्वमुक्तम् **'वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्'** [ब्र.शा.भा. १.१.२] इति शाङ्करभाष्यमाश्रित्योक्तं तत्। तथापि **'न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किन्तु**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**श्रुत्यादयोऽनुभवादयश्च यथा सम्भवमिह प्रमाणम् अनुभवासानत्वात् भूतवस्तुविषयत्वाञ्च ब्रह्मज्ञानस्य'** इत्युक्तेः शाङ्करभाष्यस्य [ब्र.शा.भा. १.१.२] कर्मशास्त्रं पूर्वमीमांसाशास्त्रं पूर्णतः वाक्यशास्त्रमेव प्रमेयस्य धर्मस्य कदाप्यप्रत्यक्षत्वात्। वेदान्तशास्त्रन्तु वेदान्तवाक्यविमर्शमुखेन ब्रह्मतत्त्वस्य साक्षात्कारस्य साधकमतः प्रमेयशास्त्रमिति वक्तुं शक्यते। साङ्ख्यशास्त्रस्य प्रमेयशास्त्रत्वात्तत्र प्रमाणानां प्रामाण्यं स्वतः परतो वेति विस्तरेण विचारः कृतो न दृश्यते। **'न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते'** [श्लोकवार्त्तिकम्, प्रामाण्यधिकारः, १.१.५] इति युक्त्या सत्कार्यवादस्य स्वीकारात् प्रामाण्याप्रामाण्ययोः स्वतस्त्वमिति तन्मतं पूर्वोत्तरमीमांसाग्रन्थेषु ब्रह्मसूत्रविवरणे श्लोकवार्त्तिकेऽन्यत्र च निरूपितम्। तथापि साङ्ख्या आनुमानिका एव। अनुमानेन प्रपञ्चसृष्टिकारणं किम्? सृष्टिक्रमश्च इति विवेचनेन यन्निश्चितम्, तदनुसारेण श्रुतिवाक्यं योजयन्ति साङ्ख्याः। कार्यमुत्पत्तेः पूर्वमपि कारणे विद्यते एवेति तिलेभ्यः तैलोत्पत्तेः, दुग्धाद् दध्युपलब्धेः निश्चीयते। तत्र उपादानकारणे कार्यस्य स्थितिः अव्यक्तावस्था, ततः कार्यरूपेण व्यक्तं भवति। अतः एकं प्रधानमव्यक्तं तत्त्वं व्यक्तरूपेण परिणतं सत् क्रमशः महदादिसंज्ञकं भवति। अव्यक्तस्य परिणतिः कूटस्थस्य कस्यचिद् अधिष्ठान एव भवतीति अयस्कान्तमणेः सन्निधाने एव लोहकणेषु भ्रमणादिप्रवृत्तिदर्शनात् कूटस्थतत्त्वं पुरुषतत्त्वमेकं स्वीक्रियते। एवञ्चैकमपरिणामितत्त्वं कूटस्थतत्त्वं पुरुषतत्त्वमपरं परिणामितत्त्वं प्रकृतितत्त्वमिति तत्त्वाभ्यां सृष्टि प्रवर्तते। सत्कार्यवादे उपादानकारणम्, निमित्तकारणमिति कारणद्वयेनैव कार्यरूपेण व्यक्तं घटपटादिकं भवतीति स्वीकारात् आरम्भवादस्यानपेक्षितत्वात् तृतीयमसमवायिकारणं नाम कारणं नापेक्षते। अद्वैतमतादयं विशेषः अद्वैतिनां मते तु सृष्टिजातस्य सर्वस्य मिथ्यात्वात् एकस्यैव तत्त्वस्य सर्वं विवर्तजातम्, विवर्तस्य मिथ्याभूतमज्ञानमेव निमित्तम्, साङ्ख्यमते सर्वं परमार्थमेव अतः परमार्थप्रपञ्चस्य परमार्थभूतप्रधानमेवोपादानम्। कूटस्थं पुरुषतत्त्वमधिष्ठानरूपेण निमित्तम्। अतः साङ्ख्याः पूर्णतः द्वैतिनः। पुरुषतत्त्वस्य ज्ञानरूपत्वाङ्गीकारे जगदान्ध्यप्रसङ्गः अतः ज्ञानरूपं प्रकाशकं पुरुषतत्त्वं स्वाधिष्ठानमात्रेण प्रवर्तयति। एतत् सर्वं साङ्ख्यैरनुमानेन साधितम्, तदनुगुणेन श्रुतिवाक्यानां योजनं कुर्वन्ति। लोके च पुरुषः घटस्य निर्माणात्
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पूर्वं घटं बुद्धौ आकलय्य मया घटस्य निर्माणं कार्यमिति अहङ्कारेण घटस्य निर्माणं करोति इति दर्शनात् तथैव सृष्टिक्रम आश्रितः साङ्ख्यैः। प्रधानादव्यक्तापरनाम्नः बुद्धिः महच्छब्दवाच्या उत्पद्य ततः अहङ्कारः, ततः एकादशेन्द्रियाणि, पञ्चतन्मात्रा च, पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि उत्पद्यन्ते। अत्र न्यायदर्शनाद् विपरीतं यदस्ति तत् स्थूलात् व्यापकाद् अव्यापकस्य सूक्ष्मस्योत्पत्तिरिति। तदित्थं स्वतःप्रामाण्यवादः परतःप्रामाण्यवाद इति प्रामाण्यस्वरूपभेदेन वैदिकदर्शनेषु सृष्टिप्रक्रियाविषये सृष्टिस्वरूपविषये मतभेदोऽस्तीति लेशेनात्र प्रतिपादितम्।

**इत्थं प्रामाण्यमाश्रित्य वाक्पुष्पैरर्चितो हरिः।**
**प्रमाणरूपी भगवान् कारणं प्रीयता महत्॥**

❑ ❑ ❑
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**
महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः

प्रो. प्रेम कुमार शर्मा*

**ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम्।।**

ऋग्वेदस्य प्रथममन्त्रेणैव स्पष्टमिदं यद् वेदानां प्रवृत्तिः यज्ञकर्मप्रवृत्त्यर्थं जाता। यज्ञाश्च कालसापेक्षाः प्रवर्तन्ते। अत एव यज्ञानां यथाकालं सम्पादनार्थं कालविधानशास्त्रस्य वेदाङ्गभूतस्य वैदिकज्योतिषशास्त्रस्य विकासः सञ्जातः। वेदाङ्गज्योतिषमस्यैव पुष्टिं विदधाति –

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः ।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥**

वैदिक वाङ्मये 'अग्निसोमात्मकं जगत्' इत्युद्भावनया ब्रह्मणा सूर्यचन्द्रमसोः कल्पनानन्तरं द्युलोकभूर्लोकान्तरिक्षलोकादिसप्तभुवनानां सृष्टिं विधाय रात्र्यनन्तर-मुषसस्तदुपरान्तञ्च कालस्य विभिन्नावयवानां दिनतिथिमासनक्षत्रर्त्वयनवर्षयुगादीनां राशिग्रहग्रहकक्षादीनां कल्पना यथा कृता तदत्रशोधपत्रे वैज्ञानिकदृशा विविच्यते।

ऋग्वेदस्याघमर्षणसूक्ते सृष्ट्युत्पत्तेः क्रम इत्थं प्रतिपादितः –

**ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।**
**ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ 1 ॥**
**समुद्रादर्णवादधिसंवत्सरो अजायत।**
**अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ 2 ॥**
**सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।**
**दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥ 3 ॥**

पुरुषसूक्ते विराटस्वरूपपुरुषस्य नाभिप्रदेशेऽन्तरिक्षस्य, ऊर्ध्वभागे द्युलोकस्य, अधोभागे च भूर्लोकस्य कल्पना कृता –

---

* आचार्यः, ज्योतिषविभागः, श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**नाभ्यां आसीदन्तरिक्ष ँ॒ शीर्ष्णो द्यौः समवर्तत् ।**

**पद्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।।**

तैत्तिरीयोपनिषदि ब्रह्मवल्ल्याः प्रथमखण्डे सुव्यवस्थितरूपेण सृष्ट्युत्पत्तेः क्रमः प्रदर्शितः –

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः ।**

**अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् ।**

**अन्नात् पुरुषः ॥**

ऋग्वेदे सूर्यस्य प्रभावेण विश्वस्मिन्नपि विश्वे उषसः प्रकाशः प्रतिपादितः

**एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः ।**

**एकैवोषा सर्वमिदं विभाति...................... ॥**

ऋग्वेदे पृथिव्यां सूर्यस्य स्थितिवशात् चमत्कृद्रूपेण दिनरात्र्योराविर्भावः कथितः–

**आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।**

**प्रबाहू अस्राक् सविता सवीमनि निवेशयन् प्रसुवन्नक्तुभिर्जगत् ॥**

ऋक्संहितायां वासरस्योल्लेखः प्राप्यते –

**आदिप्रत्नस्य रेतसो ज्योतिष्पष्यन्ति वासरम् । परो यदिध्यते दिवा ॥**

ऐतरेयब्राह्मणे चन्द्रस्यास्तंगतादुदयाच्च तिथेर्गणना प्रचलितासीत् –

**यां पर्यस्तमियादभ्युदियादिति सा तिथिः ॥**

तैत्तिरीयब्राह्मणे चन्द्रस्य पञ्चदिवसपर्यन्तं ह्रासत्वात् तावद् दिन पर्यन्तञ्च वृद्धिङ्गतत्वात् तस्य पञ्चदश संज्ञा कृता –

**चन्द्रमा वै पञ्चदशः ॥ एष हि पञ्चदश्यामपक्षीयते ॥ पञ्चदश्यामापूर्यते ॥**

अनेन यदा चन्द्रः पञ्चदशदिवसपर्यन्तमपक्षीयते तदा कृष्णपक्षस्य यदा चापूर्यते तदा शुक्लपक्षस्य पुष्टिर्भवति । तैत्तिरीय ब्राह्मणे पूर्वापर्वयोः शुक्लकृष्णपक्षयोर्नामान्यपि कृतानि, तत्रैव पूर्वपक्षस्य शुक्लपक्षस्य पञ्चदशाह्नां नामानीमानि सन्ति –
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् ।**

**संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तम् ।**

**श्रेयोवसीय आयत् सम्भूतं भूतम् ॥**

पूर्वपक्षस्य शुक्लपक्षस्य च पञ्चदशरात्रीणां नामानीमानि सन्ति–

**दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना ।**

**अप्यायमाना प्याप्यमाना प्याया सुनृतेतरा ।**

**आपूर्यमाणा पूर्यमाणा पूरयन्ति पूर्णा पौर्णमासी ॥**

अपरपक्षस्य कृष्णपक्षस्य पञ्चदशाह्नां नामानीमानि सन्ति –

**प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपम् ।**

**शुक्रममृतं तेजस्वि तेजः समृद्धम् ।**

**अरुणं भानुमन् मरीचिमदभितपत् तपस्वत् ॥**

अपरपक्षस्य कृष्णपक्षस्य पञ्चदशरात्रीणां नामानीमानि सन्ति –

**सुता सुन्वती प्रसुता सूयमानाऽभिषूयमाणा ।**

**पीति प्रपा सम्पा तृप्तिस्तर्पयन्ती ।**

**कान्ता काम्या कामजाताऽऽयुष्मती कामदुधा ॥**

अनेन प्रकारेण तैतिरीयब्राह्मणे कृष्णपक्षस्यान्तिमरात्र्या अमावस्यायाः कामदुधा संज्ञा शुक्लपक्षस्य चान्तिमरात्र्याः पौर्णमास्येव प्राप्यते। तैत्तिरीयब्राह्मण एव प्रतिपादितं यत् पूर्वशुक्लपक्षे देवा अपरपक्षे चासुरा अभवन्–

**पूर्वपक्षं देवान्वसृज्यन्त । अपरपक्षमन्वसुराः ।**

**ततो देवा अभवन् । परासुराः ॥**

अनेन स्पष्टं यत् शुक्लपक्षे जातानां सत्त्वगुणाधिक्यं कृष्णपक्षे जातानाञ्च तमोगुणाधिक्यं भवति।

ऋग्वेदे निम्नमन्त्रे मासाधिमासयोश्चर्चा प्राप्यते –

**वेद मासो धृतव्रतो द्वादश प्रजावतः । वेदा य उपजायते ॥**

ऐतरेयब्राह्मणे त्रयोदशो मासो निन्द्यः कथितः –

तं त्रयोदशान्मासादक्रीणस्तस्मात् त्रयोदशमासो नानुविद्यते।

तैत्तिरीयब्राह्मणे त्रयोदशमासाधिमासविषये कथितम् –

**द्वादशारत्नी रशना कर्तव्या ३ त्रयोदशारत्नी ३ रिति ॥**
**ऋषभो वा एष ऋतूनां ॥**
**यत्संवत्सरः॥ तस्य त्रयोदशो मासो विष्टपं ॥ ऋषभ एष यज्ञानां ॥ यदश्वमेधः॥**
**यथा वा ऋषभस्य विष्टपं ॥ एवमेतस्य विष्टपं ॥**

अनेन स्पष्टं यत् तैत्तिरीयब्राह्मणे संवत्सरः ऋतूनामृषभः त्रयोदशो मासोऽधिमासश्च तस्य पुच्छभागः कथितः।

तैत्तिरीयसंहितायां द्वादशमासानां नामानि मधु-माधव-शुक्र-शुचि-नभस्-नभस्य-इष-ऊर्ज-सहस-सहस्य-तपस्-तपस्यसंज्ञकानि सन्ति। अधिमासस्य संसर्पसंज्ञा क्षयमासस्य चाहंस्पतिसंज्ञा कृता –

**मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च।**
**सहस्यश्च तपश्च तपस्यश्चोपयाममगृहीतोऽसि संसर्पोस्यँहस्पत्याय ॥**

ऋक्संहितायां चन्द्रमार्गे स्थितानां नक्षत्राणामुल्लेखः प्राप्यते –

**अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥**

तैत्तिरीयसंहितायां निम्नानुवाके चन्द्रमार्गस्थिनक्षत्राणां देवतासहितनामानि प्राप्नुवन्ति –

**कृत्तिका नक्षत्रमग्निर्देवताग्नेरुचस्थ प्रजापतेर्धातुः सोमस्यर्चे त्वारुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षे नक्षत्रं सोमो देवतार्द्रानक्षत्रं रुद्रो देवता पुनर्वसूनक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवता श्रेषा नक्षत्रं सर्पा देवता मघानक्षत्रं पितरो देवता फल्गुनीनक्षत्रं भगो देवता फल्गुनी नक्षत्रमर्यमा देवता हस्तो नक्षत्रं सविता देवता चित्रानक्षमिन्द्रो देवता स्वातीनक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवतानूराधा नक्षत्रं मित्रो देवता ज्येष्ठानक्षमिन्द्रो देवता विचृत्तौ नक्षत्रं पितरो देवताषाढ़ानक्षमापो देवताषाढ़ा नक्षत्रं विश्वेदेवादेवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं**

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

**वसवो देवता शतभिषङ्क्षत्रमिन्द्रो देवता प्रोष्ठपदानक्षत्रमज एकपाद् देवता प्रोष्ठपदानक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्रमश्विनौ देवता भरणी नक्षत्रं यमो देवता..... ॥**

अनेन प्रकारेण तैत्तिरीयसंहितायां चन्द्रमार्गस्थितनक्षत्राणां कृत्तिकादिक्रमेण देवता सहितनामान्युल्लिखितानि। यत्र-तत्र वर्तमानप्रचलितनक्षत्रनाम्ना वैभिन्यमस्ति। यथा हि तत्र पुष्यनक्षत्रस्य तिष्यसंज्ञा, आश्लेषानक्षत्रस्य श्लेषासंज्ञा, पूर्वोत्तरफाल्गुन्योः फल्गुनी संज्ञा, मूलनक्षत्रस्य विचृत्तौसंज्ञा, पूर्वोत्तरषाढ़योराषाढ़संज्ञा, श्रवणनक्षत्रस्य श्रोणासंज्ञा, धनिष्ठानक्षत्रस्य श्रविष्ठासंज्ञा, पूर्वोत्तरभाद्रपदानक्षयोश्च प्रोष्ठपदासंज्ञा कृता। याश्च ताः संज्ञाः पश्चाद्वर्तीज्योतिषशास्त्रस्य मुहूर्त्तशास्त्रस्य च ग्रन्थेषु एषां नक्षत्राणां पर्यायवाचीत्वेन गृहीताः। अथर्वसंहितायाः निम्नसूक्ते चन्द्रमार्गस्थितसाभिजिदष्टाविंशति-नक्षत्राणामुल्लेखोऽस्ति –

**चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।**
**अष्टाविंशं सुमतिमिच्छमानो अहानि गोभिः सपर्यामि नाकम् ॥1॥**
**सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा ।**
**पुनर्वसू सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे ॥2॥**
**पुष्यं पूर्वाफल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वातिः सुखो मे अस्तु ।**
**राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्टं मूलम् ॥3॥**
**अन्नं पूर्वा रास्तां मे अषाढा ऊर्ज ये ह्युत्तर आ वहन्तु ।**
**अभिजिन्मे रास्तां पुण्यमेवश्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम् ॥4॥**
**आ मे महच्छतभिषग्वरीय आ मे द्वया प्रोष्ठपदा सुशर्म ।**
**आ रेवती चाश्वयुजौ भगं य आ मे रयिं भरण्य आ वहन्तु ॥5॥**

अनेन प्रकारेण अथर्वसंहितायां साभिजिदष्टाविंशतिनक्षत्राणां स्तुतिरुल्लिखिता। तैत्तिरीय ब्राह्मणे नक्षत्रस्वरूपप्रजापतेरङ्गविभागः कृतः –

यो वै नक्षत्रियं प्रजापतिं वेद। उभयोरेनं लोकयोर्विदुः। हस्त एवास्य हस्तः।

**चित्राशिरः निष्ट्या हृदयम् । उरू विशाखे । प्रतिष्ठानुराधाः ।**
**एष वै नक्षत्रियः प्रजापतिः ।**

ऋक्संहितायां सप्तर्षिनक्षत्रमण्डलस्य चर्चा निम्नप्रकारेण चर्चिता –

**अमी य ऋक्षा निहितास उच्चा नक्तं ददृशे कु ह चिद्दिवेयुः ।**

अनेन स्पष्टं यत् सप्तर्षीणां कृते प्राच्यकाले 'ऋक्षः' इत्यस्य प्रयोगोऽप्रवर्तत् । अतः पाश्चात्ये सप्तनक्षत्रमण्डलस्य कृते 'उर्सामेजर' अथवा 'ग्रेट बेयर' इत्यस्य प्रयोगो भवति ।

अनेन प्रकारेण वैदिकवाङ्मये चन्द्रमार्गस्थितनक्षत्राणां सप्तर्षिनक्षत्रमण्डलस्य च विस्तृतरूपेण विवेचनं कृतम् ।

ऋक्संहितायां ऋतुविषयकविचारः सम्यक्तया कृतः–

**पूर्वामनुप्रदिशं पार्थिवानामृतून् प्रशासद्विदधावनुष्टु ॥**

तैत्तिरीयसंहितायां द्वयोर्द्वयोर्मासयोरेकैकर्तोरुल्लेखः कृतः–

**मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्चनभस्यश्च वार्षिकावृतू ।**
**इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्चतपस्यश्च शैशिरावृतू ॥**

तैत्तिरीयब्राह्मणे संवत्सरे पञ्चर्तूणामुल्लेखो भवति –

**पञ्चशारदीयेन यजेत । पञ्च वा ऋतवः संवत्सरः ।**

ऐतरेय ब्राह्मणेऽपि हेमन्तशिशिरर्तवोः समासेन पञ्चर्तवः कथिताः –

**द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन ।**

तैत्तिरीयब्राह्मणे संवत्सरः पक्षीरूपेण पञ्चर्तवश्च तस्य विभिन्नाङ्गरूपेण प्रतिपादिताः –

**तस्य ते वसन्तो शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम्**
**शरदुत्तरः पक्षः । हेमन्तो मध्यम् ।**

अनेन स्पष्टं तैत्तिरीयब्राह्मणे ऐतरेय ब्राह्मणे च संवत्सरे पञ्चर्तवः तैत्तिरीय-संहितायाञ्च षडर्तवः कथिताः। परवर्तीकाले च षडर्तूणामेव प्रचलनमद्यावधि भवति।

तैत्तिरीयसंहितायां दक्षिणायनोत्तरायणयोः स्पष्टतयोल्लेखो भवति–

**तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेण ।।**

ऋक्संहितायां वर्षस्य कृते 'समा' इस्यस्य प्रयोगः कृतः –

**समानां मास आकृतिः।**

वाजसनेयि संहितायामप्यस्यैव प्रयोगः कृतः–

**कुर्वन्नेवेह कर्माणि जिजीविषे शतं समाः।**

शतपथब्राह्मणे वर्षस्य कृते संवत्सरस्य प्रयोगः कृतः –

**ऋतुभिर्हि संवत्सरः शक्नोति स्थातुम् ।**

वस्तुतः शतपथब्राह्मणस्य वाक्येनानेन 'संवसन्ति ऋतवो यत्र तत् संवत्सरः' इति व्युत्पत्तिगम्योऽर्थ उपलभ्यते।

वेदेषु युगस्य प्रयोगोऽनेकशोऽभवत्। ऋक्संहितायां कथितम्–

देवानां पूर्व्ये युगेऽसतः सदजायत ।

अनेन 'युग' शब्दस्य प्रयोगेण सृष्ट्यारम्भकालस्य ज्ञानं भवति। पुनश्च तत्रैव प्रतिपादितम् -

या ओषधिः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।

अस्यार्थः सायणाचार्येण कृतत्रेताद्वापरयुगत्रयस्य कृते कृतः। अनेन ऋग्वेदकाले चतुर्युगस्य ज्ञानं भवति।

वाजसनेयिसंहितायां पञ्चसंवत्सरात्मकस्य युगस्योल्लेखो भवति –

संवत्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्सरोसि वत्सरोसि।

वेदेषु सूर्यचन्द्रमसोश्चर्चानेकत्र मिलति। ऋक्संहितायामेकत्र पञ्चताराग्रहाणामुल्लेखः कृतः–

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रावाच्यां सध्रीचीनानि वावृदुवित्तं मे अस्य रोदसी ।।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

तत्रैवैकस्मिन् संवत्सरे द्वादशराशीणां भ्रमणं द्वाविंशत्युत्तरसप्तशताहोरात्राणाञ्च विवेचनं कृतम् ।

द्वादशारं न हि तज्जराय वर्वर्ति चक्रं परिघामृतस्य ।
आपुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः ।।

अनेन प्रकारेण वैदिकवाङ्मये विभिन्नस्थानेषु मुहूर्त्तशास्त्रस्य वैदिकज्योविषशास्त्रस्य च मूलभूतसिद्धान्तानां विवेचनं वर्तते। तैत्तिरीयब्राह्मणे कथितं यत् शुभनक्षत्रोदिते कृते यज्ञे शुभफलं भवति -

**यः कामयेत दानकामा मे प्रजाः स्युरिति ।**
**स पूर्वयोः फल्गुन्योरग्निमादधीत ।**
**अर्यम्णो वा एतन्नक्षत्रम् । यत्पूर्वे फल्गुनी । अर्यमेति तमाहुर्यो ददाति ।**
**दानकामा अस्मै प्रजा भवन्ति ।**

पुनश्च तत्रैव कथितम् –

**यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते ॥**

कन्यादानविषये तत्रैव प्रतिपादितम् –

**यं कामयेत दुहितरं प्रिया स्यादिति । तां निष्ट्यायां दद्यात् ।**
**प्रियैव भवति ॥**

वैदिकवाङ्मयं हि समुद्रादपि गभीरतमम्। अस्य गभीराध्ययनेन न केवलं कालविज्ञानस्यापितु सम्पूर्णामपि विज्ञानानां गूढ़तमानि रहस्याण्यवज्ञातुं शक्यन्ते। अत्र वैदिक वाङ्मयानुसारेण कालस्य विभिन्नावयवानां दिनतिथिमासनक्षत्रर्त्वयनवर्षयुगादीनां ग्रहराश्यादीनां यद् विवेचनं कृतम्, तस्यैव गभीरतयानुशीलनेन वेदाङ्गकालीनैस्तदुत्तर-वर्तिभिश्चाचार्यैः विस्तृतेन प्रतिपादनं कृतम्। यथा हि परवर्तीभिराचार्यैः कालस्य सौरसावनचान्द्रनाक्षत्रचतुर्भिर्मानुषमानैर्व्यवहारः कृतः। तत्रापि केन केन मानेन किं किं कर्म कर्त्तव्यमित्यपि निर्दिष्टम्। यथा हि सिद्धान्तग्रन्थेषु प्रतिपादितं यद् वर्षायनर्तुयुगादीनां व्यवहारः सौरमानेन, मासतिथ्यादीनां चान्द्रमानेन, सूतक चिकित्सितवासरादीनां सावनमानेन, घटिकादिकानां च नाक्षत्रमानेन कर्त्तव्यः। अनेन प्रकारेण वेदाङ्गकालं यावत्
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

कालविधानस्यास्य शास्त्रस्योपयोगो वैदिकयज्ञानां यथाकालं सम्पादनार्थं जातः। वेदाङ्गकालानन्तरं आचार्यवराहमिहिरं यावत् वैदिकज्योतिषशास्त्रस्यास्य मुख्यरूपेण त्रयो विभागाः स्कन्धा वा सञ्जाताः **१) सिद्धान्तः २) होरा ३) संहिता** चेति। सिद्धान्तस्कन्धे कालगणनायाः होरास्कन्धे व्यष्टिगतफलस्य, संहितास्कन्धे च समष्टिगतफलस्य तदाधारभूतसिद्धान्ताः प्रतिपादिताः। वैदिकवाङ्मये यद्यपि कालविज्ञानस्यानेके विषयाः विस्तृतरूपेण प्रतिपादिताः सन्ति, किन्त्वत्र विस्तारभयेन तेऽत्र संक्षिप्तरूपेण विवेचिताः।

❑❑❑
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# भारतीयजैनज्ञानपरम्परा

**प्रो. अनेकांतकुमारजैनः***

भारतीयसभ्यतायाः आदिकालादेव जैनधर्मदर्शनस्य अस्तित्वस्य प्रमाणानि उपलभ्यन्ते। जैन आगमानुसारेण जैनधर्मः अनादिकालतः प्रवाहमानः। जैनमान्यतानुसारेण भूतकाले भिन्न चतुर्विंशतिः तीर्थङ्कराः आसन्, वर्तमानकाले ऋषभादि चतुर्विंशतिः तीर्थङ्कराः सन्ति तथा च भविष्यत्कालेऽपि चतुर्विंशतिः तीर्थङ्कराः भविष्यन्ति। भारतीयवाङ्मयस्य प्राचीनतायाः निर्देशकाः ग्रन्थाः ऋग्वेदादयः वेदाः सन्ति। तेष्वपि व्रात्यानां वर्णनं उपलभ्यन्ते,ते वस्तुतः जैनश्रमणाः एव सन्ति। उपनिषत्सु यत्र तत्र अपि श्रमणानां चर्चा उपलभ्यते। वेदेषु जैनतीर्थंकराणां मुख्यतः ऋषभदेवस्य अजितनाथस्य अरिष्टनेमेः च वर्णनं प्राप्यते। भारतगणतन्त्रस्य पूर्वराष्ट्रपतयः विश्वप्रसिद्धदार्शनिकाश्च डॉ० सर्वपल्ली राधाकृष्णमहोदयाः अपि लिखन्ति-

'There is evidence to show that so far back as the first century B.C. there were people who were worshipping Ṛṣabhadeva, the first tīrthaṅkara. There is no doubt that Jainism prevailed even before Vardhamāna or Pārśvanātha. The Yajurveda mentions the name of three Tīrthaṅkaras-Ṛṣabha, Ajitnātha and Ariṣṭanemi. The BhāgavataPurāṇa endorses the view that Ṛṣabha was the founder of Jainism. (Indian philosophy Vol I Page 287)

वैदिककालात् व्रात्यपरम्परायाः प्रमाणानि उपलभ्यन्ते, अतः ज्ञायते यत् जैनधर्मः विश्वस्य एकं प्राचीनतमं दर्शनमस्ति। मोहनजोदडो-हडप्पा-सभ्यताषु ध्यानमग्नयोगिनं तीर्थङ्कराणां मूर्तयः उपलभ्यन्ते। येन ज्ञायते यत् भारतीयपरम्परायां जैनध्यानयोगस्य प्रतिपादनं प्राचीनं विद्यते।

प्राचीनकाले जैनधर्मस्य अभिधानं व्रात्यधर्मः इत्यपि आसीत्। न केवलं जैनसाहित्यं अपितु वैदिकसाहित्ये, पुराणे बहुशः उल्लिखितमस्ति यत् अस्माकं देशस्य

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अभिधानं भारतवर्षमिति ऋषभदेवस्य ज्येष्ठपुत्रभरतस्य नाम्ना एव विख्यातं आसीत्। ऋषभदेवानन्तरं त्रयोविंशतितीर्थंकराः संजाताः तेषु अन्तिमः तीर्थंकरः भगवान् महावीरः अस्ति। येन अखिलविश्वे जैनधर्मस्य पुनः प्रवर्तनं कृतं। चतुर्विंशतितमः तीर्थंकरमहावीरः विशिष्टता धारयति स्म,यैः सर्वेभ्यः जीवेभ्यः आध्यात्मिकोन्नतेः प्राणिमात्रहिताय शान्तेः धर्मनिरपेक्षतया च शिक्षा प्रदत्ता।

तीर्थंकरभगवतः महावीरस्य शिक्षा अद्यापि तथैव महत्त्वपूर्णा प्रासंगिका च अस्ति यथा तेषां समये षड्द्विसहस्त्रवर्षपूर्वं (२६००) आसन्। तैः मुख्यरूपेण या शिक्षा प्रदत्ताः तासु मुख्याः सन्ति अहिंसा, अनेकान्तवादः, अपरिग्रहवादश्च। तैः सर्वदा सत्यानुसन्धानस्य प्रेरणा प्रदत्ता। तैः उपदिष्टं यत् अस्माभिः सत्यस्य साक्षात्कारः करणीयः।

दर्शनान्तरेषु जैनदर्शनं नास्तिकमिति प्रतिपादितमस्ति, तस्य च कारणं वेदानां प्रामाण्य स्वीकाराभाव एव। किन्तु एतद् विषये 'नास्तिक' शब्दो न युज्यते। यतो हि '**अस्ति नास्ति दिष्टं मतिः**' इत्यनुसारं नास्ति दिष्टमिति मतिरस्ति यस्य स नास्तिक इत्येवार्थ शब्दोऽयं कथयति, तदनुसारं च परलोकसत्तां स्वीकुर्वाणा आस्तिका अन्ये च नास्तिका इति वक्तुं युज्यते ।जैनदर्शनं तद्विषये नास्ति मौनभाक्, अतो नास्ति नास्तिकं जैनदर्शनमित्येव साधीयः। अतैव अवैदिकदर्शनमिदं इति वक्तुं शक्यते।

प्राकृतागमाः (साहित्यम्)

सम्पूर्णजैनागमाः विषयदृष्ट्या चतुःषु अनुयोगेषु विभक्ताः सन्ति -

(1) **प्रथमानुयोगः** - अस्मिन् अनुयोगे महापुरुषाणां चरित्रसम्बन्धिताः ग्रन्थाः, पुराणाः, कथादयः साहित्याः सम्मिश्रिताः सन्ति।

(2) **करणानुयोगः** - करणानुयोगस्यान्तर्गते लोकालोकस्य विभागः चतुर्गति-स्वरूपाणां प्रतिपादकाः भूगोल-खगोल-गणित, गुणस्थान-कर्मसिद्धान्तादि-विषयकाः सिद्धान्तग्रन्थाः सम्मिलिताः सन्ति।

(3) **चरणानुयोगः** - अस्मिन् चरणानुयोगे श्रमणानां श्रावकाणां च तेषां आचारविषयक प्रतिपादकाः ग्रन्थाः सम्मिलिताः सन्ति।

**(4) द्रव्यानुयोगः -** अत्र जीवाजीवादीनां तत्त्वानां, जीवपुद्गलादीनां, षड्द्रव्याणां, आध्यात्मप्रधान विषयोपयुक्तः प्रतिपादकाः तत्त्वज्ञाने दार्शनिकाः तथा आध्यात्मिकाः ग्रन्थाः समाविष्टाः सन्ति।

तीर्थङ्करमहावीरस्य मूलप्रवचनं प्राकृतभाषायां आगमसाहित्येषु संकलिताः सन्ति । आगमाः मूलरूपेण द्वादशाङ्गेषु विभक्ताः सन्ति । तद्यथा **(१) आचाराङ्गसूत्रम् (२) सूत्रकृताङ्गम् (३) स्थानाङ्गसूत्रम् (४) समवायाङ्गसूत्रम् (५) भगवतीसूत्रम् (६) ज्ञातधर्मकथा (७) उपासकदशा (८) अन्तकृतदशा (९) अनुत्तरोपपादिकदशा (१०) प्रश्नव्याकरणम् (११) विपाकसूत्रम् (१२) दृष्टिवादः ।**

द्वादशोपाङ्गसूत्राणि सन्ति - **(१) उववाई, (२) रायपसेणी, (३) जीवाभिगमः, (४)प्रज्ञापना, (५) जम्बूद्वीपप्रज्ञप्तिः, (६) चन्द्रप्रज्ञप्तिः, (७) सूर्यप्रज्ञप्तिः, (८) निरयावलिका, (९) कप्पवडिसीया, ( १०) पुप्फीया, (११) पुप्फचुलीया, (१२) वह्निदशा ।**

चत्वारि छेदसूत्राणि सन्ति - **(१) व्यवहारसूत्रम्, (२) बृहद्कल्पः, (३) निशियसूत्रम्, (४) दशाश्रुतस्कन्धः ।**

चत्वारि मूलसूत्राणि सन्ति - **(१) दशवैकालिकः, (२) उत्तराध्ययनम्, (३) नन्दीसूत्रम्, (४) अनुयोगद्वारम् ।**

अन्ते द्वात्रिंशत्तमम् आवश्यकसूत्रम् वर्तते। श्वेताम्बर स्थानकवासिसम्प्रदायेन, तेरापन्थीसम्प्रदायेन च एतानि द्वात्रिंशत् सूत्राणि जैनागमः कथ्यते। श्रीश्वेताम्बरेण मूर्तिपूजकेन जैनसमाजेन द्वात्रिंशत्सूत्रेषु अन्यानि त्रयोदश सूत्राणि सम्मेलितानि। ते पञ्चचत्वारिंशत्सूत्राणि आमनन्ति। तेषु सूत्रेषु अङ्गोपाङ्गानि तथैव आमनन्ति। ते मूलसूत्रेषु आवश्यकसूत्रम् अपि गणयन्ति। तदुपरान्ते चतुर्षु मूलसूत्रेषु पिण्डनिर्युक्तिं, ओधनिर्युक्तिं च अपि गणयन्ति। ते चतुर्षु छेदसूत्रेषु महानिशीयं, पञ्चकल्पं च अपि गणयन्ति। अन्ते दश प्रकरणसूत्राणि अपि सन्ति - **(१) आतुरप्रत्याख्यानम्, (२) भक्तिपरीक्षा, (३) तन्दुलवैचारिकः, (४) चन्द्रवेदेयकः, (५) देवेन्द्रस्तवः, (६) गणिविद्या, (७) महाप्रत्याख्यानम्, (८) चतुःशरणम्, (९) श्रीस्तवः, (१०) संस्तारकः ।**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**संस्कृतसाहित्यम्**

जैनसंस्कृतकाव्यसाहित्ये किं वा अस्ति ? इति बहवः विद्वान्सः पृच्छन्ति। यद्यपि एषः प्रश्नः अज्ञानमूलः। जैनसंस्कृतसाहित्ये किं नास्ति ? इति आधिकारिकतया प्रतिप्रश्नं कर्तुं विदुषां सामर्थ्यं न भवति अतएव जैनसंस्कृतसाहित्यस्य एतादृशी स्थितिः वर्तते।

जैनसंस्कृतसाहित्यस्य अध्ययनेन ज्ञायते यत् संस्कृतवाङ्मये तस्य स्थानमतिविशिष्टमिति। संस्कृतसाहित्यस्य कायसंवर्धने जैनपरम्परायाः अतिविशिष्टं योगदानमस्ति। जैनाचार्यैरपि समस्त प्राचीनभाषाभिः सह संस्कृतभाषायां विशालं साहित्यं निर्माय, संस्कृतभारत्याः विकासे अद्वितीयं योगदानं दत्तम्। संस्कृतभाषायां परिनिबद्धस्य जैनसाहित्यस्य प्राचुर्यं वरीवर्तिति। जैनाचार्यैः धर्मदर्शनातिरिक्तं काव्य-कोश-छन्दोऽलङ्कार-ज्यौतिष-आयुर्वेद-मुद्राशास्त्र-व्याकरण-नाट्यशास्त्र-नीतिशास्त्र-आचारशास्त्रवास्तुकलाप्रभृति-विषयानासृत्य समस्तविधासु श्रेष्ठतमं विपुलग्रन्थाः रचिताः।

अत्र समस्तविधासु केवलं काव्यविधायां विशेषरूपेण महाकाव्यम्, संधानमहाकाव्यम्, एकार्थकाव्यम्, दूतकाव्यम्, खण्डकाव्यम्, सूक्तिकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम्, नाट्यविधानाञ्च प्रमुखशास्त्राणां नामोल्लेखमात्रं संक्षेपेण अवश्यमेव कर्तुं इच्छामि।

महाकाव्येषु आचार्यः रविषेणकृतं 'पद्मचरितम्', जटासिंह नन्दिद्वारा निर्मितं 'वारांगचरितम्', वीरनन्दि कृतं 'चन्द्रप्रभचरितम्', अज्ञातकर्तृकं 'वर्धमानचरितम्', महाकविः असगकृतं 'शान्तिनाथचरितम्', महासेनकृतं 'प्रद्युम्नचरितम्', आचार्यः वादीराजकृतं 'पार्श्वनाथचरितम्', आचार्यः हेमचन्द्रप्रणीतं 'कुमारपालचरितम्' नामकं द्वयाश्रयमहाकाव्यम्, महाकविःहरिचन्द्रप्रणीतं 'धर्मशर्माभ्युदय महाकाव्यम्', महाकविः बाग्भट्टप्रणीतं 'नेमिनिर्माण महाकाव्यम्', द्वितीयगुणभद्रकृतं 'धन्यकुमारचरितम्', महाकविः अमरचन्द्र कृतं 'बाल भारतम्' तथा च 'पद्मानन्दमहाकाव्यम्' इति प्रमुखाणि महाकाव्यानि सन्ति। ऐतिहासिक काव्येषु महाकविः सर्वानन्दस्य 'जगडू चरितम्' तथा नयचन्द्रसूरिकृतं 'हम्मीरमहाकाव्यम्' अतिमहत्त्वपूर्णानि महाकाव्यानि सन्ति।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

संधानकाव्येषु महाकविः धनञ्जयस्य 'द्विसंधानमहाकाव्यम्' संधानविधायाः प्रथमं जैनमहाकाव्यम् अस्ति। अथ च सूराचार्यकृतं 'नाभेयनेमि', 'द्विसंधान महाकाव्यम्' शान्तिराजप्रणीतं 'पञ्चसंधानमहाकाव्यम्' मेघविजयोपाध्याये निर्मितं 'सप्तसंधानमहाकाव्यम् उपलब्धानि सन्ति। सप्तसंधानमहाकाव्येषु तीर्थंकरः ऋषभदेवः, शान्तिनाथः, नेमिनाथः, पार्श्वनाथः, महावीरः तथा रामचन्द्रः च श्रीकृष्णः इत्येषां सप्तशलाकापुरुषाणां चरितं एकं सहैव निबद्धमस्ति।

एकार्थककाव्येषु वादीदेवसिंहसूरिकृतं 'छत्रचूडामणि' नामकं काव्यमतीव लोकप्रियमस्ति। तथैव धनेश्वरिसूरिकृतं 'शत्रुन्जयमाहात्म्यं महाकाव्यम्', कविः जयशेखरसूरिकृतं 'जैनकुमारसंभवम्' प्रमुखानि काव्यानि सन्ति। संदेश अर्थात् दूतकाव्येषु आचार्यः जिनसेनप्रणीतं 'पर्श्वाभ्युदय' काव्यम्, कविः विक्रमरचितं 'नेमिदूतकाव्यम्', कविः मेरुतुङ्गकृतं 'जैनमेघदूतं', वादीचन्द्रसूरिकृतं 'पवनदूतम्' आदि लोकप्रिय-दूतकाव्यानि सन्ति।

"**गद्यं कवीनां निकषं वदन्ति**" इत्युक्तनयेन गद्यकाव्यनिर्माणे कवीनामद्वितीयैव प्रतिभा दृश्यते। संस्कृतसाहित्ये यद्यपि कादम्बर्यादीनि गद्यकाव्यानि सुप्रसिद्धान्येव तथापि-अनतिप्रसिद्धानां बहूनां गद्यकाव्यानां परिशीलनमावश्यकम्। गद्यकाव्येषु जैनकविभिः लिखितं 'गद्यकाव्यम्' गद्यकाव्यानां अतिश्रेष्ठपरम्परा अस्ति। एषु नवमशताब्द्यां आचार्येण वादीभसिंहसूरिणा प्रणीतं 'गद्यचिन्तामणि' नामाभिहितं अत्युत्कृष्टं गद्यकाव्यमस्ति। संस्कृतस्य अनतिप्रसिद्धेषु तथाविधेषु गद्यकाव्येषु 'गद्यचिन्तामणिः' इत्याख्यं काव्यमद्वितीयम्। नाम्नैव ज्ञायते यदिदमेकं गद्यकाव्यमिति। कविना पण्डित वादीभसूरीना समग्रमपि काव्यमिदं प्रौढशैल्यां विरचितम्। संस्कृतसाहित्ये प्रकृतिवर्णननिपुणः कविः भवभूतिरेव। परन्तु गद्यचिन्तामणौ यादृशं प्रकृतिवर्णनं दृश्यते, तादृशमन्यत्र विरलतया द्रष्टुं शक्यते। गद्यचिन्तामणेः कादम्बर्याश्च मध्ये महदेव सादृश्यं वरीवर्ति। तथा च कादम्बर्याः शुकनासोपदेशं को वा विस्मरति ? तद्वदेव गद्यचिन्तामणावपि आर्यनन्देः उपदेशः प्रसिद्धः।

तथैव एकादशशताब्द्यां समुत्पन्नेन महाकविः धनपालेन कृतं 'तिलकमञ्जरी' महाकाव्यमपि उत्कृष्टं काव्यमस्ति।

चम्पूकाव्येषु महाकविना सोमदेवसूरिणा प्रणीतं 'यशस्तिलकचम्पूमहाकाव्यम्' तथा महाकविः हरिचन्द्रकृतं 'जीवन्धरचम्पूकाव्यम्', अर्हदास कृतं 'पुरुदेवचम्पूकाव्यं' च अत्युत्कृष्टं चम्पूकाव्यानि सन्ति।

संस्कृतनाट्यसाहित्यस्य विकासेऽपि जैनाचार्यैः महत्त्वपूर्णयोगदानं कृतम्। एषु प्रमुखरूपेण 'विबुधानन्दनामकं' नाटकं शीलाङ्काचार्येण लिखितमस्ति। महाकविना रामचन्द्रेण प्रायः नवसंख्यकासंस्कृतजैनरूपकाणां रचना कृता। तेषु सत्यहरिश्चन्द्रम्, नव विलासः, कौमुदीमित्रानन्दम् तथा 'यादवाभ्युदयम्' अति प्रसिद्धानि रूपकाणि सन्ति। अपि च महाकविः हस्तिमल्लेन 'विक्रान्तकौरवम्', 'मैथिली-कल्याणम्', 'अञ्जनापवनञ्ज्यः' तथा 'सुभद्रानाटिका' - इति चत्वारि अतिश्रेष्ठानि नाटकानि निर्मितानि।

एवं प्रकारेण जैनाचार्यैः संस्कृतसाहित्यस्य विकासे महत्त्वपूर्णं योगदानं कृतम्। जैनाचार्येण प्रणीतं दार्शनिकं, सैद्धान्तिकं, तात्विकं, आध्यात्मिकं, आयुर्वेदः, ज्योतिषं, व्याकरणं, गणितं, कोशः, छन्दादि विविधसाहित्यविषयेषु विपुलमात्रायां साहित्युपलभ्यन्ते।

संस्कृतालङ्कारसाहित्ये वाग्भटकवेः काव्यालङ्कारस्य हेमचन्द्राचार्यस्य च काव्यानुशासनस्य प्रमुखं स्थानमस्ति। धनञ्जयस्य 'नाममाला' हेमचन्द्राचार्यस्य च 'अभिधानचिन्तामणिः' कोशस्य क्षेत्रे विशिष्टं स्थानमधिकुरुतः। ज्यौतिषसाहित्ये भद्रबाहुभट्टारकस्य निमित्तशास्त्रेत्याख्यग्रंथो विशिष्टमस्ति। महावीरस्य गणितसारसंग्रहस्य गणितक्षेत्रे अतिशयवैशिष्ट्यमस्ति।

जैनसंस्कृतसाहित्येऽपि सन्ति नामाधुनाप्यनेके ग्रन्थाः येषां विषये वयमनभिज्ञाः यतोहि एतेषां ग्रन्थानाम मूलपाण्डुलिपयः ग्रन्थागारेषु स्थिताः सन्ति। यदा तासां अनुसन्धानं संपादनं प्रकाशनं भविष्यति तदा अवश्यमेव संस्कृतसाहित्याकाशे नूतन आयामस्य समुद्घाटनं भविष्यति। यद्यस्माकं अनुसन्धानस्य उद्देश्यः संस्कृतसाहित्यस्य

अज्ञातग्रन्थानां प्रकाशनमस्ति तर्हि अस्मभ्यं जैनसंस्कृतसाहित्येषु सन्ति विशालक्षेत्रम् यतोहि संस्कृतभाषायां जैनमनीषिभिः विविधविषयकं साहित्यं प्रणीतमिति जैनसंस्कृतसाहित्यसागरो ह्यपरम्पारः।

**दार्शनिकसाहित्यम्**

प्रथमशताब्दि ईस्वीकाले जैनाचार्येण उमास्वामिना तत्त्वार्थसूत्रस्य रचना संस्कृतभाषायां विहिता। तत्त्वार्थसूत्रोपरि काले काले वृत्तिभाष्यादिभिर्विभूषितानि ग्रन्थान्तराणि प्राप्यन्ते।

आचार्येण कुन्दकुन्देन प्राकृतभाषायां समयसार-प्रवचनसार-नियमसार–पञ्चास्तिकायः- अष्टपाहुड नामकाः ग्रन्था: विरचिताः। कुन्दकुन्दाचार्यस्य इमा रचनाः समेकितरूपेण जैनदर्शनस्य विश्वकोश इति मन्यते। द्वितीयशताब्द्यां आचार्यसमन्तभद्रोऽपि जैनदर्शनस्य क्षेत्रे अभिनवं चिन्तनं प्रस्तुतवान्। अस्य रचनासु आप्तमीमांसा, युक्त्यनुशासनम्, स्वयम्भूस्तवः जिनस्तुतिशतकम्, रत्नकरण्डक-श्रावकाचारः, तत्त्वानुशासनम्, गन्धहस्तिमहाभाष्यं चेति प्रमुखाः रचनाः सन्ति। आचार्यः सिद्धसेनदिवाकरः न्यायावतार-सन्मतितर्क-तत्त्वार्थटीका-प्रभृतीनां ग्रन्थानां रचनां कृतवान्।

षष्ठशताब्द्यां तत्त्वार्थसूत्रमधिकृत्य आचार्येण देवनन्दिना अपरनाम पूज्यपादाचार्येण सर्वार्थसिद्धिरित्याख्या टीका उपलभ्यते। सप्तमशताब्द्यां भट्ट-अकलङ्केन तत्त्वार्थसूत्रोपरि राजवार्तिकग्रन्थस्य प्रणयनं कृतम्। न्यायविनिश्चयः प्रमाणसंग्रहश्चापि अकलङ्कस्यैव जैनन्यायशास्त्रीयं रचनाद्वयं वर्तते। अष्टमशताब्द्यां हरिभद्रसूरिणाऽपि षड्दर्शनसमुच्चय-अनेकान्तवाद –जयपताकादयो ग्रन्था विरचिताः। आचार्यविद्यानन्देन नवमशताब्द्यां तत्त्वार्थसूत्रोपरि श्लोकवार्तिकं विरचितम्। वादिराजसूरिणाऽपि अस्यामेव शताब्द्यां पार्श्वनाथचरितम्, न्यायविनिश्चयश्चेति द्वौ ग्रन्थौ सृजितौ ।

दशमशताब्द्या अनन्तरं अवान्तरकालस्य प्रारम्भः स्वीक्रियते ।आचार्यप्रभाचन्द्रः परीक्षामुखसूत्रग्रन्थोपरि अत्यन्तविस्तृतं टीका प्रमेयकमलमार्तण्डस्य रचना कृता। देवसूरिणाऽपि जैनन्यायक्षेत्रे प्रमाणानयनतत्त्वालोकालङ्कारः इत्याख्यस्य ग्रन्थस्य रचना कृता। द्वादशशताब्द्यां हेमचन्द्रेण काव्यव्याकरणयोः क्षेत्रे नूतनं साहित्यं सृष्टम्।

प्रमाणमीमांसा हेमचन्द्रस्य सुप्रसिद्धा रचनाऽस्ति। विभिन्नविधासु रचनायाः कारणात् हेमचन्द्रः 'कलिकालसर्वज्ञ:' इत्युपाधिमधिगतवान्।

त्रयोदशशताब्द्यां मल्लिषेणसूरिणः 'स्याद्वादमञ्जरी' विरचिता । जैनदर्शनक्षेत्रे एषा रचना पर्याप्तं लोकप्रियतामाप्तवती। इयं रचना हेमचन्द्रकृतस्य 'अन्ययोगव्यवच्छेद' इत्याख्यस्य द्वात्रिंशिकाग्रन्थस्य टीका विद्यते। पञ्चदशशताब्द्यां गुणरत्नेन हरिभद्ररचितं षड्दर्शनसमुच्चयं लक्ष्यीकृत्य टीकाग्रन्थो रचितः। सप्तदशशताब्द्यां च आचार्येण यशोविजयेन संस्कृतप्राकृत हिन्दीभाषासु अनेकेषां खण्डनमण्डनात्मकानां ग्रन्थानां सृजनं विहितम्। जैनतर्कभाषाऽस्या प्रमुखा कृतिरस्ति। एवं जैनदर्शन-साहित्य–सिंहावलोकनेन विज्ञायते यज्जैनदर्शनस्य आचार्या न्यायशास्त्रस्य गहनं ज्ञानम् अधिगतवन्त आसन्। अत एव तेषां भाषायां न्यायशैल्याः पूर्णः प्रभावो दृश्यते। ग्रन्थानाम् उपादेयतया सह भाषागतं वैशिष्ट्यमपि तत्र स्पष्टं प्रतिभाति।

**प्रमुखसिद्धान्ताः**

जैनागमेषु जैनदर्शनस्य बहवः सिद्धान्ताः प्रतिपादिताः। तेषु रत्नत्रयं,अहिंसा ,अनेकान्तवाद- स्याद्वादः तथा च अपरिग्रहः इति विश्वप्रसिद्धाः सन्ति।

**रत्नत्रयं – मोक्षमार्गः**

आध्यात्मिकसाधनायां जैनदर्शने त्रीणि मोक्षसाधनानि – सम्यग्दर्शन-ज्ञान-चारित्राणीति सन्ति । एतानि त्रीणि साधनानि जैनधर्मे रत्नत्रयमित्येतेन नाम्ना प्रथितानि सन्ति।रत्नत्रयमेव मोक्षमार्गः अस्ति। तत्त्वार्थसूत्रे प्रथमं सूत्रमस्ति - सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः। तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्। येन येन प्रकारेण जीवादय: पदार्था व्यवस्थितास्तेन तेनावगम: सम्यग्ज्ञानम्। सम्यग्ज्ञाने नयप्रमाणविकल्पपूर्वको जीवादिपदार्थानां यथार्थावगम: भवति। स्वरूपे चरणं चारित्रम्। स्वात्मनि प्रवृत्तिरित्यर्थ:। यः सम्यग्ज्ञानयुक्तपुरुषः संसारकारणनिवृत्तिं उद्यतोऽस्ति सः कर्मादाननिमित्तभूतं समस्तक्रियोपरमः भूत्वा हिंसानृतचौर्येभ्यो मैथुनसेवापरिग्रहाभ्यां च पापप्रणालिकाभ्यो विरतिः स्वीकरोति तथा स्वरूपे रमणं करोति। एतत् भवति सम्यग्चारित्रम्। अत्र सम्यग्विशेषणस्य प्रयोगः अज्ञानपूर्वकं आचरणस्य निवृत्त्यर्थं

कृतम्। अत्र मार्गः एकैव अस्ति तथा सम्यग्दर्शनज्ञानचारित्राणि एते त्रीणि तस्य मार्गस्य सोपानानि सन्ति ।सम्यग्दर्शनेन विना ज्ञानम् चारित्रम् च सम्यक् न भवति।

**अहिंसा**

जैनदर्शने अहिंसा यावत् विस्तृतसूक्ष्मगहनरूपेण विवेचिता तावत् व्यावहारिकरूपत्वमपि प्रदत्तम्। अतः सर्वप्रथमं हिंसायाः स्वरूपं प्रगटीकृतम् 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा। अर्थात् प्रमादयोगपरिणतिसद्भावात् कस्यापि जीवस्य घातो वधो वा हिंसा तथा च हिंसापरित्याग एव अहिंसा। क्रोधमानमायालोभादि-कषाययुक्तः रागादिभावसहितश्च परिणामः प्रमादः। एतैः प्रमादैः सह मनोवचनकायानां काभिः प्रवृत्तिभिः क्रियाभिर्वा स्वस्य परस्य वा द्रव्यप्राणान् भावप्राणान् वा घातं पीडनं वा हिंसा भवति। तद्विरतिः अहिंसा। वस्तुतो हिंसा-अहिंसा प्रत्येकस्य जीवस्य परिणामस्योपरि अवलम्बिते। तदनुसारेण यः कोऽपि सार्वभौमरूपेण मनोवचनकायैः कृतकारितानुमोदनैश्च परिपूर्णरूपेण पालयति, तदेव अहिंसामहाव्रतम्, तत्पालनं श्रमणः (मुनिः) करोति। यदि गृहस्थ एकदेशरूपेण पालयेत् तर्हि स श्रावकः कथ्यते, तदेव अहिंसाणुव्रतमुच्यते।

श्रावकाय अहिंसाव्रतं व्यावहारिकं कर्तुं हिंसायाः विभाजनं चर्तृषु विभागेषु कृतम्। येन गृहस्थ निज धर्मसमाजपरिवारराष्ट्रादिविषयेषु दक्षो भवेत्, कर्तव्यविमुखो न स्यात् तथा निजश्रावकधर्मं सम्यक् परिपालयन् क्रमात् विकसन् अणुव्रततो महाव्रतं पर्यन्तं विकासयात्रां कृत्वा आत्मकल्याणं कुर्यात्।

**अनेकान्त-स्याद्वादः**

अनेकान्तपदे द्वौ शब्दौ स्त:, अनेक: (न एकः अर्थात् बहु:)+ अन्त: (धर्मः गुणः वा)। एकवस्तुनि वस्तुत्वनिष्पादकपरस्परविरुद्धशक्तिद्वयप्रकाशनमनेकान्तः उच्यते। अनेके अन्ता धर्माः सामान्यविशेषपर्याया गुणा यस्येति सिद्धोऽनेकान्तः। अनेकान्तसिद्धान्तानुसारेण वस्तुनि परस्परविरुद्धाः अनेक गुणधर्माः स्वभावतः विद्यमानाः सन्ति ,एतत् वस्तुस्वरूपम्।

परस्परं विरोधिस्वरुपा अनन्तधर्माः गुणाः वा अवलोकनार्थं तावन्त्य एव दृष्ट्यो भवितव्याः। हठाग्रहात् यदि एकेनैव पक्षेण वस्तुनः सत्यतत्त्व पश्येत् तर्हि तत्र केवलं स्वमतसंग्रह एव भवेत् तथा परमतखण्डनं स्यात्। अनेकान्तो वैचारिकक्षेत्रेषु प्रसृतां हिंसां अपकर्षति। अद्य वैज्ञानिकयुगे वयं जानीम एव, पदार्थोऽचेतनो भवतु वा चेतनो वा, अनन्तगुणधर्मशक्तीनां संग्रहितोऽखण्डरूपात्मकोऽस्ति। तस्य अनन्तशक्तिषु धर्मेषु च केचित् परस्परसहयोगिनः, तथैव परस्परविरोधिनोऽपि।

अहिंसायाः जीवननिर्वहणार्थं परिपालनार्थं च वैचारिकमतमतान्तराणां दूरीकरणार्थं जैनधर्मे अनेकान्तसिद्धान्तः प्रतिपादितः। अनेकान्तवादो वस्तुतत्त्वपरक-वैज्ञानिकानुभवाधारेण प्रवर्तते, यो मानवेभ्यः उदारः सम्यग्दृष्टिश्च प्रयच्छति। प्रत्येकेषु वस्तुषु अनन्तगुणधर्मा विद्यन्ते। तेषां विविधा दृष्टयो वर्तन्ते। नाना जीवा विभिन्नाभिर्दृष्टिभिः वर्णयन्ति, यतः सत्यं न कस्यापि धर्मस्य मानवस्य वा वैयक्तिकस्वामित्वं। सर्वेषां कथनं सहिष्णुतापूर्वकं श्रोतव्यं तथा यया अपेक्षया वर्णितं, सा अपेक्षा अवगन्तव्या, तदर्थं प्रयतितव्यम्। अस्माकं स्थूलविरोधकथनमपि केनापि पक्षेण सम्यक् भवितुं शक्नोति। अत उदारतायुक्तं समन्वयमतिना तत्कथनं श्रोतव्यं विचारः कर्तव्यश्च । तथा सति कदाग्रहः, हठवादः, पक्षपातश्चेति लवलेषमपि नास्ति। सकलपारस्परिक विवादस्य परिहरणार्थं अमोघ उपायः, यतः अनेकान्तवादानुसारेण परस्परविरुद्धावभासात्मक सापेक्षद्वयसत्यं केनापि पक्षेण सत्यमेव वर्तते। अनेन विचारेण पारस्परिकसंघर्षो विवादो वा न जायते।

अनेकान्तवादस्य वचनशैली स्याद्वादः वर्तते। द्वयोः मध्ये वाच्य-वाचक संबन्धः अस्ति। 'स्याद्वादः' इत्यस्य पदे द्वौ शब्दौ स्तः , स्यात् (कथञ्चित् ) + वादः (कथनं) अर्थात् सापेक्षदृष्ट्या कथनं । अनेकान्तविचारधारया प्रभावितो मनुजो यत् कथनं करोति, स एव स्याद्वादोऽस्ति। निजकथनमेव पूर्णतः सत्यं अपरेषां वचनं सर्वथा असत्यमिति एकान्तरूपेण नैव वदति। सापेक्षत्वमेव स्याद्वादस्य रहस्यम्। एतेनैव सत्यज्ञानं निरूपणं च शक्नोति। स्याद्वादसिद्धान्ते 'स्यात् अस्ति घटः' ईदृशः सप्तभङ्गमाध्यमेन वस्तुस्वरूपस्य प्रतिपादनं भवति।

**अपरिग्रहवादः**

जैनधर्मः प्रतिपादयति - मूर्च्छा (आसक्तिर्वा) परिग्रहः। तत्परित्याग एवापरिग्रहः। एतदर्थं प्राप्तसम्पतः वस्तूनां समविभाजनं परमावश्यकम्। समविभाजनं विना कस्यापि जीवस्य मुक्तिर्नास्ति। एतस्मिन् सामाजिकस्यार्थिकस्य समत्वस्य अपि तत्त्वमन्तर्निहितम्।

गृहस्थधर्मेऽपरिग्रहव्रतस्य तात्पर्यार्थः- यत्र कस्मिन्नपि कार्ये मर्यादितसाधनाधारेण कार्यं परिपूरयति, तत्रामर्यादितानावश्यकसाधनानां संग्रहो मूर्खत्वमेव। यत्र अनावश्यकरूपेण संगृह्णीयात्, तत्र शोषणं विषमत्वं चायाति। यतः संग्रहणाय सहजीविनां शोषणमुत्पीडनमनैतिकत्वं चावलम्बते। अतः जैनदर्शने परिग्रहसिद्धान्तस्य अतीवमहत्त्वपूर्णं प्रतिपादितं तथा श्रावकस्यापरिग्रहाणुव्रताय परिग्रहपरिमाणव्रतमिति नामधेयं प्रदत्तम्।

वस्तुतो जैनदर्शनस्याचारविचारा आत्मानमनुलक्ष्यिणः। "अप्पा सो परमप्पा" आत्मैव परमात्मा इत्येवाध्यात्मस्य मूलाधारः। आत्मवादिजैनदर्शने वीतरागतायाः प्रधानत्वं परमात्मस्वरूपस्य प्राप्त्यर्थम्। जैनदर्शनानुसारेण रागद्वेषा एव संसारमार्गौ वीतरागत्वमेव मोक्षमार्गश्च। मोक्षमार्गः सम्यग्दर्शन-सम्यग्ज्ञान-सम्यक्चारित्रात्मकरत्नत्रयस्य एकरूपत्वेन संप्राप्नोति। अध्यात्मभूमौ जीवनस्यचरमविकास एव जैनसंस्कृतेरन्तिमलक्ष्यः। समीचीनसुखप्राप्तिरेव जीवनध्येयः। आत्मस्वातंत्र्यादेव सुखमिदमवाप्नोति। कर्मबन्धनयुक्तसंसारिजीवो नावगन्तुं शक्नोति। जगति इन्द्रियजन्यसुखमेव सत्यार्थसुखमिति मन्यते। जैनदर्शनं इन्द्रियातीन्द्रियसुखयोर्भेदविज्ञानं दर्शयित्वा निःश्रेयसोमार्गं प्रेरयति।

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# अभिहितान्वयबोधः

आचार्यः का.ई. देवनाथन्*

**अन्वितस्याऽभिधावादं वादमभिहितान्वये ।**
**अन्वितौ श्रीहरी नित्यं वन्दित्वा वच्मि सुग्रहम् । ।**

प्रथितं हि भारतीयदर्शनेषु शाब्दबोधप्रस्थाने वादद्वयम् - अन्विताभिधानवादः, अभिहितान्वयवादश्चेति । तत्र गुरुसंमतान्विताभिधानवादः पदानां वाक्यार्थज्ञानकरणत्वा-वलम्बी, भाट्टाभिमतोऽभिहितान्वयवादश्च पदार्थानामेव वाक्यार्थज्ञानकरणतावलम्बीति विवेकः । **पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथ इदानीं पदार्था अवगताः सन्तः वाक्यार्थमवगमयन्ति** इति शबरस्वामिनो भाष्यपङ्क्तिरेवानयोर्वादयोर्मूलम् । तदनयोः पक्षयोः को विशिष्यत इति परिज्ञातुं मतद्वयपरिशीलनं प्राप्तकालम् । तदादौ भाट्टाभिमतोऽ-भिहितान्वयवादः सोपपत्तिकमुपन्यस्यते ।

### भाट्टाभिमतः अभिहितान्वयवादः - अत्र सूत्रस्वारस्यम्

पूर्वोपात्तशबरस्वामिसूक्तौ **पदार्थाः अवगताः सन्तः वाक्यार्थमवगमयन्ती**ति भागः अभिहितान्वयवादसाधको भाति । अभिहितान्वयो नाम अभिहितानां पदार्थानामन्वयः । पदैरभिहिताः पदार्था ह्येव वाक्यार्थप्रतिपत्तौ करणीभूता इति भाट्टानामभिमतम् । वाक्याधिकरणस्थं जैमिनिसूत्रमेतत्पक्षसाधकं भवति । तथा हि - **तद्भूतानां क्रियार्थेन समाम्नायः अर्थस्य तन्निमित्तत्वात्** इति जैमिनिसूत्रम् । तदर्थः - तद्भूतानां = तेष्वर्थेषु वर्तमानानां पदानां, क्रियार्थेन - अंशत्रयविशिष्टभावनावाचकेन सह, समाम्नायः - सम्यक् परस्परान्वितस्वार्थबोधकत्वेनोच्चारणम् । अर्थस्य = पदार्थस्य, तन्निमित्तत्वात् = वाक्यार्थनिमित्तत्वात् । वाक्यार्थनिमित्तत्वं नाम वाक्यार्थज्ञाननिमित्तत्वम् । अत्र **अर्थस्य तन्निमित्तत्वादि**त्यंशेन स्फुटमेव पदार्थानां वाक्यार्थप्रतिपत्तिकरणत्वं प्रतीयत इति ।

---

* कुलपतिचराः, कर्णाटकसंस्कृतविश्वविद्यालयः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयश्च, विशिष्टाद्वैतवेदान्ताचार्याः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**अत्र लाघवानुरोधः**

ननु पदानां शाब्दबोधहेतुत्वे सर्ववादिसम्मते, कथन्नाम पदार्थानां वाक्यार्थबोधहेतुत्वमुच्यत इति चेत्, अत्राहुः भाट्टाः - पदानि पदार्थप्रतिपादनेन चरितार्थानि। तेषां पदानां पुनः वाक्यार्थबोधकत्वे नूनं गौरवमापतेत्। पदार्थानामपि पुनः वाक्यार्थबोधनसामर्थ्यं सर्वैरङ्गीकार्यमेव। पदार्थप्रतिपत्तेरेव वाक्यार्थप्रतिपत्त्यव्यवहित-पूर्वभावित्वात्। उक्तञ्च भट्टपादैः **आनन्तर्याद्धि वाक्यार्थः तद्धेतुत्वं न मुञ्चति** इति। तद्धेतुत्वं नाम तद्धेतुकत्वं पदार्थहेतुकत्वमित्यर्थः। एवञ्च पदेभ्यः प्रतीताः पदार्था वाक्यार्थबोधं प्रतिपादयन्तीति वाक्यार्थबोधे पदार्थानां करणत्वस्वीकार एवोचितः।

**गुरुमते विरम्यव्यापारदोषः**

किञ्च पदानि शाब्दबोधं जनयन्तीति वदतां नैयायिकानां प्राभाकराणाञ्च पक्षे (भाट्टपक्षे इव) पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णो वाचक इति वक्तव्यम्। 'देवदत्त' इत्युच्चरिते पदे सन्ति नैके वर्णाः। तत्र उत्तोरोत्तरवर्णोच्चारणकाले पूर्वपूर्ववर्णानुभवो नश्यति। अतश्चान्तिमवर्णः पूर्वपूर्ववर्णानुभवजनित-सकलसंस्कार-सचिवस्सन् अर्थप्रत्यायक इत्युच्यते। किन्तु नेयं रीतिः वाक्येषु वक्तुमर्हा। वर्णानुभवः सकृज्जातः। कथन्नाम तज्जन्यः संस्कारः, पदार्थस्मरणं वाक्यार्थानुभवश्चेति कार्यद्वितयं क्रमेण कर्तुमलम्। न खलु शब्दो विरम्य व्याप्रियते। अयं हि दोषः शास्त्रेषु विरम्यव्यापारायोग इत्युच्यते।

**गुरुमते विजातीयज्ञानव्यवधानदोषः**

किञ्च, पदगतवर्णानां विजातीयव्यवधानाभावेन, संभवति पदानां पदार्थस्मृतिजनकत्वम्। किन्तु विजातीयव्यवधानसत्त्वात् न संभवति वाक्यार्थानुभव-जनकत्वम्। तथाहि, 'देवदत्त' इत्यादिपदोच्चारणवेलायां तद्घटकवर्णानां क्रमेणानुभवे श्रोतुः जाते सति, अन्तिमवर्णोच्चारणकाले, पूर्ववर्णानुभवानां नाशेऽपि तदनुभवविशिष्टोऽन्तिमवर्णः पदार्थं स्मारयतीति निर्वाहो निष्कण्टकः। पूर्ववर्णानुभवजनितसंस्काराणामुद्बोधने च नास्ति कश्चित् बाधकलेशः। किन्तु पदैः वाक्यार्थबोधे जननीये, तत्तत्पदानुभवः, तत्तत्पदार्थस्मरणम्, सकलपदसमूहरूपवाक्यस्मरणं ततश्च वाक्यार्थप्रतिपत्तिरिति वक्तव्यम्।

पदानां वाक्यार्थबोधकत्वोपपत्तये च वाक्यस्मरणमपि मध्ये कल्पनीयनम्। किन्तु इदं वाक्यस्मरणं दुर्घटम्। पदार्थस्मरणरूपविजातीयव्यवधानसद्भावात्। न खलु पदस्थले पूर्वपूर्ववर्णानुभवोत्तरं वर्णार्थप्रतिपत्तिः विजातीया विद्यते। अत्र तु पदानुभवोत्तरं पदार्थप्रतिपत्तेस्सर्वानुभवसिद्धायाः विजातीयायाः सत्त्वात् कथं वाक्यस्मरणमुपपद्येत। अपि च दीर्घदीर्घतरादिवाक्यप्रयोगे सर्वेषां पदानां स्मरणमसंभवि। किन्तु सर्वपदार्थानां वाक्यार्थबोधे भानं भवत्येव। अतश्च एतादृशस्थले पदस्मरणस्य व्यभिचारात्, सर्ववाक्यस्थलेऽपि विजातीयव्यवधानेनाऽसंभवाच्च न पदानि वाक्यार्थबोधकरणभूतानि।

**बोधस्य शाब्दत्वशङ्का**

ननु पदार्थानामेव वाक्यार्थप्रतिपत्तिहेतुत्वे कथं तस्य बोधस्य शाब्दत्वमुपपाद्यम्। **तत आगत** इत्यर्थे शब्दशब्दाद् अण्प्रत्यये सति निष्पन्नः शाब्दशब्दः शब्दजन्यमाह। तच्च जन्यत्वं यदि परंपरासाधारणं तर्हि अतिप्रसङ्गः। 'पर्वते धूमः' इति वाक्यात् धूमविषयकशाब्दबोधो जायते। ततश्च पर्वते वह्न्यनुमितिरुदेति। तत्र परंपरया वह्निज्ञानस्य वाक्यजन्यत्वमात्रेण न खलु वह्निज्ञानस्य शाब्दत्वं संभवति। अतश्च यथाकथञ्चित् शब्दजन्यत्वस्य शाब्दत्वप्रयोजकत्वेऽतिप्रसङ्गात् शब्दकरणकत्वं बोधे आस्थेयमिति कथं पदार्थानां वाक्यार्थबोधकरणत्वमिति।

**तत्र समाधानम्**

अत्रोच्यते -

**पदार्थानुगतश्चैषः वाक्यार्थो गम्यते सदा।**
**न विशिष्टार्थता तस्मात् वाक्यस्वातन्त्र्यसाधिनी ॥**

वाक्यन्नाम श्रुतपदसमूहान्नातिरिक्तं स्वतन्त्रं किञ्चिद्वस्तु। न च विशिष्टार्थप्रतिपादकत्वाद्वाक्यं स्वतन्त्रमेव, न हि पदानि विशिष्टं वाक्यार्थमभिदधतीति वाच्यम्। विशिष्टार्थस्य पदार्थानुगतत्वात्। पदप्रतिपाद्या एवार्था अन्वयविशेषविशिष्टा वाक्यार्थ इत्युच्यन्ते। न च वाक्यार्थः पदार्थव्यतिरिक्तो भवति। न हि 'देवदत्तः ग्रामं गच्छति' इति वाक्योच्चारणे, देवदत्त-ग्राम-कर्मत्व-गमनादिपदार्थाननुगतः यज्ञदत्तकर्तृक-ग्रामत्यागरूपवाक्यार्थः प्रतीयते। तस्मान्न विशिष्टार्थकत्वं वाक्यस्य स्वातन्त्र्यसाधकं

भवति। ननु तथापि पदानां तत्तत्पदार्थमात्रोपस्थापने क्षीणशक्तीनां, कथमन्वयविशेषरूप-वाक्यार्थप्रतिपादनसामर्थ्यम्? पदार्थानामेव खलु तदिति चेन्न -

**न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेषु पदानि नः।**
**तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते॥**
**अशाब्दे चापि वाक्यार्थे न पदार्थेष्वशाब्दता।**
**वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः॥**

पदानां स्वार्थाभिधायकत्वेऽपि न वाक्यार्थेऽसामर्थ्यं ब्रूमः। अन्वयविशेषरूपे तस्मिन्नेव पदानां तात्पर्यवृत्तेस्सत्त्वात्। तथाहि, अभिधाख्यव्यापारस्य पदार्थेषु उपरतत्वेऽपि पदानां तात्पर्यं वाक्यार्थ एवाङ्गीकार्यम्। पदार्थानां प्रमाणान्तरसिद्धत्वात्। अतश्च शब्दप्रमेयतया वाक्यार्थः शाब्द इत्युच्यते, तद्विषयकत्वेन च बोधः शाब्द इति।

**पदार्थवाक्यार्थयोस्संबन्धः**

अथ वाक्यार्थः पदार्थेभ्योऽवगम्यत इति स्वीकारे तयोस्संबन्धः कश्चिद् वाच्यः। न खलु असंबद्धयोर्गम्यगमकभावः क्वचिद् दृष्टः। पर्वतादौ धूमं पश्यतो वह्न्यनुमितिर्भवति। तत्र वह्निः स्वप्रतिबद्धेन धूमेनैव ज्ञाप्यते न पुनर्घटादिना। अतश्च पदार्थवाक्यार्थयोः कस्संबन्ध इति चेत्,

अत्राहुः भाष्यकाराः - **सामान्यं पदार्थः, विशेषो वाक्यार्थ** इति। तथाहि, 'देवदत्त' इति पदमात्रोच्चारणे जगतीतले विद्यमानास्सर्वे देवदत्तसंज्ञाशालिनः ज्ञायन्ते। 'देवदत्तो ग्रामं गच्छति' इति वाक्योच्चारणे सति ग्रामकर्मकगमनकर्तृभूतदेवदत्त एव ज्ञायते। शुद्धदेवदत्तः गमनादिना विशेषितो हि भवति। ततश्च पदार्थः सामान्यमिति, वाक्यार्थो विशेष इत्युच्यते। अयमेवाऽविनाभावसंबन्ध इत्युच्यते।

**पदार्थैर्न वाक्यार्थानुमानम्**

ननु तर्हि पदावगतैः पदार्थैः वाक्यार्थोऽनुमीयत इत्यापतितमिति चेन्न। पदार्थास्सामान्यरूपाः, वाक्यार्थस्तु विशेषरूप इति पदार्थवाक्यार्थयोरभेदात्, नानुमानं प्रसरति। भिन्नयोस्संबद्धयोश्च धूमवह्न्यादिरूपयोरेवाऽनुमेयानुमापकभावः संभवति। न च भेदस्संबन्धश्च विद्यते पदार्थवाक्यार्थयोः। न च संबन्धाभावे कथं पदार्थैः

वाक्यार्थोपस्थापनम्। न हि 'देवदत्तो ग्रामं गच्छति' इत्यत्र देवदत्तादिपदार्थैः ज्ञातैः यज्ञदत्तादिघटितवाक्यार्थः प्रतीयत इति वाच्यम्। सत्यं, संबद्धावेव पदार्थवाक्यार्थौ। स च संबन्धोऽविनाभाव इत्युच्यते। परं, न स अविनाभावः व्याप्तिरूपः धूमवह्न्योरिव, किन्तु मनुष्यत्वब्राह्मणत्वयोरिव। यथा हि सामान्यं मनुष्यत्वं, ब्राह्मणत्वादिरूपयत्किञ्चिद्विशेषं विना न पर्यवस्यति, तथा पदार्थास्सामान्यभूताः, अन्वयविशेषभूतवाक्यार्थं विना न संभवन्तीति पदार्थैः वाक्यार्थ उपस्थाप्यते। अयमेव न्यायः, **निर्विशेषं न सामान्यं भवेत् शशविषाणवत्** इति प्रथते। **तद्भूतानां क्रियार्थेन समाम्नायः** इति जैमिनिसूत्रेण चायमर्थो निर्णीयते। प्राचीनास्तु भाट्टाः वाक्यार्थस्य लक्ष्यत्वम् ब्रुवन्ति। इदम् भट्टपादैः, श्रीपार्थसारथिमिश्रैश्च प्रतिपादितमेव ।परन्तु "अभिधेया विना भूतेः प्रतीतिः लक्षणेष्यत" इति वार्तिकं वाक्यार्थज्ञानजन्यं ज्ञानं लक्षणा, तद्विषयत्वात् गङ्गातीरादेः, वाक्यार्थस्य च लक्ष्यत्वमित्येवम् परम् इति।

**पदोच्चारणस्यावश्यकता**

ननु पदार्थैरेव वाक्यार्थोपस्थापने सति, पदोच्चारणमनावश्यकमिति चेन्न।

**साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।**
**वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले।।**

वर्णाः - वर्णात्मकशब्दा यद्यपि साक्षात् पदार्थानेव प्रतिपादयन्ति, तथापि न तत् पदार्थप्रतिपादनं निष्फलं भवितुमर्हति। 'देवदत्तो ग्रामं गच्छति' इत्यत्र देवदत्तादिपदार्थाः पूर्वमेव ज्ञाताः। देवदत्तस्य ग्रामगमनभावना त्वज्ञातपूर्वा इति, सैव वाक्यप्रतिपाद्येति पदाभिहितपदार्थैस्तादृशवाक्यार्थप्रतीतावेव साफल्यात्, वाक्यार्थप्रतीतयेऽवश्यं पदान्युच्चारणीयानि। उक्तञ्च -

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।।**

इति। यथाहि काष्ठैः पाकरूपक्रियायां निर्वर्त्यायां, ज्वाला - ज्वलनव्यापारो द्वारीभवति, तथैव पदानां वाक्यार्थबोधे जननीये, पदार्थप्रतिपादनं नान्तरीयकं व्यापारस्थानीयं भवतीति।

**स्मरणविलक्षणमभिधानम्**

भाट्टाभिमतोऽभिहितान्वयवादो नाम पदैरभिहितानामर्थानामन्वयः शाब्दबोधे भासत इति। तत्र पदैरभिहितत्वन्नाम, नैयायिकाभिमतमभिधावृत्त्या पदजन्यस्मृतिविषयत्वन्न। किन्तु पदजन्याभिधानविषयत्वमित्यभिमतम्। अभिधा नाम शक्तिपर्याया काचित् वृत्तिरिति तार्किकमतम्। तन्मते च पदार्थानां स्मरणं भवति पदैः। किन्तु भाट्टमते पदजन्यपदार्थप्रतीतिः स्मृतिभिन्नाऽभिधानपदव्यपदेश्या इति ज्ञेयम्।

**प्राभाकरसंमतोऽन्विताभिधानवादः**

परस्परमन्वयविशिष्टा एव पदार्थाः पदैरभिधीयन्त इति गुरूणां मतम्। अत्र निदानन्तु वाक्यानां कार्यपरत्वस्वीकार इति तदादौ निरूप्यते। सर्वाणि पदानि कार्यमेवार्थं प्रतिपादयन्ति। कार्यन्नामापूर्वम्। 'यजेत स्वर्गकामः'; इत्यादिवैदिकवाक्येषु लिङादिनाऽपूर्वं प्रतिपाद्यते। 'गामानय' इत्यादिलौकिकवाक्येऽपूर्वप्रतिपादनासंभवात् क्रियारूपं कार्यं प्रतिपाद्यते। कार्यं नाम कृतिविषयः। एवञ्च 'आनय' इत्यादौ धात्वर्थानयनादौ लोडादिना कार्यत्वमुच्यत इति भावः।

ननु सर्वाणि पदानि कार्यप्रतिपादकानीति कथं युज्यते। लिङ्-लोट्-तव्यदादिकतिपयपदैरेव तदभिधानात्। न खलु 'देवदत्त! गामानय' इति वाक्ये देवदत्तादिपदैः कार्यं प्रतिपाद्यते। सर्वपदानां कार्यप्रतिपादकत्वे, एकपदेनैव तल्लाभादितरपदवैयर्थ्यञ्च प्रसजेदिति चेन्न।

भावानवबोधात्। तथाहि सर्वपदानां कार्यप्रतिपादकत्वन्नाम कार्यान्वितार्थ-प्रतिपादकत्वम्। पदानि कार्यान्वितमेव स्वं स्वमर्थं प्रतिपादयन्तीत्यनुभवसिद्धम्। 'देवदत्त! गामानय' इत्यत्रानयनरूपकार्येण साक्षात्परंपरया वाऽन्विता एवार्था देवदत्ताद्याः प्रतीयन्ते। न चात्र किं मानमिति वाच्यम्, व्युत्पत्तिकाले तथैव ग्रहात्, वृद्धव्यवहारेणैव शक्तिग्रह-संभवात्, व्यवहारस्य च सर्वस्य कार्यपरत्वात्, देवदत्तादिशब्दानां कार्यान्वितदेवदत्तादावेव व्युत्पन्नत्वात्, उत्तरकाले कार्यान्वयांशपरित्यागे मानाभावाच्च। किञ्च पदानां केवलस्वार्थबोधकत्वेऽन्वयांशस्य पदालभ्यत्वात् शाब्दे कथं भानम्। अतश्च 'ग्रामम्' इत्यत्र

ग्रामकर्मत्वयोरिव तत्संसर्गभूते निष्ठत्वादावपि शक्तिरङ्गीकार्या। नैय्यायिकादयस्तु आकाङ्क्षाभास्योऽन्वय इति वदन्ति। तन्न मनोरममिति गुरूणामाकूतम्।

**प्रकरणपञ्चिकोक्तः अन्विताभिधानवादः**

**पदेभ्य एव वाक्यार्थप्रत्ययो जायते यथा।**
**तथा वयं निबध्नीमः प्रभाकरगुरोर्मतम्।।**

इति प्रतिजानानः शालिकानाथवर्य इदमाह प्रथमं,

**पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः।**
**स्वार्थाश्चेत् बोधिताः, उक्तो वाक्यार्थोऽपि तथा सति।।**

इति। देवदत्तादिपदं ग्रामकर्मकगमनान्वितदेवदत्तादिस्वार्थबोधने उपक्षीणशक्तिकं भवति। भाट्टमते हि पदानां स्वार्थमात्रबोधकानां शाब्दबोधे सामर्थ्ये सत्यपि न करणत्वमभिमतं, किन्तु पदार्थानामेव। वस्तुतः पदैस्स्वार्थेषु इतरान्वितेषु प्रतिपादितेषु न किञ्चिदवशिष्यते प्रतिपादयितुम्। वाक्यार्थस्यापि पदैरेव प्रतिपादनात्, अन्वयविशेषविशिष्टपदार्थानामेव वाक्यार्थत्वात्, अन्वयांशेऽपि पदशक्तिस्वीकारात्। उक्तं हि,

**प्रधानगुणभावेन लब्धान्योन्यसमन्वयान्।**
**पदार्थानेव वाक्यार्थान् सङ्गिरन्ते विपश्चितः।।** इति।

अयं भावः - 'ग्रामं गच्छति' इति वाक्ये सुबन्तमेकं तिङन्तञ्चैकं विद्यते। ग्रामपदेन गमनान्वितं कर्मोच्यते। तिङन्तेन च ग्रामान्विता गमनक्रियोच्यते। कारकपदेन क्रिया गौणतया कारकञ्च प्राधान्येन प्रतिपाद्यते, क्रियापदेन च वैपरीत्येनेति विशेषः। किन्तु सर्वमपि पदमितरान्वितमेवार्थं प्रतिपादयतीति वाक्यार्थः पदलभ्य एवेति विज्ञेयम्।

**स्मारकशक्तिनिरूपणम्**

प्राभाकराणां मते, पदेषु स्मारकशक्तिः काचित् स्वीक्रियते। स्मारकशक्तिर्नाम स्मारकत्वस्वभावः। पदानामन्वयविशिष्टस्वार्थे वाचकतासत्त्वेऽपि शुद्धस्वार्थे स्मारकताऽपि विद्यते। 'देवदत्तो ग्रामं गच्छति' इत्यत्र देवदत्तपदस्य ग्रामकर्मकगमनान्वित-देवदत्तवाचकत्वेऽपि, केवलदेवदत्तस्मारकत्वमप्यास्ते। ननु तर्हि भाट्टमतात् को विशेष इति चेत्, भाट्टमते -

पदैः पदार्थानामभिधानं नाम स्मरणविलक्षणव्यापारः। पदेषु पदार्थस्मारकत्वसत्त्वेऽप्यभिधायकत्वमन्यदेव। अन्यथा वाक्यार्थस्य शाब्दत्वानुपपत्तिः। किन्तु गुरुमते पदैः पदार्थाभिधानं नामाभिधावृत्त्या पदार्थस्मरणमित्येवाङ्गीकृतम्। स्मरणापेक्षया अतिरिक्तमभिधानं केवलपदार्थविषये नास्तीति यावत्।

**वाक्यार्थबोधोत्पत्तिप्रकारः**

**पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्।**
**न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्।।**

**पदजात**मिति समूहार्थे जातपदप्रयोगः। तेनानेकत्वलाभः। सर्वपदेन चाशेषत्वलाभ इति न पौनरुक्त्यम्। **स्मारितानन्वितार्थकम्** - इत्यनेन केवलस्वार्थ-स्मारकतास्वभावः पदानामुच्यते। **न्यायसंपादितव्यक्ति** - न्यायेन आकाङ्क्षायोग्यता-सन्निधिपरामर्शेन संपादिता व्यक्तिरन्वयविशेषः यस्य तत्। पदानि प्रथमं श्रुतानि केवलस्वार्थं स्मारयन्ति। ततः आकाङ्क्षादिवशात् वाक्यार्थप्रतिपत्तिर्भवति। उक्तञ्चाऽन्यत्र -

**आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान्।**
**स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदा।।**
**आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन।** इति।

**एकमेव पदमन्विताभिधायकमिति मतनिरासः**

नन्वन्विताभिधानस्वीकारे एकेनैव पदेन विशिष्टार्थबोधनात् पदान्तराणां वैयर्थ्यं प्रसजति। न चैकपदस्याऽन्वयविशिष्टार्थकत्वेऽपि, अन्वयप्रतियोगिभूतार्थप्रतिपादकत्वेन पदान्तराणां सार्थक्यं संभवत्येव। अन्वयो हि द्विनिष्ठः। तत्रान्वयानुयोगिनः, ग्रामकर्मकगमननिरूपितान्वयविशिष्टस्य देवदत्तादेः देवदत्तादिपदलभ्यत्वेऽपि, अन्वयप्रतियोगिकोट्यन्तर्भूतग्रामादिप्रतिपादकतया ग्रामादिपदमावश्यकमेव। एवञ्चान्वयस्य शाब्दत्वमपि सुरक्षितमेवेति वाच्यम्। एवं सति, एकमेव पदमन्विताभिधायकमितराणि तु केवलस्वार्थप्रतिपादकानीत्यायातम्। तथा सति किं पदमन्विताभिधायकमिति स्वीकर्तव्यम्। प्रथमश्रुतं पदं वा, यत्किञ्चिदेव वेति चेत्,

मैवम्। 'पदजातं श्रुतं सर्वम्' इत्युक्तरीत्या पदमात्रस्यैवान्विताभिधायकत्वाभ्युपगमात्। प्रथमश्रुतपदमेवान्विताभिधायकमित्यङ्गीकारे इतरपदार्थाः सर्वे प्रथमपदार्थान्विता भवन्तीति वक्तव्यम्। किन्तु, **अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति** इत्यत्र तद्बाधितम्। तत्र खलु क्रयणे सर्वपदार्थानामन्वयो न त्वारुण्ये। न च तर्हि प्रधानार्थे इतरपदार्था अनुयन्तीति स्वीकृत्य प्रधानपदमेवान्विताभिधायकं भवतु। प्रकृते यथाऽऽरुण्यादीनां क्रयणेऽन्वयात् क्रीणातीति प्रधानपदं, तथा इति वाच्यम्। प्राधान्यस्य नियतरूपेण वक्तुमशक्यत्वात्। तथाहि, अरुणयेति वाक्ये सोमस्यापि प्राधान्यमस्ति, उद्देश्यतया। शास्त्रस्य भावनाबोधपरत्वस्वीकारात् भाट्टैः, वाक्यपरमतात्पर्यविषयत्वं क्रयभावनायामेवेति क्रीणातीत्येव प्रधानपदमिति चेत्, तर्हि प्राधान्यं वाक्यतात्पर्यकत्वमित्यायाति। वाक्यतात्पर्यन्तु न व्यवस्थितं भवति। **अग्निहोत्रं जुहोति** इत्यत्र होमभावना प्रधानार्थः। ततश्च जुहोतीत्याख्यातं प्रधानपदं वक्तव्यम्। किन्तु, **दध्ना जुहोति** इत्यत्राख्यातस्य प्राधान्यं न संभवति। तत्र दधिकरणकहोमकर्मकभावनाया उक्तत्वेऽपि वाक्यतात्पर्यं दधिकरणत्व एव, न तु होमभावनायाम्। तस्याः पूर्वमेव प्राप्तत्वात्। अतश्च सर्वे शब्दा अन्विताभिधायका इत्येव स्वीकार्यम्।

**लाक्षणिकस्याननुभावकत्वम्**

अयन्तु विशेषः। 'गङ्गायां घोष' इत्यादिलाक्षणिकपदघटितवाक्येषु न सर्वमपि पदमन्विताभिधायकम्। गङ्गादिलाक्षणिकपदानामननुभावकत्वात्, अन्विताभिधायकत्वविरहात्। तत्र घोषादिपदमेवाऽन्विताभिधायकं सत् शाब्दानुभव-जनकमिति गुरूणामभिमतम्।

चिन्तामणिकारास्तु इत्थमन्ववदन् - 'गङ्गायां घोष' इत्यत्र प्राभाकरमते नास्ति वाक्यार्थबोधः। तत्राऽसंसर्गाग्रहस्यैवाऽभिमतत्वात्। गङ्गापदोपस्थापिततीरस्य घोषपदोपस्थापितघोषस्य च मिथोऽसंसर्गाग्रहः, न तूभयविषयकबोधः कश्चिद् भवतीति।

**षष्ठाद्ये बृहट्टीकोक्तविशेषः**

वाक्यार्थस्वरूपञ्च विवेचितं वृहट्टीकायां षष्ठाद्ये। उक्तञ्च तत्र **न पदन्नाम किञ्चन वाक्ये, न पदार्था नाम केचन वाक्यार्थे** इति। अयं भावः - पदन्तावत् पृथग्भूतानां न

भवति प्रमाणं, पदार्थाश्च पृथग्भूताः न प्रमेया भवन्ति। अन्वयविशेषविशिष्टाः पदार्था वाक्यार्थपदाभिधेया एव प्रमेयाः। विना व्युत्पत्तिं शब्दो नार्थं बोधयति। शक्तिग्रहरूपव्युत्पत्तिश्च वृद्धव्यवहारात्। वृद्धाश्च **अर्थं बुद्ध्वा शब्दरचना** इति न्यायेन संसृष्टार्थविषयकज्ञानवन्तः, तद्विषयकवाक्यं प्रयुञ्जते। न खलु ते वृद्धाः गोत्वमात्रबोधेच्छया, ग्रामत्वमात्रबोधेच्छया वा क्रियामात्रबोधेच्छया वा वाक्यमुच्चारयन्ति। किन्तु गोत्वविशिष्टगोकर्मकगमनादिबोधतात्पर्येणैव। श्रोतारोऽपि तादृशं विशिष्टमेवार्थमवबुध्यन्तीति प्रत्यक्षसिद्धम्।

तत्र वाक्यन्नाम पदसमूह एव, नातिरिक्तं किञ्चित्। एवं, वाक्यार्थो नाम गुणीभूतानेकपदार्थविशिष्टः कश्चित् पदार्थ एव, न तु पदार्थव्यक्तिरिक्तः। यथा हि शिबिकायाः वोढारस्सर्वे तामुद्यच्छन्ति, यथा वा त्रयोऽपि ग्रावाणः उखां बिभ्रति, तथैव सर्वाणि पदानि वाक्यान्तर्गतानि, वाक्यार्थमवगमयन्ति। इदं पदमवगमयति न त्वपरमिति वक्तुं नास्त्यवकाशः। शक्तिग्राहकमूर्धन्येन वृद्धव्यवहारेण इतरान्विते शक्तिः पदानां सिद्ध्यति। शक्तिर्नाम सामर्थ्यम्। इतरान्विते शक्तिर्नाम इतरान्वितार्थविषयकानुभवजनकतावच्छेदकशक्तिमत्त्वम्।

**भाट्टोक्ताभिहितान्वयवादखण्डनम्**

अथ पदार्थापेक्षया पदेष्वेव शाब्दबोधकरणत्वमङ्गीकार्यमिति प्रकरणपञ्चिकोक्तरीत्या निरूप्यते। उक्तञ्च पञ्चिकायाम् -

**प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।**
**पदानामेव या शक्तिः वरमभ्युपगम्यताम्।।** इति।

अयमर्थः - शाब्दबोधप्रक्रियायां प्रथमं हि पदानां श्रवणम्। किञ्च भाट्टैरपि पदानामभिधातृत्वशक्तिस्स्वीक्रियते। अपि च बोधस्य शाब्दत्वरक्षणार्थं पदानां तात्पर्यं वाक्यार्थेऽङ्गीकृतम्। अतः वाक्यार्थबोधानुकूला शक्तिः पदेष्वेव स्वीकर्तुमुचिता।

**भाट्टमते धर्मिकल्पनागौरवम्**

पदार्थानां वाक्यार्थावगमकत्वे, पदेष्वभिधाख्यशक्तिव्यतिरेकेण पदार्थेषु वाक्यार्थबोधानुगुणा शक्तिः कल्पनीया। अतश्च शक्तिद्वयकल्पनमावश्यकम्। अस्मन्मते तु

पदानामभिधाशक्तिर्न केवलं स्वस्वार्थेषु, किन्तु अन्वयविशिष्टस्वार्थेष्विति स्वीकारात्, क्लृप्तशक्तेरन्वयविषयकत्वरूपधर्मकल्पनमात्रं विद्यते। भाट्टमते तु अतिरिक्तशक्तिरूप-धर्मिकल्पनेति, धर्मिकल्पनातो वरं धर्मकल्पना इति न्यायेन पदानामेव वाक्यार्थबोधशक्तिः स्वीकार्या।

**भाट्टमतेऽपि अन्वयांशे शक्तिस्वीकारावश्यकता**

किञ्च भाट्टमतेऽपि घटादिशब्दानां केवलघटादिस्वरूपविषयकबुद्धिजनकत्व-मात्रस्वीकारेऽभिधायकत्वं न सिद्ध्यति। यतो हि घटस्वरूपोपस्थापकत्वन्तावत् तत्स्मारकत्वमेव। स्मारकत्वञ्चाभिधायकत्वविलक्षणं तदिष्टं, घटादिस्वरूपोपस्थिति-श्चोद्बुद्धसंस्कारेण जायमानत्वात् स्मृतिरूपैव। अतश्च पदानामभिधातृत्वसिद्ध्यर्थम्, पूर्वानाधिगतान्वयरूपार्थविशिष्टतत्तदर्थबोधकत्वं भाट्टेनापि वक्तव्यम्। तर्ह्यन्वयांशेऽपि पदानां शक्तिरायातेति पदार्थानां कुतः शाब्दकरणता वाच्या।

किञ्च वाक्यार्थस्य शाब्दत्व(शाब्दप्रमेयत्व)सिद्धये पदानां वाक्यार्थे तात्पर्याख्यो व्यापारः स्वीकृतः। अन्यथा, परंपरया शब्दजन्यत्वमात्रेण शाब्दत्वसिद्धौ, परंपरया श्रोत्रजन्यत्वात् शाब्दस्य श्रौत्रत्वमपि स्यादिति हि भाट्टमतम्। अतश्च तात्पर्याख्यसम्बन्धापेक्षया उभयसंप्रतिपन्नाभिधावृत्तेरेव वाक्यार्थे स्वीकारस्समुचित इति।

किञ्च एकपदश्रवणानन्तरं तत्पदार्थावगतौ, 'अस्य पदार्थस्य केनान्वयः' इति जिज्ञासायाः सर्वानुभवसिद्धाया उपपत्तय अपि अन्वये पदशक्तिरङ्गीकार्या। सामान्यज्ञानं विना विशेषजिज्ञासाया असंभवात्, पदैः सामान्यतः अन्वयोपस्थितिरभ्युपेतव्या। तदैव 'देवदत्तस्य कुत्रान्वयः', ग्रामस्य केनान्वय' इत्यादिविशेषाकाङ्क्षा उपपद्यते। अतश्च शब्दादेव अन्वयोपस्थित्यर्थं विशिष्टे शक्तिस्स्वीकार्या।

किञ्च प्रमाणं हि स्वसंबद्धमेव प्रमेयं बोधयतीति सर्वशास्त्रसंमतम्। तत्र वाक्यार्थस्य शाब्दप्रमेयत्वाङ्गीकर्तृभाट्टमते प्रमाणशब्दस्य प्रमेयभूतवाक्यार्थस्य च संबन्धोऽवश्यंभावी। स च अनुभाव्यत्वानुभावकत्वरूप एव न्याय्य इति सिद्ध्यति पदानामन्वयेऽपि शक्तिः।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**भाट्टोक्ताक्षेपाः - समाधयश्च**

अथाभिहितान्वयवादिभिः भाट्टैरन्विताभिधानवादेऽभिहिता आक्षेपाः, तेषाञ्च गुरुमतस्थैरुक्तसमाधयश्च निरूप्यन्ते। उत्तमवृद्धप्रयुक्तवाक्यं श्रुत्वा कार्यविशेषे प्रवर्तमानं मध्यमवृद्धं पश्यन् व्युत्पित्सुर्बालः 'इमानि पदानि एतदर्थबोधकानि' इति व्युत्पद्यते। तत्काले च तेन पदानामितरान्वितेष्वेवार्थेषु शक्तिर्गृह्यत इति निर्विवादम्। अतश्च व्युत्पत्त्यनुरोधेन सर्वदा शब्दानामन्वितार्थविषयकशाब्दजनकत्वमेव न्याय्यम् - इति हि गुरुमतम्।

**अन्यथाख्यात्यनङ्गीकारात् कथं विशिष्टे शक्तिग्रह इत्याक्षेपः**

१) अत्रेदं वक्तव्यम् - प्राभाकरमते विशिष्टज्ञानेनैव सर्वोऽपि व्यवहार इति नास्ति नियमः। संवादिप्रवृत्तिमात्रस्य विशिष्टज्ञानसाध्यत्वाभ्युपगमात्। शुक्तौ 'इदं रजतम्' इति जायमानज्ञानमयथार्थमिति व्यपदिश्यमानं तावन्नैकं विशिष्टज्ञानम्। तज्ज्ञानानन्तरं हि जायमाना प्रवृत्तिर्विसंवादिनी भवति। तत्र 'इदम्' इति प्रत्यक्षात्मकं पुरोवर्तिविषयकज्ञानं, 'रजतम्' इति च तद्विषयकस्मरणम्। स्मृतस्य रजतस्य प्रत्यक्षितस्य पुरोवर्तिपदार्थस्य चासंसर्गाग्रहादेव प्रवृत्तिर्जायत इति तदभिमतम्। एवञ्च पुरोवृत्तिपदार्थे शुक्त्यादिरूपे इष्टस्य रजतादेर्यो भेदो विद्यते तस्याऽग्रहादेव भवति प्रवृत्तिः, न तु पुरोवर्तिनि रजतत्वविशिष्टविषयकज्ञानात् प्रवृत्तिः। तथा सत्यन्यथाख्यातिस्वीकारापातात्। गुरवो ह्यख्यातिवादिनः। एवञ्च व्युत्पित्सुर्जनः मध्यमवृद्धस्य प्रवृत्त्या विशिष्टज्ञानमनुमाय पदानां विशिष्टविषयकशाब्दबोधजनकत्वस्वभावं निश्चिनुत इति वक्तुं न शक्यते। मध्यमवृद्धस्य प्रवृत्तिर्ह्यसंसर्गाग्रहेणाऽपि भवितुमर्हति। प्रवृत्तिसामान्यस्य विशिष्टविषयकज्ञानजन्यत्वनियमे एव तथानिश्चयस्संभवतीति।

**तत्समाधानम्**

अत्रेदं समाधानम् - सत्यं, प्रवृत्तिर्द्विविधा संवादिनी, विसंवादिनी च। विसंवादिप्रवृत्तौ इष्टभेदाग्रहोऽसंसर्गाग्रहो वा कारणम्। किन्तु संवादिप्रवृत्तौ सर्वत्र विशिष्टविषयकज्ञानमेव कारणम्। मध्यमवृद्धस्य प्रवृत्तिः संवादिन्येव। यतो हि व्युत्पित्सुर्बालः संवादिनीं प्रवृत्तिं दृष्ट्वैव व्युत्पद्यते। 'घटमानय' इत्युत्तमवृद्धप्रयुक्तवाक्यं
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

श्रुत्वा मध्यमवृद्धेन घट आनीत एव मध्यमवृद्धो घटमानयति, सा च प्रवृत्तिस्सफलैवेति तस्यां प्रवृत्तौ विशिष्टविषयकज्ञानस्यैव कारणत्वात्, पदानां विशिष्टविषयक-ज्ञानजनकत्वनिश्चयो जायत इति न काचित् क्षतिः।

२) ननु संवादिप्रवृत्तिरपि क्वचिदसंसर्गाग्रहजन्याऽभ्युपपगन्तव्या। तथाहि निर्धूमे वह्निमति पर्वते बाष्पं धूमत्वेन गृह्णन् कश्चित् वह्निमनुमिनोति। ततश्च वह्नौ प्रवर्तते। वह्न्यर्थिनस्तस्य प्रवृत्तिश्च संवादिन्येव भवति। किन्तु तदिहं 'पर्वतः धूमवान्' इति ज्ञानं न विशिष्टविषयकं गुरुणा वक्तुं शक्यं, धूमाभाववद्विषयकत्वादन्यथाख्यात्यापातात्। अतश्च 'पर्वतः धूमवान्' इति धूमासंसर्गाग्रह इति वक्तव्यम्। पुरोवर्तिनि पर्वते धूमशून्ये यो धूमासंसर्गः, तदग्रहादेव प्रवृत्तिरिति। एवञ्च सफलाया अपि प्रवृत्तेरसंसर्गाग्रह-जन्यत्वसंभवात्, मध्यमवृद्धस्य संवादिनी प्रवृत्तिः विशिष्टज्ञानजन्यैवेति वक्तुं नावकाशः।

अत्रोच्यते - पूर्वोक्तस्थले 'पर्वतो धूमवान्' इति न विशिष्टज्ञानं, किन्तु धूमासंसर्गाग्रह इति तु सत्यम्। तस्य पर्वतस्य धूमशून्यत्वात्। तथापि तत्र संवादिप्रवृत्तेः कारणं न धूमासंसर्गाग्रहः, किन्तु तदुत्तरा वह्न्यनुमितिरेव। वह्न्यर्थी किल पर्वते प्रावर्तत। तत्प्रवृत्तेश्च स्वसमानविषयकवह्निविषयकज्ञानं यथार्थमेव कारणम्। अतश्च संवादिप्रवृत्तेः सर्वत्रापि विशिष्टज्ञानजन्यत्वाव्याहतेः बालानां प्रथमव्युत्पत्तिः वृद्धव्यवहारजन्या विशिष्टविषयिण्येवेत्यत्र न कश्चिद्दोषः।

**गुरुमते न लाघवमित्याक्षेपः**

३) नन्वभिहितान्वयवादे शक्तिद्वयत्रयस्वीकारापाताद्गौरवमिति यदुक्तं, तन्न। अस्मिन्नप्यन्विताभिधानवादे शक्तित्रयस्वीकारावश्यकत्वात्। तथाहि - अभिहितान्वयवादे पदेषु पदार्थाभिधानानुगुणा शक्तिरेका स्वीकर्तव्या, अथ च पदार्थानां वाक्यार्थावगमकत्वस्वीकारात् पदार्थेषु वाक्यार्थावगमानुगुणा शक्तिरपरा स्वीकर्तव्या, किञ्च पदाभिहितैरेव पदार्थैः वाक्यार्थावगमात् पदेषु पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिः काचित् स्वीकर्तव्या। इत्थञ्च शक्तित्रयमभिहितान्वयवादिभिः स्वीकर्तव्यमेव। तथैवाऽन्विताभिधानवादिभिरपि शक्तित्रयमास्थेयम्। तथाहि - पदेषु स्वार्थस्मारकत्वशक्तिः प्रथमं स्वीकर्तव्या। अथ च पदानामेवाऽन्विताभिधायकत्वस्य

स्वीकारादन्विताभिधानानुगुणा शक्तिः, अन्वितविषयकानुभवजननशक्तिः काचित् स्वीकर्तव्या। किञ्च तावत्पदविषयकस्मरणेऽन्विताभिधानानुकूला शक्तिरपराप्यास्थेया, यतो हि 'रामः ग्रामं गच्छति' इति प्रयोगे यदैव सर्वाणि पदान्येकस्मृत्यारूढानि भवन्ति, तदैवान्विताभिधानं भवति। 'रामः' इति 'ग्रामम्' इति 'गच्छति' इति च पृथक् पृथक् प्रयोगे न हि भवति शाब्दबोधः। अतश्च तावत्पदविषयकस्मरणेऽप्यन्विताभिधानानुकूला शक्तिरवश्यमभ्युपेयेति शक्तित्रयस्याऽस्मिन्नपि पक्षे स्वीकर्तव्यत्वात् कथं लाघवमिति।

**तत्समाधानम्**

अत्रोच्यते - भाट्टमते शक्तिपञ्चकस्य स्वीकर्तव्यत्वाद्गौरवं दुरुद्धरमेव। तथाहि 'रामो ग्रामं गच्छति' इति स्थले रामादिपदं स्वस्वार्थमुपस्थापयति। किन्तु पदान्तरेणाऽर्थान्तरस्याऽनुपस्थितौ न भवति शाब्दबोधः। शाब्दबोधो हि सर्वपदानामन्वयविशेषविषयकः। अन्वयप्रतियोगिभूतानां कतिपयपदार्थानामनुपस्थितौ न हि विशिष्टान्वयविषयकशाब्दबोधो भवितुमर्हति। एवञ्च यावता पदार्थान्तरमर्थान्तरं नोपस्थापयति तावता नाऽन्वयबोधो भवति। अतश्च भाट्टमते प्रथमतस्सर्वे पदार्थाः परस्परमनन्विता अभिधीयन्त इति वक्तव्यम्। ततश्च तावत्पदार्थविषयकमेकं स्मरणमेष्टव्यम्। एकस्मृत्यारूढेभ्यः सर्वेभ्यः पदार्थेभ्यः वाक्यार्थप्रतिपत्तिर्जायत इति वक्तव्यम्। एवञ्च गुरुमत इव भाट्टमतेऽपि सर्वपदार्थानामेकस्मृत्यारूढत्वावश्यकतया गौरवमतिरिच्यत एव। उक्तञ्च बृहट्टीकायां वार्तिककारैः -

**तेऽपि नैवाऽस्मृता यस्माद्वाक्यार्थं गमयन्ति नः।**
**तस्मात् तत्स्मरणेष्वेव संहतेषु प्रमाणतः।।**

इति। एतेन शक्तिपञ्चकमभ्युपगन्तव्यमित्यायातम्। तथाहि - पदानां स्वार्थाभिधानशक्तिरेका, तेषामेव स्वार्थस्मरशक्तिरपरा चाङ्गीकार्या। भाट्टमते हि पदैः पदार्थाभिधानं पदार्थस्मरणापेक्षया विलक्षणं, न नैय्यायिकवत् पदार्थाभिधानं नाम सङ्केतरूपं वृत्त्या पदजन्यपदार्थस्मरणमिति तदिष्टम्। अथ च पदार्थेषु वाक्यार्थावगमानुकूला शक्तिस्तृतीयाऽपि स्वीकर्तव्या। किञ्च पदार्थनिष्ठवाक्यार्थावगमशक्त्यनुकूला शक्तिः पदेष्वभ्युपेया। अथ चैकस्मृत्यारूढानामेव पदार्थानमन्वयबोधजनकत्वसंभवात्

तावत्पदार्थविषयकस्मरणेऽभिधानानुगुणा काचित् शक्तिः पञ्चम्यपि स्वीकर्तव्या - इति शक्तिपञ्चकस्वीकारावश्यकत्वात् भाट्टमते गौरवं दुरुद्धरमेवेति। **संहत्यार्थमभिदधति पदानि वाक्यम्** इति शबरस्वामिप्रोक्तं वाक्यलक्षणम्। तेन पदानामेव वाक्यत्वं लब्धम्। पदानामेव च प्रमाणत्वमुक्तं भवति। भाट्टाभिमतं पदार्थगतप्रमाणत्वन्तु नोक्तमिति तु द्रष्टव्यम्।

**भाट्टमते पदनिरपेक्षं शाब्दे पदार्थभानम् - अतो लाघवमित्याक्षेपः**

४) ननु भाट्टपक्षे शक्तिपञ्चकस्वीकारावश्यकतेति यदुक्तं, तन्न। शक्तित्रयेणैव निर्वाहात्। तथाहि - उक्तशक्तिपञ्चके तावत् पदार्थनिष्ठा वाक्यार्थावगमकशक्तिः, अथ पदनिष्ठा पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिरिति शक्तिद्वयं नापेक्षितमेव। पदगन्धं विनाऽपि पदार्थैः वाक्यार्थबोधसंभवात्। तथाहि कश्चित् पुरुषः श्वैत्यरूपमात्रं निराधारं गृह्णाति ह्रेषाशब्दञ्च श्रृणोति। तेन च सः अश्वमनुमिनोति। ततः खुरविन्यासशब्दश्रवणेन धावनक्रियामनुमिनोति। धावनञ्च कस्य धर्मिण इति न तेन परिज्ञातम्। किन्तु श्वैत्यदर्शनह्रेषाश्रवणजनिताश्वानुमितिं खुरशब्दश्रवणजनितधावनानुमितिञ्चादाय 'श्वेतोऽश्वो धावाति' इति वाक्यार्थज्ञानं प्राप्नोति। अपि च कवीनां काव्यरचनस्थलेऽपि पदनिरपेक्षं पदार्थजनितवाक्यार्थबोधः स्वीकर्तव्यः। **अर्थं बुद्धा शब्दरचना** इति न्यायेन वाक्यविशेषरूपकाव्यनिर्माणे वाक्यार्थविषयकावगमेन पूर्वं भाव्यम्। तत्र च यो वाक्यार्थावगमः पूर्वभावी, न सः पदेभ्यः, तस्य वाक्यार्थावगमस्य पूर्वतनवाक्यजन्यत्वे स्मृतिरूपत्वे वा काव्यस्याऽनुवादकत्वमायात्, न तु नूतनत्वम्। अतश्च काव्यनिर्माणानुगुणा वाक्यार्थावगतिः कवेर्न पदजन्येति सर्वैरङ्गीकार्यम्। एतावता 'श्वेतोऽश्वो धावति' इति ज्ञानस्थले काव्यनिर्माणस्थले च पदनिरपेक्षं पदार्थविषयकशाब्दबोधः जायत इति सिद्ध्यतीति मत्वा न पदार्थेषु वाक्यार्थवगमकशक्तिः, पदेषु वा तदनुगुणा शक्तिः कल्पनीयेति।

**तत्समाधानम्**

‘श्वेतोऽश्वो धावति' इति ज्ञानं, विना पदप्रयोगं न शाब्दबोधात्मकं संभवति। श्वैत्यं - प्रत्यक्षीकृत्य तदधिकरणे ह्रेषाध्वनेः खुरनिक्षेपशब्दस्य च प्रतीतौ, ‘श्वेतोऽयमश्वः,

ह्रेषाशब्दवत्त्वात्' इत्यनुमित्यात्मकस्यैव तज्ज्ञानस्य संभवात्। न च श्वैत्यं ह्रेषाशब्दः खुरनिक्षेपशब्दश्च स्वरूपत एवावगताः, न तेषां सामानाधिकरण्यं गृहीतम्, अगृहीते च सामानाधिकरण्ये न हि संभवत्यनुमानम्। न हि धूमवह्न्योः सामानाधिकरण्येऽनवगते धूमाद्वह्निमनुमितिरुदेति, अतो नानुमानसंभव इति वाच्यम्। ज्ञानस्य अर्थापत्तिप्रमाण-जन्यत्वस्वीकारेण क्षत्यभावात्। अश्वातिरिक्तद्रव्यस्याभावनिश्चये 'श्वेतोऽश्वो धावति' इति ज्ञानं जायते, जीवतो देवदत्तस्य गृहेऽसत्त्वज्ञानाद् बहिः सत्त्वज्ञानमिव।

किञ्च 'श्वेतोऽश्वो धावति' इति धीः पदार्थसामर्थ्यात् जायत इति स्वीकारे, प्रमाणान्तरस्वीकारापातः, शब्दस्य तत्राऽसत्त्वात्, शब्देऽन्तर्भावासंभवात्। अस्मन्मते पञ्चप्रमाणानि, भवन्मते च षड्प्रमाणानि सिद्धानि, न तेष्वन्तर्भवतीदम्। न खलु भाष्यकारादिभिः 'श्वेतोऽश्वो धावति' इति ज्ञानार्थं पृथक् प्रमाणं परिगणितम्।

अत्राऽयं विशेषोऽवधेयः - सामानाधिकरण्ये ज्ञातेऽनुमितिः, अज्ञाते चाऽर्थापत्तिरिति भाट्टमतम्। सामानाधिकरण्यं विनाऽप्यर्थापत्तिः प्रवर्तत इति निरूपितं शास्त्रदीपिकायामर्थापत्तिप्रकरणे। 'जीवन् देवदत्तः यतो गृहे नास्ति, अतो बहिरस्ति' इत्युक्तौ गृहाभावबहिसत्त्वयोः देवदत्ते सामानाधिकरण्यं प्रतीयते। परन्तु तत्र सामानाधिकरण्यं नास्तीत्युपपाद्यऽर्थापत्तेः प्रवृत्तिरुपपादिता वर्तते। अपि च 'श्वेतोऽश्वो धावति' इत्ययं बोधः शाब्द इत्यत्र किं प्रमाणं पर्वते वह्न्यनुमित्युत्तरं 'पर्वते वह्निमनुमिनोमि' इति भवत्यनुव्यवसायः। स एव वह्निज्ञानस्यऽनुमितित्वे मानम्। तथा 'श्वेतोऽश्वो धावति' इति बोधोत्तरं 'धावन्तं श्वेतमश्वं शृणोमि' इति वा 'शाब्दयामि' इति वा न कस्यचिदनुव्यवसायो जायते। अतश्च तज्ज्ञानस्य शाब्दत्वे न किञ्चित् साधकमानं, प्रत्युत बाधकमेव वर्तत इति निरूपितम्।

किञ्च काव्यरचनाहेतुभूतं पदार्थसंसर्गज्ञानमपि मानसात्मकं स्वीक्रियते। न च मानसं तत् स्मृत्यात्मकं यदि तर्हि गृहीतविषयत्वाज्ज्ञानस्य तत्प्रयुक्तं काव्यमप्यनुवादकं स्यात्, नूतनत्वं न भजेदिति वाच्यम्। मानसत्वेऽपि ज्ञानस्य दोषाभावात् काव्यरचनाहेतुभूतमानसज्ञाने केचन पदार्थाः स्मृताः। अन्ये च नूतनतया

प्रमाणान्तरावगताः। सर्वेषाञ्च तेषां विशिष्टज्ञानमिदं मानसं स्वीक्रियते। अतश्च कविः नूतनानर्थानपि काव्ये निबध्नातीति संभवति।

**विशिष्टे शक्तिरयुक्तेत्याक्षेपः**

५) ननु तथाऽपि पदानां न विशिष्टे शक्तिः, तथाहि - लोके 'को गच्छति' इति प्रश्ने 'राजा गच्छति' इत्य्त्तरं दीयते। तत्र पदार्थानामन्वयबोधजननसामर्थ्यं दृष्टमस्ति। न हि तत्र क्रिया काचित् प्रवर्त्यते। अयमाशयः – 'आनय' 'आनयेत्' इत्यादिकार्यतावाचकलिङादिसत्त्व एव प्रवर्तना ज्ञायते, ततश्चाऽन्यः प्रवर्तते। शास्त्रदीपिकाकारैरप्युक्तम् – 'कोऽसौ?' इति पृष्टे 'पाञ्चालः' इति। इदं वेदान्तदेशिकैरप्यनूदितम् - कोऽसौ पाञ्चाल इत्याद्युचितविरतिकं सिद्धमात्रेऽपि वाक्यम् इति। तत्र 'कोऽसौ' इति पृष्टे 'पाञ्चाल' इति उत्तरं दत्तम्। तत्र न क्रियाबोधकं पदमस्ति। गच्छतीत्युक्तावपि क्रियाप्रवृत्तिर्न भवति। एवञ्चाऽन्विताभिधानमित्यस्य 'कार्यान्विताभिधानम्' इत्यर्थः भवदभिमतः। कार्यतावाचकलिङादिकं नास्ति चेत् कार्यान्वितार्थबोधकत्वमपि न संभवति। तथापि शाब्दबोधः, व्युत्पत्तिश्च लोके जायते। अतोऽन्विते शक्तिरिति वादोऽप्रामाणिक इति।

**तत्समाधानम्**

अत्रोच्यते - अत्यल्पमेतत्। शक्तिग्राहकप्रमाणेषु मूर्धन्यं प्रमाणं वृद्धव्यवहार एव। जनाः शब्दार्थनिर्णयं व्यवहारेणैव अवगच्छन्ति। तत्र कार्यतावाचकपदप्रयोगे एव व्युत्पत्तिर्भवति। यत्र कार्यतावाचकं पदं नास्ति तत्र कार्यतावाचकं लिङादिकमध्याहर्तव्यम्। 'चैत्रः पुत्रस्ते जातः' इत्यत्र 'तं पश्य' इत्यध्याहर्तव्यम्। तदानीमेव बोधो भवति। ननु प्रथमव्युत्पत्तिकाले कार्यतावाचकं लिङादिकमपेक्ष्यताम्। अनन्तरं कुतः? 'ग्रामं गच्छ', 'नगरं गच्छ', 'ग्रामं पश्य' इत्यादि कार्यतावाचकलिङादिघटितवाक्यं बहुशः श्रुत्वाऽऽवापोद्वापाभ्यां तत्तत्पदानां पदानामर्थोऽवगम्यते। तदनन्तरं स्वयं 'ग्रामं गच्छति' इति प्रयुज्यते। तत्राऽन्विताभिधानं न स्वीकर्तव्यम्। प्रथमव्युत्पत्तिकाले मध्यमवृद्धः प्रवर्तत इति हेतोः कार्यान्विते व्युत्पत्तिर्भवतु, अनन्तरं तु सः अंशस्त्याज्य एवेति चेत्, मैवम्, उपजीव्यविरोधात्।

प्रथमव्युत्पत्तिकाले कार्यत्वान्वित एव अर्थे व्युत्पत्तिसत्त्वाद् द्वितीयादिबोधोऽपि कार्यत्वान्वितविषयक एव स्वीकर्तुमुचितः - इति।

**अन्वयेऽन्विते च शक्तिकल्पनागौरवमित्याक्षेपः**

६) नन्वन्विते शक्तिस्वीकारेऽन्वयेऽन्विते च शक्तिरिति गौरवं प्रसजति। अन्वितो नाम अन्वयवान्। अतो विशेषणेन्वये, विशेष्येऽन्विते च शक्तिः स्वीकर्तव्येति।

**तत्समाधानम्**

मैवम्। अन्वितो हि सर्वदाऽन्वयवानेव भवति। यथा घटं विना पटः तिष्ठति, तथाऽन्विताः पदार्था अन्वयं विना न तिष्ठन्ति। पदार्था ह्यन्वयवन्त एव दृष्टाः। तत्रोदाहरणमाकलनीयम् - जातिशक्तिवादे जातिशक्तात् पदात् जातौ प्रतीयमानायां व्यक्तिरपि प्रतीयते। न हि व्यक्तिं विना जातिः प्रतीयते। जातिर्हि व्यक्तेराकारः। न ह्याकारस्याऽऽकारिणं विनां प्रतीतिः। उक्तं प्रकरणपञ्चिकायां -

**अन्वितेषु पदैरेव बोध्यमानेषु शक्तिभिः।**
**अन्वयोऽर्थगृहीतत्वान्नाऽन्यां शक्तिमपेक्षते॥**

अन्वयः, अर्थगृहीतत्वात् = अर्थतो गृहीत इति कृत्वाऽन्यां शक्तिं नापेक्षते। इदमपि तत्रोक्तं -

**प्रतियन्नन्वयं यस्मात् प्रतीयात् अन्वितं पुमान्।**
**व्यक्तिं जातिमिवाऽर्थोऽसाविति सम्परिकीर्त्यते ॥**

इति। जातावेव शक्तिस्वीकारे व्यक्तिः कथं ज्ञायते इति चेत्, लक्षणया ज्ञायत इति भाट्टाः, अर्थापत्त्येति प्राचीनभाट्टाः। भेदाभेदस्वभावादिति केचनाऽन्ये भाट्टाः वदन्ति। नैयायिकास्तु जातिविशिष्टव्यक्तौ शक्तिरिति। प्राभाकराणान्तु सुलभो मार्गः। यथाहि हस्तिहस्तिपकयोः बहुशः साहचर्येण गृहीतयोरन्यतरस्य हस्तिपकस्य पृथग्दर्शने सति, एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति नीत्याऽपरस्य हस्तिनः स्मरणं भवति। तद्धि स्मरणं हस्तित्वप्रकारकम्। न हि तेन हस्तिपकेन साकं हस्तित्वस्य सम्बद्धो गृहीतः। अयं पाल्यपालकभावादिसंबन्धो हस्तिहस्तिपकयोरेव किल। तथापि हस्तित्वं ज्ञायते यथा तथैव शब्दस्य जातेश्च संबन्धे गृहीते शब्दे श्रुते जातिः स्मर्यते। जात्याश्रयो व्यक्तिरपि

स्मर्यते, तेन अपृथक्सिद्धत्वात्। अपृथक्सिद्धिरिति पदमसकृदुपयुज्यते शास्त्रदीपिकायाम्। तथा चाऽन्वयेऽन्विते च शक्तिद्वयं नास्ति। अन्विते शक्तिस्वीकारेणैवऽन्वयस्यापि भानसंभवात्।

**प्रकारान्तरेणऽन्विताभिधानासंभवाक्षेपः**

७) नन्वन्विताभिधानं वक्तुं न युज्यते, दोषत्रयसंभवात्। अन्वयप्रतियोगिनो ह्यनन्ताः सन्ति। यथा 'ग्रामं गच्छति' इत्यत्र क्रियापदस्यऽन्वयविशिष्टे गमने शक्तिर्वाच्या। अन्वयप्रतियोगिनस्तु ग्रामनगरादयो देवदत्तयज्ञदत्तादय इतरकारकाणि च। एकैककारकमप्यनन्तव्यक्तिकम्। अतोऽन्वयप्रतियोगिनामानन्त्यादन्वयोऽप्यनन्तः। ननु सामान्यतोऽन्विताभिधानं ब्रूमः, न विशेषतः। अतो यत्किञ्चिदन्वितमात्रमत्र उच्यते इति चेन्न। अन्विताभिधानं नाम विशेषरूपेणाऽन्विताभिधानम्। अन्यथा शब्दवैयर्थ्यप्रसङ्गात्। न हि शब्दः सामान्यतो यत्किञ्चिदन्वितं ग्रामं, सामान्यतो यत्किञ्चिदन्वितं गमनं च ब्रूते, अनुभवविरोधात्। ग्रामान्वितगमनं, गमनान्वितग्रामश्च वाक्यादवसीयते। वाक्याद्धि विशेषान्वय एव ज्ञायते। अतोऽन्वयानन्त्यादन्विताभिधानं नोपपद्यत एव। किञ्च प्रतियोगिनामानन्त्यात्, अन्विता अप्यनन्ता इति शक्तिग्रहणं दुःशकम्।

अपि च एकं पदमितरपदार्थान्वितं स्वार्थं यदि अभिधत्ते तर्हि एकेन पदेनैव अर्थः ज्ञात इतीतराणि पदानि व्यर्थानि। यदि पदान्तरेणाऽभिधानं प्रथमतो भवति, अनन्तरं तदभिहितार्थान्वितं स्वार्थं ब्रूते, तर्ह्यन्योन्याश्रयः। एकं पदं स्वार्थमभिधत्ते चेदेवाऽभिहितस्वार्थान्वितपदान्तरार्थं पदान्तरमभिदध्यात्। पदान्तरेण तदर्थोऽभिधीयते चेदेव तदन्वितस्वार्थमिदं पदमभिधत्ते। अतश्च पदानामर्थाभिधानेऽन्योन्याश्रयो दुरुद्धरः।

अपि च सर्वाणि पदानि इतरान्वितस्वार्थबोधकानि चेत् वाक्यभेदापत्तिः। ‘ग्रामं गच्छति’ इत्यत्र ग्रामपदं गमनान्वितग्रामं बोधयति, गम्धातुः ग्रामान्वितगमनं बोधयति। ततश्च वाक्यार्थद्वयं सम्पन्नमिति वाक्यभेदो दोषः। एकैकं पदं वाक्यार्थं यदि बोधयेत् तर्हि ‘रामः ग्रामं गच्छती’त्यत्र बहूनि वाक्यानि भवेयुः।

इत्थञ्चाऽन्विताभिधानवादे प्रतियोगिनामानन्त्यात् शक्तिग्रहासंभवः, अन्योन्याश्रयः, प्रतिपदं वाक्यभेदश्च दोषाः पतिताः।

**तत्समाधानम्**

**आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान् ।**
**स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदि ।**
**आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन ।**

इति प्रकरणपञ्चिका। आकाङ्क्षा सन्निधिः योग्यता चेति त्रयाणां शक्तिग्रहे उपलक्षणत्वस्वीकारान्न प्रथमो दोषः। तथाहि, वस्तुत आकाङ्क्षासन्निधियोग्यता-विशिष्टान्वितस्वार्थं पदानि बोधयन्ति। ततश्च विशिष्य तत्त्वेन रूपेणाभिधानापेक्षा नास्ति। सामान्यतोऽन्विताभिधानमपि नास्ति। विशिष्य किञ्चित्पदार्थस्य प्रतियोगित्वेनाऽन्वयोऽत्र न बोध्यते चेत् व्यर्थता, विशेषरूपेणाऽन्वयो बोध्यते चेदानन्त्यमित्याक्षेपः कृतः। तत्र ये ये पदार्थाः अन्वयप्रतियोगिनः, तेषां सर्वेषामपि तदादिपदस्थले बुद्धिस्थत्वेनाऽनुगम इवाऽऽकाङ्क्षायोग्यतासन्निधिभिरुपलक्षणैरनुगमः स्वीक्रियते। आकाङ्क्षा नाम अन्वयप्रतियोगिजिज्ञासा। सन्निधिश्च शब्देनैव भवतीति निर्बन्धो नास्ति। अध्याहृतेनाप्यन्विताभिधानं सम्भवति। द्वारमित्युक्ते पिधेहीत्यप्रयोगेऽपि पिधान-रूपार्थस्मरणात् पिधानेनापि साकमन्वयो द्वारपदार्थस्य भवितुमर्हति। अयमेव विशेषः भाट्टानां प्राभाकराणां च। भाट्टमते एकमपि पदं विना श्वेतोऽश्वो धावतीतिवाक्यार्थबोधः स्वीकृतः। एतेषां मते एकं पदं विहाय कुत्रापि शाब्दबोधः न भवति। परन्तु क्वचिदपेक्षितपदाभावेऽर्थोऽध्याह्रियते। अध्याहारो नाम स्मरणम्। अर्थः स्मर्यते इति यावत्। योग्यता नामाऽन्वयप्रयोजकधर्मः इत्युच्यते। योग्यो योऽर्थः तस्योपस्थापनेन अनुपपत्तिः शाम्यति। अयमाशयः - अन्विताभिधानस्याऽनुपपत्तिर्भवति। यद्यपेक्षितं पदं न श्रुतं तदाऽन्विताभिधानानुपपत्तिपरिहाराय योग्योऽर्थोऽध्याह्रियते। अध्याहृतार्थेनाऽन्वये सत्यन्विताभिधानं सङ्गच्छते। योग्यता नाम अन्वयप्रयोजकधर्मः। 'घटेन जलमाहर' इत्युक्ते घटे छिद्रेतरत्वमपि भासते। यदि घटः छिद्रयुक्तः भवति तदानीं तेन घटेन जलाहरणं कर्तुं न शक्यते। छिद्रेतरेण घटेन जलमाहर इति तु नोक्तम्। तथापि घटे भासमाने छिद्रेतरत्वमपि भासते। 'वह्निना सिञ्चति' इत्यत्र तु योग्यता नास्ति। न हि वह्निना सेकः कर्तुं शक्यते इति। तथा च आकाङ्क्षायोग्यतासन्निधिभिः उपलक्षिता ये

अन्वयप्रतियोगिनः पदार्थाः, ते तावदन्विताभिधानस्य लक्ष्याः। एवञ्चाऽऽनन्त्यं नास्ति, सर्वेषां प्रतियोगिनामुपलक्षिततत्वात्, तदादिसर्वनामशब्दस्थले बुद्धिस्थत्वेन घटादीनामिव।

अत्रेदं बोध्यम् - प्रतियोगिविशिष्ट एव शक्तिग्रहः । सर्वेऽपि प्रतियोगिनः कथं ज्ञायन्त इति चेत् तत्त्वेन ज्ञातुं न शक्यन्त एव, असर्वज्ञदुर्ज्ञेयत्वात्। परन्तु आकाङ्क्षायोग्यतासन्निधिभिः उपलक्षितानि सर्वाणि कार्यप्रतियोगीनि। यथा - 'देवदत्तः ग्रामं गच्छति, तमानय' इत्यत्र तच्छब्देन देवदत्तः उच्यते। 'यज्ञदत्तः ग्रामं गच्छति, तं पश्य' इत्यत्र तच्छब्देन यज्ञदत्तः उच्यते। 'घटस्तत्र वर्तते, तमाहर' इत्यत्र तच्छब्देन घट उच्यते। एवञ्च तच्छब्दः तत्र तत्राऽन्यमन्यमर्थं बोधयति। तेष्वर्थेषु तच्छब्दस्य कथं व्युत्पत्तिरिति चित्, बुद्धिस्थत्वेनाऽनुगतेषु सर्वेषु पदार्थेषु तच्छब्दस्य व्युत्पत्तिः। बुद्धिस्थः कुत्रचित् यज्ञदत्तः, क्वचित् देवदत्तः, क्वचित् घटः, कुत्रचित् पटः। तच्छब्दः विशेषरूपेण स्वार्थं न बोधयति, किन्तु सामान्यतः। अत एव "सर्वनाम्ना उपस्थितव्यक्तिविशेषपरामर्शत्वात्" इति उच्यते। तद्वत् अत्रापि भवितुमर्हति।

**अन्योन्याश्रयपरिहारः**

किञ्च एकं पदमन्विताभिधायकमिति नोच्यते। प्रथमतः तत्तद्पदं स्वस्वार्थं स्मारयति। संहतानि च पदान्यन्विताभिधायीनीति। 'देवदत्तः ग्रामं गच्छति' इत्यत्रैतानि पदानि संहतानि चेत् तत्राऽन्विताभिधायीनि भवन्तीत्येव स्वीक्रियते। ननु वृद्धव्यवहारकालेऽन्यपदार्थसंसृष्ट एव अर्थे व्युत्पत्तिरासादितेति भवदभिमतम्। एवञ्च सत्येकं पदमितरपदार्थसंसृष्टमर्थं नाऽभिदधाति, शुद्धमेकमर्थं स्मारयति इति कथं युज्यत इति चेन्न। सत्यम्, 'गामानय', 'गां बधान', 'अश्वमानय' इत्यादिवृद्धवाक्यात् मध्यमवृद्धप्रवृत्तौ व्युत्पित्सुः पार्श्वस्थः बालः 'बधान' इत्यस्य गवान्वितबन्धनमर्थः, 'अश्वमानय' इत्यत्राश्वान्वितबन्धनमर्थः इति व्युत्पद्यते। तथापि पदश्रवणकालानन्तरं सः सः अर्थः स्मर्यते। अनन्तरं केवलस्वार्थः स्मर्यते। ब्रह्मानन्दीयेऽयं विषय उक्तः - लोके विशिष्टानुभवः भवति चेदपि विशेष्यमात्रस्य स्मरणं भवति। तत्र वेदमधीयानेन बहुवाक्यविशिष्टमेकमनुवाकमावर्तयताऽपि कानिचन वाक्यानि न स्मर्यन्ते, कानिचन वाक्यान्येव स्मर्यन्ते। अभ्यासातिशय एवात्र निदानम्। तथैव विशेष्यमात्रस्य स्मरणम्,

अभ्यासाधिक्यात्। अभ्यासाधिक्ये हि संस्कारे वैशिष्ट्यं भवति। तत्र संस्कारातिशयो भवति चेत् स्फुटतरं स्मरणं भवति। संस्कारातिशयो नाम संस्कारबाहुल्यम्। एवञ्च 'गां पश्य', 'गामानय', 'गां बधान' इत्यादिप्रयोगेषु गोपदस्य यथा गोत्वादिना साहचर्यमधिकं भवति, न तथा बन्धनादिना साहचर्यम्। तथा बन्धधातोरपि बन्धनेन साहचर्यानुभवोऽधिकः, गवादिना साहचर्यानुभवो न्यूनः। यद्यपि प्रथमव्युत्पत्तिकाले बन्धधातुना गवान्वितबन्धनमेव बोध्यते। गवान्वितबन्धन एव व्युत्पत्तिः स्वीक्रियते। तथाप्यनन्तरकाले तत्तच्छब्दप्रयोगे तत्तदर्थस्यैव स्मरणं भवति। तथा च तत्तच्छब्दे प्रयुक्ते तस्य तस्याऽर्थस्य स्मरणं पदान्तरनिरपेक्षं भवति। तत्र च नान्योन्याश्रयः। स्मृतपदार्थैः इतरैः सह इदं पदं स्वार्थम् अन्वितं बोधयति। तदुक्तं -

**स्मृतिसन्निहितैरेवमर्थैरन्वितम् आत्मनः।**
**अर्थमाह पदं सर्वमिति नान्योन्यसंश्रयः।।**

इति। एतेनैव वाक्यभेदोऽपि परिहृतः। मिलितैरेव पदैर्वाक्यार्थबोधस्वीकारात्।

**अन्विताभिधानप्रक्रिया**

८) ननु भवन्मते शाब्दबोधोत्पत्तिप्रक्रिया केति चेदुच्यते - एकैकपदश्रवणे तत्तदर्थस्य स्मरणं भवति। अनन्तरम् एकस्मिन् स्मरणे सर्वे पदार्थाः आरूढाः भवन्ति। तत्र स्मरणे आरूढाश्चेत् आकाङ्क्षितयोग्यसन्निहितार्थान्तरान्वितार्थस्य स्वार्थस्य पदेन अभिधानं भवति इति प्रक्रिया। यथा 'देवदत्तः ग्रामं सत्वरं प्रातः गच्छति' इत्यत्र तत्र सर्वाणि पदानि स्वार्थं स्मारयन्ति। सर्वेषां पदार्थानाम् एकं स्मरणमपि अनन्तरं भवति। ततश्च देवदत्तपदेनान्विताभिधानम् - आकाङ्क्षितयोग्यसन्निहितपदार्थान्वितदेवदत्ताभिधानमेव भवति। तत्र बहवो हि पदार्था अन्वयप्रतियोगिनो वर्तन्ते। अस्मिन् वाक्ये इव 'देवदत्तः सत्वरं ग्रामं शुद्धः सन् गच्छति' इत्यादिवाक्येऽपि नैके इतरपदार्थाः सन्ति। तेषु हि आकाङ्क्षितयोग्यसन्निहितार्थ एव प्रतियोगितया अन्वेति इति स्थितिः। अन्विता ये भवन्ति तेषामानन्त्यात् शक्त्यानन्त्यम् इति क्लिष्टम् किल।

अन्वयप्रतियोगिनां सर्वेषां तावदनुगमात् शक्तिग्रहे क्लेशो नास्तीत्येकं समाधानमुक्तं पूर्वम्। अन्यदपि समाधानमुच्यते – एकं चक्षुरेकया दर्शनशक्त्या घटपटादिविषयकदर्शनं

साधयति। घटपटादिभेदेन दर्शनानि भिन्नानि। दर्शनशक्तिरेकाऽपि घटपटादिप्रतियोगिभेदेनऽनेकानि दर्शनानि साधयति। प्रतियोगि नाम सम्बन्धि इत्यर्थः। एवं शब्दोऽप्येकयाऽऽकाङ्क्षितयोग्यसन्निहितविषयिण्या शक्त्या तत्तत्प्रतियोगिबोधनं करोति। देवदत्तान्वितगमनम्, ग्रामान्वितगमनमित्यनयोः गमनयोः भेदः वर्तते, गमनमेकं चेदपि अन्वयप्रतियोगिनौ भिन्नौ इति कृत्वा तत्र भेदः वर्तते। चक्षुर्दृष्टान्तेन शब्दस्यैकस्य गम्धातोः देवदत्तान्वितगमनम्, ग्रामान्वितगमनमिति उभयबोधकत्वमस्त्येवेति विज्ञेयम्।

**भाष्यपङ्क्तिसमन्वयः**

९) ननु शबरस्वामिन एकं वाक्यं गृहीत्वा भाट्टा अभिहितान्वयवादं पठन्ति। एते च प्राभाकरा अन्विताभिधानवादं पठन्ति। तद्वाक्यस्य कथं समर्थनमिति। तद्वाक्यं च - **पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्थाः अवगताः सन्तः वाक्यार्थमवगमयन्ति** इति। यथाश्रुतार्थस्तु भाट्टानुसारी। पदानि स्वं स्वमर्थमभिधाय - अभिधानं कृत्वा, निवृत्तव्यापाराणि। पदानि पदार्थाभिधानं कुर्वन्तीति भावः। एतदनन्तरमिदानीं पदार्थाः अवगताः सन्तः वाक्यार्थमवगमयन्ति। तेन पदार्थानां वाक्यार्थावगमकत्वं ज्ञायते। पदार्था एव वाक्यार्थावगमे कारणीभूता इति शबरस्वाम्यभिप्रैति - इदमेव भाट्टमतम्। अतः इदं भाष्यवाक्यं कथं प्राभाकरमते सङ्गच्छते।

अत्रोच्यते - पदानामन्विताभिधानस्वीकारेऽन्वयस्य प्रतीत्यर्थं शक्त्यन्तरं स्वीकर्तव्यं स्यादित्याक्षेपसमाधानपरमिदं भाष्यवाक्यम्। गोपदं गोत्वजातौ शक्तम्। जातिश्च व्यक्तिं विना दुर्निरूपा। गोत्वमित्युक्तौ गोव्यक्तिज्ञानमपेक्षते। यथा शब्देन प्रतीयमाना जातिः व्यक्त्या सहैव प्रतीयते, शब्दस्य जातिप्रत्यायकत्वं स्वाभाविकं, तन्निमित्तकं व्यक्तिप्रत्यायकत्वं, तथैवाऽन्विताभिधायिनः पदस्याऽन्वितप्रत्यायकत्वं स्वाभाविकं, तन्निमित्तमन्वयप्रत्यायकत्वं, नातोऽन्यत् किमप्यपेक्ष्यतेऽन्वयप्रतिपादनार्थम्। प्राभाकरमते जातिशक्तिः स्वीक्रियते चेदपि व्यक्तिभानार्थं लक्षणादिकं न स्वीक्रियते। तद्वदेवात्राऽन्विते शक्तिरुच्यते चेदन्वयोऽपि ज्ञायत इति भावः।

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

इदानीं वाक्यसमन्वय उच्यते। पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि - स्वम् = आत्मीयमित्यर्थः। अर्थम् = अन्वितार्थम्। अभिधाय निवृत्तव्यापाराणि भवन्ति इत्यनेनऽन्विताभिधानमुक्तम्। अथेदानीं पदार्थाः = अन्वितपदार्थाः, अवगताः सन्तः वाक्यार्थमवगमयन्ति। वाक्यार्थो नाम अन्वयः। वाक्यार्थमवगमयन्तीत्यनेन हेतुहेतुमद्भावो नोक्तः। प्रयोज्यप्रयोजकभावस्तु अन्यः, हेतुहेतुमद्भावं विनाऽपि भवति। यथा - 'अयं मनुष्यः, अतः द्विपाद् भवति' इत्यत्र मनुष्यत्वप्रयुक्तत्वेऽपि द्विपात्वस्य मनुष्यत्वं न कारणं, किन्तु प्रयोजकम्।

**तद्भूतानां क्रियार्थेन समाम्नाय अर्थस्य तन्निमित्तत्वात्** इति वाक्याधिकरणसूत्रस्याऽप्येतदनुगुणोऽर्थो विज्ञेयः - अर्थस्य = अन्वितस्य अर्थस्य, तन्निमित्तत्वात् = वाक्यार्थं प्रति निमित्तत्वात्। वाक्यार्थो नाम अन्वयः। अन्वितोऽर्थोऽन्वयनिमित्तं भवति। अन्वयनिमित्तत्वं नामाऽन्वयप्रयोजकत्वमिति। अनया रीत्या प्रकरणपञ्चिकायामन्विताभिधानवादः समर्थितो वर्तते। "संहत्यार्थमभिदधति पदानि वाक्यम्" इति भाष्योक्तं वाक्यलक्षणमपि एतन्मतानुगुणम्। वाक्यार्थो यद्यपि नान्वयमात्रं, किन्तु अन्वयविशिष्टः तथापि एवमर्थवर्णने दोषो न विद्यते।

**पार्थसारथिमिश्रकृतानुवादः**

अन्विताभिधानवादखण्डनतत्परमूर्धन्यः पार्थसारथिमिश्रो
विस्तरेणऽन्विताभिधानवादमन्वददत्।

**न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शिनीं।**
**कुमारीलमतेनाऽहं करिष्ये शास्त्रदीपिकाम्।।**

इति प्रतिजानानोऽयं मिश्रः, प्राधान्येन प्राभाकरमतखण्डनार्थमेव शास्त्रदीपिकामारचयामास। तत्र च ग्रन्थेऽनूदीतोऽन्विताभिधानवादोऽत्र सङ्गृह्यते -

**पदार्थानेव वाक्यार्थं मिथः सङ्गतिशालिनः।**
**आचक्षतेऽभिधीयन्ते पदैरेष तदाभिधा॥**

इति प्रकरणपञ्चिकाकारिका। वाक्यार्थो नाम क इति जिज्ञासायां परस्परं सङ्गतिशालिनः पदार्था एव वाक्यर्थ इत्यभिधीयन्ते। सङ्गतिर्नामाऽन्वयः। परस्परमन्वयशालिनः पदार्था

एवाऽभिधीयन्ते पदैरिति भवति पदेष्वन्विताभिधानम्। नन्वन्विते पदानां शक्तिग्रहः कथं भवतीति चेदुच्यते - उत्तमवृद्धः, मध्यमवृद्धं प्रति किञ्चिद्वाक्यं वदति। तच्छ्रुत्वा मध्यमवृद्धश्च प्रवर्तते क्वचित्कार्ये। इदं पश्यन् व्युत्पित्सुर्बाल एवमनुमिनोति - विशिष्टार्थविषयकबोधोऽस्मादुत्तमवृद्धप्रयुक्ताद्वाक्यान्मध्यमवृद्धस्य समभूदिति। ततश्च पदसङ्घातरूपं वाक्यं वाक्यार्थवाचकं भवतीति निर्णीतम्। ननु तर्हि वाक्यस्य शक्तिः स्वीक्रियते किमिति चेन्न। वाक्ये न तावच्छक्तिः स्वीक्रियते, बहुगौरवापातात्। अल्पैरेव पदैरावापोद्वापभेदेन बहूनि वाक्यानि रच्यन्ते। दृश्यते हि केषाञ्चित् पुरुषाणां शब्दज्ञाने बहुस्वल्पेऽप्यनर्गलभाषणसामर्थ्यम्। कतिपयैः शब्दैरेव बहूनां वाक्यानां रचनसंभवात्। अतश्चैकैकवाक्यस्य पृथक्शक्तिस्वीकारे बहुगौरवं स्यात्। तदपेक्षया पदानामेव वाचकत्वस्वीकारो न्याय्यः। आवापोद्वापाभ्याञ्च पदेषु शक्तिर्निर्णीयते, तद्यथा 'गामानय' इत्युक्ते 'गामानय' इति प्रथमं श्रुत्वा, 'गां बधान' इति वाक्यान्तरं श्रृणोति बालः। तत्राऽऽदौ गवान्वितानयनं दृष्टम्। ततश्च गवान्वितबन्धनं परिज्ञातम्। उभयत्र गौरनुवर्तते। क्रिया तु भिद्यते। अथ च 'अश्वं बधान' इति वाक्यश्रवणेऽश्वबन्धनस्य च दर्शने सति बन्धनक्रियाया अनुवृत्तिर्गृह्यते। इत्थं गोपदस्य बन्धनान्वितगवि, बन्धधातोश्च गवान्वितबन्धन एव शक्तिरिति बालो व्युत्पद्यते। ततश्च पदानामन्वित एव शक्तिः सिद्ध्यति। ननु वाक्यार्थानामानन्त्यात् सङ्गतिग्रहो न संभवति। प्रतियोगिनामानन्त्यात् इति चेन्न। आकाङ्क्षायोग्यतासन्निधिभिरुपलक्षिता ये प्रतियोगिनः तदन्वितस्वार्थ एव पदैरभिधीयत इति पूर्वमेव दत्तोत्तरत्वात्।

ननु घटादिपदानामानयनान्वितघटादौ शक्त्यपेक्षया केवलघटादौ शक्तिस्वीकारे लाघवमिति चेदत्रोच्यते प्राभाकरैः - वाक्यार्थप्रतीतिस्तावत् किञ्चित्करणिका स्यात्। स्वरूपेणाऽभिधीयमानानां पदार्थानां तु वाक्यार्थप्रतिपादनसामर्थ्यं नैव संभवति। लोके ह्याकाङ्क्षादिमन्तोऽपि प्रत्यक्षादिभिः प्रमाणान्तरैरवगताः पदार्था व्यतिषङ्गविशेष-रूपान्वयप्रतिपादका न दृश्यन्ते। देवदत्तो हि प्रत्यक्षेण ज्ञातः। तस्य चाऽऽकाङ्क्षा वर्तते 'कोऽस्य पिता' इति। पार्श्वे उपविष्टो तत्पिता यज्ञदत्तः, तस्य योग्यता सन्निहितत्वञ्च वर्तते। अत आकाङ्क्षादिवैशिष्ट्येऽपि विना शब्दप्रयोगं न कश्चिन्निश्चिनोति 'अयमस्य पिता'

इति। अतश्चाऽऽकाङ्क्षायोग्यतासन्निधीनां सत्त्वेऽपि शब्दप्रयोगाभावे पदार्थान्तरस्याऽन्वय-प्रतियोगित्वेन बोधो न संभवति।

किञ्च भाट्टानां मते शक्तित्रयमभ्युपगन्तव्यमिति न लाघवं संभवति। पदानां पदार्थेऽभिधाशक्तिः, पदार्थानां वाक्यार्थबोधे शक्तिः, पदानां पदार्थगतवाक्यार्थ-बोधनशक्त्याधायकशक्तिश्चेति। अस्मन्मते चैकैव शक्तिरन्विते स्वीक्रियत इति भवति लाघवम्। अत्र किञ्चित् स्वारस्यमवधेयम् - स्मारकशक्तिरिति काचित् शक्तिः व्यवह्रियते। प्राभाकारैः किल तत्तत्पदेन केवलस्वार्थः स्मार्यत इत्युच्यते। तत्तदर्थस्मरणं प्रति पदेषु स्मारकशक्तिः स्वीकर्तव्येति कैश्चिदुच्यते। किन्तु प्राभाकाराः स्मारकत्वमित्येव व्यवहरन्ति, न तु स्मारकशक्तिरिति। एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमितिरीत्येव पदानां स्मारकत्वमभ्युपगतम्। न तु किञ्चित् स्मारकशक्तिरित्यतिरिक्तम्।

किञ्चाऽभिहितान्वयवादे शाब्दबोध उपपादयितुं न शक्यते। पदार्थकरणकः शाब्दबोधो न कथञ्चिद् भवितुमर्हति। पदार्थानां करणत्वे स्वीकृतेऽपि पदानां वाक्यार्थे तात्पर्यमवश्यमङ्गीकर्तव्यम्। अतश्च तात्पर्यविशिष्टानां प्रथमावगतानां पदानामेवाऽ-न्विताभिधायकत्वं स्वीकर्तुमुचितम्। इदञ्च

**प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।**
**पदानामेव सा शक्तिः वरमप्युपगम्यताम्॥**

इति पञ्चिकाश्लोकोक्तं पूर्वमेव निरूपितम्। न हि पदानि पदार्थावगतिः, प्रथमातिक्रमणे मानाभावादिति न्यायात्, उपजीव्यं प्रबलमिति न्यायाच्च। एवञ्च प्रथमावगतत्वात्, तात्पर्यवत्वात्, अभिधायकत्वाच्च, पदानां वाक्यार्थाभिधायकत्वं स्वीकर्तुं न्याय्यम्। तेन पदजन्यत्वात् शाब्दबोधस्य शाब्दत्वमपि सिद्ध्यति।

नन्वन्विताभिधानवादमते वाक्यार्थस्य शाब्दत्वं न घटते। पदार्थानामेव वाक्यार्थाक्षेपकत्वात्। तथाह्युक्तं शबरस्वामिना **सामान्यं पदार्थः, विशेषो वाक्यार्थः** इति। 'ग्रामं गच्छति' इत्यत्र गच्छतिपदार्थस्तावत् गमनसामान्यम्। तद्धि गमनं ग्रामकर्मकं वा, नगरकर्मकं वा, वनकर्मकं वा स्यात्। 'ग्रामम्' इति पदार्थस्याऽन्वये सतीदं गमनं ग्रामकर्मकमेव, न तु नगरादिकर्मकमेव इति विशेष एव वाक्यार्थ इत्युच्यते। ततश्च

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

निर्विशेषं न सामान्यं भवेच्छशविशाषाणवत् इति न्यायेन सामान्यस्य विशेषं विनाऽवस्थानासंभवात् सामान्यभूतस्य पदार्थस्यैव विशेषाक्षेपकत्वमिति पदार्थकरणत्वमेव शाब्दबुद्धेरुचितम् ।

मैवम् । 'गामानय' इत्यादौ गोपदेन गोसामान्यस्य प्रतिपादने सति किमाक्षिप्यत इति विचारणीयम् । अत्र कश्चिद्विशेषः स्यादित्येवाऽऽक्षिप्यते, न तु पदान्तरोपस्थापितो नियतविशेषः । तस्याऽऽक्षेपे वाक्यार्थस्य शाब्दत्वं स्यात् । तथा च पदार्थकरणकत्वमपगच्छेत् । पदार्थो हि किञ्चित् पदान्तरेणऽन्वये प्राप्त एव विशेषभूत आपद्यते । नियविशेषाक्षेपस्तु पदेन सामान्यविशेषे परिज्ञात एव संभवति । अतश्च पदस्य द्दढापेक्षकत्वात् पदार्थकरणकत्वं वक्तुं न शक्यते । अस्मन्मते तु सर्वं पदमाकाङ्क्षायोग्यतासन्निधिभिरुपलक्षितार्थान्तरान्वितमेव स्वार्थं बोधयतीति विशेषान्वय-प्रतीतिरुपपद्यते । अतश्च शाब्दत्वमस्मन्मते सूपपादमेव, नियतविशेषस्य शब्दतो लाभात् । भवन्मतेऽपि नियतविशेषस्य लाभाय पदापेक्षा विद्यत इत्यन्ततोऽस्मन्मतप्रवेश एव । न हि यत्किञ्चित्पदार्थान्तरान्वयेनऽऽकाङ्क्षा शान्तिर्भवति । एवमन्वयमन्योन्याश्रयप्रश्नोऽपि प्राभाकारैः समाहितः, स च अंशः पूर्वमेव प्रतिपादितः ।

**न्यायमञ्जरीगतविशेषः**

श्रीमज्जयन्तभट्टोऽतिविलक्षणन्यायमञ्जरीग्रन्थकारो बहुषु विषयेषु स्वाभिप्रायं विशेषतः प्रकटीकरोति । तेन चाऽभिहितान्वयवादं समर्थयता विस्तरेणाऽन्विताभिधानवादः प्रतिपादितः । तत्रत्यविशेषाश्चात्र सङ्गृह्यन्ते ।

**वक्ता वाक्यं प्रयुङ्क्ते च संसृष्टार्थविवक्षया ।**

इति । वक्ता हि विशिष्टमर्थं विवक्षित्वा वाक्यं प्रयुङ्क्ते, न तु पृथक् पृथक् पदार्थबुबोधयिषया । श्रोत्राऽपि च विशिष्टार्थ एव बुध्यते । न च विशकलिताः पदार्थाः । अतश्च पदानामन्विताभिधानमेव स्वरसतः सिद्ध्यति । तथैवोक्तं भाष्यकारैः **स्वरसत्वात् इति संहत्याऽर्थमभिदधति पदानि । एकार्थपदसमूहो वाक्यम्** इति । न्यायभाष्यकारोऽप्येवमाह - **पदसमूहो वाक्यमर्थपरिसमाप्तौ** इति । किञ्च वाक्यार्थबोधस्य शाब्दत्वं सर्वेष्टम् । अतश्च शब्दादनुपस्थितस्य शाब्दबोधविषयत्वं न स्वीकर्तुमुचितम् ।

शब्दादनुपस्थितस्य शाब्दबोधविषयत्वे वाक्यार्थबुद्धेरशाब्दत्वमेव स्यात्। साक्षात् शाब्दत्वसंभवे पदार्थैर्व्यवधानमयुक्तमित्यन्विताभिधानवादे वाक्यार्थबुद्धेः शाब्दत्वं सुनिरूपमिति न्यायमञ्जर्यामुक्तम्। एवमाकाङ्क्षायोग्यतासन्निधीनां विचारावसरे कस्येयमियमाकाङ्क्षेतिप्रश्नपूर्वकं किं शब्दस्य, किमर्थस्य, उत प्रमातुः इति विकल्प्य पुरुषस्याऽऽकाङ्क्षेति पक्षं प्रतिपाद्य पुरुषाकाङ्क्षामात्रं न संबन्धकारणमिति निगमयामास जयन्तभट्टः। ततश्च सामान्येनाऽन्विताभिधानं विशेषतश्चाभिहितान्वय इति कश्चनपक्ष उत्थाप्य खण्डितः। प्रथमतः क्रियापदं कारकसामान्यान्वितं स्वार्थं बोधयति। कारकपदञ्च सामान्यतः क्रियान्वितस्वार्थं बोधयति। अनन्तरञ्च पदान्तरात् विशेषसंबन्धो गम्यते। अतश्च सामान्येनाऽन्विताभिधानमप्यभ्युपगतम्। विशेषतश्चाभिहितान्वयोऽ-प्यभ्युपगत इति केचन मन्यन्ते। तत्र चायं दोष उट्टङ्कितः -

**दोषोऽन्विताभिधाने यः सामान्येऽपि स तादृशः।**
**दोषस्तुल्यो विशेषेऽपि यश्चोक्तोऽभिहितान्वये।।**

अयं भावः - विशेषान्विताभिधानवादे उक्तदोषः सामान्यान्विताभिधानवादेऽपि संभवत्येव। सामान्याभिहितान्वयवादे उक्तदोषश्च विशेषाभिहितान्वयवादे संभवत्येवेत्ययं पक्षो नितरां दुष्ट एवेति।

चित्सुखाचार्यैश्चाभिहितान्वयवादसमर्थकैरन्विताभिधानवादानुवादो न्यरूपि। किन्तु तैस्तत्त्वबिन्दुग्रन्थगतो वाचस्पतिमिश्रसंमतोऽभिहितान्वयवाद एवऽनुदित इति न स पक्षोऽत्र विव्रियते।

**न्यायकुसुमाञ्जलावन्विताभिधानवादः**

न्यायाचार्यपदाभिधेया उदयनाचार्याऽस्तु भाट्टाभिमतादभिहितान्वयवादाद्विलक्षण-मेवऽभिहितान्वयवादमभ्युपगच्छन्ति। पदार्थानां शाब्दबोधकरणत्वं भाट्टाभिमतम्। किन्त्वतीतानागतपदार्थानां शाब्दबोधं प्रति करणत्वाऽसंभवादिदमयुक्तमिति न्यायाचार्या अधिक्षिपन्ति। कारकत्वं हि पूर्वकाल-संबन्धिनस्यैव पदार्थस्य क्रियां प्रति संभवति। ज्ञानरूपा क्रिया हि शाब्दबोधः। तं शाब्दबोधं प्रत्यतीतपदार्थानामनागतपदार्थानां वा कारकत्वं कथमिवोपपद्यताम्। किञ्च काव्यनिर्माणस्थलेऽपि न कश्चित् क्लेशः। तत्र

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पदार्थानां शाब्दबोधकरणत्वं वक्तव्यमिति हि भाट्टैरभिहितम्। कवेः प्रथमतः पदार्था एव बोधं जनयन्ति। अनन्तरञ्च कविः काव्यं रचयतीति हि तत्पक्षः। अत्र च प्राभाकरैरेव समाहितम् - कवेः काव्यनिर्माणानुगुणज्ञानमनुमितिरूपमर्थापत्तिजन्यं वेति। इदञ्च पूर्वं 'पश्यतः श्वेतिमा रूपम्' इति ज्ञाननिरूपणवेलायां विचारितम्। अतश्च शाब्दबोधे पदानामेव करणत्वम्। पदार्थोपस्थितेश्च व्यापारत्वमित्ययं न्यायाचार्याणां सिद्धान्तः। एतैश्चान्विताभिधानवादः सम्यगनूदितः, अथ च खण्डितः।

पदानां केवलस्वार्थे स्मारकशक्तेः सत्त्वात् तत्तत्पदैः तत्तदर्थाः स्मार्यन्ते प्रथमम्। अनन्तरं पदं स्मारितेतरपदार्थान्वितमर्थं पदार्थान्तरमनुभावयतीति। इयमेव रीतिः पूर्वमन्विताभिधानप्रस्तावे उक्तः। सैव रीतिराचार्यैरप्यादृता। नन्वन्विताभिधानस्वीकारे पदानां पर्यायतापत्तिरिति चेन्न। 'गामानय' इत्यत्र गोपदेन क्रियान्वितकारकानुभवः, क्रियापदेन च कारकान्वितक्रियानुभवश्च भवतीति हि पर्यायताऽऽपाद्यते। किन्तु गुणप्रधानभावरूपः विशेष्यविशेषणभावो व्यत्यस्त इति नायं दोषः संभवति। द्वैतिभिरप्ययं विषयः स्वीकृतः। 'पर्वतोऽग्निमान्', ‘पर्वतेऽग्निः' इति वाक्यद्वयेनाऽप्येक एवार्थो बोध्यते। तथाऽपि पौनरुक्त्यं न शङ्कनीयम्। विशेषणविशेष्यभावस्य भिन्नत्वात्। जयतीर्थवर्या अपीत्थं वदन्ति - पर्वतोऽग्निमान् इति वाक्यात् पर्वतविशेष्यकबोधो भवति। अग्निविशेष्यकबोधश्चार्थाद्भवति चेदप्यार्थमंशमादाय न पौनरुक्त्यं शङ्कनीयमिति।

ननु तथाप्यन्विताभिधानवादेऽन्योन्याश्रयो दुरुद्धर एव। कारकपदं हि क्रियापदजन्यक्रियाविषयकबोधमादाय विशिष्टं कारकमभिधत्ते। क्रियापदञ्च कारकपदाभिहितं कारकमपेक्ष्य तद्विशिष्टक्रियां बोधयति। अतश्चाऽन्योन्याश्रय इति चेन्न। पदान्तरनिरपेक्षं तत्तत्पदानां स्वस्वार्थस्मारकत्वस्याऽपि स्वीकारात्। तानि तानि पदानि केवलस्वार्थान् प्रथमतः स्मारयन्ति। तत्र च न पदान्तरस्याऽपेक्षेति नाऽन्योन्याश्रय आशङ्कितुं शक्यः।

न च तथापि वाक्यभेदः संभवत्येव। एकेनैव पदेन विशिष्टार्थस्य बोधितत्वात् पृथक् तस्मिन् पदे वाक्यलक्षणं समन्वेति। पदान्तरेण पुनः विशिष्टस्याऽर्थस्य बोधनात् तदप्यपरं वाक्यं भवेत्। तथाच 'घटमानय' इत्यत्र वाक्यद्वयं स्यादिति चेन्न।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

विकल्पासहत्वात्। 'गामानय' इति वाक्याद् 'गां बधान', 'अश्वमानय' इत्यादिबोधः स्यादित्याक्षिप्यते वा, अथवैकेनैव पदेन विशिष्टबोधः प्राप्त इति प्रतिपदं वाक्यभेद आपाद्यते वा। 'गामानय' इति वाक्यस्थले 'गां बधान', 'अश्वमानय' इत्यादिस्थलीयबोध आपादयितुं न शक्यते। यतो हि 'गामानय' इत्यत्र गोपदेनाऽऽनयनान्वितगौरेव बोध्यते, न बन्धनाऽवितगौः। तथैवाऽऽनयनपदेन गवान्वितानयनमेवोच्यते, न त्ववश्वान्वितमानयनम्। कुत इयं व्यवस्थेति चेन्न। सन्निहितं स्मारितञ्चाऽऽनयनं विहाय 'गामानय' इति वाक्याघटकगोपदेन बन्धनान्वितगोः बोधनासंभवात्। अतश्च प्रथमकल्पो नावकल्पते। किञ्चैकेनैव पदेन वाक्यकृत्यं संपन्नमिति वाक्यभेदो नापादनार्हः। आनयनपदप्रयोगेण तदर्थस्मरणोत्तरमेवाऽऽनयनाऽन्वितगोपदार्थस्य गोशब्देन बोधयितुं शक्यत्वात्। तथैवाऽऽनयनपदेनाऽपि गवान्वितमानयनं गोपदप्रयोगेण गोस्मरणोत्तरमेव संभवति। एवञ्च गोपदमात्रप्रयोगे तत्साकाङ्क्षमेव भवति। साकाङ्क्षञ्च न वाक्यमिति **अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्** इति जैमिनिसूत्रसिद्धम्।

नन तथापि 'गामानय' इत्यस्यैकवाक्यत्वं वक्तुं न शक्यते। तत्र गोशब्दस्याऽऽनयनान्वितगौरर्थः। तत्र गौर्विशेष्यः। आनयनपदेन च गवान्वितानयनं बोध्यते। तत्राऽऽनयनं विशेष्यम्। एवञ्च विशेष्यभेदात् कथमर्थैकत्वमिति। मैवम्। कथमर्थैकत्वमिति चेदत्र न्यायाचार्यैरन्विताभिधानवादिनां रहस्यं प्रकटीकृतम्। अस्मिन् वाद एकं पदमन्विताभिधानशक्यान् सर्वानर्थान् विशेष्यविशेषणभावापन्नान् बोधयतीत्यभ्युपगम्यते। यद्यपि विशेष्यविशेषणभावः पदभेदेन भिन्नस्तथापि प्रतिपदमन्यूनानतिरिक्तार्था एव बोध्यन्त इति भवत्यर्थ्यैक्यम्। 'गामानय' इत्यत्र गौः, आनयनञ्चेत्यर्थद्वयं बोध्यते। विशेष्यविशेषणभावे विशेषे सत्यपि, गोपदेनाऽप्यर्थद्वयमेव बोध्यते, आनयनपदेनाऽपीमावेवार्थौ बोध्येत इत्यर्थैक्यं विद्यते। एवञ्चाऽस्मिन्वादे विशिष्टवाक्यघटकेनैकैकेनाऽपि पदेन यावन्तोऽर्था बोध्यन्ते त एव पदान्तरैरपि तद्वाक्यघटकैर्बोध्यन्त इति सुस्थमेवाऽर्थैक्यमिति विज्ञेयम्। इत्थञ्च न्यायाचार्यैरन्विताभिधानवादे पूर्वोक्तरीत्या पदान्तरवैयर्थ्यपौनरुक्त्यवाक्यभेददोषाः परिहृताः। प्रकरणपञ्चिकायां तु विशेषणविशेष्यभावभेदे अपि-

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**भूयांसो यद्यपि स्वार्थाः पदानां ते पृथक् पृथक् ।**
**प्रयोजनतया त्वेकवाक्यार्थं सम्प्रचक्षते ॥**
**तत्प्रतीत्येककार्यत्वात् वाक्यमप्येकमुच्यते ।**
**प्रतिपत्तिः गुणानां हि प्रधानैकप्रयोजना ॥**

इति परिहारः उक्तः। स च पूर्वमेव निरूपितः। किन्तु सामान्यतः पदान्तरस्मारिते शक्तिरिति गुरुमताभिप्राय उल्लिखितः। तदस्य ग्रन्थस्य कोऽर्थ इति परिशीलनीयम्। 'गामानय' इत्यत्र पदान्तरेण कारकपदभूतगोपदेन स्मारितो यो गोरूपार्थः, तदन्वितस्वार्थे गमने धातोः शक्तिर्वक्तव्या। किन्तु सामान्यतः पदान्तरस्मारितेति कथनात् गोत्वावच्छिन्नान्वितानयनबोधो धातुना न वक्तुं शक्यः। किन्तु यत्किञ्चित्पदार्थान्वितानयनमेव बोध्यत इति वक्तव्यम्। एवं कारकपदेनाऽपि गोपदेनाऽऽनयनत्वावच्छिन्नानयनान्वितस्वार्थबोधो न संभवेत्। किन्तु यत्किञ्चित्क्रियान्वितस्वार्थबोध एव स्यात्। एवमर्थस्वीकारे वाक्यभेदपर्यायत्वान्योन्याश्रयाणां प्रसङ्ग एव नापद्यते। तथाच कथमित्थमनुवादः कृत आचार्यैरिति।

अत्रोच्यते - पूर्वोपात्तप्रकरणपञ्चिकानुसारेण विशेषरूपेणैवेतरपदार्था अन्वयप्रतियोगितया भासन्त इत्येवाऽन्विताभिधानवादिनामभिमतम्। 'गामानय' इत्यत्र धातुना गवान्वितमेवाऽऽनयनं बोध्यते, न तु यत्किञ्चित्पदार्थान्वितानयनम्। इयमेवाऽन्विताभिधानवादिमतपरिस्थितिः। तर्ह्याचार्याणां “नापि पौनरुक्त्यम्, विशेषान्वये तात्पर्यात्” इति ग्रन्थस्य कथं समन्वय इति चेत्, सामान्यं नाम गोत्वादिकम्। एवञ्च 'गामानय' इत्यत्र गोत्वेन रूपेण भासमानो यः पदार्थः, तदन्वितस्वार्थबोधो धातुना भवति, तथैव गोपदात् गमनत्वावच्छिन्नान्वितगोरेव बोधः इति विवक्षितम्। गोत्वविशिष्टगवान्वितस्वार्थबोधकत्वमेव धातोः। तथैव कारकपदस्य क्रियाविशेषान्वितस्वार्थबोधकत्वमेवेत्येवाऽऽचार्याणामभिप्रायो बोध्यः।

द्वैतिनोऽपि सामान्यत इतरपदार्थान्विते शक्तिरिति निरूपयन्ति, किन्तु तेषामाशयोऽन्यादृशः। सामान्यत इतरपदार्थान्वित इत्यस्य इतरत्वेन रूपेणेतरपदार्थः प्रतियोगितयाऽन्विताभिधाने विषय इति ते आशेरते।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**कुसुमाञ्जलावन्विताभिधानवादखण्डनम्**

इत्थमन्विताभिधानवादमतमनूद्य न्यायाचार्यैर्विस्तरेण तत्खण्डनं व्यधायि। तत्रत्य-मुख्यांशोऽत्र सङ्गृह्यते। भाट्टमते च प्राभाकरैः शक्तित्रयकल्पनाप्रयुक्तगौरवमापादितम्। पदानां पदार्थेषु शक्तिः, पदार्थानां शाब्दबोधजनकशक्तिः, पदानां पदार्थगतवाक्यार्था-वगमकत्वाधायकशक्तिश्चेति शक्तित्रयकल्पनाप्रयुक्तगौरवमापादितम्। किन्त्वेतेषां गुरूणां मतेऽपि शक्तित्रयकल्पनं दुरुद्धरमेव। एका पदानां स्मारकशक्तिः, अपराऽन्विता-भिधाशक्तिः, तृतीया चाप्तपुरुषनिष्ठा शक्तिरिति। इमानि पदान्याप्तोक्तानीति निश्चये सत्येवाऽन्विताभिधानस्य भवद्भिः स्वीकारात्। अतश्च पदगतान्विताभिधानशक्त्यनुगुणा शक्तिराप्तपुरुषेऽभ्युपगन्तव्यैव। भाट्टैः प्रतीदं हि भवद्भिरुक्तं -

**प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।**
**पदानामेव सा शक्तिः वरमभ्युपगम्यताम्॥**

पदानां प्रथमं श्रुतत्वात्, पदेष्वभिधायकत्वस्य स्वीकारात् वाक्यबोधस्य शाब्दत्वरक्षणार्थं पदेषु वाक्यार्थतात्पर्यस्वीकाराच्च पदेष्वेव शाब्दबोधजनकत्वं स्वीक्रियतामिति हि भाट्टान् प्रत्युपदिष्टम्। तदिदानीं भवन्तोऽपि शिक्षणीयः। इत्थं -

**प्राथम्यामभिधातृत्वात् तात्पर्योपगमादपि।**
**आप्तानामेव सा शक्तिः वरमभ्युपगम्यताम्॥**

इति। पदापेक्षयाऽप्याप्तानां खलु प्राथम्यं निर्विवादम्। पदाभिधानानुकूलकृतिमत्त्वं ह्याप्तेष्वभिधातृषु वर्तते। एवं वाक्यार्थतात्पर्यशालित्वमप्याप्तेष्वङ्गीकार्यम्। अतश्च पदापेक्षयाऽऽप्तेष्वेव शाब्दबोधानुकूला शक्तिः स्वीकर्तव्येति परिहसन्त्याचार्याः।

**अद्वैतिनां पक्षनिरूपणम्**

अद्वैतवेदान्तिनस्तु अभिहितान्वयवादं स्वीकुर्वन्ति। **तत्तु समन्वयात्** इति सूत्रव्याख्याने शङ्कराचार्यैरित्थमभाषि - **अपि च आम्नायस्य क्रियार्थत्वादानर्थक्यम-तदर्थानामित्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधितच्छेष-व्यतिरेकेण भूतञ्चेद्वस्तूपदिशति भव्यार्थत्वेन कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः** - इति। अत्र च भामत्यां वाचस्पतिमिश्राः - **अयमभिसन्धिरित्यारभ्य तस्मात् पदानां**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता। तथाच तत्तदर्थान्तरविशिष्टैकवाक्यार्थ-प्रत्यय उपपन्नो भवति। यथाहुश्शास्त्रविदः -

**साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।**
**वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥**
**वाक्यार्थमितयेतेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥** इति।

इति व्याचक्षुः। अत्र च पदार्थप्रतिपादनस्य व्यापारत्वं स्पष्टमेव प्रतिपन्नम्। साक्षाद्वाक्यार्थबोधः पदान्न भवतीत्यत्र भट्टपादानां वार्तिकञ्च प्रमाणीकृतम्। इदमेव कल्पतरौ परिमले च व्युदपादि। कल्पतरुकारास्तु वाक्यार्थो लक्ष्य इति भाट्टमतं विशदयन्ति।

**तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते**

इति श्लोकवार्तिकम्, **तत्पदस्वरूपाभिहितैः पदार्थैस्संलक्ष्यतेऽसौ इति सिद्धमेतदिति** न्यायरत्नमालाग्रन्थश्चात्र प्रमाणम्। अयमेव भाट्टाभिमतो लक्षणापक्षः कल्पतरौ परिमले च विवृतः। अतश्चाऽद्वैतसिद्धान्ते भाट्टमत इवाऽभिहितान्वयवाद उररीकृतः। तत्त्वमसि-वाक्यार्थस्य लक्ष्यतामभ्युपगच्छतामेतेषां मते वाक्यार्थे लक्षणेति पक्षोऽत्यन्तानुकूल एव। तत्र च लक्षणा कीदृशीति प्रस्थानभेदपरिशीलनेन विज्ञातव्यम्।

**विशिष्टाद्वैतिनां पक्षनिरूपणम्**

विशिष्टाद्वैतवेदान्तिनस्तु अन्विताभिधानवादमभिहितान्वयवादञ्चोभयम् अभ्युप-गच्छन्ति। न्यायपरिशुद्धौ तावत् आचार्यैर्वेदान्तदेशकैः वादद्वयमपि विस्तरेण न्यरूपि। आदौ अन्विताभिधानपराणि बहूनि श्रीभाष्यवाक्यानि तथा वेदार्थसङ्ग्रहवाक्यान्युल्लिखितानि। ततश्च भाष्यकारपरमाचार्याणां श्रीमद्यामुनाचार्याणामागमप्रामाण्यगतश्लोकाविमौ प्रमाणीकृतौ-

**अन्यान्विताभिधानेऽपि व्यवहारोपपत्तितः।**
**अवश्याश्रयणीयेयमन्विातार्थाभिधायिता॥**
**तस्मादाकाङ्क्षितास्सन्नयोग्यार्थान्वितसङ्गतेः।**
**स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः॥**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इति। अयमन्तिमः श्लोकः -

**आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान्।**
**स्वार्थानाहुः पदानीति व्युत्पत्तिस्संश्रिता यदा॥**

इति प्रकरणपञ्चिकाश्लोकसरूपः। ततो भाष्यकारशिष्याणां पराशरभट्टानां तत्त्वरत्नाकरगतश्लोकश्चोपात्तः -

**अवश्याश्रयणीयेयमन्विताभिधायिता।**
**इत्याहुर्यामानुचार्याः पदैरेवान्विताभिधाम्॥**

इति। ततश्च न्यायसुदर्शने प्रज्ञापरित्राणे च पूर्वाचार्यग्रन्थे स्थितमन्विताभिधाननिरूपणमुट्टङ्कितम्।

अतः परम्, अभिहितान्वयवादद्योतकानि बहूनि श्रीभाष्यकारवाक्यानि दर्शितानि। तद्यथा वेदार्थसङ्ग्रहे - **प्रकृतिप्रत्ययरूपेण पदस्यैवाऽनेकविशेषणगर्भत्वात्, अनेकपदार्थसंसर्गबोधकत्वाच्च, वाक्यस्ये**ति। तथा श्रीभाष्ये **प्रकृतिप्रत्ययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीय**मित्यादिकम्। इत्थं पक्षद्वयसाधकान्यपि प्राच्याचार्यवाक्यानि प्रथमतो निर्दिश्य कस्मिन् पक्षे निर्भर इति जिज्ञासायाम्, अन्विताभिधानवाद एव सिद्धान्त इति कथयतां पक्षः केचिदित्यादिना निरूपितः। तत्त्वमुक्ताकलापे चैभिरेव वेदान्तदेशिकवर्यैः वादद्वयमपि समर्थितं विद्यते। तत्र च प्रथममन्विताभिधानसमर्थनपरं श्लोकद्वयं पठितम् -

**आचष्टे प्रत्ययश्च प्रकृतिरपि मिथः श्लिष्टमित्यभ्युपेत-**
**मन्योन्यस्मारितार्थान्वितमभिदधति स्वार्थमेवं पदानि।**

इत्यादिना। अथ

**स्वार्थे शब्दस्य चासाविति मिलितमतौ व्यापृताविल्यनेकाः**

इति श्लोकेनऽभिहितान्वयवादे दूषणमभिहितम्। ततश्च -

**संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानिचिद्भाष्यवाक्या-**
**-न्याद्यव्युत्पत्तिरुक्ता प्रतिपदमिह च क्वापि नान्यस्य हानिः।**
**इत्थं मत्वा सयूथ्याः कतिचिदभिहितान्योन्यसंसर्गमीषुः**
**तत्तत्स्वारस्यलोकप्रतिपदनुगमात् तच्च नाधिक्षिपामः॥**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इति श्लोकेनाऽभिहितान्वयपक्षः समर्थितो दृश्यते। अत्र च स्पष्टं नाधिक्षिपाम इति पदेनऽभिहितान्वयवादेऽङ्गीकारः प्रदर्शितः। एवञ्च प्रधानार्थे विरोधाभावात् पक्षद्वयेऽपि तुल्यैवास्थेत्याचार्याणामभिप्राय इति गम्यते। अयमेव विशिष्टाद्वैतवेदान्तिनां सिद्धान्तः।

**द्वैतिनां पक्षनिरूपणम्**

द्वैतवेदान्तिनस्तु सामान्यान्विताभिधानं स्वीकुर्वन्ति। तेषामयमभिप्रायः - सामान्यतः यदीतरपदार्थः पदेन न बोध्यते, तर्हि विशेषजिज्ञासा कथं स्यात्। विशेषजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य कारणत्वात्। अत्र च पक्षद्वयं सव्यभिचारग्रन्थोक्तमनुसन्धेयम्। अतश्च सामान्यान्विताभिधानं पदैः स्वीकार्यमेव। उक्तञ्चानुव्याख्याने -

**शक्तिश्चैवाऽन्विते स्वार्थे शब्दानामनुभूयते। अतोऽन्विताभिधायित्वं गौरवं कल्पनेऽन्यथा॥**

इति। अत्र च व्याख्यायां न्यायसुधायां श्रीमज्जयतीर्थवर्याः विस्तरशोऽन्विताभिधानवादमभिहितान्वयवादञ्च परिशीलयन्ति। विशेषान्विताभिधानवादिनां पक्षं निरूप्य तत्र च पदान्तरवैयर्थ्यम्, अन्योन्याश्रयः, पर्यायत्वञ्चेति दोषानुद्भाव्य तत्परिहारे प्रयततां विशेषान्विताभिधानवादिनामभिप्रायमप्युपस्थाप्य निराचक्रुः। ततश्च स्वपक्षमाविष्कृत्याऽभिहितान्वयवादो निरस्तो विद्यते। विशेषान्विताभिधानवादेऽन्वयप्रतियोगिनां विशेषाणामानन्त्यात् **शक्तिग्रह एव पुरुषायुषं पर्यवस्यती**ति तद्वारणाय प्राभाकरैरप्यन्वयप्रतियोगिनां विशेषाणां सर्वेषां केनचित् सामान्याकारेण सङ्ग्रहोऽवश्यं कर्तव्यः। अतश्च तैरपि सामान्योपाधिर्न त्यक्तुं शक्य इति स्वाभिप्रायः प्रकटितः। भाट्टाभिमतेऽभिहितान्वयवादे च पदार्थानामन्वयबोधकत्वं कुत्राप्यनुपलब्धमिति पदार्थानां करणत्वे पृथक् प्रमाणतापत्तिश्च स्यादिति च विशेषतो दूषणमभिहितम्। अयं पक्षो न्यायसुधायामिव तर्कताण्डवेऽपि विशेषतो निरूपितः।

**चिन्तामणिकारपक्षः**

गङ्गेशोपाध्यायाः तत्त्वचिनामणिकारा अन्विताभिधानवादं विस्तरेण निरूपयामासुः। कार्यान्वितान्वित एव पदानां शक्तिग्रहो भवतीति हेतोः कार्यान्वित एव शक्तिः स्वीकर्तुमुविता। लिङः कार्ये शक्तिः। लोके च कार्यं नाम क्रिया, वेदे त्वपूर्वम्।

एवञ्चाऽपूर्वान्वितार्थेष्वेव पदानां शक्तिः। लोके तु लिङः क्रियारूपकार्ये कार्यत्वे वा लक्षणा - इति प्राभाकरमतं महता ग्रन्थेन सुविस्तरमुपपाद्य निराकृतं मणिग्रन्थे।

**गदाधरभट्टाचार्याणामभिप्रायः**

अथेदानीं गदाधारभट्टाचार्यैर्निरूपितः अंशः प्रतिपाद्यते। भट्टाचार्यास्तावदन्वयस्याऽऽकाङ्क्षाभास्यत्वमुररीकुर्वन्ति। उक्तञ्च व्युत्पत्तिवाद आदावेव **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते** इति। अत्र संसर्गमर्यादा नामाऽऽकाङ्क्षा। तेन च वृत्तिलभ्यत्वं व्युदस्तं बोध्यम्। शक्तिवादेऽपि स्पष्टमेव वृत्त्यनुपस्थापितस्याऽप्यन्वयस्य शाब्दबोधे भानं निरूपितम्। तथाहि- शाब्दबोधे यो योऽर्थो भासते, सर्वत्रापि तत्र शक्तिरपेक्षितेति प्रभाकरेणाऽक्षिप्ते, उच्यते नायं नियमः शक्त्युपस्थापितस्यैव शाब्दबोध इति। शाब्दबोधे तावत् शक्तिज्ञानाधीना लक्षणज्ञानाधीना चोपस्थितिः कारणम्। एवञ्च शाब्दबोधरूपमेककार्यं प्रति कारणद्वयसत्त्वेन व्यतिरेकव्यभिचार आपतति सति तृणारणिमणिन्यायेन कार्यतावच्छेदकस्य सोङ्कोचं कृत्वा दोषो वारणीयः। यथा तृणारणिमणिस्थले तृणं विहायाऽरणिनाऽपि वह्निर्जायते, अरणिं विना तृणेनाऽपि वह्निर्जायते, अतश्च वह्नित्वावच्छिन्नं प्रति न तृणस्य नारणेर्वा कारणता संभवतीत्याक्षेपे तृणाव्यवहितोत्तरजायमानवह्निं प्रति तृणं कारणम्, अरण्यव्यवहितोत्तर-जायमानवह्निं प्रत्यरणिः कारणमिति कार्यतावच्छेदकसङ्कोचेन कार्यकारणभावद्वयं व्यवस्थापनीयम्। तथैव तत्पदलक्षणाज्ञानाधीनोपस्थित्यव्यवहितोत्तर-जायमानशाब्दबोधं प्रति तत्पदलक्षणाज्ञानाधीनोपस्थितिः कारणं, तत्पदशक्तिज्ञानाधीनोपस्थित्यव्यवहितोत्तर-जायमानशाब्दबोधं प्रति तत्पदशक्तिज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयं स्वीकर्तव्यम्। अतश्च संसर्गस्य शाब्दबोधविषयत्वेऽपि न वृत्त्योपस्थियपेक्षिता। संसर्गविषयकशाब्दबोधस्य पूर्वोक्तकार्यतावच्छेदकानाक्रान्तत्वात्। अतश्चान्वयांशे नापेक्षितैव पदानां शक्तिरिति।

**लघुचन्द्रिकाग्रन्थोक्तविशेषः**

ब्रह्मानन्दसरस्वरतीस्वामिनः लघुचन्द्रिकायां प्राचीनसंमतमेवाऽन्विताभिधानवादं विशेषतो निरूपयन्ति। अखण्डार्थलक्षणोपपत्तिप्रकरणेऽद्वैतसिद्धौ - अखण्डार्थवाक्यस्य

लक्षणं तावदिदमभिहितम् - **अपर्यायशब्दानां पदवृत्तिस्मारितातिरिक्तागोचरप्रमाणजनकत्व-मिति।** तत्त्वमसीति वाक्ये च लक्षणसमन्वय इष्टः। तत्र तत्त्वमितिपदयोः पर्यायत्वं तावन्नास्ति। एवञ्चापर्यायशब्दाभ्यां ताभ्यां पदवृत्तिस्मारितातिरिक्तागोचोरप्रमा जन्यते। तद्वाक्यजन्यप्रमायां हि पदवृत्तिस्मारितातिरिक्तः कश्चिदर्थो न भासते, शुद्धं चैतन्यं हि तज्ज्ञानविषयः। अतश्चाखण्डार्थविषयकवृत्तिरूपायां तस्यां प्रमायां पदवृत्तिस्मारिता-तिरिक्ताविषयकत्वं वर्तत इति भवति समन्वयः। अत्र लक्षणवाक्ये पदवृत्तिज्ञाप्य इत्यनुक्त्वा पदवृत्तिस्मारितेति किमर्थमुक्तमिति जिज्ञासायामिदमभिहितं - पदवृत्तिज्ञाप्येत्युक्तौ सर्वस्मिन्नेव प्रमाणवाक्येऽतिव्याप्तिः स्यात्। तथाहि - अन्विताभिधानवादिमते शक्त्या, अभिहितान्वयवादिमते च लक्षणया वाक्यार्थभूतः संसर्गो ज्ञाप्यते। अन्विताभिधानवादे तावदभिधाख्यवृत्त्या संसर्गः प्रतीयते। भाट्टमते च लक्षणया। उक्तञ्च वार्तिके **सर्वत्रैव हि वाक्यार्थो लक्ष्यमाण इति स्थितिः** इति। एवञ्च सर्वत्रैव वाक्यजन्यबुद्धौ वृत्त्या पदज्ञाप्यो यो वाक्यार्थः, तदतिरिक्ताविषयकत्वसत्त्वात् सर्वमेव प्रमाणवाक्यमखण्डार्थविषयं स्यादिति। एतद्दोषवारणाय स्मारितेत्युक्तौ मतद्वयेऽपि वाक्यार्थस्य वृत्तिलभ्यत्वात् स्मारितत्वाऽ-नङ्गीकारान्न दोषः। पदवृत्तिस्मारितातिरिक्तस्य वाक्यार्थस्य तत्प्रमायां विषयत्वादिति। अथ च सिद्धाविदं निर्दिष्टं - संसर्गांशे कुब्जशक्तिरन्विताभिधानवादिना स्वीक्रियते। भाट्टमते लक्षणाज्ञानं नापेक्षितम्, अज्ञाताऽपि पदार्थनिष्ठा लक्षणा शाब्दबोधं प्रति कारणमिति स्वीक्रियते। अतो मतद्वयेऽपि वाक्यार्थभूतसंसर्गः पदस्मारितो न भवति। किन्तु संसर्गस्यानुभाव्यत्वमेव – इति। प्रकृतिप्रत्ययस्थले अन्विताभिधानस्य सर्वमतेऽपि स्वीकारार्यत्वात् तदन्यत्रापि अन्विताभिधानमेव स्वीकार्यम् इति अन्विताभिधानवादसारः।

यद्यपि प्राभाकरग्रन्थानां नयविवेकः, तन्त्ररहस्य-प्रभृतीनां तत्वचिन्तामणेः भाट्टग्रन्थानां वेदान्तग्रन्थानां च परिशीलनेन बहवः प्रमेयाः सूक्ष्माःलम्भयितुं शक्यन्ते तथापि संक्षेपेण निरूपितोऽयम् पक्षः।

❑❑❑

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

## श्रीपाञ्चरात्रशब्दनिर्वचनानि

आचार्यः टि.वि. राघवाचार्युलु*

श्रीमन्नारायणः सृष्ट्यदौ चतुर्मुखाय वेदान् उपदिदेश। अनन्ता **वै वेदाः** इति वेदानामनन्तत्वात् दुरवगाहत्वात् गम्भीरत्वाच्च लोकहितार्थं वेदसम्प्रदायः अत्यन्तसुलभतया ज्ञातुं प्रबोधयति अनन्तगरुडविष्वक्सेनचतुर्मुखेन्द्राः पञ्च श्रीमन्नारायणं प्रार्थयामास। तेषां प्रार्थनानुसारेण श्रीमन्नारयणः पञ्चरात्रिषु शास्त्ररहस्यान् तेभ्यः सुलभमार्गेण विपुलतया बोधयामास। तस्मात् अस्य शास्त्रस्य श्रीपाञ्चरात्रागमः इति अन्वर्थनाम सिद्धम्। भगवच्छास्त्रमिति प्रसिद्धस्य पञ्चरात्रस्य बहूनि निर्वचनानि सन्ति।

नारदपाञ्चरात्रे[1] एवं श्रूयते -

**रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।**
**तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः ॥** इति।

पञ्चविधाः रात्रयः ज्ञानानि च यस्मिन् विद्यन्ते तत् पञ्चरात्रमित्युच्यते।

**एकमेकं साङ्ख्ययोगं वेदारण्यकमेव च।**
**परस्पराङ्गान्येतानि पाञ्चरात्रं च कथ्यते[2] ॥**

वेदः, आरण्यकम्, साङ्ख्यं, योगः इति चतुश्शास्त्राणि परस्पराङ्गतया यस्मिन् शास्त्रे प्रवर्तन्ते तत् शास्त्रं पञ्चविधज्ञानसमाहारं पञ्चरात्रमिति विव्रियते ।

शाण्डिल्य[3]संहितायामेवं श्रूयते -

**साङ्ख्यं योगस्तथा शैवं वेदारण्ये च पञ्चकम्।**
**प्रोच्यन्ते रात्रयः कान्ते आत्मानन्दसमर्पणात् ॥**
**पञ्चाननमीरसतो योऽर्थः स यत्र स्वयमाप्यते ।**
**परमानन्दमेतेन प्राप्नोति परमात्मनः ॥**

---

* दर्शनसङ्कायाध्यक्षः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[1] १.४४

[2] महाभारतम्, १२.३३६

[3] १.४.७५-७६

साङ्ख्यं, योगः, शैवं, वेदाः, आरण्यकानि चेति पञ्च साधकस्य आत्मानन्दकरत्वात् पञ्चरात्रयः इति उच्यन्ते। एताभिः पञ्चविद्याभिः प्राप्तव्यं परमानन्दमेकमेव शास्त्रं प्रबोधयतीति अस्य शास्त्रस्य पाञ्चरात्रमिति संज्ञा सिद्धा इति।

शाण्डिल्य[1]संहितायामेव श्रूयते -

**साङ्ख्ययोगश्च वैराग्यं तपो भक्तिश्च केशवे ।**
**पञ्चार्थदानतः त्राणात् विद्या सा पाञ्चरात्रिकी ॥**

साङ्ख्यं, योगः, वैराग्यं, तपः, भक्तिः इति पञ्चार्थान् प्रसादयतीति अस्य शास्त्रस्य पाञ्चरात्रमिति ज्ञायते।

पौष्कर[2]संहितायामेवं श्रूयते -

**पुराणं वेदवेदान्तं तथान्यत्सांख्ययोगजम्।**
**पञ्चप्रकारं विज्ञेयं यत्र रात्र्यायतेऽब्जज ॥**
**फलोत्कर्षवशेनैव पाञ्चरात्रमिति स्मृतम् ।**

वेदः, वेदान्तं, पुराणं, साङ्ख्यं, योगः इति पञ्चनामानि शास्त्राणि यस्मिन् विद्यन्ते तत् पाञ्चरात्रमिति ज्ञायते।

पाद्मसंहितायां ज्ञानपादे[3] -

**पञ्चेतराणि शास्त्राणि रात्रीयन्ते महन्त्यपि ।**
**तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते ॥**
**चन्द्रतारागणं यद्वच्छोभते नैव वासरे।**
**तयेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ ॥**
**पञ्चत्वमथवा यद्वद्दीप्यमाने दिवाकरे ।**
**ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके ॥**

---

1 १.४.७८

2 ३८.३०७-३०८

3 १.७२-७४

तथैवानिरुद्ध[1]संहितायामपि श्रूयते -

**तस्मात्तु पञ्चरात्राख्यं ब्रह्मलोकपितामहः ।**

विश्वामित्र[2]संहितायामेवं श्रूयते -

**साङ्ख्ययोगादयः पञ्च रात्रीयन्तेऽस्य सन्निधौ ।**
**तस्माद्वा पञ्चरात्रार्थः प्रोच्यते सूरिसत्तमैः ॥**
**अथवा रात्रयो यद्वत्सन्निधौ पञ्चताय वै ।**
**नीयन्ते तद्वदन्यानि शास्त्राण्येतस्य सन्निधौ ॥**
**इति वा पञ्चरात्रार्थो विद्वद्भिः कथ्यते द्विजाः ।**

श्रीप्रश्न[3]संहितायामेवं श्रूयते -

**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम् ।**
**तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः ॥**

रात्रिशब्दः अज्ञानार्थकः । तन्नाशकवाचकः पञ्चशब्दः । तस्मात् अज्ञाननाशकं शास्त्रं पाञ्चरात्रमिति ज्ञायते ।

विष्णु[4]संहितायामेवं श्रूयते –

**रात्रयो गोचराःपञ्चशब्दादिविषयात्मकाः ।**
**महाभूतात्मकान्यत्र पञ्चरात्रमिदं ततः ॥**
**अवाप्य तु परं तेजो यत्रैताः पञ्चरात्र्यः ।**
**नश्यन्ति पञ्चरात्रं तत् सर्वज्ञानविनाशकम् ॥**

शब्दादयः, विषयाः, पञ्चभूतानि, पञ्चरात्रयः, तद्गोचरमज्ञाननाशकं तेजोरूपं शास्त्रं पञ्चरात्रमिति व्यक्तं भवति ।

---

[1] १.३५-३८
[2] २.६-८
[3] २.४०
[4] २.४९-५०

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

हयशीर्ष[1]संहितायां श्रूयत एवम् -

**आकाशवायुतेजांसि पानीयं वसुधा तथा ।**
**एता वै रात्रयः ख्याताह्यचेतनास्तयोत्कटाः ॥**
**रात्रीणामप्यथैतासां व्यतिरिक्तं निरञ्जनम् ।**
**स यथा बुद्ध्यते तत्त्वं तथा मुक्तोऽनुकीर्त्यते ॥**
**पञ्चभूतानि रात्रयः उच्यन्ते ।**
**तद्व्यतिरिक्तं निरञ्जनतत्त्वबोधकं शास्त्रं पाञ्चरात्रमिति ज्ञायते ।**

परम[2]संहितायामुच्यते एवम् -

**महाभूतगुणाः पञ्चरात्रयो देहिनः स्मृताः ।**
**तद्योगाद्विनिर्वृत्तेर्वा पञ्चरात्रमिति स्मृतम् ॥**

तथैव कपिञ्जल[3]संहितायामेवं श्रूयते -

**अथ वक्ष्यामि विप्रेन्द्र पञ्चरात्रार्थमुत्तमम् ।**
**पृथिव्यादीनि भूतानि गुणाः पञ्च महामते ॥**
**रात्रयो जन्तवः प्रोक्ताः सर्वशास्त्रेषु निश्चिताः ।**
**तद्योगाद्विनिवृत्तस्तु पञ्चरात्रमिति स्मृतम् ॥**

तथैव विष्णु[4]तन्त्रे एवं श्रूयते -

**वियद्वायुश्च वह्निश्च आपश्चैव धरा तथा ।**
**रात्रयो देहिनां प्रोक्ता अविद्यासंभवत्ततः ॥**
**तद्योगाद्विनिवृत्तिं तु कारयेयुर्यतस्ततः ।**
**पाञ्चरात्रमिति प्रोक्तम् एतच्छास्त्रं यथा तथा ॥**

पञ्चमहाभूतानि पञ्चगुणाः जीवानां पञ्चरात्रयः। तद्योगविनिवर्तकं शास्त्रं

---

[1] ४.२-३

[2] १.३९-४०

[3] १.३१-३२

[4] १.७८-७९
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पञ्चरात्रमिति पञ्चरात्रशब्दनिर्वचनमुच्यते ।

परम[1]संहितायामेवं श्रूयते -

**भूतमात्राणि गर्वश्च बुद्धिरव्यक्तमेव च ।**
**रात्रयः पुरुषस्योक्ताः पञ्चरात्रं ततः स्मृतम् ॥**

पञ्चभूतानि, गर्वः, बुद्धिः, अव्यक्तं च जीवस्य रात्रयः। तेषां विवेचकमेव पञ्चरात्रमिति ज्ञायते ।

विष्णुतिलकसंहिता[2]याम् एवं श्रूयते -

**अव्यक्तं च मनोबुद्धिरहङ्कारश्च चित्तकम् ।**
**तन्मात्राश्चैव गन्धाद्याः रात्रयो देहिनः स्मृताः ॥**
**एभिस्समन्वितैर्देहैः देहिनां भुक्तिमुक्तिदम् ।**
**साधनं पूजनं त्वेतत् पञ्चरात्रमिति स्मृतम् ॥**
**यतो भूतगुणाः पञ्चरात्रयो देहिनः स्मृताः ।**
**तद्भोगाद्विनिवृत्तिं तु कारयेयुर्यतस्ततः ॥**

अव्यक्तम्, अहङ्कारः, मनः, बुद्धिः, चित्तं गन्धादीनि तन्मात्राणि च जीवानां रात्रय उच्यन्ते। अव्याधिभिः समन्वितानां शरीरधारिणां भुक्तिमुक्तिदं शास्त्रं पञ्चरात्रमिति उच्यते।

विश्वामित्र[3]संहितायां विलक्षणतया एवं श्रूयते -

**पञ्चेन्द्रियाणि विषयाः पञ्चभूतानि तद्गुणाः ।**
**पञ्चशब्दाभिधेयानि विद्वांसोऽप्याचचक्षिरे ॥**
**रा इत्ययमपि प्रोक्तो धातुरादानवाचकः ।**
**विषयेन्द्रियभूतानामादातारश्च पञ्चराः ॥**
**मनुष्याः पालनात्तेषां पञ्चरात्रमिति स्मृतम् ।**

---

[1] १.४०
[2] १.८०-८२
[3] २.३-५

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पञ्चेन्द्रियाणि, विषयाः, भूतानि तद्गुणाः, पञ्चशब्देन कीर्त्यन्ते। **रा** इति धातोः आदानमित्यर्थः। विषयेन्द्रियभूतानि पञ्चरान् मनुष्यान् जीवान् सर्वान् रक्षकं शास्त्रं पञ्चरात्रमित्युक्तम् ।

अन्येन प्रकारेण **रा** इति धातोः आदानं नाम स्वीकरणमित्यर्थः उच्यते । पञ्चसङ्ख्यास्थितानां पञ्चेन्द्रिय पञ्चविषय पञ्चभूत शब्दादि पञ्चगुणानां समाहारेण पञ्चशब्देन व्यवहारो विद्यते । तेषां स्वीकर्तारः मानवाः **पञ्चराः** इत्युच्यन्ते। **पञ्चरान् त्रायत** इति पाञ्चरात्रमित्युच्यते।

पुरुषोत्तम[1]संहितायां श्रूयते एवम् –

**सार्थककोटिप्रमाणेन कथितं तस्य विष्णुना ।**
**रात्रिभिः पञ्चभिस्सर्वं पञ्चरात्रमतः स्मृतम्॥**

ब्रह्मणा सार्थकोटिश्लोकप्रमाणेन पञ्चरात्रिषु केशवात् श्रुतं शास्त्रं पञ्चरात्रमित्युक्तम्।

मार्कण्डेय[2]संहितायामपि एवमेव श्रूयते -

**सार्थकोटिप्रमाणेन कथितं तस्य विष्णुना ।**
**रात्रिभिः पञ्चभिस्सर्वं पञ्चरात्रमतः स्मृतम्** ॥ इति ।

ईश्वरसंहितायां श्रूयते –

**पञ्चायुधांशास्ते पञ्चशाण्डिल्यश्चौपगायनः ।**
**मौञ्ज्यायनः कौशिकश्च भारद्वाजश्च योगिनः ॥**
**आद्यमेकायनं वेदं रहस्याम्नायसंज्ञितम् ।**
**दिव्यमन्त्रक्रियोपेतं च मोक्षैकफललक्षणम् ॥**
**पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभुः ।**
**अध्यापयामास यतस्तदेतन्मुनिपुङ्गवाः ॥**
**शास्त्रं सर्वजनैर्लोक पञ्चरात्रमितीर्यते ।**

---

1 १.८

2 १.२२
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

परिगणितान् शाण्डिल्य-औपगायन-मौञ्ज्यायन-कौशिक- भारद्वाजेतिमुनिश्रेष्ठेभ्यः पञ्चरात्रिषु जगत्प्रभुणा नारायणेन प्रोक्तमिदं शास्त्रं पञ्चरात्रमित्युच्यते।

विहगेश्वसंहितायां श्रूयते एवम् -

**आदौ कृतयुगे प्राप्ते केशवेन प्रसादिता।**
**अनन्तो गरुडश्चैव विष्वक्सेनो कपालभृत्॥**
**ब्रह्मा इत्येव पञ्चैते शृण्वन्ति पृथगीरितम्।**
**अनन्तः प्रथये रात्रे गरुडश्च द्वितीयके ॥**
**तृतीयरात्रे सेनेशः चतुर्थे वेधसा श्रुतम्।**
**रुद्रः पञ्चमरात्रे च श्रद्धाशास्त्रं पृथक् पृथक्॥** इति।

अनन्तगरुडादिभिः पञ्चरात्रिषु स्वीकरणेन शास्त्रमिदं पञ्चरात्रमित्युच्यते। श्रीमन्नारायणेन कृतयुगे अनन्तगरुडविष्वक्सेनरुद्रब्रह्मेभ्यः पञ्चरात्रिषु क्रमेणोक्तं शास्त्रमिदं पञ्चरात्रमिति ज्ञायते ।

भारद्वाज[1]संहितायां श्रूयते एवम् -

**प्रथमं ब्रह्मरात्रं तु द्वितीयं शिवरात्रकम् ।**
**तृतीयमिदन्द्ररात्रं तु चतुर्थं नागरात्रकम्॥**
**पञ्चमम् ऋषिरात्रं तु पञ्चरात्रमिति स्मृतम्।**

**American Oriental Sassty Journal** मध्ये **The Name Panchatantra** शोधव्यासे १९६५ संवत्सरे वि. राघवन् महोदयैः एवमुक्तम् – सनत्कुमारसंहितानुरोधेन ब्रह्मरात्र शिवरात्र इन्द्ररात्र ऋषिरात्र बृहस्पतिरात्र इति संज्ञकं पञ्चविभागोपेतं शास्त्रमिदं पञ्चरात्रमिति।

पाञ्चरात्ररक्षायाः उपोद्घाते एवमुच्यते -

अभिगमन-उपादान-इज्या-स्वाध्याय-योगेति पञ्चविधभगवदाराधनाङ्ग-कर्मणामनुष्ठाने कालपञ्चकस्य प्रतिपादकत्वात् शास्त्रमिदं पाञ्चरात्रमित्युच्यते इति।

---
[1] २.१२-१३

**Introduction of Pancharatra Ahirbyudhnya Samhita** इति ग्रन्थे प्रेडर् महाशयेन एवमुक्तम् –

शतपथब्राह्मणे पञ्चरात्रशब्दः नारायणशब्दं श्रावयति । नारायणेनाविर्भूतं परव्यूहविभवान्तर्याम्यर्चावतारान्त्रणां पञ्चमूर्तीनां स्वरूपनिरूपणपरं पाञ्चरात्रम्। नारायण एव पाञ्चरात्रं प्रसादयामासेति शतपथब्राह्मणे **पञ्चरात्रसत्रपुरुषः इत्युच्यते** इति ज्ञायते।

दर्शनोदयः इत्यस्मिन् ग्रन्थे महामहोपाध्यायैः लक्ष्मीपुरं श्रीनिवासाचार्यैः एवमुक्तम् – **तापः पुण्ड्रः नाम मन्त्रः याग इति पञ्चसंस्काराणां प्रतिपादितत्वात् अस्य शास्त्रस्य पञ्चरात्रमिति नाम सिद्धम् ।**

अहिर्बुध्न्यसंहितायामेवं श्रूयते -

**तत्परव्यूहविभवस्वभावादिनिरूपणम् ।**
**पाञ्चरात्रह्वयं तन्त्रं मोक्षैकफललक्षणम्॥**

वैकुण्ठे पररूपेण, क्षीरसागरे व्यूहरूपेण, अवतारेषु विभवरूपेण, सर्वत्रान्तर्यामिरूपेण, आलयेषु अर्चारूपेण परब्रह्मस्वरूपं पञ्चधा व्यवस्थितमिति ज्ञापकात् मोक्षप्रापकमिदं शास्त्रं पाञ्चरात्रमिति व्यवह्रियते।

परमपुरुष[1]संहितायां श्रूयते एवम् -

**श्रीमन्नारायणः शौरिः हरिः परमपुरुषः ।**
**पञ्चरात्रिषु तत्सर्वं ब्रह्मणोऽह्यवदत्स्वयम् ॥**

श्रीमन्नारायणात् चतुर्मुखब्रह्मणा पञ्चरात्रिषु श्रुतमिति कारणात् शास्त्रमिदं पञ्चरात्रमित्युच्यते।

**Panchatantra : A name and origin CASS** इति ग्रन्थे पि.पि.आप्टे महाशयैः एवमुक्तम् -

**बौद्धं पाशुपतं चैव कापालं शैवमेव च।**
**गाणापत्यं च पञ्चैते तामसानि समीरिताः ॥**

---

[1] १.२४

**तमस्तु रात्रिरित्युक्तं तद्विष्टेन तामसम् ।**
**तस्मात्पञ्चेतरत्वाच्च शास्त्रं पञ्चेतरं विदुः ॥**

बोद्धं, पाशुपतं, कापालं, शैवं, गाणापत्यम् इति पञ्चशास्त्राणि तामसानि इत्युच्यन्ते । एतेभ्यः पञ्चशास्त्रेभ्यः भिन्नस्य प्रकृतशास्त्रस्य पञ्चरात्रमिति नाम ज्ञायते ।

ज्ञानामृतसार[1]संहितायामेवं श्रूयते -

**रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।**
**तेनेदं भगवच्छास्त्रं पञ्चरात्रमिति स्मृतम् ॥**

रात्रिशब्दस्य विज्ञानमिति अर्थः । तत् ज्ञानं पञ्चेन्द्रियेभ्यः पञ्चविधा इति, पञ्चविधानां विज्ञानं प्रबोधयति एतच्छास्त्रमिति। अतः अमुं शास्त्रं पञ्चरात्रमिति व्यवहरन्ति।

उत्सवसंग्रहे एवमुच्यते -

**पुराणन्यायमीमांसा तथान्यत्सांख्ययोगतः।**
**पञ्चप्रकारो विज्ञेयः पञ्चरात्रमिति स्मृतम् ॥**
**आगमं भारतं शिल्पं वैद्यं ज्योतिषमेव च ।**
**पञ्चशास्त्राणि संयोगात् पञ्चरात्रमिति स्मृतम् ॥**

पुराणं न्यायः मीमांसा साङ्ख्यं योगः इति पञ्च विद्यास्थानीयविषयाणां सङ्ग्रहस्य बोधकत्वात्, अपि च आगमः भरतशास्त्रं शिल्पशास्त्रं वैद्यशास्त्रं ज्योतिषशास्त्रमिति पञ्चशास्त्राणामैक्यत्वात् चास्य शास्त्रस्य पाञ्चरात्रमिति नाम सिद्धमिति उत्सवसंग्रहः ज्ञापयति ।

पराशरसंहितायामेवं श्रूयते -

**तेभ्यो ज्ञानं ददौ सर्वं पञ्चरात्रेण सर्वशः।**

चतुर्मुखब्रह्मा, सनत्कुमारः, सनकः, सनन्दः इति महर्षिभ्यः पञ्चरात्रिषु श्रीमन्नारायणेनोपदिष्टमिदं शास्त्रं पाञ्चरात्रमित्युच्यते।

---

[1] १.१.४४

महोत्सवविधौ एवं श्रूयते -

**श्रीशेषपक्षीश्वरपद्मगर्भसेनेशमुख्यान् प्रतिबोधयन्तम् ।**

**श्रीपाञ्चरात्रागमशास्त्रमाद्यं विष्णुं सदाहं शरणं प्रपद्ये ॥**

सांसारिकविषयवलयमग्नानामास्तिकजनानां समुद्धरणाय श्रीमन्नारायणः पञ्चरात्रिषु पाञ्चरात्रागमं क्रमेण नित्यानपायिन्यै महालक्ष्म्यै, स्वनाभिकमलसंजाताय चतुर्मुखाय, निरन्तरशय्यादिकैङ्कर्यपरायादिशेषाय, सन्ततवाहनाक्षाय विष्वक्सेनाय च प्रथमतः एकायनवेदमिति नाम्ना उपदिदेशेति साम्प्रदायवादिनामभिप्रायः ।

क्रियाकैरवचन्द्रिकायामेवं श्रूयते -

**पञ्चभिः रात्रिभिः निर्व्यूहः अस्योपदेशः इति पाञ्चरात्रम्** इति ।

भगवान् श्रीमन्नारायणः पञ्चरात्रिषु पञ्चसङ्ख्यकानां शास्त्रस्यास्योपदेशेन पाञ्चरात्रमिति सार्थकव्यवहारः सिद्धः ।

- **पाञ्चरात्रस्य नामान्तराणि –**

पाञ्चरात्रशास्त्रस्य तन्त्रम्, आगमः, एकायनं, प्रकृतिवेदः, मूलवेदः, सात्वतविधिः, भगवच्छास्त्रं, महोपनिषत्, भागवतमतं, दिव्यशास्त्रमिति च विविधनामानि सन्ति ।

- **तन्त्रम् -**

आगमानामेव तन्त्रमिति व्यवहारः । विस्तारार्थकस्य तन् धातोः उणादिप्रत्यये ष्ट्रन् संयोगे तन्त्रशब्दः भवति । एकायनवेदमन्त्राः तत्त्वमन्त्राः तेषामाश्रयान् अर्थान् सर्वान् उपबृंहणं कुर्वन् भक्तसंरक्षणं करोतीति कारणात् तन्त्रमिति उच्यते ।

❑ ❑ ❑

# ऋतुसंहारे वसन्तवर्णनम्

आचार्या सि.ललिताराणी *

**सर्वं प्रिये चारुतरं वसन्ते ।**[1]

**1.उपक्रमः**

महाकवेः कालिदासस्य एका महत्त्वपूर्णरचना ऋतुसंहारनामकं खण्डकाव्यम् । षण्णां ऋतूनाम् समूहः इति। महाकविनानेन काव्येस्मिन् प्रथमसर्गे ग्रीष्मर्तुवर्णनं विहितमस्ति। द्वितीयसर्गे प्रावृड्वर्णनं कृतमस्ति। तृतीयसर्गे शरदृतुवर्णनमस्ति। चतुर्थसर्गे हेमन्तवर्णनमस्ति। पञ्चमसर्गे शिशिरं वर्णयति। अन्तिमसर्गे (षष्ठसर्गे) वसन्तकालं वर्णयति ।

**2. ऋतुशब्दस्य व्युत्पत्तिः**

**ऋ – गतौ इयर्ति इति। ऋतुशब्दः ऋ गतावित्यस्माद्धातोः निष्पन्नः ।**[2] इयर्ति गच्छति अशोकपुष्पविकासान् इति। स च षड्विधः। तत्र मुख्यः वसन्त इति ग्रन्थानां निर्णयः, यथाऽऽह भगवान् गीतायां **ऋतूनां कुसुमाकरः**[3] इति।

**3. ऋतुसंहारम्**

कालिदासस्य रचना षड्सु सर्गेषु निबद्धाऽस्ति। ऋतुराजवर्णनसन्दर्भे श्रुङ्गारभावना प्रमुखा भवति। अत एव नायिकानायकयोः संवादरूपेण ऋतूनां वर्णनं कृतमस्ति। वसन्तर्तुवर्णनसन्दर्भे कविः कथयति –

**प्रफुल्लचूताङ्कुरतीक्ष्णसायको**
**द्विरेफमालाविलसद्धनुर्गुणः**

---

* सङ्कायाध्यक्षा, साहित्यसंस्कृतिसङ्कायः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[1] ऋतु.स.श्लोक.2.पु.177

[2] वा.प, भागः 2, 1433

[3] भग.गी.अ.20.श्लो.35.पु.573

**मनांसि वेद्धुं सुरतप्रसङ्गिनां**
**वसन्तयोद्धा समुपागतः प्रिये ॥**[1]

हे प्रिये विकसितचूताङ्कुरः एव तीक्ष्णबाणः भ्रमरपंङ्क्तिमेव शोभामानां धनुर्ज्यां कृत्वा वसन्तर्तुनामको योद्धा मनांसि पीडयितुं समुपागतः ।

**द्रुमाः सपुष्पाः सलिलं सपद्मं**
**स्त्रियः सकामाः पवनस्सुगन्धिः ।**
**सुखाः प्रदोषा दिवसाश्च रम्याः**
**सर्वं प्रिये चारुतरं वसन्ते ॥**[2]

वसन्ते दृश्यं सर्वं मनोहरम् । वृक्षाः पुष्पैः सहिताः, जलाशयाः पद्मैस्सहिताः, स्त्रियः मदनयुक्ताः, पवनः अत्यन्तं सुगन्धिः, प्रदोषाः सुखमयाः दिवसाः अपि मनोहराः विलसन्ति ।

**वापीजलानां मणिमेखलानां**
**शशाङ्कभासां प्रमदाजनानाम् ।**
**चूतद्रुमाणां कुसुमान्वितानां**
**ददाति सौभाग्यमयं वसन्तः ॥**[3]

वसन्तः प्रकृतेः सौन्दर्यमेव वर्धयति । वापीषु जलानां रत्नखचितमेखलानां चन्द्रप्रकाशानां स्त्रीणां आम्रवृक्षाणां पुष्पयुतानां सौभाग्यं वसन्त एव प्रयच्छतीति ।

**स्तनेषु हाराः सितचन्दनार्द्राः**
**भुजेषु सङ्गं वलयाङ्गदानि ।**
**प्रयान्त्यनङ्गातुरमानसानां**
**नितम्बिनीनां जघनेषु काञ्च्याः ॥**[4]

---

1 ऋतु.सं.श्लो.1.पु.176
2 तत्रैव.श्लो.2.पु.177
3 तत्रैव.श्लो.3.पु.178
4 तत्रैव.श्लो.6.पु.182

श्वेतचन्दनक्लिन्नाः हाराः स्त्रीणां स्तनेषु भवन्ति। भुजेषु वलयाङ्गदानि भवन्ति। मन्मथविकारमनसां सुन्दरीणां जघनेषु मेखलाः गच्छन्तीति।

**उच्छ्वासयन्त्यः श्लथबन्धनानि**
**गात्राणि कन्दर्पसमाकुलानि।**
**समीपवर्तिष्वधुना प्रियेषु**
**समुत्सुका एव भवन्ति नार्यः॥**[1]

मदनेन व्याकुलानि, अत एव श्लथानि गलितानि येषां तानि। गात्राणि अङ्गानि सोत्साहं कुर्वन्ति नार्यः। अस्मिन् वसन्तकाले स्वकान्तेषु समुत्सुका एव भवन्ति समुत्कण्ठिता एव भवन्ति। वसन्तस्य अतीव कामोद्दीपकत्वादिति भावः।

**अङ्गानि निद्रालसविभ्रमाणि**
**वाक्यानि किञ्चिन्मदलालसानि।**
**भ्रूक्षेपजिह्मानि च वीक्षितानि**
**चकार कामः प्रमदाजनानाम्॥**[2]

मन्मथः प्रमदाजनानां गात्राणि निद्रालसविभ्रमविलासैः युक्तानि करोति।। किञ्चित् उत्सुकता, विलोकितानि (भ्रूक्षेपजिह्मानि) भ्रूविलासेन वक्राणि चकार।

**प्रियङ्गुकालीयककुङ्कुमाक्तं**
**स्तनेषु गौरेषु विलासिनीभिः।**
**आलिप्यते चन्दनमङ्गनाभि**
**र्मदालसाभिर्मृगनाभियुक्तम्॥**[3]

मदेन अलसाभिः अङ्गनाभिः स्तनेषु प्रियङ्गुः- सुगन्धिबीजविशेषः कृष्णागुरुः कुङ्कुमं काश्मीरजं तैः मिश्रितं कस्तूर्या सहितं चन्दनम् आलिप्यते।

---

[1] ऋतु.सं.श्लो.8.पु.184
[2] तत्रैव.श्लो.11.पु.188
[3] तत्रैव.श्लो.12 पु.190

**गुरूणि वासांसि विहाय तूर्णं**
**तमानि लाक्षारसरञ्जितानि ।**
**सुगन्धिकालागुरुधूपितानि**
**धत्ते जनः काममदालसाङ्गः ॥[1]**

कामस्य मदेन अलसान्यङ्गानि सत्वरं गुरूणि वासांसि त्यक्त्वा लाक्षारसेन आलक्तरसेन रञ्जितानि। सुगन्धिकालागुरुधूपितानि सुगन्धिना शोभन गन्धवता धूपितानि वासितानि सूक्ष्माणि धत्ते।

**पुंस्कोकिलश्चूतरसासवेन**
**मत्तः प्रियां चुम्बति रागहृष्टः ।**
**कूजद्विरेफोप्ययमम्बुजस्थः**
**प्रियं प्रियायाः प्रकरोति चाटु ॥[2]**

चूतरससेवनेन मत्तः (क्षीबः) पुमांश्चासौ कोकिलश्च। प्रेममुदितः प्रेयसीं चुम्बति। कमलस्थितं गुञ्जन्भ्रमरोपि कान्तायाः मिथ्याश्लाघां प्रकरोति।

**कान्तामुखद्युतिजुषामपि चोद्गतानां**
**शोभां परां कुरववकद्रुममञ्जरीणाम् ।**
**दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य**
**कन्दर्पबाणपतनव्यथितं हि चेतः ॥[3]**

कामिनी वदनानां (द्युति) कान्तिं जुषन्ते। सद्यः प्रदुर्भूतानां कुरबकद्रुममञ्जरीणां (लोके कोरांटी इति) शोभां सहृदयस्य चित्तं हरति। कन्दर्पस्य बाणपतनेन शरपातनेन दुःखितं न भवेत्।

**किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं**
**किं कर्णिकारकुसुमैर्न कृतं न दग्धम् ।**

---

[1] ऋतु.सं.श्लो.13 पु.191
[2] तत्रैव.श्लो.14.पु.192
[3] तत्रैव.श्लो.18 पु. 196

**यत्कोकिलः पुनरयं मधुरैर्वचोभि**
**र्यूनां मनः सुवदनानिहितं निहन्ति ॥**[1]

शोभनानि वदनानि स्थापितं तरुणानां मनः हरन्ति। शुकमुखच्छविष्विव पलाशपुष्पेषु तथा कर्णिकारकुसुमैः दग्धं न करोति। यत् यस्मात्कारणात् कोकिलः वारं वारं मधुरैः वचोभिः निहन्ति।

**नानामनोज्ञकुसुमद्रुमभूषितान्ता**
**न्हृष्टान्यपुष्टनिनदाकुलसानुदेशान्।**
**शैलेयजालपरिणद्धशिलातलौघा**
**न्दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥**[2]

अपि च हे प्रियसखे। प्रियमुखे मुखकान्तिं प्राप्नोति। तादृशः नानामनोज्ञ कुसुमद्रुमभूषितशोभां दृष्ट्वा कस्य हृदयं मदनबाणेन पिण्डितं न भवति?

**उपसंहारः**

अत एव महाकवेः कालिदासस्य मुखात् निस्सृतं खण्डकाव्यम् अतिसुन्दरम् सुमनोज्ञम् इति वक्तुं नास्ति संशीतिलेशः इति। ऋतूनां राजभूतः ऋतुः रसराजस्य शृङ्गारस्य विभावेषु मुख्य इति लोकविदितमेव। अस्य परिशीलनेन सर्वमपि वातावरणं ऋतुराजे रसराजस्य वर्धकमित्यवगन्तुं शक्यते। सम्भवेष्वपि विविधवर्णनेषु रसमाधारीकृत्यैव वर्णनानि प्रवृत्तानीति कापि दिग्दर्शिता कविकुलगुरुणा। खण्डकाव्येष्वपि रसोन्मुखीकरणं सहृदयकृत्यमित्युपदिष्टं कालिदासेन।

**उपयुक्तग्रन्थसूची**

1. **श्रीमद् भगवद्गीता,** श्रीमत्परमहंसपरिव्राजकाचार्य पूज्यपाद श्रीशङ्करानन्दसरस्वती विरचितया गीतातात्पर्यबोधिन्या चतिवर श्री भोले बाबा विरचितेन तदनुवादेन च समलङ्कृता, भारतीय विद्याप्रकाशन, दिल्ली – 2015

[1] ऋतु.सं.श्लो.20.पु.199
[2] तत्रैव.श्लो.25.पु.205

2. **वाचस्पत्यम्,** निर्माणम् - सूननझाः, निर्देशनम् - प्रो.मदन मोहन जाः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), क.जे.सौमैया संस्कृतविद्यापीठम्. विद्याविहारः, मुम्बई.
3. **ऋतुसंहारः**- मृणलिनी व्याख्या, रवि मोहनरायः रावि कृष्णकुमारी, 404,डा डी हौज जंजनं काण्ण, चिराला - 523155
4. **संस्कृतसाहित्येतिहासः** - आचार्य रामचन्द्रमिश्रः, चौखम्बा विद्याभवन, वारणसी -2013.

❑ ❑ ❑

महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका
महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# Curriculum Development for Sanskrit students in the light of IKS and NEP-2020

**R.J. Rama Sree*,**
**Sri N. Mukteswara Rao, IAS (Retd.)**

## 1. Introduction

Normally any language is used as a tool to express our feelings, emotions, a tool for communication for which there will be a continuous process of learning, acquiring, organizing, disseminating, and accessing different of domains of knowledge in all stages of our life. Unlike other languages, Sanskrit is a classical language of India representing its heritage, treasure of ancestry, value system which governed its people, chronological history of its evolution in all walks of human life, will and wisdom of ancient sages and rishis who are greater than present day scientists, treasure house of vast wisdom etc.

In Sanskrit, Sáṃskṛta- is a compound word consisting of *Sáṃ* ('together, good, well, perfected') and *kṛta-* ('made, formed, work'). It connotes a work that has been "well prepared, pure and perfect, polished, sacred"[1]. Interestingly, Science is defined as a systematically organized body of knowledge on a particular subject. Even though Sanskrit is considered as sacred language of Ancient India, the name given to Sanskrit language itself implies that the content of ancient Sanskrit texts of all disciplines of thousand years back, is scientific. It is the language that has acquired completeness in all dimensions like expressiveness, linguistic abilities, writing systems, phonology, morphology, linguistic resources like dictionaries, thesaurus etc., and well developed unambiguous grammatical theories.

* **Dept. of Computer Science, NSU, Tirupati**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

### 1.1. Amazing facts about Sanskrit Language

- It is the Mother of all languages. Most of world languages have been directly or indirectly influenced by this language.
- Sanskrit has the power to say a sentence with a minimum number of words than that of any other language.
- Sanskrit has an *amazing* wealth of words and synonyms with etymological meanings to give great versatility. It has in *fact* over 70 words for water while English has just got one. Even elephants have *amazing* 100 names in Sanskrit each with specific meaning. It has over 122 words for the action "to go" each with specific meaning.
- Qualitative and quantitative rich textual content in most advanced sciences in all walks of human life are available unlike other languages.
- Sanskrit is a treasure house of ancient traditional knowledge consisting of
    - Well defined sciences like Mathematics, Astronomy, Metallurgy etc., predictive sciences like jyothisya, Environmental Sciences, Medicine, reasoning Sciences, Grammar Formalisms, agriculture etc.
    - Entertaining sciences like fine arts, performing arts, vocational arts.
    - civilization crafts
    - spiritual sciences, literature of all sorts etc.
- Research has shown that the phonetics of this language has roots in various energy points of the body and reading, speaking or reciting Sanskrit stimulates these points and raises the energy levels, whereby resistance

against illnesses, relaxation to mind and reduction of stress are achieved.
(Sanskrit Phonetic system is very scientific (अक्षरात्मकम्) – wherein the sequence of all Aksharas depends on the place of production along our vocal cords (सर्वपेटिका) unlike phonetics of other languages (शब्द आत्मकम्).

- Sanskrit is the only language which uses all the nerves of the tongue. By its pronunciation, energy points in the body are activated that causes the blood circulation to improve. This, coupled with the enhanced brain functioning and higher energy levels, ensures better health. Blood Pressure, diabetes, cholesterol etc. are controlled.
  (Ref: American Hindu University after constant study)

**1.2. Learning system before British**

The education system of ancient times was regarded as a source for the knowledge, traditions and practices that guided and encouraged humanity.

- Gurukulas (teacher & students live close proximity – But only for certain communities)
- Caste Based Education (career/ profession is inherited from family)
- Learning is a part of life without/ with less any performance evaluation; But pupil 's learning is assessed, and progressive improvement is planned without restriction on time.
- Well established Universities like Nalanda, Takshshila etc
- Clear distinction between practical and theoretical studies
- No financial involvement; Probably most of the financial burden is on the society; not on teacher and student

- Well defined texts as knowledge sources in all walks of life/career
- Humanity and ethics are underlying principles to be practiced.

### 1.3. Impact of British on Indian Education

British rule is said to have been responsible for the modernization witnessed in the Indian civilization.

- With the advent of the British Rule in India, their policies and measures breached the legacies of traditional schools of learning which resulted in the need for creating a class of subordinates. To achieve this goal, they instituted a number of acts to create an Indian canvas of English color through the education system.
- To rule in India, they planned to educate a small section of upper and middle classes to assist them in trading and profit making.
- Slowly Indian traditional outlook on education changed and western culture completely affected the education system in India.
- Even after independence, Sanskrit was treated as another language - Not even as classical language of India.
- Practice of Teaching, learning of precious traditional branches of knowledge slowly disappeared; and this affected oral passing down of family professional traditional knowledge down to their next subsequent generations.

### 1.4. Present status of Education

The education practice must make its contribution to the evolution of healthy habits, attitudes, and attributes of character so that the students become effective and disciplined citizens of the nation after the achievement of their studies. However, the present education system is not that effective because of the following reasons.

- The education provided in our schools and colleges is detached from life. The curriculum as formed and presented

through the conventional methods of education does not give the students insight into the everyday world in which they are living. When they finish their studies, they feel ill-adjusted in society.

- More drop outs
- Privatization of Education
- Heavy burden on parents
- More stress to the students (Every year, at least 2 to 5 IITians' suicidal stories)
- Automatic passing of the students
- Quality measured in terms of marks, not on knowledge gained

**2.0. Status of Sanskrit in National Education Policy 2020**

The National Education Policy of India 2020 (NEP-2020), which was started by the Union Cabinet of India on 29 July 2020, outlines the vision of new education system of India. The policy is a comprehensive framework from elementary education to higher education as well as vocational training in both rural and urban India. The policy aims to transform India's education system by 2030.

**2.1. Some of salient features of NEP- 2020 about Sanskrit as a language**

NEP-2020 approved by the Union Cabinet proposed the setting up of an Indian Institute of Translation and Interpretation (IITI) while also laying significant emphasis on Sanskrit and other Indian languages. Some of the points noted in NEP-2020 document[2] are stated below:

- Sanskrit will be "mainstreamed" with strong offerings in school - including as one of the language options in the three-language formula - as well as in higher education.
- Sanskrit Universities too will move towards becoming large multidisciplinary institutions of higher learning. It says that

"the rich heritage of ancient and eternal Indian knowledge and thought has been a guiding light for this Policy- these provisions raise important issues of the connection between language, knowledge, and power.

- This policy also upholds the long-standing state patronage of Sanskrit language, its ongoing efforts to 'Sanskritise' Indian languages, and construct a particular national identity.
- The policy also suggests the hiring of outstanding local artists, writers, crafts-persons, and other experts as master instructors; accurate inclusion of traditional Indian knowledge including tribal and other local knowledge throughout into the curriculum, across humanities, sciences, arts, crafts, and sports etc.
- Strong departments and programmes in Indian languages, comparative literature, creative writing, arts, music, philosophy, etc. will be launched and developed across the country, and degrees will be developed in these subjects.
- India will expand its institutes and universities studying all classical languages and literature, with strong efforts to collect, preserve, translate, and study the tens of thousands of manuscripts that have not yet received their due attention.
- Indian Knowledge available in Sanskrit may be included in all the subjects in school education such as Science, Mathematics, History etc.
- The Ministry of Education in November 2021 constituted a high-powered committee, the Bharatiya Bhasha Samiti, for the promotion of Indian languages, led by the Rashtriya Swayamsevak Sangh (RSS)-affiliated Sanskrit proponent and the committee is tasked with preparing an action plan for the growth of Indian languages as prescribed under National Education Policy NEP-2020, which requires mother tongue

to be the medium of instruction in schools and higher education institutions[3].

- Constitution of a committee to suggest a long term plan and vision for the development of Sanskrit under the chairmanship of Sri N. Gopala Swami, Chancellor, NSU, Tirupati[4].

**2.2. Some of salient features of IKS about Sanskrit as a treasure house of Knowledge**

The richness and diversity of Indian knowledge systems have been recognized and celebrated around the world, and they have influenced many fields of study. Indian knowledge systems cover a wide range of disciplines, including philosophy, spirituality, science, mathematics, medicine, astronomy, and others. The Upanishads, or philosophical texts are regarded as the foundation of Hindu philosophy. Ayurveda, an ancient Indian medical system, is thought to have originated around 5,000 years ago and is still practiced today. Yoga, another Indian system, includes physical, mental, and spiritual practices and has grown in popularity around the world. Indian mathematics has had a profound impact on the world, including the invention of the decimal system and the concept of zero. Indian astronomy has also made significant contributions, such as the discovery of equinox precession and the calculation of the length of a solar year. Indian knowledge systems also include various art forms that have evolved over time, such as music, dance, and literature etc.

These systems evolved over thousands of years and were passed down through generations through oral and written traditions. In order to facilitate, promote and coordinate multi-disciplinary and transdisciplinary research on all aspects of IKS, an innovative cell - Indian Knowledge System (IKS) is established under Ministry of Education (MoE), to

explore the possibility of exploring the development of societal applications useful to the present society.

### 3.0. Design and development of Curriculum and Research Environment from the perspective of Sanskrit

NEP-2020 mainly focuses on the education system which produces students with knowledge, confidence, values and skills. It could be because of complete lack of relationship between education, employment and skill development in conventional education system. The present alarming situation necessitates transformation and/or redesigning of education system, not only by introducing innovations but developing "learner-centric approach" in the entire education delivery mechanism and globally followed evaluation system as well. There is a need to allow the flexibility in education system, so that students depending upon their interests and aims can choose interdisciplinary, intra-disciplinary and skill-based courses. This can only be possible when choice based credit system (CBCS), an internationally acknowledged system, is adopted. The CBCS not only offers opportunities and avenues to learn core subjects but also exploring additional avenues of learning beyond the core subjects for holistic development of an individual.

In the above scenario, Sanskrit universities in India have a major role in framing the syllabus as well as creating suitable research Environment. The total framework for this may be developed in two streams viz., (i) Curriculum with Sanskrit as major content and (ii) Curriculum with Sanskrit as minor for Students/Researchers .

While framing the curriculum for different educational programs, NEP-2020 classified course content as follows.

- Core Course: A course, which should compulsorily be studied by a candidate as a core requirement is termed as a Core course.
- Elective Course: Generally, a course which can be chosen from a pool of courses is called an Elective Course.

a) Discipline Specific Elective (DSE) Course: Dissertation/Project:
b) Elective courses may be offered by the main discipline/subject of study is referred to as Discipline Specific Elective.
c) Generic Elective (GE) Course: An elective course chosen generally from an unrelated discipline/subject, with an intention to seek exposure is called a Generic Elective.
d) Ability Enhancement Courses (AEC): The Ability Enhancement (AE) Courses may be of two kinds: Ability Enhancement Compulsory Courses (AECC) and Skill EnhancementCourses (SEC).

**3.1. Curriculum for Sanskrit as major content**

The following points may be noted in framing the curriculum for Sanskrit as core or DSE-

a) Only a finite number of conventional courses like vyakarana, nyaya, dasrshnas etc., are being offered at present as core /DSE at present.
b) More focus to be given to the neglected to traditional subjects. The course content as either core or DSE should be developed. For example, some of the forgotten branches of traditional subjects are

- Material Sciences like Astronomy, Astrology, Metallurgy etc
- Life Sciences like वृक्षशास्त्रम्, अश्व-पशुवैद्यम् etc.

- Traditional Indian Medical systems, Herbal medicines, traditional therapies and corresponding valuable texts like चरकसंहिता, सुश्रुतसंहिता etc.
- Fine arts and performing arts like गुहचित्र-कूट्यचित्र, शिल्पशास्त्र, गान्धर्व शास्त्र etc.
- Pedagogy- Focus to be given to concepts of अध्यापनविद्या - गुरुकुल Systems - origin, growth & Contribution - various learning methodologies - their relevance to modern times etc., and more dimensions of pedagogical studies should be thoroughly understood and implemented.

c) A serious thought on exploring interdisciplinary courses of Sanskrit with modern subjects to enrich learning of Sanskrit core /DSE should be given.

- Vedic mathematics & modern mathematics
- Vyakarana and Natural Language Processing
- Astrophysics & Khagola shastra
- Reasoning in AI and Tarka shastra
- Modern Medicine and Ayurveda
- Yoga and psychiatry
- Psychology and cognitive science of IKS
- Modern law and Indian traditional law
- Indian and western language processing tools like Amarakosham and thesaurus
- Comparative grammar formalisms of Indian & western languages
- Indian and western anesthetics - Modern day relevance

Such combinations must be identified and both Sanskrit and non-

Sanskrit students shouldinterchangeably share the concepts of both sides of subjects.

d) A section titled "multilingualism, and the power of language" was included to the updated National Education Policy (NEP). In order to rightly implement this, different Indian language expertise may be collaborated to develop (i) course contents of modern and traditional subjects into the different Indian Languages through translation and (ii) to develop inter-disciplinary content.

e) Multidisciplinary education is a concept that has been embraced by the Indian government through the new NEP-2020. This approach to learning looks at how different disciplines can interact and overlap with each other to create a comprehensive understanding of a subject. It is very important to bridge the gap between modern subjects and traditional Sanskrit knowledge systems. If not, purpose of education may be lost after some time.

f) While introducing and framing the core and DSE contents, the concept of ‘Contemporarization’ – useful to the present day context, is essential to draw attention on usefulness of Indian Traditional knowledge.

**g)** There is a peculiar situation where some practitioners of traditional knowledge do not have formal learning in Shastras they are practicing which may bring disrepute for the ancient traditional knowledge. For example, an ayurvedic doctor in village might not have seen the original text of चरकसंहिता and bharatanatyam practitioner might not have seen the texts of Bhatamuni. Hence it is suggested to devise customized readers for approaching and making the detail study of these traditional sciences.

**3.2. Curriculum for Sanskrit as minor content**

Students who pursue modern subjects as core should be given a wide variety of course content from Sanskrit and IKS in the framework of CBCS as DSE, GE, AEC since Sanskrit universities are the only scope and place of study for such students.

Another reason is that most of the students want to stick to modern subjects as core for career purpose and may be interested to take our traditional subjects as inter-disciplinary- and for such students DSE may be the best choice. Hence developing Inter-disciplinary content with (a) Languages and (b) Modern Sciences is the foremost important task.

Nowadays teaching traditional subjects has become controversial debate where everyone has their own valid points. Some people claim that these conventional subjects are inadequate for learning while others believe that these are imperative for the future and Traditional subjects do not come in handy when it is time for the modern working world. In such context, the need for contemporizing is a must - wherein a perfect combination of modern and traditional course contents is to be paired in order to bring a new learning orientation.

**4. 0. Conclusion**

The main thrust of NEP-2020 regarding higher education is to end the fragmentation of higher education by transforming higher education institutions into large multidisciplinary universities, colleges, and HEI clusters, each of which will aim to have more students. The new NEP-2020 is based on four pillars which are **Access, Equity, Quality, and Accountability**. Hence the work to be done is to be treated as a single whole task and all the Sanskrit universities should take their part with the concept of synergy. The following must be remembered while attempting to design the course curriculum.

- Hebrew, which has tressured religious and scriptural knowledge became extinct. Now with the efforts of administration of Israel, it has become relevant and spoken everywhere. The success

story of Hebrew can be repeated in respect of Sanskrit Language "mainstreaming".

- Designing and developing course curriculum for Sanskrit as core and non-core is not an easy task and is not the same as that of modern subjects- as modern programs are uniformly offered across the globe and ideas can be easily shared.
- If not done properly, there may not be a next chance to hook up with modern subjects and we may lose the chance to rediscover our identity to present modern world.
- Sanskrit Universities gain universality and doors are open for learning Sanskrit from nooks and corners of the country if and only if properly planned.
- Younger generations are to be trained to learn and propagate untouched branches of Indian traditional knowledge which are to be revived.
- Genuine studying of Sanskrit in original texts enables them deep understanding of the knowledge and wisdom in Sanskrit texts and helps Research Development and new patents for the country.

## References

1. https://en.wikipedia.org/wiki/Sanskrit
2. https://www.education.gov.in/sites/upload_files/mhrd/files/NEP_FinalEnglish0.pdf
3. https://www.hindustantimes.com/india-news/centre-sets-up-committee-to-promote-indian-languages-101637175239432.html
4. https://www.education.gov.in/sites/upload_files/mhrd/files/document-reports/Report-CVRM.pdf

PS: Sincere thanks to Mr. V. Bharat Kumar and Ms. V. Rupika who supported in typing and editing the document.

❑ ❑ ❑

# यजुर्वेदीयहस्तसञ्चालनविधिः

डा. निरञ्जनमिश्रः*

शुक्लयजुर्वेदस्य माध्यन्दिनशाखायां हस्तस्वरेण साकं मन्त्राः पठ्यन्ते। तत्र उदात्तादि स्वरेण साकं हस्तस्वरः अनिवार्यतया कर्तव्यः भवति। अतः उक्तं याज्ञवल्क्येन –

**याथा वाणी तया पाणि रिक्तं तु परिवर्जयेत्**
**यत्र यत्र स्थिता वाणी पाणिस्तत्रैवतिष्ठति।** (या.शि. - 47)

यदि हस्तसंचालने दोषाः भवन्ति चेत् वेदपाठस्य फलं नश्यति। उक्तं हि याज्ञवल्क्येन – हस्त भ्रष्टः स्वराद् भ्रष्टो न वेद फलमश्नुते। यो हस्तस्वरं विहाय मन्त्रपाठं करोति स तु अनृतः अवैदिकश्च भवति तथा पापभाग्भवति।

**ऋचो यजुंषि सामानि हस्तहीनानि यः पठेत्**
**अनृचो ब्राह्मणस्तावद् यावत् स्वारं न विन्दति।** (या.शि. - 40)

अध्ययनार्थं उपवेशने सामान्यनियमः –

अध्ययनसमये शिष्यस्य शारीरिकस्थितिः कथं भवेत् तन्निर्णितम् याज्ञवल्क्येन। गुरोः समक्षम् उपविश्य विद्यार्थी स्व हस्तौ जानुनोरूपरि संस्थाप्य गुरोरनुमतिं संप्रार्थ्य प्रसन्नो भूत्वा स्व हस्ताग्रे दृष्टिं निवेश्य पठनं प्रारम्भ्येत्। उक्तं च याज्ञवल्क्येन -

**हस्तौ सू संयुतौ धार्यौ जानुरोरूपरि स्थितौ**
**गुरोरनुमतिं कुर्यात् पठन्नाऽन्यमतिर्भवेत्।**
**उरूभागे तृतीये तु कूर्परं न्यस्यदक्षिणम्।**
**सुप्रसन्नामना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः।**
**निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।** (या.शि. - 20.21)

* सहाचार्यः, वेदभाष्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**उदात्तादिस्वरविचारः**

वाजसनेयप्रातिशाख्ये "**अथशिक्षाविहिताः**" इत्यतः "**आयाममार्दवाभिहिताः**" "**सवनक्रमेणोरकण्ठभ्रूमध्यानि**" इति सूत्रत्रये एतेषां स्वरितादिस्वराणामुपक्रमः कृतो वर्तते। अत्र प्रातसवन-माध्यन्दिनसवन-तृतीयसवन क्रमेण उर-कण्ठ-भ्रूमध्यानीति त्रीणि वायोः स्थानानि भवन्ति । एतेषु स्थानेषु वर्णोच्चारणवेलायां शरीरस्य आयममार्दवाभिधातेति त्रयो विकाराः भवन्ति। **आयमो नाम शरीरस्योर्ध्वगमनम्, मार्दवो नाम अधोगमनम्, अभिघात नाम तिर्य्यग्गमनम् - अयं उच्चनिचाभ्यामभिनिवर्त्येते** एवमेव शरीरस्य प्रयत्नेन अथवा विकारेण एते स्वराः निष्पद्यन्ते।

उच्चैरुदात्तः (आयामेन) गात्राणामूर्ध्वगमनेन यः स्वरो निष्पद्यते स उदात-संज्ञकःस्यात्। यथा लजी3न् शाची3न् अग्ना3इ।

नीचैरनुदात्तः (मार्दवेण) गात्राणामधोगमनेन य- स्वरो निष्पद्यते सो अनुदातसंज्ञकः स्यात्। आर्षेयु ऋषीणाम्।

उभयवान्स्वरितः – उदात्तस्योर्ध्वगमनं गात्राणां प्रयत्नः अनुदात्तस्याधोगमनं गात्राणां प्रयत्नः। आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वरः उच्चार्यते स स्वरितसंज्ञः स्यात्। यथा **धान्यमसि** , अर्थात् – उदात्तानुदातोभयप्रयत्ननिष्पाद्यः स्वरितः। यथा धातुद्वयेन त्रपुसीसादि निष्पद्यते तथैव। एतस्य स्वरितस्य अष्टे भेदाः भवन्ति। जात्य – अभिनिहित – क्षैप्र-प्रश्लिष्ट तैरोव्यञ्जन-तैरोविराम-पादवृत-ताथाभाव्येति। एतेषु जात्यः भिन्नः भवति ।

**एकपदे नीचपूर्व सयवो जात्य इष्यते ।**
**अपूर्वोऽपि परस्तद्वत् धान्यं-सुप्वा-स्वरित्यपि ।।** (या.शि-78)

**एकपदे नीचपूर्वः सयवो जात्यः**। यत्र एकस्मिन् पदे अनुदात्तपूर्व यकारेण - वकारण वा सहित स्वरितः भवति सः "जात्यस्वरसंज्ञः" इत्युच्यते। यथा " कुन्या इव" "धान्यमसि" अपूर्व "स्वेर्दुवेषु"।

एतदनन्तरं अन्ये "अभिनिहित" प्रभृतयः सप्तस्वराः वेदितव्याः भवन्ति। "**उदात्तादयः परे सप्त**" अभिनिहित-क्षैप्र-प्रश्लिष्टा एते त्रयो नीचस्वराः भवन्ति।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अभिनिहितः-

**ए ओ-आभ्यामुदात्ताभ्यामाकारो निहितश्च यः**

**स च यत्र प्रलुप्येत तं चाभिनिहितं विदुः ।।** (या.शि. - 79)

को नाम अभिनिहितस्वरः – **एदोद्भ्यामकरो लुगभिनिहितः** अर्थात् एकारैकाराभ्यामुदात्ताभ्यां परः अकारः यत्र लुप्यते तत्र अभिनिहित स्वरः स्यात्। उदाहरणम् ते अप्यरसाम् – तेऽप्सरसाम् , ते अवुन्तु तेऽवन्तु ओकास्स्य-वेदः असि-वेदोऽसि, तुथः असि तुथोऽसि।

**क्षैप्रः-**

**इ-उवर्णौ यदोदात्तावापद्यते यवौ क्वचित्**

**अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणम् ।।** (या.शि. - 80)

"**युवर्णौ यवौक्षैप्रः**" इति सूत्र वलेन यदा इवर्णौ उवर्णौ उदातवनुदास्वरोदयौ यकारवकारभ्यां यथासंख्येन युक्तौ तदा क्षैप्रसंज्ञः स्यात् – उदाहरणम्- त्रि-अम्बकम्- त्र्यम्बकम् , वाजीअर्वन् -वाज्यर्वन् उवर्णस्य – नु इन्द्र योजा-न्विन्द्र योजा , द्रु अन्नः द्रवन्नः सुर्पिः।

प्रश्लिष्टः-

**इकारो यत्र दृश्येत इकारणैव संयुतः**

**उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ।।** (या.शि. - 81)

**इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः** अर्थात् - ह्रस्व इकारपूर्वउदात्तः ,परश्च इकारोऽनुदातः तयोः परस्परप्रश्लेषेसति प्रश्लिष्टसज्ञः स्वरः स्यात् यथा - **अभि-इन्धताम्** **अभीन्धताम् , स्रुचि इव -स्रूचीवघृतम्।**

**तैरोव्यञ्जनः-**

**उदात्तपूर्वः स्वरितो व्यञ्जनेन युतो यदि**

**एषः सर्वो बाहुस्वरस् तैरोव्यञ्जन उच्यते ।।** (या.शि-82)
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः** अर्थात् -उदातात्परो यः स्वरः , व्यञ्जनयुक्तः सः तैरोव्यञ्जनसंज्ञः स्यात्, उदाहरणम् - **इडे रन्ते हव्ये काम्ये इडे रन्ते चन्द्रे ज्योतेऽदिते सरस्वती।**

तैरोविरामः -

**अवग्रहात् परो यस्तु स्वरितः स्यादनन्तरः**

**तैरोविरामं तद्विद्यादुदात्तो यद्यवग्रहः।।**(या.शि-83)

**उदवग्रहस्तैरोविरामः** अर्थात् - सावग्रहपदपूर्वपदस्यान्तिमाक्षरं उदात्तस्वरश्चेत् सः तैरोविरामः भवति। उदात्तोऽवग्रह तत उत्तरः तैरोविरामसंज्ञः स्यात् । अवग्रहाभावेतु तैरोव्यञ्जनसंज्ञः -उदाहरणम् – गोपताविति गोपतौ, यज्ञपतिमिति यज्ञ-पतिम्।

पादवृत्तः -

**स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते**

**पादवृत्तो भवेत् स्वरः श्वित्रऽआदित्य दर्शनम्।।** (या.शि. - 84)

**विवृतिलक्षणः** पादवृत्तः अर्थात् स्वरयोरनन्तरयोरन्तरं विवृतिरूच्यते। तया लक्ष्यत इति विवृतिलक्षणः विवृत्यासहित इत्यर्थः। सः पादवृत्तसंज्ञः स्वरः स्यात्। उदाहरणम्- **का ई मरे – का ईमरे पिशङ्गिला। ध्रुवा असदन्नृतस्य।**

ताथाभाव्यः-

**उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः**

**ताथाभाव्यो भवेत्स्वारस् तनूनप्त्रे निदर्शनम्।।** (या.शि. - 85)

**अवग्रहे यदा नीच उच्चयोर्मध्यतः काचित्**

**ताथाभाव्यो भवेत्स्वरस् तनुनप्त्रे निदर्शनम्।**

उदात्तन्तो न्यवग्रहस्ताथाभाव्यः अर्थात् – उदातादिरूदातान्तः ताथाभाव्यसंज्ञकः स्वरो भवति। उदाहरणम् – तनूनप्त्र इति तनू नप्त्रै, तनूनपादिति तनू-नपात्।

**उदात्तानुस्वरितस्वरप्रदर्शनविधिः –**

**स्वरो वर्णोऽक्षरं मात्रातत्प्रयोगार्थ एव च**

**मन्त्रं जिज्ञास्यमानेन वेदितव्यं पदे पदे।**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इति नियमं पुरस्कृत्य स्वरसहितं मन्त्राः वक्तव्याः भवति। याज्ञवल्क्यशिक्षानुसारं –

**उदात्तं तु भ्रुवःप्रान्ते प्रचयं नासिकाग्रतः**

**हृत्प्रदेशेऽनुदात्तं तु तिर्यक् जात्यादिशीरितः।**।(या.शि-55)

**प्रचयस्वरोनाम स्वरितात् परम्, अनुदात्तमेकमनेकं वाक्षरमुदात्तवत्। एकश्रुत्या उच्चारणियं स्यात्। अयमेव प्रचमः प्रचितः प्रचो निचित उदात्तमय उदात्तश्रुति, एकस्वर, एकश्रुति** इति वैदिकैः व्यवह्रियन्ते।

**स्वरितादनुदात्तानां परेषां प्रचयस्वरः (ऋग्प्रातिशाख्ये) उदात्तश्रुति, एकस्वर एकश्रुति** अर्थात् उदात्तस्वरस्य हस्तप्रदर्शनं स्व भ्रुकुट्याः प्रन्तसमीपे (दक्षिणकर्णाग्रे इति यावत्) कुर्यात्। एव प्रचयं स्वरितं नासिकाग्रतः मुखाभिमुखं यावत्।अनुदातं हृत्प्रदेशे हृदयाभिमुखस्थाने। एतदर्थमुच्यते – हृद्यनुदातः मूर्ध्न्युदात्तः, श्रुतिमूले स्वरितः।

- उदात्तस्वरः चिह्नरहितः भवति। **उदात्तं रेखया हीनं न स्यात् चेत्स्वरितात्परम्, स्वरितादुत्तरं चेत्स्यात् तदेव प्रत्यय विदुः।**
- स्वरितस्वरः मन्त्रेषु वर्णेषु वा उपरिरेखां कृत्वा प्रदर्शयेत्। उर्ध्वरेखा तु वर्णस्य मूर्ध्नि तिष्ठति यः स्यि
- अनुदात्तस्वरः वर्णानाम् अधःरेखां कृत्वा संसूच्यते।
- ह्रस्वानुस्वारं ꣳ चिह्नेन प्रदश्र्यते।
- दीर्घ अनुस्वारं ꣴ इति चिह्नेन प्रदश्र्यते।
- उदात्तस्वरस्यानन्तरं यः विसर्गः भवति ᳲ चिह्नेन सूचितास्ति।
- स्वरितस्वरस्यनन्तरं यः विसर्गः भवति ÷ अनेन चिह्नेन तत् प्रदश्र्यते।
- अनुदात्तस्वरस्य परं विसर्गः भवति तत् ᳳ चिह्नेन संसूच्यते।
- अर्धन्युब्ज स्वरितस्वरं ᳵ अनेन चिह्नेन प्रदश्र्यते।
- पूर्णन्युब्ज स्वरितस्वरं ᳶ अनेन चिह्नेन प्रदश्र्यते।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

उदात्तस्वरस्य हस्तप्रदर्शनं उर्ध्वगामी – वामगामी इति भेदद्वयेन क्रीयते। उर्ध्वगामी इत्युक्ते भ्रुवःप्रान्ते हस्तं संस्थाप्यते। उदाहरणम् – वसोंः पवित्रपमसि।

वामगामी त्रिविधः वर्तते। अनुदात्तयोः मध्ये यः उदात्तः भवति तस्य प्रदर्शनं वामभागे एव प्रदश्र्यते। उदाहरणम्- **गायुत्री त्रिष्टुब्जगत्य** अत्र त्रि इत्यस्य वर्णस्य वामभागे उदात्तस्वरः भवति। **ष्टु** इत्यस्य उर्ध्वगामी भवति।

मन्त्रस्य अन्ते यदि एतादृशः उदात्तस्वरः भवति ततः पूर्वं अनुदात्तस्वरः भवति पुनः ततः परं मन्त्रस्यारम्भस्वरः अनुदात्तस्वरः भवति चेत् प्रथममन्त्रस्य उदात्तस्वरः वामगामी भवति। **त्वमंजसि गर्थुधम्** अत्र मन्त्रे धवर्णः अन्तिम उदात्तः भवति। एतस्य अपरमन्त्रस्य प्रारम्भः अनुदात्तेन स्वरेण भवति। अतः अयं उदात्तस्वरः वामगामी भवति।

मन्त्रस्य आरम्भः उदात्तस्वरेण भवति तथा तदुत्तर वर्णः यदि अनुदात्तः भवति तदा सः उदात्तः वामगामी उदात्तः भवति। यथा **य एतावंन्तश्च।**

**अनुदात्तस्वरः –**

शु य माध्यन्दिनसंहितानुसारं अनुदात्तस्वरः पञ्चधा विभज्यते- यथा निम्नगामी, अन्त्यदर्शी, दक्षगामी अन्तर्गामी, तिर्यग्दर्शी।

**निम्नगामी –**

उदात्त-अनुदात्त-स्वरित एतेषां स्वराणां क्रमः यदि तेनैव निर्दिष्टेन क्रमेण पौनपुन्येन आगच्छति चेत् अनुदात्तस्वरस्य प्रदर्शनं अधोभागे एव भवति। उदाहरणं – **गुणनांन्त्वागुणपतिं.. हवामहे।** अत्र मन्त्रे उभयोः ग कारयोः स्वरः अधोभागे एव भवति। अतः अयं निम्नगामी उनुदात्तः इति।

**अन्त्यदर्शी –**

यत्र बहवः अनुदात्तस्वराः क्रमबद्धतया वर्णेषु आगच्छन्ति तथा तत्र अन्तिमस्वरे एव हस्तं अधः नीयते, तदेव अन्तिमानुदात्तम् **अन्यदर्शी** अनुदात्तमिति आचक्षते। यथा वुलविज्ञायुस्थविर, अत्र 'य' वर्णे अनुस्वारस्वरस्य प्रदर्शनं भवति।

**दक्षगामी अनुदात्त –**

अनुदात्तरं उदात्तः, पुनः तदुत्तरं अनुदात्तस्वरः आयाति चेत् सः अनुदात्तः दक्षिणभागे प्रदर्श्येते। अयमेव दक्षगामी अनुदात्तः। उदाहरणम् - **गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह।** अत्र मन्त्रे नु – प वर्णयोः अनुदात्तप्रदर्शनं दक्षिणगामी भवति।

**अन्तर्गामी अनुदात्त –**

अर्धन्यूब्ज स्वरितस्वरस्य पूर्वं यः अनुदात्तः भवति तं किञ्चित् अन्तः संस्थाप्य प्रदर्श्यते। अतः स एव अन्तर्गामी अनुदात्तस्वरः उच्यते। उदाहरणम्- **कपर्दिने च व्युप्तकेशाय च।** अत्र मन्त्रे व्युपूर्व चकारस्य अनुदात्तस्वरः अन्तर्गामी अनुदात्तस्वरः भवति।

**तिर्यग्दर्शी अनुदात्त -**

अनुदात्तस्वरस्योत्तरं यदि ६ पूर्णन्यूब्जस्वरः आगच्छेत् तर्हि हस्तस्यस्थितिः पिण्डदानवत् किंचित् अधः संस्थाप्य ततः उपरि आनयेत्। उदाहरणम् – **बृहत्युष्णिहा ककुप्।** अत्र त्यु इति पूर्णन्युब्ज वर्णस्य पूर्वं ह कारस्य यः अनुदात्तः भवति सैव तिर्यग्दर्शी अनुदात्तः इति ज्ञायते।

**स्वरितस्वरः –**

मन्त्रभागे स्वरितस्वरः अपि पञ्चधा विभक्तः। यथा पूर्णस्वरितः, मध्यपातीस्वरितः, अर्धन्युब्जस्वरितः, अधोगामीपूर्णन्युब्जस्वरितः, दक्षिगामीपूर्णन्युब्ज-स्वरितश्चेति।

**पूर्णस्वरितः - त्र्यम्बकं यजामहे** इत्यत्र त्र्य वर्णः पूर्णस्वरितः भवति।

**मध्यपातीस्वरित –** उदात्तोत्तरस्वरितः तथा तदन्तरं अनुदात्तस्वरः भवति चेत् सः मध्यपातीस्वरितः भवति। उदाहरणम् – **गणानान्त्वा गणपति ७ हवामहे** इत्यत्र ना इति वर्णः मध्यगामीस्वरित भवति।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**अर्धन्युब्जस्वरितः -** ॅ अथवा ॣ इति न्युब्जस्वरितस्य परं अनुदात्तः भवति तदा हस्तं किञ्चित् हृदयप्रदेशं आनीय स्वरितवर्णागते पुनः हृदयदेशात् हस्तमानीय स्वरितस्थाने संस्थापनेन अर्धन्युब्जस्वरितस्वरः भवति। उदाहरणम् - **चु व्युप्तकेशाय च।**

**अधोगामीपूर्णन्युब्जस्वरितः -** ॣ इति पूर्णमन्युब्जस्वरः भवति। तस्यैव पूर्णन्युब्जस्वरस्योत्तरं उदात्तस्वरस्तथा तदुत्तरं यः स्वरितस्वरः आगच्छति सैव अधोगामीपूर्णन्युब्जस्वरः भवति। तदा हस्तस्वरं अधः वैपरित्येन प्रदर्शयेत्। उदाहरणम् – **बृहुत्युष्णिहा कुकुप्।**

**दक्षगामीपूर्णन्युब्जस्वरितः** – पूर्णन्युब्जस्वर ॣ स्वरवत् एतस्यापि हस्तप्रदर्शनं भवति। हस्तसंचालनसमये यदि पूर्णन्युब्जस्वरस्य अनन्तरम् उदात्तस्वरः ततः अनुदात्तस्वरः आगच्छति तदा एनं पूर्णन्युब्जस्वरितं दक्षिणस्यां नित्वा वैपरीत्येन प्रदश्र्यते। उदाहरणम्– **रुथ्यो न रुश्मीन्।**

पदान्ते व्यञ्जनवर्णश्चेत् स्वरः कथं भवतीति विषये उच्यते। यदि पदस्य अन्तिमे व्यञ्जनमायाति चेत् हस्तस्वरप्रदर्शनं पञ्चधा भवति।

1. **मकारान्त -** मुष्ट्याकृतिर्मकारे स्यात् (या.शि.) यदि पदान्ते मकारः भवति तर्हि तस्य प्रदर्शनं हस्तं मुष्ट्याकारं कृत्वा प्रदर्शयेत्। उदाहरणम् -**त्वमुजासि गर्भधम्।**
2. न कारे तु नखग्रहः – पदान्ते यदि नकार आगच्छति तर्हि तर्जन्यग्रेण अङ्गुष्ठं स्पृशेत्। यथा **रुथ्यो न रश्मीन्।**
3. ककारान्त तथा टकारान्त वर्णः पदान्ते भवति चेत् तर्जन्यङ्गुलं किञ्चित् वक्रेण स्थापयेत्।

   उदाहरणम् - **स्वाहा वाट्, अध्यवोदधिवक्ता प्रथमोपदैव्यो भिषक्।**
4. पकारान्त – पदान्ते पकारः भवति चेत् पञ्चाङ्गुलिभिः तस्य प्रदर्शनं भवति। पञ्चाङ्गुलिनामग्रभागं एकीकृत्य प्रदर्शयेत्। उदाहरणम् – **गायत्री त्रिष्टुब् जगत्यऽष्टुब्।**
5. तकारान्त – त कारे कुण्डलाकृतिः। **सहस्राक्षः सहस्रपात्।** तकारः पदान्ते भवति चेत् हस्तस्य आकारः कुण्डलाकृतिवत् भवति। एतेषाम् एव व्यञ्जनवर्णनाम् हस्तस्वरप्रकारविषये ग्रन्थेषु चर्चा दृश्यते नान्येषाम्।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**विसर्गसमये हस्तस्वरः कथम् –**

1. उदात्तस्वरस्य अनन्तरं यदि उष्म विसर्गः भवति चेत् तर्जन्यङ्गुलिद्वारा तस्य प्रदर्शनं भवति। यथा –

**भूमिमथो पुरः** मन्त्रभागे एतस्य प्रदर्शनं ꣳ इति चिह्नेन भवति।

**उर्ध्वक्षेपाश्च उष्मस्यात् अधःक्षेपाश्च या भवेत्**
**एकैकामुत्सृजेत् धीरः स्वरिते तूभयं भवेत्। (या.शि.63)**

2. अनुदात्तस्वरस्यानन्तरं यदि विसर्गः भवति चेत् तं कनिष्ठिकया प्रदर्श्यते। यथा – **उदैत्पुरूषः**। मन्त्रे ꣶ अनेने चिह्नेन एतस्य प्रदर्शनं भवति।
3. स्वरिते तूभयं क्षिपेत्। एतादृशं स्वरितस्वरोत्तरं यः विसर्गः तं तर्जनीकनिष्ठिकाभ्यामेव उभयोः प्रक्षेपेण प्रदर्शयेत्। मन्त्रे एतस्य ÷ चिह्नेनानेन प्रदर्श्यते। **सूचिभिः शम्यन्तुत्वा।**

   अस्मिन् (स्वरितविसर्ग) विषये भिन्नः नियमः अपि वर्तते। यथा वकारयुक्तः स्वरितस्वरस्य विसर्गस्य ह्स्वस्वरः उभयाङ्गुलिप्रक्षेपेण भवति। यथा **वायवस्थ देवो वः**, अति विश्वाः।

**अपवादः** - यत्र द्वित्ववकारः स्वरितेन युक्तः भवति तत्र यदि विसर्गः भवति तर्हि तत्र उभयाङ्गुली प्रक्षेपः न भवति। तत्र तु कनिष्ठिकया एव स्वरः प्रदर्श्यते। यथा **वसोः पवित्रमसि** – अत्र सो इत्यत्र प्रयोगः भवति।

यदि स्वरितवर्णस्योत्तरं विसर्गः तथा अनन्तरं संयुक्तवर्णश्चेत् तत्र स्वरितयुक्तविसर्गस्यापि केवलं कनिष्ठिकया एव प्रक्षेपः भवति।

तथैव जात्यस्वरितोत्तरं विसर्गः भवति चेत् तत्र उभयाङ्गुलिप्रक्षेपेण एव स स्वरः प्रदर्श्यते। यथा - **श्वेतवायव्याः।**

**उष्म (विसर्ग) प्रकाराः –**

**त्रिविधातु भवेदुष्मा प्रचिताबलकातरा**
**स्वरिते प्रचितां विद्यात् निपाते वलकां विदुः**
**उत्थाने तु तथा तारामेताभिस्त्रिभिरूष्मभिः**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत्। (य.शि. - 71.72)**

**प्रचिता –**

ह्रस्वस्वरित, ह्रस्व अथवा दीर्धवकारयुक्त स्वरितोत्तरं यः विसर्गः भवति सैव प्रचिता विसर्गः। एतत् ÷ चिह्नेन तथा उभयाङ्गुलिप्रक्षेपेण प्रदर्श्यते।

**बलका –**

विसर्गस्य पूर्वं अनुदात्तस्तथा प्रचयस्वरश्चेत् अथवा वकाररहितदीर्घस्वरश्चेत् तत्र कनिष्ठिका प्रक्षेपेण स्वरः प्रदर्श्यते।

**तरा –**

विसर्गस्य पूर्वं उदात्तस्वरःभवति चेत् सः विसर्गः तरा इत्युच्यते। एतस्य प्रदर्शनं तर्जनी प्रक्षेपेण प्रदर्श्यते। मन्त्रे तस्य ऽ इति चिह्नेन ज्ञायते।

**अनुस्वारस्य स्वरप्रदर्शनम् कथम् –**

शुक्लयजुर्वेदानुसारं अनुस्वारः द्विविधः। ह्रस्वः दीर्घश्चेति। कात्यायनीयप्रतिज्ञासूत्रानुसारं एतत् त्रिविधः उच्यते।

**तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरूर्भेदैः**

**दीर्घात्परो ह्रस्वः ह्रस्वात्परो दीर्घो गुरौ परे गुरुः। 3.1**

परन्तु अत्र गुरो परे गुरूः इत्यस्य प्रदर्शनं इदानीन्तनाः न कुर्वन्ति लुप्तत्वात्। संहितायां अनुस्वारोच्चारणं प्रायः परसवर्णेन सवर्णेन सह भवति। परं अनुस्वारस्योत्तरं यदि श-ष-स-ह-र प्रभृतीनां वर्णानां आगमनं भवति तर्हि सः अनुस्वारः गुं कारस्य स्वरुपेण परिवर्तते यत् ॎ ॎ ॎ ॎ ॎ विभिन्नैः चिह्नैः प्रदर्श्यते।

मन्त्रेषु दीर्घवर्णस्योत्तरं यदि गुंकारयुक्तः अनुस्वारः आगच्छति तदा तं ॎ अथवा ॎ चिह्नेन सूच्यते। एतत् ह्रस्वअनुस्वारस्य तर्जनीअङ्गुष्ठेति अङ्गुलीद्वयेन प्रदर्श्यते। उदाहरणम् – छन्दा॒ /ॎ यज्ञिरे। अस्मिन् विषये याज्ञवल्क्यशिक्षायाम् –

**अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपां रसम्।**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**दीर्घे रङ्गे च तर्जन्या प्रसारःपरिकीर्तित। (य.शि. - ६४)**

दीर्घवर्णस्योत्तरं यदि गुंकारयुक्तः अनुस्वारः भवति तस्य अग्रे ऋ वर्णस्तथा श-ष-स-ह प्रभृतिषु यदि कोऽपि वर्णः भवति तर्हि सः दीर्घ अनुस्वारः भवति। मन्त्रेषु तत्.ॕ.. इति चिह्नेन प्रदश्यते।

सामान्यतः दीर्घ अनुस्वारविषये अयं नियमः अस्ति यत् गुं कारयुक्तअनुस्वारस्य पूर्वं यदि ह्रस्ववर्ण आगच्छति तर्हि अनुस्वारः दीर्घः अनुस्वारः इत्युच्यते। तत् ७/ॕ प्रभृतीभिः चिह्नैः प्रदश्यते। एतस्य हस्तप्रदर्शनं तर्जनीअङ्गुलीं अग्रे प्रक्षिप्य क्रियते। दीर्घे रङ्गे च तर्जन्या प्रसारः परिकीर्तितः। यथा – **स भूमिं** ७ **सर्वतस्पृत्वा।**

**अपवादः -** ह्रस्ववर्णस्योत्तरं यः गुंकारस्य (अनुस्वारः) अनन्तरं यदि संयुक्तवर्णः भवति तर्हि सः गुंकारः ह्रस्व भवति। यथा उक्तम् – संयोगाद्यश्च यो भवेदिति । यथा – **सूर्य ७ स्वाहा।** अत्र मन्त्रे य इत्यस्य ह्रस्वः, तस्योत्तरं यः गुंकारः, एतस्य दीर्घः स्यात्। परन्तु अग्रे संयुक्त वर्णत्वात् उपर्युक्त नियमानुसारं तस्योच्चारणं भवति। तर्जनी अङ्गुलिद्वारा एव तस्य प्रदर्शनं भवति। यथा – याज्ञवल्क्यशिक्षायामुक्तम् अस्ति –

**अनुस्वारस्योपरिष्टात् संयोगो यत्र दृश्यते**

**ह्रस्वं तं तु विजानियात् सं ७ स्थामिति निदर्शनम् । (या,शि-४३)**

मन्त्रेषु दीर्घानुस्वारस्य ÷ अनेन चिह्नेन प्रदर्शनं भवति। एतस्य रङ्ग इति संज्ञा। तथैव रङ्गस्य दीर्घ गुं कार अनुस्वारस्य ह्रस्तप्रदर्शनं तर्जनीद्वरा बहिः प्रक्षेपेण प्रदश्यते।

यथा – **जुहि शत्रुं रप , लोका ७ अकल्पयन्।**

तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काण्वसंहिता प्रभृतिषु अनुस्वारस्योत्तरं श-ष-स-ह-र वर्णानाम् आगमनेऽपि गुं इति उच्चार्यते। अर्थात् तत्र दीर्घादिभेदाः न भवन्ति।

**वर्जितहस्तमुद्रा –**

**चुलुनौका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः**
**एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः ।।**

सहायकग्रन्थसूची

1. याज्ञवल्क्यशिक्षा
2. काण्वसंहिता
3. वाजसनेयिसंहिता
4. वाजसनेयीप्रातिशाख्यम्
5. पाणिनीयशिक्षा

❑ ❑ ❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# विहगेन्द्रसंहितायां प्राणायामविधिः

**Dr. PTG Ranga Ramanujacharyulu** *

वैष्णवागमयोरन्यतमः पाञ्चरात्रागमः। रा-आदाने इति धातोः अदादिगणे परस्मैपदी-सेट् गणे राशदिभ्यां त्रिप् इत्युणादिसूत्रेण त्रिप्-प्रत्यये रात्रिः इति रूपं सिध्यति। तस्मादेव रात्रिशब्दात् कृदिकारादक्तिनः इति सूत्रवार्तिकेन ङीप् पक्षे रात्री इति स्थिते संख्यारत्रं क्लीबम् (अष्टा.) इति सूत्रेण रात्रिशब्दः रात्र इति परिणम्यते।

विहगेन्द्रसंहितायां द्वादशपटले षष्ठिश्लोकैः(60) प्राणायामविधिना योगानुष्योगानुष्ठानक्रमः योगेन विष्णुध्यानं मनसा पाञ्चभौतिकस्य बाह्येदेहस्य त्यागः पुनः मनसैव सांख्योक्त क्रमेणाराधनानुकूला नूतनशरीरसृष्टिरिति विषयाः वर्णिताः। यथा-आध्यात्मिकसाधने सांख्यं योगं च मुख्यतया गण्येते इति। सम्प्रति साख्यसारः विव्रियते। परमात्मा लोकान् सिसृक्षुः आत्मानं स्त्रीपुरुषरूपेण द्विधा विभक्तम्। पुरुषः प्रकृतिं प्राविश्य क्षुब्धं करोति। प्रकृतेः सप्ततत्त्वानि महदादिप्रकृतिविकृतीनि जायन्ते। तेषु तत्वेषु सात्विकराजसतामसाहङ्काराश्चेति त्रयः सृष्टिस्थितिलयहेतवः भवन्ति। तेभ्य आकाशादीनि पञ्चमहाभूततत्त्वानि उत्पन्नानि। तेभ्यः भूततन्मात्रेभ्यः पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि मनः इत्येकादशेन्द्रियाणि उत्पद्यन्ते। पञ्चतन्मात्राणि पञ्चकर्मेन्द्रियाणि मात्रारूपाणि ज्ञानेन्द्रियाणि पञ्चेति षोडशतत्त्वानि। केवलविकृतयः पुरुषः तटस्थः एव। एवं पञ्चविंशतिसंख्याकैः तत्त्वैः जगत्सृष्टिस्थितिलयानां वर्णनाद्दर्शनस्य सांख्यमिति सार्थकं नाम। ईश्वरः विशेषतः पुराणेषु पृथग्गण्यते। सेश्वरसांख्यं षड्विंशतितत्त्वात्मकम्। पुरुषगणने तदयं अत्र संक्षेपः। यथा-

**मूलप्रकृतिरव्यक्तः महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारः न प्रकृतिः न विकृतिः पुरुषः ॥**

---

* **Assistant Professor, Department of Agama, National Sanskrit University, Tirupati**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**सांख्यमते सृष्टिक्रमः**

शब्दस्पर्शरूपरसगन्धाः पञ्चमहाभूतानां तन्मत्राणि। सृष्ट्यारम्भे परमात्मनः शब्दगुणकमाकाश -सम्भूतम्। विकारादाकाशात् शब्दस्पर्शगुणद्वययुक्तः वायुरुत्पद्यते। विकाराणां द्वयोः शब्दस्पर्शरूपवान् गुणत्रययुक्तो अग्निरुत्पन्नः। विकारादग्नेः शब्दस्पर्शरूपरसादिचतुरभ्यः गुणेभ्यः आपः उतपन्नः। तेभ्यः पञ्चमेन गन्धगुणेनापि सम्पन्ना पृथिवी उत्पन्ना। एवं सांख्यमते सृष्टिक्रमः। प्रलयकाले पञ्चगुणात्मिका पृथिवी चतुर्गुणयुक्तासु अप्सु प्रलीयते ।एवं विलोमक्रमेण निर्गुणान्तलयो भवेत्।

सांख्यज्ञानसाधकः योगोऽपि सांख्यदर्शनादभिन्नः। अपि च सांख्यंसिद्धान्तः योगः अनुभव-साधनाविति ज्ञेयौ। सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः इति भगवद्गीतायां भगवदुक्तिरत्र स्मरेत्। योगशब्दस्य बहवोऽर्थाः वर्तन्ते। जीवात्मपरमात्मनोः ऐक्यसाधनं योग इति अद्वैतिनः। योगदर्शने विशिष्टाद्वैतवत् जीवात्मपरमात्मनोः भेदः एवाङ्गीकृतः ।

**योगदर्शनसारः**

यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधय इत्यष्टौ योगाङ्गानि। तेषु ध्यानधारणासमाधयः अन्तरङ्गतया प्रथमे पञ्चबहिरङ्गतया परिगणितानि। बहिरङ्गेष्वपि प्राणायामः योगसाधने जीवानुभूतः। योगो हठयोगः, क्रियायोग इति मुख्यं भेदद्वयम्। तपस्स्वाध्याय ईश्वरप्रणिधानानि क्रियायोगः। अस्मिन् पाञ्चरात्रागमे ईश्वरप्रणिधानरूपः क्रियायोगः एव द्वादशपटले विवृतः ।

प्राणानामायामः प्राणायामः। तस्मिन् सिद्धे प्रत्याहारध्यानधारणासमाधीनां सिद्धिः सुलभतरा भवतीति योगिनामनुभवः। प्राणायामः द्वादशपटले विवृतः। मनुष्यशरीरं तस्यैव अङ्गुलिप्रमाणेन षण्णवत्यङ्गुलिमितान् भवति। शरीरे द्विसप्ततिसहस्रनाड्यः भवन्ति। तासु चतुर्दशमुख्यतमाः चतुर्दशस्वपि योगसाधने नाडीत्रयप्राधान्यं योगदर्शने स्पष्टम्। कुण्डलिन्याः आरभ्य ब्रह्मरन्ध्रपर्यन्तं नाडीत्रयमिदं षड्चक्राणि अभिव्याप्य तिष्ठति। तासु वामनाडी इडा सैव चन्द्रनाडी। दक्षिणनाडी पिङ्गला सैव सूर्य नाडी मध्ये स्थिता सुषुम्ना। पर्यायेण इडापिङ्गलयोः वायोः रेचचपूरणञ्च कृत्वा साधकेन सुषुम्नायां प्रवेश एव

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

प्राणायामफलम्। वायोरन्तरादानं पूरणम्। निस्सारणं रेचनम्। किञ्चत्कालमन्तः नियमनं कुम्भकम्। एवं युतानां त्रयाणां सकृत्करणेन प्राणायामो कथ्यते। क्रमेण साधकः प्राणायामस्याभिवृद्धिं कुर्यात्। सांख्ययोगयोः सिद्धान्तविस्तारः श्रीमद्भागवते तृतीयस्कन्धे षोडशाध्यायादारभ्य तृतीयस्कन्धे आसमाप्त्यन्तं द्रष्टव्यम्। शोपणादिकर्माणि भौतिकशरीर-शुद्धिकारकानि विशेषतः प्राणायामेन आन्तरशुद्धिः, बहिरशुद्धिश्च भवेत्।

जनाबाहुळ्ये ध्वन्यादिना मनसश्चैकाग्रता न भवेत्। ततः प्रथमं प्राणायामस्य निर्विघ्नाचरणार्थमनुकूलः प्रदेशो आश्रयणीयः। सिद्धे प्राणायामे स्थलभेदः नापेक्षितः। एकान्ते पर्वताग्रे नदीतीरे गोशालायां देवालये बिल्वम्रवटाश्वत्थशमीवृक्षमूलेषु वा प्राणायामाभ्यासः कुर्यात्। यद्वा पुष्पवनबहुले आरामे मन्दिरे वा प्राणायामं कुर्यात् ।तदुक्तम्-

**शुचौ समानदेशेऽथ गोमयेनोपलेपिते ।**
**स्नातः शुकाम्बरधरो सपवित्रोर्ध्व पुण्ड्रकः ॥**
**कुशं चेलाजिनं वाऽथ दारुजान्यासनानि च ।**
**कम्बलान् व्याघ्रचर्मान् वा आसनानि च कल्पयेत् ॥ इति ।**
**स्नानशुद्धवस्त्राधारणपूर्वप्रातः कालः अनुकूलः ।**

**आसनम्** – शरीरस्य स्थैर्यसम्पादकं प्राणायामाचरणे सुखसाधनमेवासनम्। तच्च न बाह्यम्। स्वशरीरेण साध्यम्। अष्टाशीतिसहस्राधिकान्यासनानि यद्यपि विद्यन्ते तथापि न्यूनाधिकं त्रिंशदासनान्येव प्रयोगे दृश्यन्ते। योगदर्शने स्थिरसुखमासनमित्येवासन-लक्षणमित्युक्तम्। योगदर्शनव्यासभाष्ये अष्टौ आसनानि वर्णितानि। प्रागुदङ्मुखो वा साधकः आसनं कुर्यात्। यथा -

**स्वस्तिकं पद्म भद्रं वा वीरं गोमुखमेव च ।**
**भूतात्मशुद्धिदं प्रोक्तं शोषणादीनि कारयेत् ॥**
**मयूरं कुक्कुटं चापि आसीनस्सुसमाहितः ।**
**गुरुपादारविन्दाभ्यां प्रमाणं दण्डवद् भुवि ॥** इति ।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

प्राणायामे एकाग्रतासम्पादनार्थां मन्त्रस्मरणं मानसमपेक्षितम्। एवं भगवद्रूपमपि ध्येयम्। एवं ध्यातं भगवद्रूपं मनसि लग्नं भवेत्। सम्प्राज्ञातसमाधिर्भवेत्। अत्र मन्त्रः –

**सशरायेति शार्ङ्गाय नाराचाय पदं वदेत् ।**
**हुं फट् सुदर्शनायेति स्वाहान्तं तदनन्तरम् ॥** इति।

मन्त्रमिमं स्मरन् नारायणं ध्यायेत्। भगवतो नारायणस्य ध्येयरूपमपि पञ्चभिः श्लोकैः वर्णितिम् । किन्तु सुदर्शनस्याष्टौ बाहवः इत्यष्टबाहुमूर्तिः वर्णिता। यथा-

**ध्यायेन्नारायणं देवं रक्तवर्णं त्रिलोचनम् ।**
**चक्रमण्डलमध्यस्थं महाकायं महाभुजम् ॥**
**मकुटाग्रे स्थाङ्गस्यात्सुरप्रहरणोद्यतम् ।**
**अभयं दक्षिणे वामे वरदं द्विभुजश्च सः ॥**
**ज्वालामालासमावृत्य ज्वालेन ज्वालमुद्भवम् ।**
**उद्भूतज्वालासप्तार्चिः पूरयन्तं नभस्थले ॥** इति।

ततः परमात्मास्मरणेन पञ्चमहाभूतांशाः भौतिकशरीरे वर्तन्ते। तान् प्रलीनान् मनसा कुर्यात् प्रलयश्च संहार एव। पूर्वोक्तसंख्यदर्शनानुकूलः लयः वर्णितः। पृथ्व्यांशः पञ्चगुणांशयुक्तः अम्भसि लीनः इति मनसा कल्पयेत्। एवं पञ्चभूतात्मकं बाह्यशरीरं नष्टमिति मतिं कुर्यात्। षट्कोणात्मकं बिन्दुं संचिन्त्य प्रणवेन वायुबीजं स्मरन् चक्रसुदर्शनगायत्रीं जपेत्। वायुबीजमन्त्रस्य किष्किन्धः ऋषिः, बृहती छन्दः। एवं चक्रगायत्री जपेन प्राणायामपरः हृदये अग्निबीजं त्रिकोणं रक्तवर्णं रमिति बीजाक्षरं स्मरन् सर्वपापैः प्रमुच्येत। पुनः सुदर्शनं स्मरन् सर्वं शरीरं दग्धं भावयेत्। एवं मनसा नाष्टे कृते बह्यशरीरे ऊर्ध्वदशादमृतमण्डलाच्चामृतधारया प्लावितं पूतं द्वितीयं शरीरमुत्पन्नं मन्येत। यथा उपनिषत्सु आकाशाद्वायुः वायोरग्निरिति सृष्टिक्रमः निरूपितः, तथा शरीरस्य संख्यानुकूलां सृष्टिं भूतानामनुलोमात्मिकां मन्यते। एवं सुदर्शनमपि शरीरे आवाहयेत्। ततः योगदर्शनानुसारं शरीरस्वरूपं भगवतो ध्यानधारणाप्रकाराश्चोपवर्णिताः। षण्णवत्यङ्गुलमिते शरीरे चतुर्दशनाड्यः पूर्वं प्रोक्तम्। प्राणवायुरपि प्राणापानव्यानो-दानसमानाश्चेति पञ्चभेदात्मकः। नागकूर्मकृकरदेवदत्तधनञ्जयेति आन्तरिकाः वायवः

हठयोगतन्त्रेषु विवृताः । यथा वैराम्भमुख्यकान्तर्यामप्रपञ्चनेति चत्वारः वायवः द्वादशपटले विवृताः । एवं चतुर्दशवायवः अस्मिन् तन्त्रे निरूपिताः । तदुक्तम्-

**एवं संवृतकं देहं षण्णवत्यङ्गुलीयकम् ।**
**प्राणापानसमानश्च उदानव्यानौ च वायवः ॥**
**नागः कूर्मकृकराश्च देवदत्तो धनुञ्जयः ।**
**वैराम्भमुख्यकश्चैव अन्तर्यामप्रपञ्चनाः ॥**
**एवं वायुचतुर्दश्यां विकारं विविधं भवेत् ।**
**नाभीमूलोर्ध्वकं पद्मनालं चेति दशाङ्गलम् ॥** इति ।

नाभिमूले दशाङ्गुलपद्ममधोमुखं भवति। प्रणवेन तदुत्थाप्य व्याहृतिभिः विकासयेत्। पद्मे कर्णिकाकारपीठे त्रिलोचनो अष्टबाहुर्नारायणः देव्यादिभिस्सहासने विराजमानः द्रष्टव्यः। ब्रह्मरन्ध्रे चतसृभिः नाडीभिः पञ्चवर्णैः सुषुम्नाडी विद्यते। दक्षिणकर्णे दक्षिणनेत्रे नासिकायाः दक्षिणभागे पिङ्गलानाडी, वामे सुषुमनानाडी च भवेताम्। यथोक्तम्-

**सुषुम्ना नाडिका यस्य पञ्चवर्णेति पञ्चधा ।**
**चतुर्दिक्षु चतुर्नाडी मध्यनाडी समावृता ॥**
**वीणा नाडी च संरब्धा ब्रह्मरन्ध्रवासनम् ।**
**दक्षिणं श्रवणं नेत्रं पश्चिमं सन्निधान्तकम् ॥**
**वामनेत्रं भ्रुवं चैव पूर्णमस्तकमेव च ।**
**इडा च वामनासानतं पिङ्गला दक्षिणे पुटे ॥** इति ।

नाडीनां बन्धः शृङ्खला बन्धः एव। अपानाद्वायुमाकृष्य हृदये निधाय सुषुम्नायां प्रावेश्य मूलाधारे अग्निमुत्थाप्य ब्रह्मरन्ध्रान्तं नयेत्। योगक्रमः पतञ्जलयोगदर्शने निरूपिते क्रियायोगक्रमेत् हठतत्त्वकौमुदीति हठयोगग्रन्थे निरूपितः। यतः इडा पिङ्गला सुषम्णा इति नाडीत्रयस्य निवेशनप्रकारः वायुसंख्यानां तेभ्यो ग्रन्थेभ्यः भेदो दृश्यते, इतरे विषयाः तुल्यरूपाः। यथा-

**सुषम्ना नाडिका यस्य षडाधरिति पत्रकम् ।**
**इडापिङ्गलनाडीश्यां व्यत्यसेति परस्परम् ॥**
**नाडीत्रयेति सम्बन्धमाधारं पत्रकं भवेत् ।**
**सोमसुर्याग्निना बुध्वा वामदक्षिणपृष्ठतः ॥** इति ।

चतुर्विंशातिपटलात्मिकायां विहगेन्द्रसंहितायां पाञ्चरात्रसम्बन्धिनः विषयाः प्रोक्ताः । विशिष्य भगव ।दभिन्नस्य सुदर्शनस्य कैङ्कर्यप्रकारः उपवर्णितः । चतुर्विंशतिपटलेषु पाञ्चरात्रागमविषयो वर्णितः तथापि प्रथमादिद्वादशावधि पटलेषु मूर्तेः रक्षबन्धनम्, चक्रलक्षणम्, प्रतिष्ठाविधिः, आराधनक्रमः इति सिद्धान्तविषयाः वर्णिताः ।

परम्पराप्राप्तोऽपि आगमानुष्ठानक्रमः विशेषव्याख्यानेनैव ज्ञायते। प्रायशः प्रतिष्ठातारा आचार्याः स्वाचार्याश्रिताः प्रतिष्ठाविधिं क्रमेण ज्ञायन्ते। कल्पेनानुक्तेनापि स्थापनादिषु क्रमभङ्गः न भवत्येव। भगवदाराधनफलमामुष्मिकमेव, तथाप्यैहिकफलाशाया च प्रजाः देवादीनाराधयन्ति। केवल सात्विकाः भागवताः फलान्तराभाविनः, आपद्गताः पुनः प्रतिष्ठां इच्छन्तोऽपि उत्सवाद्यनुष्ठानेन फलं लभन्ते।

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# संस्कृतवाङ्मये रसशब्दविचारः

**डा. का. लीनाचन्द्रा***

रसशब्दः रस् धातोः अच् प्रत्ययान्ते निष्पद्यते। भारतीयसंस्कृतवाङ्मयस्यातीव प्राचीनेषु शब्देषु रसशब्दोऽयमन्यतमः। रसशब्दस्य जले, स्वादे, वीर्ये, शृङ्गारादौ विषे, द्रवादौ च प्रयोगो दृष्टिपथमवतरति। यथोक्तं हेमकोशे -

**रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे ।**
**बाले गृहे धातौ तिक्तादौ पारदेऽपि च ।**
**प्रेम्णि भावे ह्यात्मनि च सुपेये स्वरसे सुखे इति ॥**[१]

**रसस्वरूपम्**

रससिद्धान्तस्य प्रवर्तकः आचार्यः भरतमुनिः - **न हि रसादृते कश्चिदर्थः प्रवर्तते**[२] इत्युक्त्वा स्फुटीकुर्वन् यत् काव्ये वर्णितमेतादृशं किमपि वस्तु नास्ति यत् रसवर्जितं स्यात्। यथाहि आत्मतत्वज्ञः परमात्मनो दर्शनं कृत्वा अपूर्णानन्दसन्दोहनिमग्नो जायते तथैव काव्यमर्मज्ञाः सहृदयाः ब्रह्मानन्दसहोदरानन्दपदं रसमास्वाद्य आनन्दसागरे निमग्नाः जायन्ते।

रससम्प्रदायस्य प्रवर्तको भवति भरतमुनिः। तेन रसस्वरूपनिरूपणाय स्वीये रससूत्रे सूत्रितं यत् **विभावानुभावव्यभिचारी संयोगात् रसनिष्पत्तिः**[३] इति। ततः दर्शनाचार्याः तद्दर्शनानुसारमस्य सूत्रस्य व्याख्यानमकुर्वन्। तत्र केचन नैय्यायिकाः, केचन वेदान्तिनः, केचन मीमांसकाः, केचन द्वैतिनः च सन्ति। तत्र नैय्यायिकः श्रीशङ्कुकः रसानुभूतिरनुमितिजन्येति प्राप्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्यो अनुमितः स्थास्यते रसः अनुकार्यनलादौ यत्र गृहीतैः विभावाद्यनुकारिभिन्न नटे रसस्यानुमानं क्रियते। वेदान्तानुसारी भट्टनायकः काव्यं भावकत्वभोजकत्वनाम्नि द्वे स्वतन्त्रे शक्ती अनुपगम्येते।

---

* सहायिकाचार्या, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अयं रसः भावजन्य इति मनुते। एतन्मते रसास्वादः ब्रह्मास्वादसहोदरः। काव्यानन्द-ब्रह्मानन्दयोः अवश्यमेव भेदः स्यात् यत् काव्यानन्दे चैतन्यं विषयस्थापनं भवति न तु ब्रह्मानन्दे। भट्टलोल्लटस्योत्पत्तिवादानुसारं विभावादिकारणैस्सहृदय-दमयन्त्यादिदर्शनजन्यनलादिसमवेतरन्युद्वेदस्य स्थायी भावस्य तत्कार्यकटाक्षादि-सञ्चारितोत्त्वादीनाञ्च अनुकार्यनलादीनैव सम्बन्धत्तत्रैव रसमुत्पद्यते। नटे तु तदनुकृत्यसादृश्यमूलकारोपि विधीयते।

मम्मटेनाऽपि काव्यप्रकाशे रसलक्षणमेवं प्रतिपादितम् -

**कारणान्यथ कार्याणि सहकारिणि यानि च**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।**
**विभावानुभावस्तत्कथ्यन्ते व्यभिचारिणः**
**व्यक्तस्सतैर्विभावाद्यैः स्थायीभावः रसः स्मृतः ॥**[४]

विश्वनाथेन साहित्यदर्पणे उक्तम् -

**विभावेनानुभावेन व्यक्तस्सञ्चारिणा तथा।**
**रसतामेति रत्यादिः स्थायीभावो स चेतसाम् ॥**[५]

धनञ्जयेनोक्तं स्वीये दशरूपके -

**क्रीडतां मृण्मयैर्यद्वद्बालानां द्विरदादिभिः।**
**सोत्साहः स्वदते तद्वच्छोतॄणामर्जुनादिभिः ॥**
**विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ।**
**आचीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः ॥**[६]

**रससम्प्रदायः**

यद्यपि राजशेखरेण काव्यमीमांसायामुक्तं यत् ब्रह्मणा सर्वप्रथमं रसस्योपदेशो नन्दिकेश्वराय प्रदत्तः। अतः स्यात् रसस्य प्रथमं निरूपणं नन्दिकेश्वरेणाकारी, न तु भरतमुनिना। किन्तु संयोगात् तन्निमित्तो रससिद्धान्तविषयको ग्रन्थो नाद्यावति समुपलब्धो अस्माभिः। यद्यपि वैदिकसाहित्ये रसशब्दानामुल्लेखो मिलति परमालङ्कारिकपरम्परायां रससिद्धस्वरूपनिरूपणे नाट्यशास्त्रकर्ता भरतमुनिरेव प्राथम्येन गण्यते। भरतमुनेः पूर्वमपि
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

रसपरम्परा आसीदिति सत्यं, किन्तु तदानीन्तनस्य कस्यचिदपि ग्रन्थस्य तत् ग्रन्थकर्तुश्च प्रामाण्याभावादाचार्य भरतादेव रससम्प्रदायस्यारम्भः स्वीक्रियते।

**रसभेदाः**

प्रथमतः रसः लौकिकोऽलौकिकश्च भवति। वासनारूपरत्यादिभावनां संस्कारोद्बोध: लौकिकसंयोगेन लौकिकरसो भवति, अलौकिकसंयोगेनालौकिकरसो कथ्यते। रसभेदविषये नवरसाः, दशरसाः इति वादाः परिलक्ष्यन्ते। परन्तु शृङ्गारप्रकाशे शृङ्गार एव एकोरस: इति स्वीक्रियते। यथा आलङ्कारिकः भोजराजो वदति -

**वीराद्भुतादिषु च येह रसप्रसिद्धिः**
**सिद्धा कुतोऽपि वटयक्षवदाविभाति।**
**लोके गतानुगतिकत्ववशादुपेता-**
**मेतां निवर्तयितुमेष परिश्रमो नः ॥**[७]

तथैव भवभूतिरपि करुणरस एक एव रसमिति मनुते। तदुक्तं –

**एको रसः करुण एव निमित्तभेदात् भिन्नः**
**पृथक् पृथगिवाश्रयते विवर्तान्।**
**आवर्तबुद्बुदतरङ्गमयान्वकारान्**
**अम्भो यथा सलिलमेव हि तत्समाग्रम्॥**[८]

एवमेव केचनाचार्याः नवरसान् स्वीकुर्वन्ति।

**विवधेषु वाङ्मयेषु रसशब्दाः**

**वैदिकवाङ्मये रसः**

**१) मधुरार्थे - स्वादु रसो मधुपेो वराय**[९]
**२) सोमरसार्थे – सोमौ अर्षति धर्णसिर्दधान इन्द्रियं रसम्**[१०]
**३) दुग्धार्थे - यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम्**[११]
**४) अयनार्थे – रसेन समगंस्महि**[१२]
**५) षड्तूणाम् - नमो वः पितरो रसाः**[१३]
**६) दधि-मधु- घृतादिशब्दार्थे - ता रसोनाभिर्धताम्**[१४]

७) शोणितार्थे - या रसस्य हरणाय [१५]

८) आत्मानन्दार्थे - अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।[१६]

९) प्राणार्थे - प्राणो वा अङ्गानां रसः[१७]

१०) सूक्ष्मार्थे – येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनानि।
एतेनैव विजानाति किमत्र परिशिष्यते।। [१८]

११) आस्वादनार्थे - प्रश्नोपनिषदि, गोपालोपनिषदि, देव्युपनिषदि, बृहदारण्यकोपनिषदि, सुबालोपनिषदि, छान्दोग्योपनिषदि रसः आस्वाद्यत्वेन स्वीकृतः।

१२) आध्यात्मिकार्थे – मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः - सर्वरसः। [१९]

१३) तैतिरीयोपनिषदि - रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति। [२०]

१४) काव्यात्मत्वेन - यः वाऽु वै रसस्तवन्नात्मा । [२१]

१५) सारवान् – तत्वार्थे - गायत्र्यादीनि छन्दांसि हि रसः। आद् उ वे रसः ।[२२]

लौकिकवाङ्मये रसः

**रामायणे रसः** – संस्कृतवाङ्मये आदिकाव्यं तथा उपजीव्यकाव्यं भवति रामायणम् । महर्षिवाल्मीकेः करुणरसमयी वाणी वस्तुतः रामायणस्य रचनायाः स्रोतः। यथा -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ [२३]

ऋषिः स्वयमुक्तवान् यत् श्लोकस्य कारणं शोक एवेति -
शोकार्तस्य प्रवृत्तो मे श्लोका भवन्तु नान्यथा ॥[२४]

रामायणे नवरसानामुल्लेखः वर्तते । यथा-
पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।
जातिभिः सप्तभिर्बद्धं तन्त्रीलयसमन्वितम् ॥[२५]
रसैः श्रृङ्गारकरुणहास्यरौद्रभयानकैः ।

**वीरादिभिश्च संयुक्तं काव्यमेतदयाचताम् ॥**[२६]

आनन्दवर्धनेन उक्तं रामायणे हि करुणरसः स्वयमादिकविना सूचितः। यथा-

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुराः।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥** [२७]

**महाभारते रसः** - आनन्दवर्धनः महाभारते शान्तरसोऽङ्गीरसः इति उक्तवान्। अस्माभिरपि तत् द्रष्टुं शक्यते।

**निरुक्ते रसः** - निरुक्ते यास्कः रसशब्दस्य प्रयोगः जल- तुषार-दुग्ध-किरणार्थेषु अकरोत्।

**व्याकरणशास्त्रे रसः** - पाणनीयव्याकरणे रसशब्दः धात्वर्थे तथा आस्वादनार्थे तथा स्नेहार्थे प्रयुक्तः। शास्त्रेऽस्मिन् रसशब्दस्य व्युत्पत्तिरुक्तं यथा- रस्यते आस्वाद्यते अनेनेति रसः, रस्यदे आस्वाद्यते इति रसः, रसति रसयति वा रसः इति।

**आयुर्वेदे रसः** - यास्कमुनिः रसविषये एवमकथयत्- रसनार्थे रसस्तस्य द्रव्यमापः क्षितिस्तथा इति। इत्येवं प्रकारेण विविधेषुवाङ्मयेषु रसशब्दविमर्शःअस्माभिः द्रष्टुं शक्यते इति शम्।

**पादटिप्पणी**

१) हेमकोशः - प. ६२
२) नाट्यशास्त्रम् - ६.३२
३) नाट्यशास्त्रम् - ६.३३
४) काव्यप्रकाशः ०४.२७-२८
५) साहित्यदर्पणः - ३.२
६) दशरूपकम् – ४.२०
७) श्रृङ्गारप्रकाशे - ०२.२२
८) उत्तररामचरितम् - ३.४७
९) ऋग्वेदः - ४.४४.२२
१०) ऋग्वेदः-९.२.२३
११) ऋग्वेदः - ७.२३.२३
१२) ऋग्वेदः -२.२३.२३
१३) यजुर्वेदः - २.३२
१४) अथर्ववेदः - ६.६७.२
१५) अथर्ववेदः - २.८.६
१६) अथर्ववेदः - २०.०५.४४
१७) बृ.क.- २.३.२९
१८) कठोपनिषत् - ४.३
१९) छान्दोक्योपनिषत् - ३.३.२
२०) तैत्तरीयोपनिषत् - ३.७
२१) शथपथब्राह्मणम्-७.२.३-४
२२) शथपथब्राह्मणम - ७.३.२

२३) रामायणम् - २.२.१५

२४) ऋग्वेदः - ९.२.२३

२५) रामायणम् - २.४.८.७

२६) रामायणम् - २.४.८.७-९

२७) ध्वन्यालोकः – २.५

❑ ❑ ❑

# Musical References in Pancharatra Agama

**Dr. Vyzarsu Balasubrahmanyam***

**Abstract**

Agama-s, the practical manuals of divine worship, are the scriptures which explain the process of performing ritualistic worship to God by offering Shodasa (16) upacharas along with Vedic Bija mantras. Agama Shastra also includes the importance of several other branches of scientific knowledge. Agama Shastra has originated for veneration of the Omnipresent God and to praise this Supreme God, who is the embodiment of the divine Sound, Sangita Shastra has originated. Depending on the deity that is worshipped, Agama-s are mainly of three types - Vaishnava, Shaiva and Shakta. Further, Vaishnava Agama is of two types - Vaikhanasa and Pancharatra. Agama Shastras lay down the rituals and procedures of worship not only through mantras but also through Music. There are several internal references, explaining the ways in which the indicated Ragas, Talas and Instruments, can be presented to musically propitiate various Gods.

Pancharatra Agama considers Vishnu as the Supreme God and music is an inseparable part of the ritualistic worship. In the Kriya vidhana of Pancharatra and the associated Samhitas, there are several music references. In the Sriprasna, Padma, Ishwara,

---

* **Assistant Professor (Indian Music – Vocal), Department of Education, National Sanskrit University, Tirupati**

Parameswara, Aniruddha and Vishwamitra Samhitas, there is a mention of Ragas like Kamada, Kedara, Gaudakhya, Poornachandra etc., and talas like Karkari, Garuda, Jaya, Jhampe etc. Similarly, in Sriprasna, Padma, Vishwamitra, Vishishta, Hayashirsha, Markandeya, Vishwaksena, Brahmadbrahma, Ishwara, Parameswara, Pushkara, Aniruddha and Samvartaka Samhita-s, there is a mention of musical instruments like Anaka, Kahala, Ghanta, Chihna, Jhallari, Jhalli, Dundubhi, Pataha etc.

Through this paper, a humble attempt is being made to present the several musical references found in the Pancharatra Agama.

***Keywords***

**Agama, Vaishanava Agama, Pancharatra Agama, Music in Agamas, Carnatic Music, Ragas, Talas, Musical Instruments**

## 1. Introduction

Pancharatra Agama is one of the religious texts belonging to Vaishnavism that prescribes the procedures for consecrating the idols in the temples and also the day to day ritualistic forms of worship to be performed in these temples. It lays down the rituals and procedures of worship not only through mantras but also through Music.

Pancharatra Shastra is known with several names such as Tantra, Agama, Ekayana, Prakriti Veda, Mula Veda, Sattvata Vidhi, Bhagavatsastra, Mahopanishat, Bhagavata Mata and Divya Shastra.

Pancharatra Agama is a Shastra which leads to attainment of salvation.

It is the shastra which established the essential procedures very central to the temple system, which is an important part of Indian Culture. It is a significant shastra pertaing to several branches of science like Vastu, Jyotisha, Ayurveda, Music, Dance, Sculpture, Culinary Art, Yantra, Mantra, Yoga, Sankhya etc.

It is given that Lord Srimannarayana himself had explained this doctrine over 5 nights to Sri Mahalakshmi, Brahma Deva, Adisesha, Garutmanta and Vishvaksena and hence the name 'Pancharatra'. These details have been further passed down by them as a tradition to Sages and they in turn propagated them through their disciples and thus passed on to posterity through various Samhita-s. This Pancharatra is said to have been preserved as a treasure in the form of 1 crore 50 lakh Slokas in several Samhitas. While some of them are available in the form of manuscripts, some are unavailable.

## 2. Musical References in Pancharatra Agama

Let us now examine some of the references to Music, Instruments, Ragas and Talas mentioned in the various processes of worshipping God, construction of temples as prescribed by Pancharatra Agama Shastra.

**2.1 Garbhanyasa Vidhi :** In the process of constructing the Garbhalaya temple, a copper plate is planted in the ground at night

time only. It is mentioned in the Paadma Samhita that on this occasion, instruments like Shankha and Bheri are played aloud.

**2.2 Murdheshtaka Vidhi :** It is again mentioned in the Paadma Samhita that during the last part of temple construction, called Murdheshtaka Vidhi, has to be completed along with the playing of the instruments. Similarly, it is also prescribed that the process of 'Jaladhivaasa' and Consecration festivities of 'Mula Virat' (main idol of the deity) in the temple is also to be done to the accompaniment of musical instruments.

**2.3 Brahmotsavam :** In the rituals of Dhvajaarohana, Ankurarpana, Devataahvaana, Baliharana etc., performed during Brahmotsava-s, we have many references to the performance of musical instruments, ragas, talas and also nrittas

**2.3.1 Ankurarpana :** In this process a rangoli in the form of Kalachakra is drawn and lamps are lit on either sides. A laya vadya called 'Manduka' is placed in the centre and 'Shankha' and 'Kona' are placed on either sides. Then Veena is placed in the East direction, 'Venu' and other mukha Vadyas are placed in the South, Skinned instruments in the West and Metal instruments in the North. These instruments are adorned with new clothes and puja is performed.

श्लो ॥ कालचक्रं तत्र लिख्य न्यस्एद्दीपान् समंततः ।
मंडुकं ब्रह्मण स्थाने पार्श्वयो स्तस्य वैरमे ॥
शंखं कोणं च विन्यस्य तदादीन्परितोन्यस्एत् ॥
ऐन्द्रे वीणादि याम्एतु सुषिरादीनि पद्मजे ॥

वारुण्यां चर्मवाद्यानि सौम्ये कांस्यं तु विन्यसेत् ।
पिथाय नव वस्त्रेण प्रोक्ष्य पुण्याह वारिणा ॥
गंधपुष्पाणि संकीर्य तेषु देवान्समर्चयेत् ।

**2.3.2 Devataahvaana:** This is the process of invocating and inviting various Gods.

**a. Garuda :** Svara 'Madhyamam' has been assigned to this God and it is given that 'Gaudakhya' Raga has to be played to appease him and it has to be set to Triputa Talam. Performance of Vishnukranta Nritta has been prescribed.

श्लो ॥ तार्क्ष्यस्यतालं त्रिपुटं स्वरो मध्यम ईरितः ॥
गौडाख्यरागो नृत्तं च विष्णुक्रान्तमुदा हृतम् ॥

**b. Indra:** Svara 'Panchama' has been assigned to this God and it is given that 'Nata' Raga has to be played to appease him and it has to be set to Sama Talam. Playing the instrument 'Pataha' and performance of Vilasa Nritta has been prescribed.

श्लो ॥ समतालो नाटरागः स्वरः पञ्चम नामकः ।
नृत्तं विलास मित्युक्तं पुरन्दरमनः प्रियम् ॥

**c. Agni:** Svara 'Rishabha' has been assigned to this God and it is given that 'Gauli' Raga has to be played to appease him and it has to be set to Ata Talam. Playing the instruments like 'Mardala', 'Bheri' and 'Pataha' and performance of Sarvatobhadraka Nritta has been prescribed.

श्लो ॥ आटतालो गौलिरागः स्वरो (वृषभ) ऋषभ संज्ञिकः ।
नृत्तं तु सर्वतो भ्रदं जातवेद प्रियं भवेत् ॥

d. Yama: Svara 'Gandhara' has been assigned to this God and is given that 'Daisiki' Raga has to be played to appease him and has to be set to Mangala Talam. Playing of 'Tala-s' and performance of Sarvatobhadraka Nritta has been prescribed.

श्लो ॥ तालस्तु मङ्गलः प्रोक्तः स्वरोगान्दार ईरितः ।
रागस्तुदैशिकीनृत्तं सर्वतोभ्रद संज्ञिकम् ॥

e. Nairuti: Svara 'Shadja' has been assigned to this God and it is given that 'Desakshi' Raga has to be played to appease him and it has to be set to Jaya Talam. Playing the instruments like 'Mardala', 'Bheri' and 'Pataha' and performance of Kamala Nritta has been prescribed.

श्लो ॥ जयतालः स्वरः षड्ज रागो देशाक्षि नामकः ।
नृत्यं कमल वद्वृत्तं निऋरतेः प्रियदं भवेत् ॥

**f. Paschima (Varuna):** Svara 'Dhaivata' has been assigned to this God and it is given that 'Nata' Raga has to be played to appease him and it has to be set to Bhadra Talam. Performance of Kamala Nritta has been prescribed.

श्लो ॥ भद्रातालो नाटरागः स्वरोधैवत मुच्यते ।
नृत्तं कमलमित्युक्तं वरुणस्य प्रियं भवेत् ॥

g. Vayuvya: Svara 'Shadja' has been assigned to this God and it is given that 'Sri' Raga has to be played to appease him and it has to be set to Jhampe Talam. Playing the instruments like 'Bheri' and performance of Prushthakutthima Nritta has been prescribed.

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

श्लो ॥ झमृतालः समाख्यातो रागः श्रीराग संज्ञकः ।
स्वरः षड्जो नृत्तमुक्तं पृष्ठकुट्टिमसंज्ञतम् ॥

h. Saumya (Kubera): Svara 'Rishabha' has been assigned to this God and it is given that 'Mohana' Raga has to be played to appease him and it has to be set to Ananta Talam. Performance of Mandalaka Nritta has been prescribed.

श्लो ॥ अनन्त तालोरागस्तु मोहनं वृषभः स्वरः ।
नृत्तं मण्डलनृत्तं स्यात् कुबेरं तैश्च तोषयेत् ॥

**i. Eesanya :** Svara 'Dhaivata' has been assigned to this God with Karkari Talam. Playing the instruments like 'Pataha', 'Bheri', 'Dhamaruka'. Raga and Nritta details have not been given.

श्लो ॥ शशिधर वाद्यं, वामजानूर्ध्वनृत्तं
वामजानूर्ध्वनृत्तं दैवत स्वरं कर्करी तालं

**j. Vishvaksena:** Kalyani Raga and Adi Tala have been assigned.

व ॥ हे विष्वक्सेन! चमूनाथ! इन्फ्रादि लोकपालैः कुमुदादि ज्ञानिभिः, पूर्णादि पार्षदैः, चप्रचड्डादि द्वारपालैः, सिधैस्साध्यैः नित्यमुकैः सनक सनन्दनादिभि स्सन्नद्धः साङ्गस्सायुध स्सवाहन सशक्ति पत्नी पुत्र पौत्र सपरिवार युतः अस्यश्री समेत श्री.... स्वामिनः नवाह महोत्सवं सेवितुं आगच्छागच्छागच्छा गच्छ, ध्वजारोहणादि अवरोहणान्तं सौमनस्येन सावधानतया त्वया वस्तव्यम्. आदितालं कल्याणीरागं

**k. Sudarshana:** Bhujanga Raga and Dhruva Tala have been assigned.

व ॥ हे सुदर्शन चक्रराजाधिराज! हरिकरार विन्द सहस्र किरणैः विराजमान सहस्रशोभा समान! दनुजकुल भीषण! त्रिदशतोषण! अम्बरीष रक्षक! गजेन्द्र विपत्ति विच्छेदक वरसुधाहरणचरण! शिशुपालहरण! त्रिलोचन! कलानल निभ! सुनाभ! षोडशभुज!
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

षोडश दिव्यायुधधर! द्वा त्रिंशदायुधाधि देवता समेत! भद्रया देव्यासह त्वया वस्तव्यम्. ध्रुवतालं भुजङ्ग रागं

**l. Musalayudha :** Saveri Raga and Triputa Tala have been assigned.

व ।। हेमुसलायुध! बलदेवप्रियायुध! सकला सुरशिरश्शकलीकरण विचक्षण! द्विषन्मद निर्भेदकृतलक्षण! कालिनी समाकर्षण! कोटि रव जनघुष्यमाण महिमन्! स्वहितेन हलेन सुमङ्गल्याभिस्सह..... त्वया वस्तव्यम्. त्रिपुटतालं सावेरी रागं

**m. Khadgam :** Samanta Raga and Ata Tala have been assigned.

व ।। हे खड्गन्! त्वं खड्गमण्डलाधिपते! अनेककोटि सूर्य मण्डल प्रकाश! कैटभारिकटि तटी निवास! सुरम्ययाभेटकेन समेत! छुरिकायुत! हेत्या देव्यासह त्वया.... वस्तव्यम्. आटतालं सुमन्तरागं

**n. Panchajanya :** Saurashtra Raga and Rupaka Tala have been assigned.

व ।। हे पाञ्चजन्य! निखिल शङ्खाधिपते! पञ्चजन शिरोवितन्यमान निज निर्दोषविनिर्धूतासुर सैन्य गोविन्द मुखारविन्द निरीक्ष्यराजहंस! निर्जित शशिबिम्बकोटि प्रकाश! प्रभासजनन! जनतत्वात्मक! सपरिवार! सौम्यया देव्यासह त्वयावस्तव्यम्. मध्यतालं मध्यमावतीरागं

**o. Sarnga :** Begada Raga and Eka Tala have been assigned.

व ।। हे शार्ङ्ग! त्वं समस्तकोदण्णनायक! विस्तार स्फूर्जिताक्षसार! दानव मुखार विन्दाभिनन्दित विश्रान्तगुण! जयासमेत! सुनन्दा देव्यासह त्वया.... वस्तव्यम्. एकतालं बेगड रागम्

**p. Padmadhiraja:** Regupta Raga and Jhampe Tala have been assigned.

व ॥ हेपद्माधिराज! पद्मावती पाणिपद्म पद्मिनी वल्लभप्रकाश! जयया. देव्यासह! त्वया! .... वस्तव्यम्. झम्पतालं रेगुप्त रागं

**q. Vanamali :** Pantuvarali Raga and Malla Tala have been assigned.

व ॥ हे वनमाले! पञ्चभूतात्मके! वैजयन्त्याख्ये! दामोदर प्रिये! सुपरिमलै स्सह त्वया.... वस्तव्यम्. मल्लतालम् – पन्तुवराली रागं

**r. Dharmadaya :** Samanta Raga and Simhaleela Tala have been assigned.

व ॥ हेधर्मादयः! कुन्दकुसुमावधारणवासो! मुख्य हस्त कृताञ्जुलयः! इतर हस्त धृतयोगपीठाः! सिंहमुखादिकैः अरुणकान्तिभिः! अधर्माद्यै स्सह साजैस्सा युधैर्युष्माभि ..... वस्तव्यम्. सिंहलीलातालं सामन्त रागम्

**s. Surya:** Ramakriya Raga and Jayaleela Tala have been assigned.

व ॥ हे सूर्य! विधात मित्रभो वरुणाह्वय। भगवन्! इन्द्रक विबृहद्धातु यम सुवर्णतादि दिवाकरमित्र विष्णवादि द्वादशादित्यै र्युतः यावदुत्सवं अत्र स्थिरोभव. जयलीला तालं रामक्रियारागम्

**t. Prahlada:** Kambhoji Raga and Simhavikrama Tala have been assigned.

व ॥ हे प्रह्लाद! परमभागवतोत्तम! सालोक्य सारुप्य सामीप्य सायुज्य मिच्छद्भिः अर्चनवन्दन सख्यात्म निवेदन श्रवण स्मरण कीर्तन पादसेवनादि नवविध भक्ति संयुतैः सर्वविध कैज्कर्यपरैः नारद पराशर पुण्डरीक व्यासाम्बरीष शुक शौनक भीष्म दाल्भ्य रुक्माङ्गद अर्जुन वसिष्ठ बलि परमभागवतैस्सह त्वया..... वस्तव्यम्. सिंहविक्रमतालं काम्भोजि रागं

**u. Narada :** Padamanjari Raga and Hamsanada Tala have been assigned.

व ॥ हे नारद! कश्यपात्रि वशिष्ठ शब्धलिखित याज्ञवल्क्य जाबालि आश्वलायन आपस्तम्ब बोधायन सालङ्कायन शालिहोत्र कण्वागस्त्यकच्छप शौनक भृग्वादि देवर्षिभिरुपेतः सनकादि योगिभिस्सह, शतश्री शतधारा शतस्वरा विमला वल्लकी मत्तकोकिला मञ्जुलस्वरा देवमोहिनी प्रभृति सर्ववीणादिभिस्सह निषाद ऋषभ गान्दार षड्ज मध्यम धैवतादि सप्तस्वरयुतः सर्वानन्दकर वीणावादनं कुर्वन् यावदुत्सवं त्वमत्र सुस्थिरो भव. हंस नाद तालम् पदमंजरी रागम्

**v. Samudra :** Maraja Raga and Kandarpa Tala have been assigned.

व ॥ हेसमुद्र! सरित् पते! गङ्गा यमुना सरस्वती शतरूपा रोष्टि मरुध्वृधा कालिन्दिनी कनकावती गोदावरी कृष्णवेणी तुङ्गभद्रा भीमरधी भवनाशिनी सन्दा परमानन्दा पिनाकिनी गणकी चन्द्रभागा सिन्धु श्रोणा वेगवती वेत्रवती सरयू पिपासा पूर्णभद्रा परभद्रा नर्मदा मधुमावती इक्षुमती ऐरावती भोजनावती वानरवल्लिका मलिनी मत्तगणा पयस्विनी चन्द्रफालगा महारण्यादि सर्वनदीभिस्सह जम्बू प्लक्ष कुश क्रौञ्च शाक शाल्मल पुष्कराख्य सप्तद्वीपैस्सह, समस्त यादोगणैश्च साङ्गस्सायुधः समागत्य यावदुत्सवं त्वमत्रसुस्थिरो भव. कन्दर्प तालं मरज रागं

**w. Manuvu :** Kedaragaula Raga and Rangapradeepaka Tala have been assigned.

व ॥ हेमनो! स्वयम्भूतनय! शतरूपया सह चतुर्दशमनुभि स्समन्वितः राजभिः चक्रवर्तिभिस्सह पुरग्रामारण्य जनपदादि नानादेशैः बहुकर्मयु कैः नानाजाति मनष्य गणैश्च सेव्यमानः साङ्गः सायुधः समागत्य यावदुत्सवं अत्र सुस्थिरोभव. रङ्ग प्रदीपकतालम् केदारगौल रागम्

**x. Meruvu:** Pali Raga and Gajaleela Tala have been assigned.

व ॥ हे मेरो! त्वं हिमवन्निषध विन्ध्य माल्यवत् पारियात्र गन्धमादन हेमकूटाख्य सप्तकुल पर्वतैरनुगीयमानः समागत्य यावदुत्सवं अत्र सुस्थिरोभव. श्रीरङ्गतालम् देवगान्दारी रागम्

**y. Arundhati :** Varali Raga and Chacchatputa Tala have been assigned.

व ॥ हे अरुन्धति! परम पतिव्रते! त्वं लक्ष्मी गौरी लोपामुद्रा अनसूया वसुधा सावित्री गायत्री सरस्वती देवमाता प्रभृति पतिधर्म परायणाभिस्सह समागत्य यावदुत्सव समाप्ति अत्तेवसुस्थिराभव!. चञ्चत्पुटतालम् वराली रागम्

**z. Veda:** Kausika Raga and Gharma Tala have been assigned.

व ॥ हे वेदाः! यूयं ऋग्यजुस्सामाधर्व चतुर्वेद प्रतिपादित समस्त जनहित भूत भगवन्नारायण स्वरूपरूप गुण विभवैश्वर्यैःउपनिषद्भिः आयुर्वेदाद्यैश्च, श्रद्धाकरुणान्डरट्लैश्च व्याकरणादि षडक्षैश्च, ब्राह्मण वैष्णवाद्यैः, अष्टादश पुराणैः श्रीपाञ्चरात्रागमादि शास्त्रैः, मीमांसाद्यैः, अन्वीक्षकी तर्क दण्णनीति प्रभृतिभिः, मूर्तिमद्भिः समस्त विद्यादिभिः, दिव्य प्रबन्टैश्च समागत्य यावदुत्सवं अत्र सुस्थिरा भवन्तु. घर्मतालं कौशिक रागं

**aa. Ananta :** Varalika Raga, Ananta Tala, Gandhara Svara and Ketaka Nrtta have been assigned.

व ॥ हे अनन्त! भुजङ्गनाथ! दिगस्त विश्रान्त सुरकान्ता सुगीयमान चरित! स्फुरन्मणि प्रकाशमान! फणामण्डल शिखरायमान भूमण्डल! हलमुसला युध धर! लक्ष्मी कान्तोप भोगो पतल्प! मृणालवद्धवल हंस कान्तिभिः वारुणी सहितः, वासुकी तक्षक धृतराष्ट्र कर्कोटक पद्म महापद्म शङ्ख गुलिक धनञ्जय कम्बल अश्वत्थ शङ्कर श्वेतफाल इलापुत्र शुनाश्व दधिमुख हरिद्रौक हस्तक पीठकर्ण विशालाक्षैः एकविंशतिकुलोद्भवैः नानावर्ण सर्पगणैस्सह भोगवत्यां स्थितः! सकलकला प्रवीणाभिः नानानागकान्याभि स्सह कालीयादि सर्पगणनायकै स्सह कूर्मारूढः! साङ्गः

समागत्य यावदुत्सवं अत्र सुस्थिरोभव!

श्लो ॥ अनन्त तालो गान्दार स्वर् रागो वरालिका ।
नृत्तं केतकमित्युक्तं अनन्त प्रीतिदं भवेत् ॥
अनस्ततालं गान्दार स्वरं वरालिका रागं केतक नृत्तं.

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

**ab. Brahma :** Ghanta Raga, Dhruva Tala, Nishada Svara and Kamala Nrtta have been assigned.

श्लो ॥ घण्टा रागोनिषादश्च स्वरस्तालस्तु वै ध्रुवः ।
नृत्तं कमल मित्याहुः ब्रह्मणः प्रीतिकारकम् ॥
घंटारागं निषाद् स्वरं ध्रुवतालं कमल नृत्तं.

**ac. Desanivasi:** Ghajja Raga, Nrusimha Tala have been assigned.

व ॥ एतद्एश निवासिनः यूयं ब्रह्म, क्षत्र वैश्य मा स्वधर्म निरतैः
आश्रमवासिभि: विधालङ्कृत श्रीरभाद्यष्टोत्तरशत दिव्यदेश निवासिभिस्सह
समागत्य यावत् उत्सवसमाप्ति सुस्थिराः भवन्तु. नृसिंह तालं घज्जारागम्

**ad. Gramanivasi :** Bhupala Raga, Simha Tala

व ॥ हे ग्रामनिवासिनः! वेदशास्त्र पुराणस्तोत्र दिव्य प्रबन्धपाठकैः क्षत्र, वैश्य, शूद्रादि अष्टादश वर्णःसर्वजन्तु नियोगादिभिः दासवर्टैः सह समागत्य यावदुत्सव समाप्ति सुस्थिराः भवन्तु. सिंह तालम् भूपाल रागम्.

**2.4 Balidana Vidhi :** In this process of Kriya vidhana offered to various Gods like Brahma, Garuda, Nairuti, Paschima, Vayuvya, Saumya, Eesanya, usage of various ragas, talas, vadyas and nrittas have been mentioned.

व ॥ सनक प्रमुख प्रतिबद्धसखं सुरबृन्द समन्वितपद्मपदम् ॥
नमितप्रणुत प्रतिपत्तिकरं विधिमद्भुतसृष्टि समुद्वहनम् ।
सरसिजभवनं सरसिजवदनं सरसिजनाभसुतम् ।
करधृतिकनकं घनमतिमनघं जितशत पत्रिकरम् ।
प्रकटित विभवं प्रमुदित हृदयं प्रतिदिन सृष्टिकरम् ।
शतमखनमितं शकलित कलुषं शतधृतितालमिदम् ।
तत्तत् शतधृतितालमिदम् ॥

**2.5 Grama Bali:** In this process, Gods like Kumuda, Kumudaksha, Pundarika, Vamana, Shankukarna, Sumukha, Supratishtha, Prusnigarbha, Bhuta have also been associated with various ragas, talas, vadyas and nrittas.

**Kumuda :** Svara 'Shadjam' has been assigned to this God and it is given that 'Gardhara' Raga has to be played to appease him and it has to be set to Sama Talam. Performance of Vilasmeta Nritta has been prescribed.

श्लो ॥ स्वरषड्जस्समं तालं रागो गार्धार ईरितः ।
नृत्तं विलासमेतैस्तं कुमुदं मोदयेद्रमे! ॥

Kumudākṣa: Svara 'Rishabha' has been assigned to this God and it is given that 'Kaulava' Raga has to be played to appease him and it has to be set to Madhyama Talam. Performance of Vishnukranta Nritta has been prescribed.

श्लो ॥ कुमुदाक्ष प्रियो रागः कौलवो वृषभस्स्वरः ।
तालस्तु मध्यमो नृत्तं विष्णुक्रान्तमिहोच्यते ॥

Puṇḍarīka: Svara 'Gandhara' has been assigned to this God and it is given that 'Madhyamavati' Raga has to be played to appease him and it has to be set to Bhringani Talam. Performance of Kaitaka Nritta has been prescribed.

श्लो ॥ तालं भृङ्गणिसंज्ञं स्यात् स्वरो गानार नामकः ।
मध्यमावतिरागस्तु नृत्तं कैतकमुच्यते ॥

**Vāmana :** Svara 'Panchama' has been assigned to this God and it is given that 'Sri' Raga has to be played to appease him and it has to be set to Malla Talam. Performance of Bhadramali Nritta has been prescribed.

श्लो ॥ स्वरश्च पञ्च मस्तालो मल्लश्रीराग ईरितः ।
नृत्तं तु भद्रमाली च वामनस्य प्रियं भवेत् ॥

Śaṅkukarṇa : Svara 'Dhaivata' has been assigned to this God and it is given that 'Bhupala' Raga has to be played to appease him and it has to be set to Mangala Talam. Performance of Kantara Nritta has been prescribed.

श्लो ॥ स्वरोदैवतानामा स्यात् मङ्गलं तालमीरितम् ।
भूपालो राग इत्युक्तोनृत्तं कान्तारकुट्टिमम् ॥

**Sumukha :** Svara 'Nishada' has been assigned to this God and it is given that 'Hamsadhvani' Raga has to be played to appease him and it has to be set to Bhadra Talam. Performance of Paribhradam Nritta has been prescribed.

श्लो ॥ स्वरो निषादस्तालं तु भद्रो हंसध्वनिस्तु सः ।
रागो नृत्तं पारिभ्रदं सुमुखस्य प्रियं भवेत् ॥

**Supratiṣṭha :** Svara 'Gandhara' has been assigned to this God and it is given that 'Purnachandra' Raga has to be played to appease him and it has to be set to Karkari Talam. Performance of Katibandhana Nritta has been prescribed.

श्लो ॥ तालस्तु कर्करी प्रोक्तः स्वरो गार्धारनामकः ।
पूर्णचन्द्रस्तु रागस्स्यात् नृत्तनु कटिबन्धनम् ॥

**Pṛśnigarbha :** Svara 'Nishada' has been assigned to this God and it is given that 'Megha' Raga has to be played to appease him and it has to be set to Bhrngani Talam. Performance of Mangala Nritta has been prescribed.

श्लो ॥ तालस्तु झिङ्गणी प्रोक्तो निषादस्स्वर उच्यते ।
रागो मृएघाभिदो भद्रे! ऋत्तं मंगलमीरितम् ॥
निषाद स्वरं मेघरागं झिजिणि (भृङ्गणि) तालं
मङ्गल नृत्तं

Bhūta : It is given that 'Gardhari' Raga has to be played to appease him. Performance of Sarvamangala Nritta has been prescribed.

श्लो ॥ तालं अण्णकोटिमध्य पद्मजाण्णभाण्ण देवता ।
षणभेद योनिभेद काण्णतृप्तिकारणम् ।
सर्वगीत वाद्य घोष सर्वनृत्यडम्बरम् ।
सर्वविष्णुतुष्टि हेतु सर्वदैवत तालकम् ॥
देवगानं गार्धारि रागं सर्वमङ्गल नृत्तं

## 3. Conclusion

There seem to be several variations in the available texts of various Samhitas pertaining to Pancharatra Agama and many instruments mentioned in the Pancharatra Agama are not in vogue. Over the centuries, some of the Ragas seem to have changed in name and form. We see many references to Marga Talas and some Apurva Talas.

There is every necessity to research, reconstruct and revive the various musical instruments, ragas, talas and nrittas mentioned in these religious texts to preserve the various aspects of Indian music and culture for the benefit of posterity.

## References

1. Bharata Sekharacharyulu PTG, 'Sri Pancharatragama Prasasti', Tirupati, 2018
2. Bhattara Charyulu SB, 'Kriya in Pancharatra and Vaikhanasa Agama', (Ph.D Thesis), Department of Sanskrit, Sri Venkateswara University, Tirupati
3. Narasimhacharya SBL, 'Mahostava vidhi', Padmasri publications, Tirupati, 1985
4. Narasimhan KEL, 'Agameshu sangeetam', 45th All India oriental Conference, article published in National Seminar conducted by Rastriya Sanskrit Vidyapeetha, Tirupati. June 2010
5. 'Sriprasna Samhita', Jeeyar Educational Trust, Seethanagaram, 2008
6. Interview with Sri Bharata Sekharacharyulu, Lecturer in Pancharatra Agama, Vedic University, Tirupati
7. Interview with Dr PTG Ranga Ramanujacharyulu, Asst.Professor, Department of Agama, National Sanskrit University, Tirupati

❑❑❑

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# व्याकरणदृष्ट्या धातुकाव्यस्य वैशिष्ट्यम्

डा. उदयन हेगडे*

**ग्रन्थपरिचयः**

अस्मिन् धातुकाव्याख्ये काव्यग्रन्थे त्रयः सर्गाः विद्यन्ते। प्रथमे सर्गे ९२ कारिकाः, द्वितीये सर्गे ८४ कारिकाः, तृतीये सर्गे ७१ कारिकाश्च विद्यन्ते । यद्यपि अयं काव्यग्रन्थः, तथापि व्याकरणभूयिष्ठत्वमेव अस्य विद्यते। काव्यद्वारा (व्याकरण)धातूनाम् अध्ययनाय अयं ग्रन्थः नितान्तम् उपकारकः। १८९०तमे वर्षे केरलप्रदेशे अस्य काव्यग्रन्थस्य प्रकाशनं कृतमिति भाति, किन्तु, तस्य प्रतिकृतिः नोपलभ्यते। बाम्बे-प्रदेशस्य काव्यमालासरणौ अस्य ग्रन्थस्य प्रकाशनं जातं १८९४ तमे वर्षे कृष्णार्पणाख्यया व्याख्यया सह।

**धातुकाव्यम् - नारायणभट्टतिरिः**

अस्य धातुकाव्यग्रन्थस्य रचयिता मेल्पत्तूरुनारायणभट्टतिरिः इत्याख्यः केरलदेशीयः सुप्रसिद्धः व्याकरणविद्वान्। अनेन विरचितः धातुकाव्याख्यः अयं ग्रन्थः। अस्मात् पूर्वं वासुदेवकविना विरचितस्य वासुदेवविजयाभिधस्य काव्यरत्नस्य शेषपूरणाय सः इत्थं प्रतिजानीते -

**उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।**
**उदाहरत्यद्य वृकोदरोदितान्धातून्क्रमेणैव हि माधवाश्रयात्**[1] ॥

वासुदेवः इति कश्चित् केरलदेशे पुरुवनग्रामजन्मा अवर्तते। तेन पाणिनीयसूत्राणि उदाहरणसहितानि प्रकाशितानि आसन्। तेन सूत्राणामूर्ध्वं धातवः उदाहृताः। अस्मिन् धातुकाव्याख्ये ग्रन्थे धातवः क्रमशः उक्ताः इत्यतः अस्य वैशिष्ट्यं वर्तते इति अवगम्यते। बहवः धातवः दुर्लभप्रयोगाः विद्यन्ते। तेषां सर्वेषामपि धातूनाम् अत्र काव्ये सोदाहरणं निरूपणेन, अखिलधातूनामेकत्र समावेशात् जिज्ञासूनां महान्

---

* सहायकाचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[1] धातुकाव्यम् १
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

उपकारः भवति इत्याशयेन तेनेदं काव्यं प्रणीतम्। अस्मिन् धातुकाव्ये धातुपाठानुसारं क्रमेण उदाहरणप्रदर्शनात्, अस्मिन् प्रकरणे एतावन्तः धातवः इति अध्येतृभिः (श्रोतृभिः) सम्यक् अवगम्यते। अत्र शास्त्रे दुष्करमपि गणविभाजनादिकं अत्यद्भुतरूपेण प्रकाशनीयम् इति ग्रन्थकारस्य आशयः।

लोके बहवः धातुपाठाः विद्यन्ते। अस्मिन् धातुकाव्यग्रन्थे कस्य धातुपाठस्य आश्रयणम् इति प्रश्ने सति – तत्रोक्तं – वृकोदरोदीरितान् इत्यादिना। वृकोदरः नाम भीमसेनः। वैयाकरणेन भीमसेनेन या पद्धतिः अनुसृता, सैव अनुस्रियते इति भावः। भीमसेनप्रणीतत्वात् केवलं प्रसिद्धिं स्वीकृत्य कथं प्रामाणिकत्वबुद्धिः तत्र भवेत् इति चिन्तायाम्, उच्यते – देवकृतदैवधातुपाठस्य व्याख्याने पुरुषकारे – "*तस्मात् भीमसेनस्यापि अयमेव पाठः*[1]" इति वचनं दृश्यते। भीमसेनकृतः यः धातुपाठः, तस्य धातुपाठस्य मैत्रेयरक्षितविरचित-धातुप्रदीपादिषु मतभेदाः प्रदर्शिताः। तर्हि किमत्र कर्तव्यम् ? इति चेत्, उक्तं ग्रन्थकारेण – माधवाश्रयात् इति। माधवो नाम कश्चित् धातुवृत्तिकारः वर्तते, तेन विरचिता माधवीया धातुवृत्तिः। अयं ग्रन्थः धातुपाठविषये अनुस्रियते। अतः, क्लेशः नास्ति। अन्योऽपि अर्थः स्वीक्रियते – माधवो नाम लक्ष्मीवल्लभः। मधुकुलावतीर्णस्य पूर्णब्रह्मणः आश्रयात् सर्वात्मना शरीरकरणात् तत्करुणयैवेदं क्रियते, अतो न दुःसाधत्वमिति ग्रन्थकारस्य आशयः। तथैव, माधव एवाश्रयः = प्रतिपाद्यः। तस्माद्धेतोरेव इदं क्रियते। अतः, माधवविषयकथाकथनचिन्तनाद्यर्थमेव क्रियमाणत्वात् सदोषमपि खेदाय न भवतीति भावः। एवं च, श्लोके माधवाश्रयात् इत्यनेनैव इष्टदेवतानुस्मरणमपि कृतं वर्तते। अस्मिन् ग्रन्थे के विषयाः प्रतिपादिता ? कश्च कथाभागः इत्यस्मिन् विषये उच्यते -

**कंसहिंसाप्रबन्धार्थो वीरभक्त्यादयो रसाः। त्रिभिर्दिनैः कृतं कर्म त्रिभिः सर्गैश्च कथ्यते॥**
**अक्रूरयोगो यात्रादिचापच्छेदान्तचेष्टितम्। मल्लोद्योगादिकं सान्तपर्यन्तं च त्र्यहे कृतम्॥**
**धातुपाठे च भूवादिभूयान् भवति तत्र च। अगणः प्रथमो भागो द्यूताद्यो गणवान् परः॥**

---

[1] दैवम् पृ सं
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**अनयो रगणो भागः प्रथमः सर्ग उच्यते। द्वितीयभागमारभ्य तुदाद्यन्तं द्वितीयके॥**
**रुधादितश्चुराद्यन्तं तृतीयेनोपवर्ण्यते। व्यज्यते गणभेदादिः कथाभेदादिलाञ्छनैः॥**
**तात्पर्यभेदाद्योज्यन्ते तुल्यार्था अपि धातवः ॥**

अथ धातुकाव्यम् आरभ्यते -

**स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधीगाधितकार्यबाधिनम्।**
**द्रक्ष्यन्हरिं नाधितलोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम्[1] ॥**

अथ स गान्दिनीभूर्हरिं द्रक्ष्यन् अन्तरिन्द्रियं मुदास्कुन्दितं देधे। अथ श्रीकृष्णानयनार्थं कंसनियोगानन्तरं स तत्तादृशभगवद्भक्तिशाली गान्दिनीतो भवत्युत्पद्यते इति गान्दिनीभूः अक्रूरः। गान्दिनी नाम श्वफल्कभार्या। द्रक्ष्यन्निति भविष्यत्प्रत्यय-स्यात्रासन्नभविष्यत्कालत्वाद् द्रष्टुमारब्धवान् इति अर्थः। भोक्ष्यमाणः आचरति इतिवत्। अन्तरिन्द्रियं नाम मनः। तदानीम् आभ्यन्तरतमे भगवद्रूपे एवात्याविष्टत्वेन बहिर्मनोवृत्तीनामसत्प्रायत्वात् अन्तरिन्द्रियत्वमेव मनः जातम् इति। मुदि सन्तोषे समुद्रस्थानीये आस्कुन्दितम् आप्लुतं स्नातं निमग्नमित्यर्थः। अथवा मुदायां स्कुन्दितम् इति वा। हलन्तादपि विकल्पेन टाप्-प्रत्ययः स्यात्, आकारान्तस्यापि मुदाशब्दस्य सद्भावात्। अथवा मुदा हेतुना उत्प्लुत्य गतं कृतनर्तनम् इत्यपि अर्थवर्णनं कर्तुं शक्यम्। यद्वा मुदा कर्त्र्या उद्धृतमुन्नमितं वर्धितम् इत्यपि। कीदृशं हरिम् इति प्रश्ने– गोकुलैः एधितं - गोकुले प्रवृद्धम्। गोकुलं नाम गोष्ठः। स्पर्धालुधीगाधितकार्यबाधिनं - स्पर्धालूनां स्पर्धावतां धियि बुद्धौ गाधितं प्रतिष्ठितं लब्धस्थानम् इत्यर्थः। लिप्सतं वा कार्यं बाधितुं शीलं यस्य, तम्। नाधितलोकनाथकं - नाधितलोकस्य उपतप्तजनस्य नाथकम् ईशितारं = रक्षकम् इत्यर्थः। नाधितस्य प्रार्थितस्य निजलोकस्य आशीरूपेणानुग्रहीतारम् इति वा। गान्दिनीभूः - गान्दिन्या भवति उत्पद्यत इति गान्दिनीभूः - अत्र भू[2]धातुः सत्तार्थकः।

---

[1] धातुकाव्यम् २

[2] पा.धा.पा.१

अस्मात् धातोः "**क्विप् च**[1]" इति क्विप्-प्रत्ययः। एधितमित्यत्र **एध**[2]धातुः वृद्ध्यर्थकः। अस्मात् धातोः "**गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवस-जनरुहजीर्यतिभ्यश्च**[3]" इति सूत्रेण कर्तरि क्तप्रत्ययः। स्पर्धालुरित्यत्र संघर्षार्थकः **स्पर्ध**[4]धातुः। संघर्षः नाम पराभिभवेच्छा। पराभिभवस्य धात्वर्थान्तर्भावात् अत्र अकर्मकत्वम्। अस्माद् "**गुरोश्च हलः**[5]" इत्यप्रत्यये स्पर्धा इति रूपम्। गाधित इत्यत्र **गाधृ**[6] धातुः (गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च)। प्रतिष्ठा नाम आत्मयापनास्थानलाभश्च। एकत्र स्थापनं संदर्भो वा ग्रन्थः। संदर्भः शब्दविषयोऽर्थविषयोऽपि। अस्मात् कर्तरि कर्मणि वा क्तप्रत्ययः । कार्यबाधिनम् इत्यत्र लोडनार्थकः **बाधृ**[7]धातुः। लोडनं प्रतिघातः। अस्मात् "**सुप्यजातौ णिनिस्ताच्छील्ये**[8]" इति इति सूत्रेण णिनिप्रत्ययः। नाधितलोकनाथकमित्यत्र उभौ धातू - **नाधृ**[9] **नाथृ**[10] **याञ्चोपतापैश्वर्याशीःषु** इति। ऐश्वर्यमाधिपत्यं नियन्तृत्वं च। 'नृति-नन्दि-नार्दि-नक्कि-नाटि नाधृ-नाथृ-नृवर्जिताः सर्वे नादयो णोपदेशाः' इत्युक्त्या उभावप्यणोपदेशौ । आद्यो णोपदेश इत्येके। आद्यात् कर्तरि कर्मणि वा क्तः द्वितीयात् ण्वुल् । देधे इत्यत्र धारणार्थकः **दध**[11]धातुः। लिट्-लकारः। स्कुन्दितम् इत्यत्र **स्कुदि**[12]धातुः आप्रवणार्थकः। आप्रवणमाप्लवनमुत्प्लुत्य गमनं वा। उद्धरणं वा। अस्मादिदित्त्वान्नुमि पूर्ववत् क्तप्रत्ययः॥

---

[1] पा.सू. ३.२.७६
[2] पा.धा.पा.२
[3] पा.सू. ३.२.७२
[4] पा.धा.पा.३
[5] पा.सू. ३.३.१०३
[6] पा.धा.पा.४
[7] पा.धा.पा.५
[8] पा.सू. ३.२.७८
[9] पा.धा.पा.६
[10] तत्रैव.७
[11] तत्रैव.८
[12] तत्रैव.९

**प्रश्विन्दिताशं यशसा पुराप्यसौ विवन्दिषुस्तं नतभन्दिनं विभुम् ।**
**स्वमन्दिरात्स्पन्दितुमेव नाशकत्कंसात्परिक्लिन्दितसज्जनाद्भिया[1] ॥**

अत्र अपिः उभयत्र योजनीयः। असौ पुरा अपि तं विभुं विवन्दिषुरपि स्वमन्दिरात् स्पन्दितुमेव नाशकत् इति। असौ नाम अक्रूरः। पुरापि पुरैव विवन्दिषुः वन्दितुमिच्छुः। अत्र अपिर्विरोधार्थे प्रयुक्तः। स्पन्दितुं किञ्चिदपि चलितुं नाशकत्, न शक्तोऽभूत्। कीदृशम्? इति चेत्, यशसा प्रश्विन्दिताशं प्रश्विन्दिताः सम्यग्धवलीकृता आशा दिशो येन, तम्। नतभन्दिनं - नतान् नमनकर्तॄन् भन्दयितुं सुखयितुं कल्याणवतः कर्तुं वा शीलं यस्य, तम्। कंसात् भिया। अत्र हेतौ तृतीया। कीदृशान्! परिक्लिन्दितसज्जनात्। परिक्लिन्दिताः परिदेविताः सज्जना येन, तस्मात्। प्रश्विन्दिता इत्यत्र श्वैत्यर्थकः **श्विदि**[2]धातुः। तस्य णिजन्तात् कर्मणि क्तप्रत्ययः। विवन्दिषुरित्यत्र **वदि**[3]धातुः **वदि**[3]धातुः (वदि अभिवादनस्तुत्योः)। प्रणतिपूर्वकमाशीर्वचनं नतिमात्रं वा अभिवादनम्। अस्मात् सन्नन्तात् "सनाशंसभिक्ष उः[4]" इत्युप्रत्ययः। नतभन्दिनमित्यत्र **भदि**[5]**धातुः** (भदि (भदि कल्याणे सुखे च)। कल्याणं कल्याणवद्भावः। अस्माण्णिजन्ताण् णिनिप्रत्ययः। मन्दिरादित्यत्र **मदि**[6]धातुः (मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु)। स्वप्नः आलस्यम्। अस्मात् अधिकरणार्थे 'इषि-मदि-मुदि-खिदि-श्विदि-मिदि-मन्दि' इत्यादिना किरच्-प्रत्ययः। स्पन्दितुमित्यत्र **स्पदि**[7]धातुः (स्पदि किंचिच्चलने)। तस्मात् "**शकधृषज्ञाग्लाघटरभलभ-**

[1] धातुकाव्यम् ३
[2] पा.धा.पा.१०
[3] तत्रैव.११
[4] पा.सू. ३.२.१६८
[5] पा.धा.पा.१२
[6] तत्रैव.१३
[7] पा.धा.पा.१४

**क्रमसहार्हास्त्यर्थेषु तुमुन्**[1]" इति सूत्रेण तुमुन्-प्रत्ययः। परिक्लिन्दितेत्यत्र १५ **क्लिदि**[2]धातुः परिदेवनार्थकः। अस्माण्णिजन्तात् कर्मणि क्तः ॥

**मुदा स चेतो ददृदे चिरं हरौ स्वादात्सुरैः स्वर्दितमङ्गलोर्दने।**
**अकूर्दतेवास्य पुरः स्वखूर्दकैर्वनान्तगूर्दी रिपुगोदसूद्यसौ**[3] ॥

स मुदा चिरं हरौ चेतो ददृदे। मुदा हेतुना ददृदे = समर्पितवान्। स्वादात् = माधुर्यात् हेतोः, सुरैः स्वर्दितमङ्गलोर्दने, स्वर्दितानि = आस्वादितानि मङ्गलरूपाण्यूर्दनानि = क्रीडनानि यस्य, तस्मिन्। मनोलयस्यातिशयं वक्ति - असौ अस्य पुरः स्वखूर्दकैरकूर्दतेव इति। अयं हरिः स्वखुर्दकैः स्वकीयैः क्रीडनकैः वयस्यैः इत्यर्थः। अत्र सहार्थे तृतीया। अकूर्दत = क्रीडितवान्। वनान्तगूर्दी - वनान्ते वनमध्ये गूर्दितुं क्रीडितुं शीलं यस्य सः। रिपुगोदसूदी – रिपूणां, गोदं = क्रीडां, सूदितुं = हिंसितुं शीलं यस्य॥ मुदा इत्यत्र हर्षार्थकः **मुद**[4]धातुः। अस्मात् संपदादिक्विप्-प्रत्ययः। ददृदे इत्यत्र दानार्थकः **दद**[5]धातुः। धारणे च इति कल्पद्रुमे दृश्यते। अस्माल्लिटि "**न शसददवादिगुणानाम्**[6]" इत्येत्वाभ्यासलोपाभावः। स्वादात् इत्यत्र आस्वादनार्थकः **स्वद**[7]धातुः। आस्वादनम् = अनुभवः। "**धात्वादेः षः सः**[8]" इति सूत्रेण सकारः। स्वदेर्घञ्-प्रत्ययः। स्वर्दिता इत्यत्र आस्वादनार्थकः **स्वर्द**[9]धातुः। तस्य कर्मणि क्तप्रत्ययः। अनयोः स्वदधातुः षोपदेशः। "अदन्त्यपराः सादयः षोपदेशाः" इत्युक्तेः।

[1] पा.सू. ३.४.६५
[2] पा.धा.पा.१५
[3] धातुकाव्यम् ४
[4] पा.धा.पा.१६
[5] पा.धा.पा.१७
[6] पा.सू. ६.४.१२६
[7] पा.धा.पा.१८
[8] पा.सू. ६.१.६४
[9] पा.धा.पा.१९

"स्मिङ्-स्विदि-स्वदि-स्वञ्जि-स्वपयश्च" इत्युक्तेः च। ऊर्दनेत्यत्र उर्द[1]धातुः (उर्द माने क्रीडायां च)। अस्माल्ल्युटि, "**उपधायां च**[2]" इति दीर्घः। अकूर्दतेत्यत्र **कुर्द**[3]धातुः (**कुर्द खुर्द**[4] **गुर्द**[5] **गुद**[6] क्रीडायामेव)। कुर्देर्लङ्-लकारः। खूर्दकैः इत्यत्र खूर्देण्वुल्-प्रत्ययः। वनान्तगूर्दी इत्यत्र गूर्देर्णिनि-प्रत्ययः। रिपुगोदसूदी इत्यत्र गुदेश्च घञ्-प्रत्ययः, क्षरणार्थकः **षूद**[7]धातुश्च। निःसरणं तदहिंसार्थेऽप्यस्ति, तस्माण्णिनि-प्रत्ययः।

**गभीरनिर्ह्लादमथास्थितो रथं ह्लादादनुस्वादितकृष्णसत्कथः ।**
**पृदाकुजिद्वेगमयत्नतो ययौ वियोयुतत्काननजोतिनाध्वना**[8] **॥**

अथ स रथमास्थितोऽयत्नतो वियोयुतत् काननजोतिनाध्वना पृदाकुजिद्वेगं ययौ। आस्थितः नाम आरुह्य स्थितः। अयत्नतः = अप्रयासेन। वियोयुतत् - काननजोतिना वियोयुतता अत्यर्थं भासमानेन काननेन जोतितुं भासितुं शीलं यस्य, तेन। पृदाकुजिद्वेगम् - फूत्कारादिकुत्सितशब्दकरणात् पृदाकुः = सर्पः, तं जयतीति पृदाकुजित् = गरुडः। तस्य वेग इव वेगो यस्य, इति क्रियाविशेषणं रथविशेषणं वा। गभीरनिर्ह्लादं - गभीरो निर्ह्लादो ध्वनिः यस्य, तं रथम्। ह्लादादनुस्वादितकृष्णसत्कथः। ह्लादात् = सुखेन हेतुना अनुस्वादिताः पुनःपुनश्चर्व्यमाणाः कृष्णस्य सत्कथाः येन, सः। निर्ह्लादमित्यत्र **ह्राद**[9]धातुः **ह्राद**[9]धातुः (ह्राद अव्यक्ते शब्दे)। अस्माद्धातोः घञ् । ह्लादात् इत्यत्र सुखार्थकः

---

[1] पा.धा.पा.२०
[2] पा.सू. ८.२.७८
[3] पा.धा.पा.२१
[4] तत्रैव.२२
[5] तत्रैव.२३
[6] तत्रैव.२४
[7] पा.धा.पा.२५
[8] धातुकाव्यम् ५
[9] पा.धा.पा.२६

**ह्लाद**[1]धातुः (ह्लादी सुखे च)। चात् अव्यक्तशब्देऽपि। अस्मादपि घञ्-प्रत्ययः। अनुस्वादितेत्यत्र आस्वादनार्थकः **स्वाद**[2]धातुः। कर्मणि क्तः। पृदाकुरित्यत्र **पर्द**[3]धातुः (पर्द कुत्सिते शब्दे)। अस्मात् "पर्देर्नित्संप्रसारणमल्लोपश्च" इत्याकुप्रत्ययो रेफस्य संप्रसारणं पकारस्थिताकारस्य लोपश्च । अयत्नतः इत्यत्र प्रयत्नार्थकः **यत**[4]धातुः (यती प्रयत्ने)। अस्माद् "**यजयाचयतविच्छप्रच्छरक्षो नङ्**[5]"इति नङ्-प्रत्ययः। वियोयुतदित्यत्र **युतृ**[6]धातुः (युतृ **जुतृ**[7] भासने)। युतेः यङ्लुगन्ताच्छतरि रूपम्। जोतिना इत्यत्र जुतेर्णिनि-प्रत्ययः ॥

एवं गोकुलं प्रति प्रस्थितोऽक्रूरो निजेप्सितप्रतिबन्धमाशङ्कमानः प्रार्थयते -

**स वेथते स्माखिलवेथितं विधिं प्रश्रन्थितग्रन्थनधीरकत्थनः ।**
**अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन्दिशः प्रश्च्युतितैः स्मितामृतैः**[8] **॥**

स विधि वेथते स । विधिम् = ईश्वरं, वेथते स्म प्रार्थितवान्। अखिलवेथितं - सर्वजनैः प्रार्थितमिति विधिविशेषणं प्रधानकर्म वा। प्रश्नन्थितमन्थनधीः - प्रकर्षेण श्रन्थितं शिथिलीभूतं ग्रन्थनं कौटिल्यं यस्यास्तादृशी धीर्यस्य सः। अकत्थनः - न कत्थनम् आत्मश्लाघाशीलं यस्य सः। अस्य विष्णोः श्लाघाशील इति वा। प्रार्थनीयमेवाह - मुरारिर्ममान्तिके अतेत् - सततं गच्छेत्। चिन्मयो ज्ञानस्वरूपः। प्रश्च्युतितैः - स्मितामृतैर्दिशश्च्योतन्। प्रश्च्युतितैः गलितैः थृ। च्योतन् आसिञ्चन्। वेथत इत्यत्र

[1] पा.धा.पा.२७

[2] पा.धा.पा.२८

[3] पा.धा.पा.२९

[4] तत्रैव.३०

[5] पा.सू. ३.३.९०

[6] पा.धा.पा.३१

[7] तत्रैव.३२

[8] धातुकाव्यम् ६

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**विथृ**[1]धातुः (**विथृ वेथृ**[2] याचने)। विथेः "**लट् स्मे**[3]" इति भूते लट्। वेथितम् इत्यत्र वेथेः वेथेः कर्मणि कप्रत्ययः। प्रश्रन्थितेत्यत्र **श्रथि**[4]धातुः (श्रथि शैथिल्ये)। तच्च विशिष्टता अगाधता वा। अस्मात् कर्तरि क्तः। ग्रन्थनेत्यत्र **ग्रथि**[5]धातुः (ग्रथि कौटिल्ये)। शाठ्यं वक्रता वा तत्। तस्माल्ल्युट्। अकत्थन इत्यत्र श्लाघार्थकः कत्थ[6]धातुः। सा च परविषया स्वविषया च स्यात्। अस्माद् "**अनुदात्तेतश्च हलादेः**[7]" इति युच्-प्रत्ययः। अत्र अत्र युजन्तोक्त्या तवर्गान्तानुदात्तेतां समाप्तिः सूचिता। अतेदित्यत्र **अत**[8]धातुः (अत सातत्यगमने)। अस्माल्लिङ्। उदात्तेत् प्रकरणारम्भर्कद्योतकमिदम्। चिन्मय इत्यत्र **चित**[9]धातुः (चिती संज्ञाने)। तच्च चैतन्यं स्मरणं च। भट्टिमते ज्ञानमात्रं च। अस्मात् संपदादिक्किबन्तान्मयट्-प्रत्ययः। तद्रूप इति केचित् (कौमुद्युक्तेः)। ताद्रूप्ये मयट्-प्रत्ययः। च्योतन् इत्यत्र **च्युतिर्**[10]-धातुः (च्युतिर् आसेचने)। आर्द्रीभवनम् इत्यर्थः। अस्माच्छतरि रूपम्। प्रश्च्युतितैरित्यत्र **श्च्युतिर्**[11]-धातुः क्षरणार्थकः। स्रुतिस्तत्। तस्मात् कर्तरि क्तः॥

अयं काव्यग्रन्थः अत्यन्तं विस्तृतः (त्रिसर्गात्मकः), प्रायशः सर्वानपि धातून् (द्विसहस्रं) सङ्गृह्णाति। सर्वेषाम् अत्र सङ्ग्रहस्य अशक्यत्वात्, लेखनम् उपसंह्रियते।

---

[1] पा.धा.पा.३३
[2] पा.धा.पा.३४
[3] पा.सू. ३.२.११८
[4] पा.धा.पा.३५
[5] तत्रैव.३६
[6] पा.धा.पा.३७
[7] पा.सू. ३.२.१४९
[8] पा.धा.पा.३८
[9] तत्रैव.३९
[10] तत्रैव.४०
[11] तत्रैव.४१
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**परामृष्टग्रन्थसूची**


१. **अष्टाध्यायी** - पाणिनिविरचिता, सम्पादनम् - श्रीगोपालदत्तपाण्डेयः, चौखम्भा सुरभारती प्रकाशन, वाराणसी, चतुर्थं संस्करणम्, १९१२

२. **धातुकाव्यम्** – नारायणभट्टतिरिप्रणीतम् (काव्यमालाग्रन्थगुच्छ-अन्तर्गतम्), सम्पादनम् – पण्डित केदारनाथ तथा वासुदेव-लक्ष्मणशास्त्री- पणशीकर निर्णयसागरमुद्रणालयः, बाम्बे, १९१५


❑❑❑
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# ज्योतिषशास्त्रे पञ्चमहापुरुषयोगेषु व्यक्तित्वविकासः

डा. नारायणन् नम्पूतिरि न.त*

समस्ते विश्वेऽस्मिन् सम्पूर्णजीवराशीनां विज्ञानज्ञानावाप्तये आध्यात्मिकाधि-दैविकाधिभौतिकशापोपशमनकरणनैपुण्ययुक्ता पुण्यापुण्यज्ञानाज्ञानधर्माधर्मसत्यासत्यनित्या-नित्यशिक्षणज्ञानावाप्तये शारीरिकमानसिकबौद्धिकबौद्धिकार्थिकदृष्ट्या सुख-सन्तोषफलतायै प्रादुर्भूताः चत्वारो वेदाः ब्रह्मणः चतुर्मुखात्। ते एव - ऋग्यजुस्सामाथर्वणाः। एते एव चत्वारः वेदाः सकलसंस्कृतवाङ्मयस्याधारभूताः।

"संस्कृतवाङ्मये व्यक्तित्वविकासोद्बोधनम्" इति विषयः वेदाङ्गभूतस्य ज्योतिषस्याधारेण कथं सम्भवति इति स्वीकृतविषयः। विषयश्रवणेनैव कथं वा व्यक्तित्वविकासः ज्योतिषशास्त्रेण सम्भवति इति सर्वेषां संशयः सामान्यः एव।

यद्यपि संस्कृतं देवभाषा संस्काराणां भाण्डाकारः तथापि केवलं संस्कृतपठनपाठनेन व्यक्तित्वविकासः सम्भवति इति नाङ्गीक्रियते। तत्रैव ज्योतिषस्य प्राधान्यम्। व्यक्तित्वं कर्मफलमाश्रित्यैव भवति इति सर्वे जानन्ति। यथा –

**यदुपचितमिहान्यजन्मनि शुभाशुभं कर्मणः पंक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥१॥**

ग्रहाः कर्मफलसूचकाः एवं कर्मफलदायकाः च भवन्तीति बुधानामाभिप्रायः। ग्रहाः कर्मफलदायकाः यथा - कश्चन दोषनिवारणार्थं कस्यचित् ग्रहस्य पूजां करोति। तद्फलेन तद्दोषनिवारणम्। पुनश्च ये आत्मबलं वाञ्छन्ति ते सूर्योपासनया उत्तमात्मबलं प्राप्नुवन्ति। केचन मनोबलार्थं चन्द्रस्य, चित्तसमुन्नत्यै कुजस्य, पाण्डित्यार्थं बुधस्य, उत्तमगुणार्थं गुरोः, वैभवार्थं शुक्रस्य च उपासनां कुर्वन्ति। तस्मात् तेषां फलप्राप्तिः भवति। अनेन तेषां व्यक्तित्वविकासः अपि संभूयते। केवलं ग्रहाणां पूजनेन न अपितु भगवतां पूजनेन च व्यक्तित्वविकासः जायते। महाभागवते प्रहलादेन ईश्वरपूजनविषये प्रतिपादितम् यथा-

---

* अतिथि-अध्यापकः, ज्योतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥२ ॥**

देवतानां प्रीत्या ग्रहाः प्रीताः भवन्ति तस्मात् व्यक्तित्वविकासोऽपि जायते। ग्रहाः फलसूचका अपि भवन्ति तानि च फलानि द्विधा भवन्ति। उत्तमानि, अधमानि च उभयफलेनाऽपि व्यक्तित्वविकासः सम्भवति। उत्तमफलेन उत्तमव्यक्तित्वविकासः, अधमफलेन अधमव्यक्तित्वविकासश्च। उत्तमव्यक्तित्वविकास योगेषु अन्यतमः पञ्चमहापुरुषयोगाः ।

राजयोगेषु पञ्चमहापुरुषयोगा: अत्यन्तं मुख्याः। एतेषु योगेषु जाताः राजा वा राजसमो वा जायन्ते अयं च व्यक्तित्वविकासेनैव भवति पञ्चताराग्रहाः अर्थात् कुज-बुध-गुरु-शुक्र-शनयः क्रमशः एतेषां योगानां कारकाः भवन्ति उक्तञ्च –

**रुचकभद्रकहंसकमालव: सशशका इति पञ्चच कीर्त्तिताः।**
**स्वभवनोच्चगतेषु चतुष्टये क्षितिसुतादिषु तान् क्रमशो वदेत् ॥३ ॥**

पुर्वोक्तपञ्चताराग्रहाः जातके स्वक्षेत्रे स्वोच्चे वा स्थित्वा लग्नात् वा चन्द्रात् वा केन्द्रगतश्चेत् रुचकादि पञ्चमहापुरुषयोगाः सम्भवन्ति।

**१. रुचकमहापुरुषयोगः**

जातकचक्रे कुजः स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे भूत्वा लग्नात् जन्मराशिवशात् यदि केन्द्रस्थ भवति तर्ह योगाऽयं सम्भवति।

**रुचकमहापुरुषफलम् –**

**भक्तो विप्राचार्यवृन्दारकाणां मर्त्योऽत्यर्थं शत्रुवीर्यस्य हन्ता**
**चञ्चत्कीर्त्तिश्चारुकीर्त्तिः समानहस्ताङ्घ्रिस्याल्लोमजानूरुजङ्घाः ॥४ ॥**

रुचकयोगे जातः देवः, विप्राचार्येषु विनयः, शत्रुजित्, सुन्दरः, आजानुबाहुः, प्राप्तयशोधनी च भवति।

**२. भद्रकमहापुरुषयोग:**

जातके बुध स्वक्षेत्रे, स्वोच्चे, मूलत्रिकोणे भूत्वा लग्नात् जन्मराशेः यदि केन्द्रेभवति तर्हि भद्रकमहापुरुषयोगः सम्भवति।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**भद्रकमहापुरुषफलम् –**

**आयुष्मान् सकुशाग्रबुद्धिरमलो विद्वज्जनश्लाधितो ।**
**भूप भद्रक योगजोऽतिविभवश्चास्थान कोलाहलः ॥५ ॥**

अस्मिन् योगे उत्पन्नः दीर्घादुष्मान् कुशाग्रबुद्धिः, स्वच्छशरीरः, विद्यावान्, राजा, धनाढ्यः, उपन्यासकश्च भवति ।

**३. हंसमहापुरुषयोगः -**

जन्मकुण्डल्यां गुरुः स्वक्षेत्रे, स्वोच्चे, मूलत्रिकोणे लग्नात् जन्मराशेः यदि केन्द्रस्थः भवति तर्हि हंसनामकमहापुरुषयोग : भवति ।

**हंसमहापुरुषफलम्**

**हंसे सद्भिरभिष्टुतः क्षितिपतिः शङ्खाब्जमत्स्याङ्कुशैः ।**
**चिह्नैः पादकराङ्कितः शुभवपुर्मृष्टान्नभुग्धार्मिकः ॥६ ॥**

हंसमहापुरुषयोगे जातः सद्गुणसम्पन्नः, भूपालः, हस्तपादयोः शङ्ख-पद्म-मत्स्य अङ्कुशादिरेखासमन्वितः, सुन्दराकृतिः, मृष्टान्नभोजने रतः, धार्मिकश्च भवति ।

**४. मालव्यमहापुरुषयोगः -**

जातकचक्रे शुक्रः स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे भूत्वा लग्नात् अथवा जन्मराशेः यदि केन्द्रस्थः भवति तर्हि मालव्यनामकमहापुरुषयोगः भवति।

**मालव्यमहापुरुषफलम् –**

**पुष्टाङ्गो धृतिमान्धनी सुतवधूभाग्यान्वितो वर्धनो ।**
**मालव्ये सुखभुक्सुवाहनयशा विद्वान्प्रसन्नेन्द्रियः ॥७ ॥**

मालव्यमहापुरुषयोगे जातः कृशाङ्गः, वाहनयुतः, धनिकः, दारासन्तानयुतः, वर्धन, सुखाशनपरः, पण्डितः, प्रसन्नपञ्चेन्द्रियश्च भवति।

**५. शशमहापुरुषयोगः -**

जन्मकुण्डल्यां मन्दः स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे वा भूत्वा लग्नात् जन्मराशेः यदि केन्द्रस्थो भवति तर्हि शशमहापुरुषयोगः भवति।

**शशमहापुरुषयोफलम् –**

**शस्तः सर्वजनैः सुभृत्यबलवान् ग्रामाधिपो वा नृपो ।**
**दर्वृत्तः शशयोगजोऽन्य वनितावित्तान्वितः सौख्यवान् ॥८॥**

शशमहापुरुषयोगे जातः सर्वजनानुरक्तः सुभृत्यः, बलशाली, राजा, अन्याङ्गनारतः, परधनभोगी, सुखी च भवति। केवलं पञ्चपुरुषमहायोगैश्च नास्ति व्यक्तित्वविकासः अपितु ईश्वरानुग्रहादमि सञ्जायते। ध्यानोपासनापूजाधर्माचरादिभिरपि कर्मभिः व्यक्तित्वविकास्स्फुटीभवत्येव।

**पादटिप्पणी**

१. फ.दी. १. २
२. म.भा. ७
३. फ.दी.६.१
४. श.हो.प्र. २
५. फ.दी.६. २
६. फ.दी.६. ३
७. फ.दी.६. ४
८. फ.दी.६. ५

**अनुशीलितग्रन्थसूची**

१) फलदीपिका - श्रीमन्त्रेश्वरः, व्या - डा. हरिशङ्कर पाठक : चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २००७
२) सारावली - श्रीमत् कल्याणवर्मा, व्या - डा. मुरलीधर चतुर्वेदी, मोतीलाल-बनारसीदास्, वाराणसी, १९८६
३) मानसागरी - व्या - आचार्य श्री मधुकान्त झा, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २००५
४) श्रीमद्भागवतम् – व्यासः, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, १९९३

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# महाभाष्ये लौकिकन्यायानां समादरः

**प्रो. सुबोधशर्मा***

**'सिद्धे शब्दार्थसम्बन्धे'** सति महर्षिः पाणिनिः व्याकरणशास्त्रस्य प्रणयनं करोति। अनादिकालतः प्रचलितानां शब्दानामन्वाख्यानं भवति। तदुक्तं भगवता पाणिनिना - **'पृषोदरादीनि यथोपदिष्टम्'** । एवञ्च, व्याकरणमपि न लोकादतिरिच्यते। महाभाष्येऽपि- **'नहीदं लोकाद्भिद्यते'** - लोके यस्य अनभिधानं तस्य शास्त्रे आश्रयणं नैव भवति। एवं प्रकारेण लोकव्यवहारस्य अतीव समादरो वर्त्तते व्याकरणशास्त्रे। भवति हि शक्तिग्राहकेषु शिरोमणीभूतः लोकव्यवहारः। अतः लोकव्यवहारेण सामञ्जस्यं कथं न भवेद् व्याकरणशास्त्रे।

**'उत्तरोत्तरं मुनीनां प्रामाण्यम्'** इति वचनात् महर्षिणा पतञ्जलिना प्रणीतं महाभाष्यं पाणिनीयव्याकरणशास्त्रस्य सर्वोत्कृष्टो निधिः वर्तते। एतन्महाभाष्यं भाषामाधुर्येण भावगाम्भीर्येण स्वविषयप्रतिपादनशैल्या च संस्कृतजगति कमप्यपूर्वमेव स्थानं बिभर्ति। महाभाष्ये लौकिकन्यायानां, लौकिकदृष्टान्तानां, लौकिकोदाहरणानां वा अतीव प्रयोगः कृतोऽस्ति, अतोऽपि महाभाष्यस्य लोके अभ्यर्हितत्वं सौष्ठवञ्च स्वीक्रियते। पदे-पदे अत्र लौकिकन्यायानां गुम्फनं दरीदृश्यते। महाभाष्ये अनेकेषां लोकप्रचलितन्यायानां समावेशो वर्तते। अत्र नानाविधानां न्यायानां स्पष्टरूपेण, ध्वननरूपेण वा समावेशो भवति। महाभाष्यकारस्य लौकिकन्यायविषये महान् समादरो भवति। अत एव बहुत्र संदेहस्थले सति संभवे लौकिकन्यायेन समाधानमुक्तवान्। न ह्येतावत् महाभाष्यकारोऽनेकत्र शास्त्रदृष्ट्या शास्त्रयुक्त्या वा समाधानं कृत्वापि तमेव सिद्धान्तं पुनः द्रढयितुं लौकिकन्यायं दर्शयति।

लौकिकन्यायमाश्रित्य अनेके विद्वांसः पुस्तकमपि चकार। तेषु आचार्याः रामकिशोरशुक्लमबोदयाः, आचार्याः भीमसिंहवेदालङ्कारमहोदयाश्च विशेषेण स्मरणीया भवन्ति। परिभाषेन्दुशेखरेऽपि केचन तादृशाः न्यायाः मिलन्ति।

---

* केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

तत्र न्यायो नाम युक्तिः, लोकेप्रचलिता युक्तिः= व्यवहारः तर्को वा लौकिकन्याय इत्युच्यते। अत्र निबन्धे केषाञ्चिन्न्यायानामुपयोगिता प्रदर्शयिष्यते। ते लौकिकन्यायाः केचन न्यायशब्दायुक्ता केचन च न्यायशब्दरहिता एव भवन्ति, लौकिकयुक्त्या सिद्धत्वमुभयत्र समानं भवति।

कूपखानकन्यायः, माठरपरिवेषणन्यायः, तक्रकौन्डिन्यन्यायः, मण्डूकप्लुति-न्यायः, प्रसादवासिन्यायः, स्थालीपुलाकन्यायः, देवदत्तहन्तृहतन्यायः, वृद्धकुमारीवर-न्यायः, पर्जन्यवल्लक्षणप्रवृत्तिन्यायः, व्यपदेशिवदेकस्मिन्, एकदेशविकृतमनन्यवत्, आगन्तुकानामग्रेसन्निवेशनन्यायः, नष्टाश्वदग्धरथन्यायः, शालीकलापन्यायः, त्रिविषटप-परिव्राजकन्यायः, एवं बहुविधा लोकप्रचलितन्यायाः महाभाष्ये संदृशन्ते। एतेषां न्यायानां यथा आपमरजनेषु लोके उपयोगो भवति तद्वच्छास्त्रेऽपि शास्त्रीयसिद्धान्तबोधनाय यत्र तत्र प्रयोगो भवति। केचिन्न्याया विचार्यन्ते।

**कूपखानकन्यायः** – अस्य न्यायस्य चर्चा महाभाष्यकारेण पस्पशाह्निके कृता । तत्र महाभाष्यकारः शब्दोऽर्थः सम्बन्धश्च नित्यो भवतीति सिद्धान्तं संस्थाप्य, शास्त्रस्य प्रयोजनं धर्मनियमः इत्युवाच। पुनश्च प्रश्नमुत्थापयति **'शब्दज्ञाने धर्म आहोस्वित् प्रयोगे'**, ततश्च ज्ञाने धर्म इति सिद्धान्तयति। किन्तु 'शब्दज्ञाने धर्म' इति स्वीकारे शब्दज्ञानाम् अधर्मोऽपि भवति, यो हि शब्दान् जानाति, असौ अपशब्दानपि जानाति, अतः शब्दज्ञाने धर्मश्चेत् नान्तरीयकतया अधर्मोपि प्राप्नोति, तत्र महाभाष्यकारः ''कूपखानकन्यायेन'' समाधानमकरोत्।

तथाहि - 'अथवा कूपखानकवदेतद्भविष्यति। तद्यथा- कूपखानकः कूपं खनन् यद्यपि मृदापांसुभिश्चावकीर्णो भवति। सोऽप्सु संजातासु तत एव गुणमासादयति, येन स दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्धानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति।'

न्यायस्यार्थः – यथा लोके कूपखननकाले कूपखानकस्य शरीरे मृत्तिकापङ्कादयः अवश्यं लगन्ति, तेन कूपखानकः दूषितो भवति। किन्तु यदा कूपे जलमाविर्भवति, तदा

तेनैव जलेन कूपखानकः स्नात्वा शुद्धो भवति निर्मलः। तथैव शास्त्रेऽपि भवति, शब्दज्ञा अवश्यमेव अपशब्दज्ञाः भवन्ति, अपशब्दज्ञानं विना कथं ते शब्दाऽपशब्दयोः विवेकं कर्तुं पारयन्ति? ते वैयाकरणा अपशब्दजन्यदोषं सुशब्दज्ञानेन अपघ्नन्ति, अत एव उच्यते- एकः शब्दः सम्यज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति। कूपखानकदृष्टान्तेन महाभाष्यकारः नान्तरीयककर्मजन्यं विपरीतफलं न भवतीति अनायासेनैव बोधयितुं पारयन्ति। एवञ्च नान्तरीयककर्मजन्यं विपरीतफलं न भवतीति शास्त्रे कल्पनेन अस्य न्यायस्योपयोगिता।

**माठरपरिवेषणन्यायः -** अस्य न्यायस्य तत्रोपयोगः यत्र विशेषेण सामान्यस्य बाधो भवति। 'सर्वे ब्राह्मणा भोज्यन्यतां माठरकौण्डिन्यौ परिवेविषाताम्' इति न्यायस्वरूपं भवति। 'अत्र सर्वे ब्राह्मणा भोज्यन्यताम्' इति कथनेन माठरकौण्डिन्यब्राह्मणयोरपि ग्रहणं प्राप्नोति, तथापि 'माठरकौण्डिन्यौ परिवेविषाताम्' इति विशेषकथनेन माठरकौण्डिन्यौ भोजनं विहाय परिवेषणं कुरुतः। भोजनपरिवेषणक्रिययोः एककालावच्छेदेन संभवाऽभावात् विशेषक्रियया सामान्यक्रियायाः बाधो भवति। तथैव शास्त्रेऽपि विशेषविधिना सामान्यविधेः बाधो भवति। अनेन न्यायेन 'सामान्यविशेषयोर्मध्ये विशेषो बलवान्' इति शास्त्रीयनियमः अनायासेन बोधयितुं शक्यते।

भाष्यकारः एनं न्यायं 'विशेषकार्येण सामान्यकार्यस्य बाधो भवति' इति बोधनाय **'हयवरट्'** इति सूत्रे उपन्यस्तवान्। तत्रेदमाशङ्कितं यत्- 'हयवरट्' इति यथान्यासे यर्- प्रत्याहारे रेफस्यापि गणना भवेत्, तेन च 'मद्रह्रदः' 'भद्रह्रदः' इत्यत्रापि हकारात् परस्य रेफस्य द्वित्वेन अनिष्टरूपापत्तिर्भवेत्। अतः यकारवकाराभ्यां पूर्वमेव रेफस्य पाठः कार्यः। पुनश्च महाभाष्यकारः कथयति- ''अथवा पुनरस्तु परोपदेशः मद्रह्रदः भद्रह्रदः इत्यादौ नेमौ रहौ कार्यिणौ द्विर्वचनस्य, किं तर्हि, निमित्तं द्विर्वचनस्य, तद्यथा- ब्राह्मणा भोज्यन्यतां माठरकौण्डिन्यौ परिवेविषाताम्, नेदानीं तौ भुञ्जाते।'' इत्येवं प्रकारेण 'विशेषकार्येण सामान्यकार्यस्य बाधो भवति' इति बोधनाय भाष्यकारः प्रयुक्तवान् एनं न्यायम्।

यद्यपि माठरकौण्डिन्ययोः परिवेषणकाल एव भोजनक्रियायाः बाधो भवति, परिवेषणक्रियातः पूर्वं पश्चाद्वा तयोः भोजनक्रिया सम्भवति, तथापि एककालावच्छेदेन द्वयोः परिवेषणभोजनक्रिययोः एकत्र संभवाऽभावात् विशेषक्रियया सामान्यक्रियायाः बाधो भवतीति ज्ञेयम्। तथा चायं न्यायः एकत्र द्वयोः विध्योः असम्भव एव प्रवर्तते।

तक्रकौण्डिन्यन्यायः-तक्रकौण्डिन्यन्यायस्योपयोगः 'उत्सर्गाः अपवादैः बाध्यन्ते' इति नियमबोधनाय भवति। 'ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय' इति न्यायस्य स्वरूपं विद्यते। 'ब्राह्मणेभ्यो दधि दीयताम्' इति यदि कश्चन कथयति, तदा ब्राह्मणत्वेन कौण्डिन्यस्यापि ग्रहणं भवति, तस्यापि दधिदानं प्राप्नोति। किन्तु 'तक्रं कौण्डिन्याय' इति विशेषविधानेन कौण्डिन्यायतक्रम् एव दीयते नदधि, इति लोके सामान्यविधेः विशेषविधाना बाधो भवति। तथैव शास्त्रेऽपि उत्सर्गस्य सामान्यविधेः विशेषविधाना बाधो जायते।

अयं न्यायः - 'मिदचोऽन्त्यात्परः' इत्यत्र महाहाष्ये उट्टङ्कितोऽस्ति। भाष्ये 'मिदचोऽन्त्यात्परः' इति सूत्रं 'षष्ठी स्थाने योगा' इतयस्य बाधकम् इत्युकत्वा- कुण्डानि, वनानि, यशांसि, पयांसि, इत्येतान्युदाहरणानि दर्शितानि। अत्र सर्वत्र 'नपुंसकस्य झलचः' इति नुम् भवति।तत्र नुम्- विधौ 'अचः' इति षष्ठीश्रुत्या 'षष्ठी स्थाने योगा' इत्यस्य प्राप्तिः। नुमः मित्वाच्च 'मिदचोऽन्त्यात्परः' इत्यस्य प्राप्तिः। तत्र स्थानेयोगत्वं प्रबाध्य 'मिदचोऽन्त्यात्परः' इति बलेन 'नपुंसकस्य झलचः' इति नुम् अन्त्यस्य अचः परोऽवयवो भवति, न तु अन्त्यस्य स्थाने।

पुनः महाभाष्यकारः आक्षिपति - कुण्डानि, वनानि इत्यत्र एकस्यैव अन्त्याकारस्य स्थानेऽपि स्यात्, तस्मात् परोऽपि स्यादित्युभयोः सम्भवो नास्ति। यदि अन्त्यस्य स्थाने नुम् भवति, तदा अकारस्य निवृत्तौ ततः परो नुम् न संभवति। अथ अकारात्परो भवति तर्हि अकारात् परत्वसम्पत्तये पूर्वस्य आवश्यकतया 'अकारस्य स्थाने नुम्' इति कथनमसम्भवमेव। अतः अन्त्यात् अचः परो नुम् भवतु, न तु अन्त्यस्य स्थान इति बोधनार्थं स्थानेयोगत्वस्य बाधकं 'मिदचोऽन्त्यात्परः' इति कथनं समीचीनं भवति। किन्तु यशांसि, पयांसि, इत्यत्र तु 'षष्ठी स्थानेयोगा' 'मिदचोऽन्त्यात्परः'

इत्युभयोः सम्भवो विद्यते। यशस्, पयस् इत्यत्र मिदचोऽन्त्यात्परः' इति अन्त्यादचः परो नुम् प्राप्नोति, 'षष्ठी स्थानेयोगा' इति तु 'अलोऽन्त्य'बलेन अन्त्यस्य सकारस्य प्राप्नोति। अर्थात् यशस्, पयस् इत्यत्र अन्त्यादचः परः सकारस्य स्थाने यदि नुम् भवति, तदा स नुम् अन्त्यादचः परोऽपि जायते, सकारस्य स्थानेऽपि भवतीति उभयोः सम्भवो विद्यते। कथं 'मिदचोऽन्त्यात्परः' इत्यस्य बाधकत्वमित्याशयः। तथा च भाष्यम्- 'भवेदिदं युक्तमुदाहरणं- कुण्डानि, वनानि, यत्र नास्ति सम्भवो यदयमचोऽन्त्यात्परश्च स्यात्, स्थाने च इति, इदं त्वयुक्तं यशांसि, पयांसि। अस्ति हि सम्भवो यदयमचोऽन्त्यात् परश्च स्यात् स्थाने च।'

तदा पुनः भाष्यकारो ब्रूते - 'नैव ईश्वर आज्ञापयति नैव धर्मशास्त्रकाराः पठन्ति- 'अपवादैः उत्सर्गा बाध्यन्ते' किं तर्हि लौकिकोऽयं दृष्टान्तः। लोके सत्यपि सम्भवे बाधनं भवति, तद्यथा- सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय, इति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्त्तकं भवति। एवमिहापीति।' अनेन उत्सर्गापवादयोः बाध्यबाधकभावः सत्यपि सम्भवे भवतीति अनायासेन बोधयितुं शक्यते।

उभयोः न्याययोः भेदो यत् माठरपरिवेषणन्यायः एककालावच्छेदेन एकस्य कार्यद्वयासम्भवस्थले प्रवर्त्तते, तक्रकौण्डिन्यन्यायश्च तदप्राप्तियोग्येऽचारितार्थ्यमात्रेण सत्यपि सम्भवे प्रवर्त्तते। 'सर्वेषाम्' इत्यत्र 'ह्रस्वनद्यापो नुट्' इत्युत्सर्गशास्त्रेण नुट्प्राप्नोति, तत्रैव 'आमि सर्वनाम्नः सुट्' इति विशेषविधाना सुट्प्राप्नोति। अत्र यद्यपि सामान्यविधौ नुटि कृतेऽपि 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषया नुड्विशिष्टस्य आमः आम्- ग्रहणेन ग्रहणात् 'आमि सर्वनाम्नः सुट्' इति सुट्प्राप्नोति। सुटः सर्वथा अप्राप्तिर्नास्ति। तथापि सत्यपि सम्भवे सामान्यविधेः विशेषविधाना बाधो भवतीति न्यायस्य विषयो भवत्येव।

**गर्गशतदण्डनन्यायः** - 'समुदाये वाक्यसमाप्तिर्भवति' इति बोधनाय भाष्यकारः गर्गशतदण्डनन्यायं दर्शयति। 'वृद्धिरादैच्' इत्यस्य आदैच्च वृद्धिसंज्ञः स्यादित्यर्थः। सूत्रं, समुदायस्य वृद्धिसंज्ञा भवति, उत प्रत्येकमिति इति विषये मौनं भवति। तत्र आदैचां समुदायस्यैव संज्ञा न भवेदित्येतदर्थं भाष्यकारः वृद्धिसंज्ञासूत्रे 'प्रत्येकमिति

वक्तव्यम्’ इति उक्त्वा, ‘प्रत्यवयवं वाक्यसमाप्तिर्दृश्यते, तद्यथा- ‘देवदत्तयज्ञदत्तविष्णुमित्राः भोज्यन्ताम्, न चोच्यते प्रत्येकमिति।’ अतः प्रत्येकमिति कथनमन्तरापि वृद्धिसंज्ञासूत्रे प्रतिवर्णं संज्ञा भविष्यतीति भाष्यकृतामाशयः। अनन्तरं ‘ननु चायमस्ति दृष्टान्तः- समुदाये वाक्यपरिसमाप्तिः ‘गर्गाः शतं दण्ड्यन्ताम्’ इति अर्थिनश्च राजानः हिरण्येन भवन्ति न प्रत्येकं दण्डयन्ति।’ अतः ‘सह सुपा’ इत्यादौ विनापि सहशब्दं समुदायस्यैव समाससंज्ञा सहशब्दोऽनर्थकः सन् योगविभार्थो भवति।

एवञ्च भाष्यकाराणामभिप्रायो यत् लोके ‘प्रत्यवयवं वाक्यसमाप्तिर्दृश्यते’ ‘समुदाये वाक्यसमाप्तिर्भवति’ इति द्विविधो व्यवहारोऽवलोक्यते। एवमेव शास्त्रेऽपि लक्ष्यानुसारमुभयविधव्यवहारो भवति, ‘वृद्धिरादैच्’ इत्यत्र प्रतिवर्णं संज्ञा। ‘सह सुपा’ इत्यादिना समसशास्त्रेण समुदायस्यैव समाससंज्ञेति। ‘समुदाये वाक्यसमाप्तिर्भवति’ इति सिद्धान्तबोधनाय भाष्यकारः गर्गशतदण्डनन्यायस्य उपयोगं करोति।

**मण्डूकप्लुतिन्यायः** - इमं न्यायं भाष्यकारः व्यवहितेऽपि सूत्रपदानुवृत्तिर्भवतीति बोधनाय उपयुङ्क्ते। महाभाष्यकारः ‘इको गुणवृद्धी’ इति सूत्रे प्रथमम् इग्ग्रहणस्य प्रयोजनं प्रतिपाद्य शङ्कते- ‘यदीग्ग्रहणं क्रियते द्यौः, पन्थाः,सः, इदम् इत्येतेऽपीक एव प्राप्नुवन्ति।’ सर्वं वाक्यं सावधारणमिति इक एव गुणवृद्धी स्याताम्। द्यौः, इत्यत्र ‘दिव औत्’ इत्यनेन औकारः। पन्थाः, इत्यत्र ‘पथिमथ्यृभुक्षामात्’ इत्यनेन आकारः। सः, इदम्इत्युभयत्र ‘त्यदादिनामः’ इत्यनेन अकारः। इत्येतेऽपीक एव स्थाने प्राप्नुवन्तीति भाष्यकृतामाशयः। एतत्समाधानाय कथयति- ‘प्रकृतं गुणवृद्धिग्रहणमनुवर्तते। वृद्धिरादैजदेङ्गुणः।’ अतः गुणवृद्धीपदानुवर्तमाने पुनः सूत्रे ‘गुणवृद्धिग्रहणं गुणशब्दमुच्चार्य यत्र गुणविधानम्, वृद्धिशब्दमुच्चार्य यत्र वृद्धिविधानं तत्रैव ‘इको गुणवृद्धी’ इति सूत्रं प्रवर्तते’ इत्येतदर्थम्। ‘दिव औत्’ इत्यादौ तथात्वाभावात् नेदं सूत्रं प्रवर्तत इति भावः।

किन्तु ‘वृद्धिरादैच्’ इति सूत्रात् वृद्धिपदमनुवर्तते इति स्वीक्रियते तदा मध्ये ‘अदेङ्गुणः’ इत्यपि आयाति, तत्रापि वृद्धिपदस्यानुवृत्तिर्भवेत्, यथा जलस्य प्रवाहो नैरन्तर्येण वहति तद्वत्। तेन च अत् एङ् च वृद्धिसंज्ञोऽपि भवेत्।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अत्रैव लौकिकयुक्त्या भाष्यकारो बोधयति यत् मध्ये सूत्रत्यागं कृत्वापि अनुवर्तनम् भवति। यथा मणडूकाः मध्ये किञ्चत् स्थानं त्यक्त्वा उत्प्लुत्य अग्रे गच्छति, इति लोके दृश्यते तथैव शास्त्रेऽपि भवति। 'वृद्धिरादैच्' इति सूत्रात् वृद्धिपदम् 'अदेङ्गुणः' इत्यत्र नानुवर्तते, 'इको गुणवृद्धी'इति सूत्रे त्वनुवर्तते। तदुक्तम्- 'अथवा मणडूकगतयोऽधिकाराः। यथा मणडूकाः उत्प्लुत्योत्प्लुत्य गच्छति तद्वदधिकाराः।' यथा लोके द्विविधा गतिर्भवति- जलप्रवाहगतिः मणडूकगतिश्च, एवं शास्त्रेऽपि लक्ष्यानुरोधात् उभयगत्याश्रयणं भवतीति भावः।

**प्रासादवासिन्यायः** - अस्य न्यायस्योपयोगं भाष्यकारः 'मुखनासिकावचनोऽ-नुनासिकः' सूत्रे मुखग्रहणप्रत्याख्यानाय करोति। महाभाष्यकारः कथयति- विनाऽपि मुखग्रहणं मुखनासिकावचनानां वर्णानामनुनासिकसंज्ञा सेत्स्यति। मुखग्रहणं शक्यमकर्तुम्।

तथाहि - 'मुखग्रहणं शक्यमकर्तुम्। केनेदानीमुभयवचनानां भविष्यति? प्रासादवासिन्यायेन। तद्यथा- केचित् प्रासादवासिनः, केचित् भूमिवासिनः केचिदुभयवासिनः। तत्र ये प्रासादवासिनः, गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिनः, गृह्यन्ते ते भूमिवासिग्रहणेन। ये तूभयवासिनः, गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च। एवमिहापि केचिन् मुखवचनाः, केचिन्नासिकावचनाः, केचिदुभयवचनाः। तत्र ये मुखवचनाः, गृह्यन्ते ते मखग्रहणेन। ये नासिकावचनाः, गृह्यन्ते ते नासिकाग्रहणेन। ये उभयवचनाः, गृह्यन्ते ते मखग्रहणेन नासिकाग्रहणेन च।'

तथा च 'नासिकावचनोऽनुनासिकः' इत्येव उच्यताम्। सूत्रे मुखनासिकावचनानाम् अनुनासिकसंज्ञासिद्ध्यर्थं मुखग्रहणस्यावश्यकता नास्ति। यद्यपि 'नासिकावचनोऽनुनासिकः' इत्युच्यमाने केवलानां नासिकावचनानामपि अनुनासिकसंज्ञा प्राप्नोति, किन्तु तत्र नैव दोषो न प्रयोजनम् इति भाष्यकृतामाशयः।

**सूत्रशाटकन्यायः** - अस्य न्यायस्योपयोगः शास्त्रे भाविसंज्ञाविज्ञनार्थो भवति। लोके यथा भानिन्याः संज्ञायाः व्यवहाराः भवन्ति, तद्वच्छास्त्रेऽपि भानिन्याः संज्ञायाः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

आश्रयणं भवतीति बोधनाय महाभाष्यकारः एनं न्यायम् 'इग्यणः सम्प्रसारणम्' इति सूत्र उट्टंकितवान् ।

'इग्यणः सम्प्रसारणम्' इति सूत्रस्य यणः स्थाने यः सम्पद्यमान इक् सः सम्प्रसारणसंज्ञः इति सूत्रार्थो भवति चेत् अन्योन्याश्रय आपतीत्याशंक्य भाष्ये उक्तम्- 'नेदं तुल्यमन्यैरितरेतराश्रयैः। नहि किञ्चिदुच्यते अस्य स्थाने ये आकारैकारौकारा भाव्यन्ते, ते वृद्धिसंज्ञा भवन्तीति। इह हि पुनरुच्यते 'इग्यो यणः स्थाने वर्णः सः सम्प्रसारणसंज्ञो भवति। एवं तर्हि भाविनीयं संज्ञाविज्ञायते। तद्यथा- कश्चित् कञ्चित् तन्तुवायमाह- 'अस्य सूत्रस्य शाटकं वय'। सः पश्यति यदि शाटकः, न वातव्यः। अथ वातव्यः न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धम्। भाविनी खल्वस्याः संज्ञा अभिप्रेता। स मन्ये वातव्यः यस्मिन्नुते शाटक इत्येतद् भविष्यति। एवमिहापि स यणः स्थने भवति यस्याभिनिर्वृत्तस्य सम्प्रसारणमित्येतत्संज्ञा भविष्यति'' इति

**देवदत्तहन्तृहतन्यायः** - अस्य न्यायस्यापि व्याकरणशास्त्रे बहुधा प्रयेगो भवति। यथा कश्चन देवदत्तं हतवान्। देवदत्तं हतं दृष्ट्वा कशचन देवदत्तहितचिन्तको यदि देवदत्तहन्तारं हन्ति, अथापि देवदत्तस्य पुनरुज्जीवनं न सम्भवतीति लोके दृश्यते। तद्वत् शास्त्रेऽपि यदि कस्यचित् स्थाने कश्चन आदेशो जातः, पुनः अतिदेशकशतेन असिद्धत्वे, स्थानिनोऽवस्थितिः न भवति इति बोधनाय भाष्यकारः एनं न्यायं प्रयुङ्क्ते।

अयं न्यायः 'अचः परस्मिन् पूर्वनिधौ' इति सूत्रे, 'षत्वतुकोरसिद्धः' इति सूत्रे च भाष्ये प्रदर्शितः। 'अचः परस्मिन्' इत्यत्र 'वाय्वोः' इत्यादौ यणादेशोत्तरं 'लोपो व्योर्वलि' इति वलोपापत्तिमाशङ्क्य 'असिद्धवचनात् सिद्धम्' अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम्' इत्युक्तवान्। एवञ्च यणादेशस्य असिद्धत्वात् वल्परकत्वाऽभावेन ''वाय्वोः'' इत्यादौ 'लोपो व्योर्वलि' इत्यस्य न प्रसक्तिरिति तात्पर्यम्। पुनः 'पट्व्या' 'मृद्व्या' इत्यादिप्रयोगसिद्धिविषये आशङ्कितम्– पट्व्या, मृद्व्या इत्यादावपि आदेशस्य असिद्धत्वे ईकारस्य श्रवणं भवेदिति। तत्र समाधत्ते- 'असिद्धवचनात् सिद्धमिति चेत्, तन्न, किं कारणम्? नान्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। तद्यथा- न हि देवदत्तस्य हन्तरि हते

देवदत्तस्य प्रादुर्भावो भवति।' एवञ्च ईकारनाशकस्य यणादेशस्य असिद्धत्वेऽपि पुनः ईकारस्य उज्जीवनाऽभावात् 'पट्व्या' इत्यादौ न ईकारश्रवणापत्तिरूपो दोष इति भावः। एवञ्च अनेन न्यायेन इदं दर्शितं भवति यत् कस्यचिद् आदेशस्य असिद्धत्वेऽपि पुनः स्थानिनोऽवस्थानं न भवति इति।

**स्थालीपुलाकन्यायः** - अस्य न्यायस्यापि अतीव प्रयोगो भवति व्याकरणशास्त्रे। यथा लोके तण्डुलादिपाककाले, स्थाल्याः एकं तण्डुलं वीक्ष्य अन्ये सर्वे तण्डुलाः पक्वाः, अपक्वा वेति जना जानन्ति। तथैव शास्त्रेऽपि एकस्मिन् साधिते अन्येऽपि सधिताः भवन्ति।

अयं न्याय 'कारके' इति सूत्रे भाष्ये उत्थापितः। भाष्ये कारकस्य अन्वर्थसंज्ञात्वस्वीकारे 'अकर्तरि कर्तृशब्दो नोपपद्यते। करणं कारकम्, अधिकरणं कारकम्' इत्याशङ्क्य 'सिद्धं तु प्रतिकारकं क्रियाभेदात् पचादीनां करणाधिकरणयोः कर्तृभावः' इति सिद्धान्तः स्थापितः। अनन्तरं वार्त्तिककारेण 'अपादानादीनां त्वसिद्धिः' इत्याशङ्किते– 'सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यञ्च विवक्षितम्' इत्युक्त्वा समाहितम्। पुनः अत्रैव महाभाष्ये स्थालीपुकालन्यायेन समाधानं यच्छति- 'पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शितम् अपादानादीनां कर्तृत्वनिदर्शनाय। पर्याप्तो ह्येकः पुलाक स्थाल्या निदर्शनाय' इति।

यथा एकेन स्थालीपुलाकेन सर्वेषां स्थालीपुलाकानां स्थितिः ज्ञायते, तद्वत्करणाधिकरणयोः पर्याप्तकर्तृत्वविवेचनेन अपादानादीनामपि कर्तृत्वं विवेचितमिति स्वीकर्तव्यम् इति भावः।

**वृद्धकुमारीवरन्यायः** - 'न मुने' इति सूत्रे 'ने' इति परार्थिका सप्तमी इति स्वीकारे, नाभावे कृते मुभावस्य सिद्धत्वेऽपि नाभावे कर्तव्ये मुभावस्य असिद्धत्वात् नाभावो न स्यादित्याशङ्क्य 'नैष दोष इहेङ्गितेन चेष्टितेन महता वा सूत्रनिबन्धनेन आचार्यस्याभिप्रायो लक्ष्यते। एतदेव ज्ञापयत्याचार्यो भवत्यत्र नाभाव इति यदयं ने असिद्धत्वप्रतिषेधं शास्ति' इति समाधानमुक्त्वा, 'अथवा वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम्। तद्यथा वृद्धकुमारीन्द्रेणोक्ता 'वरं वृणीष्वे'ति, सा वरमवृणीत- पुत्रा मे बहुक्षीरघृतमोदनं

कांसपात्र्यां भुञ्जीरन्' इति न च तावदस्याः पतिर्भवति, कुतः पुत्राः, कुतो वा गावः कुतो धान्यम्। तत्रैकेन वाक्येन पतिपुत्रगावः धान्यमिति सर्वं संग्रहीतं भवति। एवमिहापि 'ने' असिद्धत्वप्रतिषेधं ब्रुवता नाभावोऽपि संग्रहीतो भवति।' अत्र महाभाष्यकारः वृद्धकुमारीवरन्यायस्योपयोगं कृतवान्।

एवमेव बहवः न्यायाः महाभाष्यकारेण शास्त्रस्य दुरूहसिद्धान्तान् अनायासेन बोधयितुं दर्शिताः सन्ति। लौकिकन्यायेन नूनमेव प्रतिपक्षिणः जिज्ञासवो वा झटिति सिद्धान्तस्वीकाराय बोधाय वा समर्थाः भवन्ति। अत एव महाभाष्यकारः शास्त्रयुक्त्या यस्य दोषस्य निराकरणं करोति तस्यैव दोषस्य निराकरणाय पुनः लौकिकन्यायस्य दृष्टान्तस्य वा उपयोगं करोति। इति शम्।

❑❑❑

# अपूर्वसद्भावमीमांसा

**प्रो. सूर्यनारायणभट्टः***

**"मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता"** इति भट्टपादवचनानुसारम् अभ्यर्हिता विद्या इयं द्वादशाध्यायात्मिका मीमांसा भगवता परमकारुणिकेन जैमिनिमहर्षिणा धर्माधर्मविवेकाय सूत्ररूपेण भुवमवतीर्णा। तदनु शबरकुमारिलप्रभृतिभिः भाष्यवार्तिकादिग्रन्थप्रणयनपूर्वकमियमतिविस्तारतामवाप। गच्छता कालेन प्राचीनार्वाचीन-भेदेन भूयांसो ग्रन्थाः एतच्छास्त्रकृद्भिः प्राणायिषत ।

"वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः" इति लक्षणलक्षितधर्म एव शास्त्रस्यास्य प्रमेयभूतो विषयः। तन्निरूपणार्थमलौकिकानि विध्यादिनैकानि प्रमाणानि शास्त्रेऽस्मिन् प्रतिपादितानि। तत्र प्रमेयभूतधर्मस्य लक्षणं प्रमाणं च प्रथमाध्याये निरूप्य द्वितीयादिष्वध्यायेषु प्रमेयभूतो धर्मः विवेचयिष्यत इति व्यवस्था।

विषयोपक्रमः – "ज्योतिष्टोमेन स्वर्गकामो यजेत", "नानृतं वदेत्" इत्यादिविहितनिषिद्धकर्मजन्यं स्वर्गादिफलजनकमवान्तरव्यापारमपूर्वमिति कश्चन शक्तिविशेषः अभ्युपगम्यते दार्शनिकैः। स च शक्तिविशेषः यागादिकर्मणः स्वर्गादिफलजनकत्वान्यथानुपपत्त्या साधितः मीमांसायां द्वीतीयाध्यायस्य प्रथमपादस्य तृतीयाधिकरणे "चोदना पुनरारम्भः" इत्यनेन सूत्रेण। अत्र अपूर्वं विनापि यागादेः स्वार्गादिसाधनत्वं सिद्ध्यतीति न तदन्यथानुपपत्तिरपूर्वे प्रमाणमिति प्रमाणाभावात् नास्त्यपूर्वमिति पूर्वपक्षोत्थितिः।

सङ्गतिः – इतः पूर्वं प्रतिपदाधिकरणभावार्थाधिकरणयोः "सोमेन यजेत" इत्यादौ सर्वेषां फलकरणत्वमुत कस्यचिदेकस्य, सर्वेषां चेत् अनेकादृष्टकल्पना-प्रयुक्तगौरवात् कस्यैकस्येति आशङ्क्य यागादेः धात्वर्थस्यैव भावनाकरणत्वं न तु सोमादेरुपपदार्थस्य, सोमादीनान्तु दृष्टद्वारैव तदर्थत्वं सम्भवतीति नानेकादृष्टकल्पनमिति संसाध्य भावार्थाधिकरणचिन्तनफलत्वेन धात्वर्थादेव अपूर्वं, तस्यैव अपूर्वार्थत्वमिति

* मीमांसाविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः शृङ्गेरी

निरूपितम्। इह अपूर्वाधिकरणे तु अपूर्वसद्भावप्रमाणाभावात् तद्विनापि निर्वाहः भवितुमर्हतीति अपूर्वमेव नास्तीति पूर्वपक्षस्योत्थानात्, अपूर्वस्यैवाभावात् धात्वर्थस्य कथं तज्जनकत्वं सम्भवेदित्येवं पूर्वाधिकरणसिद्धस्य धात्वर्थस्यैवापूर्वजनकत्वमित्यर्थस्याक्षिप्यमाणत्वात् आक्षेपिकीसङ्गत्या विचारोऽयं उपतिष्ठते। अपूर्वभेदोपयोगिचिन्तनस्य पादार्थत्वात् अपूर्वसाधनस्य च अपूर्वभेदोपयोगित्वात् पादसङ्गतिर्लभ्यते। शब्दान्तरादिषड्प्रमाणैः भावनाभेदस्यैव प्राधान्येन प्रतिपाद्यमानत्वात् तस्यैव अध्यायार्थत्वेऽपि तत्फलत्वेन अपूर्वभेदस्यापि निरूपणात् अपूर्वभेदौपयिकापूर्वसाधनपरेऽस्मिन्नधिकरणेऽध्यायसङ्गतिरपि न विरुद्ध्यते। अपूर्वसद्भावनिरूपणमेवात्र विषयः। तच्च अस्ति नवेति संशयः।

अत्रायं पूर्वपक्षः – यद्यपि स्वर्गादिफलस्य कालान्तरभावित्वात् यागादिक्रियायाश्च क्षणिकत्वात् कञ्चनव्यापारमन्तरा न तयोः साध्यसाधनभावः सम्भवति। कार्योत्पत्तिपूर्वक्षणे कार्याधिकरणे कारणत्वस्य आवश्यकत्वात् स्वर्गोत्पत्तिपूर्वक्षणे च सुखविशेषात्मकस्वर्गरूपफलाधिकरणे यागकर्तरि यागस्य अभावात् व्यापाराङ्गीकारे तु स्वर्गोत्पत्तिपूर्वक्षणे तादात्म्येन यागस्य तत्कर्तरि असत्वेऽपि स्वजन्यव्यापारकत्वसम्बन्धेन विद्यमानत्वात् यागस्य करणत्वमुपपद्यते। तथापि व्यापारत्वेन अपूर्वं कल्पयितुं न शक्यते, वस्तुसत्तावबोधनार्थं विद्यमानैः प्रत्यक्षादिप्रमाणैः निरूपयितुमशक्यत्वात्। यागस्वर्गयोर्विद्यमानः साध्यसाधनभाव एव प्रत्यक्षेणावगन्तुं न शक्यते यागजन्यापूर्वं प्रत्यक्षविषयः कथं स्यात् ? रूपादिशून्यं सत् चक्षुराद्ययोग्यं च तत्। तस्मात् प्रत्यक्षं न प्रमाणम्। अविनाभूतलिङ्गाभावात् नाप्यनुमानम्। "यजेत स्वर्गकामः" इत्यादिवाक्येषु अपूर्ववाचकपदाभावात् नापि शब्दः प्रमाणम्। सादृश्याभावात् नोपमानम्। अदृष्टपूर्वस्य अदृष्टसादृश्यस्य च उपमानविषयत्वमेव, तर्हि यागस्य स्वर्गसाधनत्वनिर्वाहार्थं मध्ये व्यापारः अपूर्वाख्यः कश्चन कल्प्यते इति चेत् तस्यैव स्वर्गसाधनत्वात् यागः अन्यथासिद्धः स्यादिति श्रौतः साध्यसाधनभाव एव भग्नः स्यादिति श्रुतिविरुद्धार्थापत्तिरिति न प्रमाणम्।

अत आहुः - **"प्रमाणपञ्चकाज्ञानात् अपूर्वं षष्ठगोचरः ।**
**तस्मादन्वर्थनामैतत् न वस्तुत्वेन गम्यते"** ॥ इति ।

अपि च क्लृप्तयागध्वंसस्यैव व्यापारत्वसम्भवे अपूर्वकल्पनायां गौरवापत्तेः नापूर्वं कल्पनीयम् । ध्वंसं प्रति प्रतियोगिनः कारणत्वेन यागध्वंसस्यापि यागजन्यत्वात् स्वजन्यध्वंसाश्रयत्वेन स्वर्गोत्पत्तिपूर्वक्षणे स्वर्गाधिकरणे यागकर्तरि विद्यमानत्वेन यागध्वंसस्य व्यापारत्वमुपपद्यते । अपूर्वस्य तु यागजन्यत्वम्, सद्भावः, स्थायित्वम्, व्यापरत्वम् , फलजनकत्वमिति कल्पनागौरवं बहु स्यात् । यागध्वंसस्य उपस्थितस्य केवलमवान्तरव्यापारत्वमात्रं कल्पनीयमित्यतः लाघवमिति तस्य अवान्तरव्यापारत्वम् ।

नन्वेवं सति -

**"कर्मनाशाजलस्पर्शात् करतोया विलङ्घनात् ।**
**गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात्"** ॥

इत्यत्र यद्धर्मस्य कर्मनाशाजलस्पर्शादि नाश्यत्वमुक्तं, यच्च "प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि" इति पापानां प्रायश्चित्त नाश्यत्वमुक्तं तदुभयमनुपपन्नं स्यात् । तथा हि कर्मनाशाख्यनद्याः जलस्पर्शेन, करतोयेतिनद्याः लङ्घनेन,गण्डकीनद्याः बाहुभ्यां तरणेन, "मया धर्मः अनुष्ठितः" इत्यादिरूपेण कृतस्य धर्मस्य कीर्तनेन च धर्मो नश्यतीति तेन वाक्येनोच्यते । अत्र धर्मपदेन तावद्यागादिः बोध्यते । तस्य क्षणिकत्वेन कर्मनाशाजलस्पर्शादिकं विनापि स्वत एव नाशित्वात् । न हि कदाचिदनुष्ठितो यागः कर्मनाशाजलस्पर्शादिकालं यावत् तिष्ठति येन तन्नाश्यः स्यात् । अतो धर्मपदेन लक्षणया यागादिधर्मजन्यः, स्वगादिजनकः अवान्तरव्यापार एव बोध्यः । यदि च ध्वंस एव अवान्तरव्यापारः तर्हि तस्य अविनाशित्वात् कीर्तनादिनाश्यत्वकथनमनुपपन्नं भवति । तथैव यागेन कालान्तरभाविस्वर्गादिफले जननीये कश्चिदवान्तरव्यापारोऽपेक्ष्यते । तथैव ब्रह्महत्याद्यधर्मेण नरकादिफले जननीयेऽपि । यदि कल्पनागौरवात् अपूर्वं विहाय लाघवात् धर्मस्य तद्ध्वंस एव अवान्तरव्यापारः, न तु अपूर्वमित्युच्येत तर्हि तुल्यन्यायेन अधर्मस्यापि अधर्मध्वंस एव व्यापारो भवेत् । "प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि" इत्यत्र च ब्रह्महत्यादि निषिद्धक्रियावाचिनः पापशब्दस्य लक्षणया तादृश क्रियाजन्यव्यापारबोधकत्वं

स्वीकार्यम्। क्षणिकायाः क्रियायाः स्वतो नाशित्वेन प्रायश्चित्तनाश्यत्वानुपपत्तेः। ध्वंसस्य व्यापारत्वे तु तस्य अविनाशित्वात् प्रायश्चित्तनाश्यत्वकथनं नोपपद्यत इति चेत् उच्यते –

प्रायश्चित्तकर्मनाशाजलस्पर्शादेः न धर्माधर्मजन्यव्यापारनाशकत्वं स्वीक्रियते, किन्तु स्वर्गनरकादिकालन्तरभविफलप्रतिबन्धकत्वमेव। तदेव च पूर्वोदाहृत-वाक्यद्वयाभिप्रेतम्। यदि च कर्मनाशाजलस्पर्शादीनां प्रतिबन्धकत्वकल्पते गौरवमिति विभाव्यते तर्हि कीर्तनात्यन्तभावविशिष्टज्योतिष्टोमादेः स्वर्गादिकारणत्वमस्तु। एवं च अपूर्वं विनाऽपि ध्वंसरूपावान्तरव्यपारेणैव यागस्वर्गादिसाध्य-साधनभावोत्पत्तेः अन्यथानुपपत्त्यभावात् नार्थापत्तिप्रमाणेनापूर्वम् सिद्ध्यति। किञ्च देवताप्रसादस्य द्वारत्वमङ्गीकृत्य कैश्चिद्वेदान्तिभिः विना अपूर्वं साध्यसाधनभावः निरूप्यते तदपि न, यतो हि तस्यापि साध्यसाधनभावनिर्वाहः नैव युज्यते। देवताप्रसादस्यापि इच्छादिरूपत्वात् क्षणिकत्वमेव। अतः प्रसादकल्पनात् प्रागेव ध्वंसस्य उपस्थितत्वात् स एव युज्यते। अतः यागध्वंसस्यैव व्यापारत्वकल्पनम् उचितम् ।

ननु यागध्वंसस्य अभावरूपत्वात् तस्य फलजनकत्वं विरुध्यत इति चेत् – अभावस्यापि कारणत्वं न बाधकम्। यथा अभावप्रमाणम् उपलब्ध्यभावरूपम् अभावोपलम्बकं भवति। एवमेव सन्ध्यावन्दनाद्यभावस्य च प्रत्यवायजनकत्वमस्तीति अभावरूपस्य यागध्वंसस्य फलजनकत्वं सम्भवत्येव। अतः सर्वथा अपूर्वक्ल्पनापेक्षया यागध्वंसरूपावान्तरव्यापारेणैव यागस्वर्गादिसाध्यसाधनोपपत्तेः अन्यथानुपपत्त्यभावात् न अर्थापत्या अपूर्वकल्पनमिति प्राप्ते –

अभिधीयते – **“ कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।**
**योग्यता शास्त्रगम्या या सा पराऽपूर्वमुच्यते ”** ॥ इति।

अतः अपूर्वाङ्गीकारे शास्त्रमेव प्रमाणम्। यदि ध्वंसस्यैव अवान्तरव्यापारत्वे तस्य अविनाशित्वात् तस्य कीर्तनप्रायश्चित्ताविनाश्यत्वकथनासम्भवात् तयोः वाक्ययोः कीर्तनप्रायश्चित्तादेः फलोत्पत्तिप्रतिबन्धकत्वकथने एव तात्पर्यं वक्तव्यम्। तथा सति “धर्मः क्षरति कीर्तनात्” इत्यत्र प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि इत्यत्र च कीर्तननाश्यत्वयोः नाशवाचिनोः फलाजनकत्वे लक्षणा आपद्यते। न च तत्र किञ्चित्प्रमाणं

पश्यामः। न च यागध्वंसरूपस्य व्यापारस्य नित्यत्वेन नाश्यत्वानुपपत्तिरेव लक्षणायां बीजं वा स्यात् ध्वंसस्यैव व्यापारत्वमित्यस्यैव असिद्धेः। न वा कल्पनालाघवमेवध्वंसस्यव्यापारत्वं साधयेत्। लाघवस्य स्वतःप्रमाणत्वाभावेन व्यापारत्वाऽसाधकत्वमेव।

एवं च क्षरति नाश्यत्वयोः लक्षणायां प्रमाणाभावात् शक्यार्थःएव स्वीकार्यः। स च ध्वंसस्य व्यापरत्वे नोपपद्यते इति नाशयोग्यः कश्चन व्यापारः एव स्वीकार्यः। स व्यापारविशेष एव अपूर्वम्। यागस्वर्गयोः साध्यसाधनभावान्यथानुपपत्त्या सिद्धे अवान्तरव्यापारे, तस्य च धर्मः क्षरति कीर्तनादित्यादिना कीर्तनादि नाश्यत्वकथनेन नाशयोग्यत्वे लब्धे ध्वंसस्य तद्भिन्नत्वेन अन्यस्य च क्लृप्तस्य च पदार्थस्य व्यापारत्वानुपपत्तेः अतिरिक्तमपूर्वं सिध्यति।

अपि चोदना पुनरारम्भः इत्यत्र भगवान् भाष्यकारः "चोदनेत्यपूर्वं ब्रूमः। अपूर्वं पुनरस्ति यतः आरम्भः शिष्यते स्वर्गकामो यजेत इति। इतरथा हि विधानमनर्थकं स्यात् भङ्गित्वाद्यागस्य" इत्याह। ननु व्यापारवर्ती यागे नष्टे तन्निष्ठापूर्वस्यापि नाशापत्तिरिचेत् – अपूर्वस्य यागजन्यत्वेऽपि यागनिष्ठत्वं नाङ्गीक्रीयते। फलं प्रति तदीयः व्यापरः स्वीकर्तव्यः। फलं तु आत्मनि भवति, अतः तदीय व्यापारोऽपि अपूर्वाख्यः आत्मनिष्ठ एव। फलसामानाधिकरण्यसिध्यर्थं फलबलेन अपूर्वस्य फलभोक्तृनिष्ठत्वमेव न्याय्यम्। तस्मात् यागस्वर्गयोः अवान्तर व्यापारः अपूर्वाख्यः अर्थापत्तिप्रमाणगम्यः साधीतमेव। देवताप्रसादस्य तु अत्यन्तगुरुभूतत्वात् तादृशवाचकपक्षाभावात् अनङ्गीकार एव युक्तः तस्मात् अस्ति अपूर्वम्।

सिद्धे अपूर्वे तद्भेदस्तु पूर्वाचार्यैः इत्थं प्रदर्शितः। प्रथमं तावत् अधिकारवाक्येन कर्मणः फलसाधनत्वं (फलसम्बन्धः) बोध्यते। यागेन स्वर्गं कुर्यादिति। कथं विनश्वरेण फलं कर्तव्यम् इत्यपेक्षायाम् अपूर्वं कृत्वा इत्युच्यते। कथमपूर्वं क्रियते इति जिज्ञासायां यागानुष्ठानप्रकारेण इति समाधानम्। तच्चापूर्वम् अनेकविधम्। दर्शपूर्णमासयोस्तु फलापूर्वं समुदायापूर्वम् उत्पत्त्यपूर्वम् अङ्गापूर्वमिति बहुविधम्। येन स्वर्गः आरभ्यते तत्फलापूर्वम्। अमावास्यायां त्रयाणां यागानां एकः समुदायः, पौर्णमास्याम् अपरः। तयोः भिन्नकालवर्तिनोस्सम्भूय फलापूर्वारम्भायोगात् तदारम्भाय समुदायद्वयजन्यमपूर्वद्वयं

कल्पनीयम्। तयोरेकैकस्य आरम्भाय एकैकसमुदायवर्तिनां त्रयाणां यागानां भिन्नक्षणवर्तित्वेन सन्धातापत्त्यभावात् यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्वाणि कल्पनीयानि तेषां च अङ्गोपकारमन्तरेण अनिष्पत्तेः अङ्गनामनेकक्षणवर्तिनां सन्धातासम्भवात् अङ्गापूर्वाणि कल्पनीयानि। सन्निपत्त्योपकारकाण्यवघातादीनि द्रव्यदेवतासंस्कारद्वारेण यागस्वरूपस्यैव अतिशयाधानेन तदुत्पत्त्यपूर्वनिष्पत्तौ व्याप्रियन्ते तद्वारेण फलापूर्वे। अरादुपकारकाणि तु प्रयाजादीन्युत्पत्त्यपूर्वेभ्यः फलापूर्वोत्पत्तौ साक्षादेव व्याप्रियन्ते । एवं सत्यपि प्रकारभेदे सर्वाण्यङ्गानि अपूर्वनिष्पत्तौ अनुग्राहकाणि इत्येकरूपेण इत्थम्भावेन स्वीक्रियन्ते। अनयैव दिशा सर्वत्र अपूर्वसद्भावः सम्पादनीयः।

सूत्रार्थस्तु – आरम्भ्यते इति आरम्भः अपूर्वमित्यर्थः। यतः "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादौ चोदनया यागस्वर्गयोः अपूर्वद्वारा साध्यसाधनभावस्य प्रतिपाद्यमानत्वात्। तस्मात् अस्त्यपूर्वम्।

**अनुशीलितग्रन्थाः**

१.मीमांसाशाबरभाष्यम्

२.भाट्टदीपिका

३.मीमांसाकौस्तुभः

४.जैमिनीयन्यायमाला

५.तन्त्रवार्तिकम्

❑ ❑ ❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# गण्डान्ताद्यशुभजन्मविचारः

**प्रो. हंसधर झा***

ज्योतिषं नाम ग्रहनक्षत्राधारितं शास्त्रम्। जन्मकालिकग्रहनक्षत्रानुरोधेन शास्त्रेऽस्मिन् जातकस्य शुभाशुभं विचार्यत इति तु तावत् प्रसिद्धमेव। जन्मकालिक-तिथि-नक्षत्र-योग-करणादिवशेनापि विधीयतेऽत्र शुभाशुफलविचार इत्यपि नाविदितं विज्ञैः। तदत्र जन्माङ्गचक्रवशेन यो विचारो भवति तस्मादितरोऽप्यस्त्येको विचारो यो जातकस्य जन्मानन्तरं सद्य एव विचारणीयो भवति। जन्माङ्गे यद्यपि ग्रहा अनुकूला भवन्ति तदापि कदाचित् अशुभं जन्म जायते। अशुभजन्मनि सति सद्य एवाशुभफलस्य सम्भावना जायते। तच्चाशुभं जन्म महर्षिपराशरेण बहुविधमुक्तम्। तद् यथा- अमाजन्म, कृष्णचतुर्दशीजन्म, भद्रावमादिजन्म, सोदरपित्रर्क्षे जन्म, संक्रान्तिजन्म, ग्रहणजन्म, त्र्यन्यजन्म, प्रसूतिविकृतिजन्म, गण्डान्तजन्म, अभुक्तमूलजन्म इत्यादीनि। एतेषु अशुभजन्मसु शान्तिर्विधेयेति शास्त्रस्य सम्मतम्। तदत्र शोधपत्रे सर्वेषामशुभजन्मनां लक्षणानि तथा तेषां शान्तिविधानं सर्वमपि नोपस्थापयितुं शक्यते। किन्त्वत्र प्राधान्येन गण्डान्तविचारः अभुक्तमूलविचारश्चेति द्वयमपि क्रियत एव, स्थालीपुलाकन्यायेन अन्येषामपि साङ्केतिकं वर्णनं समुपस्थापयामि।

तत्र हि महर्षिपराशरेण स्वकीये बृहत्पाराशरहोराशास्त्रस्यान्ते एतत्सम्बन्धी स्वतन्त्रः अध्याय एव प्रकल्पितो यत्र अशुभजन्मनां लक्षणानि तु प्रतिपादितान्येव तत्रैव तेषां सविस्तरं शान्तविधानमपि निर्दिष्टम्। यथा बृहत्पाराशरहोराशास्त्रे महर्षिः लिखति[1]-

**अथ ब्रवीमि मैत्रेय कारणान्तरमत्र ते।**
**येनाशुभं जनुर्नृणां शुभाङ्गेऽपि ससद्गृहे॥**
**भद्राऽमाऽसितपक्षीया चतुर्दश्यां च संक्रमे।**
**रवेः सोदरपित्रर्क्षे गण्डान्तत्रितयेऽथवा॥**

---

* केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालम् (म.प्र.)

[1] बृहत्पारशरहोराशास्त्रम्, अशुभजनुर्वर्णनाध्यायः (अध्याय-86), श्लोकः- 1-5
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**सूर्येन्दुग्रहणे दग्धयुतौ पातेऽवमेऽपि च ।**
**यमघण्टव्यतीपातादियोगे जन्म चेन्नृणाम् ॥**
**कन्यात्रयान्तरं पुत्रः पुत्री पुत्रत्रयान्तरे ।**
**जायते यदि वा सूतिर्विकारे ऽप्यशुभं जनुः ॥**
**शुभाप्तये बुधः कुर्याच्छान्तिं शास्त्रोक्तसम्मतम् ।**
**शिवं शान्त्या प्रजायेत वच्म्यतस्तामनुक्रमात् ॥** इति ॥

अर्थात् जन्माङ्गचक्रे ग्रहाणां स्थितिर्यद्यनुकूला भवेत्, किन्तु जातकस्य जन्मामावास्यायां स्यात्, भद्रायां स्यात्, कृष्णचतुर्दश्याम्भवेत्, रविसंक्रान्तिदिने भवेत्, सोदरस्य पितुर्वा जन्मनक्षत्रे भवेत्, गण्डान्तत्रितये अर्थात् तिथिगण्डान्ते, लग्नगणाडान्ते, नक्षत्रगणाडान्ते वा भवेत्, रविचन्द्रग्रहणकाले भवेत्, दग्दतिथौ भवेत्, व्यतीपातयोगेऽथवा वैधृतियोगे भवेत्, अवमे (तिथिक्षये) स्यात्, यमघण्टव्यतीपातादियोगे भवेत्, कन्यात्रयानन्तरं पुत्रस्य जन्म भवेदथवा पुत्रत्रयानन्तरं कन्याया जन्म भवेत्, अथवा सूतिविकारो भवेत्तदा अशुभञ्जन्म कथ्यते। अशुभजन्मनि सति शास्त्रोक्तविधानेन शान्तिङ्कुर्यात् । शान्त्या अशुभजन्मजन्यदोषा नाशमुपगच्छन्ति ।

एवमेतेषामशुभजन्मनां विषये महर्षिपराशरेण सविस्तरं सफलं शान्तिविधानादिकं विवेचितम्। किन्त्वत्र विस्तरभिया समासेन विलिख्यते। विस्तृतं ज्ञातुं कृपया ग्रन्थोऽवलोकनीयः ।

1. **अमाजन्मफलम्**[1]

**अमावास्योद्भवो जातः पित्रोर्दारिद्र्यदो मतः ।**
**दोषप्रशमनायैव शान्तिं कुर्वीत यत्नतः ॥** इति ॥

अमावास्यायामुत्पन्नो जातकः पित्रोः कृते (मातुः पितुश्च कृते) दारिद्र्यदोषकारको भवति। दारिद्र्यदोषप्रशमनाय शास्त्रोक्तविधानेन शान्तिं कुर्यात् ।

---

[1] बृहत्पाराशरहोराशास्त्रम्, अमाजन्मशान्त्यध्यायः (अध्याय-87), श्लोकः-1

2. **कृष्णचतुर्दशीजन्मफलम्**[1]

**पक्षेऽसिते चतुर्दश्यां जन्म चेदशुभं स्मृतम् ।**
**षड्भिर्भक्ते चतुर्दश्या माने तु प्रथमे यदि ॥**
**जनुर्भवेच्छुभं तर्हि द्वितीये चेन्मृतिः पितुः ।**
**तृतीये मातृमरणं चतुर्थे मातुलक्षतिः ॥**
**पञ्चमे वंशनाशः स्यात् षष्ठे सम्पत्तिसंक्षयः ।**
**अपि वाऽत्मविनाशः स्यादतः शान्तिं समाचरेत् ॥** इति ॥

यदि जातकस्य जन्म कृष्णपक्षस्य चतुर्दश्याम्भवेत्, तदा तस्याश्चतुर्दश्या यद् घट्यादिमानन्तत् षड्भिर्विभजेत् । तत्र केवलम्प्रथमे षष्ठांशे यदि जन्म स्यात्तदा शुभं ज्ञेयम् । अन्यथा अशुभं ज्ञेयम् । तद्यथा- द्वितीये षष्ठांशे यदि जन्म स्यात्तदा पितृमरणम्, तृतीये षष्ठांशे यदि जन्म स्यात्तदा मातृमरणम्, चतुर्थे षष्ठांशे यदि जन्म स्यात्तदा मातुलनाशः, पञ्चमे षष्ठांशे यदि जन्म स्यात्तदा वंशनाशः, तथाऽन्तिमे (षष्ठे) षष्ठांशे यदि जन्म स्यात्तदा सम्पत्तिनाशोऽथवा आत्मविनाशः स्यात् । अतो दोषनिवारणार्थं शास्त्रोक्तविधानेन शान्तिं समाचरेत् ।

अत्र गर्गस्याप्येवमेव मतम्, यथा[2]-

**कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलम् ।**
**चतुर्दशीं च षड्भागं कुर्यादादौ शुभं स्मृतम् ॥**
**द्वितीये पितरं हन्ति तृतीये मातरन्तथा ।**
**चतुर्थे मातुलं हन्ति पञ्चमे वंशनाशनम् ॥**
**षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनम् ।**
**तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विधानतः ॥** इति ॥

---

[1] बृहत्पारशरहोराशास्त्रम्, कृष्णचतुर्दशीजननशान्त्यध्यायः (अध्याय-88), श्लोकः1-3
[2] सङ्क्षहशिरोमणिः, चतुर्शीप्रभा, श्लो. 120-122

3. **भद्रावमादिजन्मफलम्**[1]

**भद्रावमव्यतीपातयमघण्टादिदुर्युतौ ।**
**जनुर्यदशुभं पूर्वमुदितं तत्र संश्रृणु ॥**
**शान्तिस्तद्दुर्युतावेव कार्या यस्यां जनुर्भवेत् ।**
**शान्तेर्विधिं यद्विधानाच्छिवमाप्नोति मानवः ॥**
**शुभे मुहूर्ते सल्लग्ने दैवज्ञेनोदिते नरः ।** इति । ।

यदि भद्रायां (2/7/12) तिथौ, अवमतिथौ (तिथिक्षये), व्यतीपात-यमघण्टादिदुर्योगेषु वा जन्म भवेत्तदा अशुभं जन्म ज्ञेयम् । तस्य शान्तिस्तदा कार्या यदा स अशुभयोगः (यस्यां अशुभतिथौ, यस्याम् अशुभयोगे वा जन्म जातं स कालः ) पुनरागच्छेत् । अथवा तदसम्भवे यस्मिन् कस्मिन्नपि दैवज्ञेनोपदिष्टे शुभे मुहूर्ते, शुभे लग्नेऽपि शास्त्रोक्तविधानेन शान्तिं कुर्यात् । एवं शान्तिविधानेन जातकः कल्याणमवाप्नोति ।

4. **सोदरपित्रर्क्षे जन्मफलम्**[2]

**यदि जन्म भवेत् पित्रोर्जन्मर्क्षे वापि सोदरे ।**
**मृतिस्तयोरथैकस्य वा भवेदिति निश्चितम् ॥**
**शुभर्क्षे सद्दिने रिक्ताऽमावमादिविवर्जिते ।**
**चन्द्रताराबलोपेते शान्तिं कुर्याद् विचक्षणः ॥** इति ॥

कस्यापि जन्म पितुर्जन्मनक्षत्रेऽथवा मातुर्जन्मनक्षत्रेऽथवा सोदरस्य जन्मनक्षत्रे भवेत्, तदा तयोर्मध्ये कस्याप्येकस्य मरणम्भवति । अर्थादुपर्युक्तानान्त्रयाणाम्मध्ये यस्य जन्मनक्षत्रे जातकस्य जन्म स्यात्तस्यावा जातकस्य मृत्युर्भवतीति भावः । एतच्छान्तिकामनया रिक्तावमादिवर्जिततिथौ, शुभनक्षत्रे, शुभदिने, चन्द्रतारानुकूले क्षणे शास्त्रोक्तविधिना शान्तिं कुर्यात् ।
अत्र गर्गवचनमेवमस्ति, यथा[3]-

---

[1] बृहत्पाराशरहोराशास्त्रम्, भद्रावमादिदुष्टयोगशमनाध्यायः (अध्याय-89), श्लोकः-1-3
[2] बृहत्पाराशरहोराशास्त्रम्, एकनक्षत्रोत्थजातकशान्त्यध्यायः (अध्याय-90), श्लोकः-1-3
[3] सङ्ग्रहशिरोमणिः, चतुर्शीप्रभा, श्लो.117

**एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः ।**
**प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चितम् ॥** इति ॥

अर्थादेकस्मिन्नेव नक्षत्रे यदि भ्रातृभगिन्योर्जन्म भवति तदा तयोर्मध्ये कस्याप्येकस्य मृत्युर्भवति, अथवा यद्येकस्मिन्नेव नक्षत्रे द्वयोर्भ्रात्रोर्जन्म भवति तदापि तयोर्मध्ये कस्याप्येकस्य मृत्युर्भवति। एवं हि एकस्मिन्नेव नक्षत्रे यदि मातृपुत्रयोर्जन्म भवति तदापि तयोर्मध्ये कस्याप्येकस्य मृत्युर्भवति। अथवा एकस्मिन्नक्षत्रे यदि पितृपुत्रयोर्जन्म भवति तदापि तयोर्मध्ये कस्याप्येकस्य मृत्युर्भवति।

5. **संक्रान्तिजन्मदोषः**[1]

**सूर्यादौ सूर्यसंक्रान्तिर्घोरा ध्वांक्षी महोदरी।**
**मन्दा मन्दाकिनी मिश्रा राक्षसी चेति सप्तधा ॥**
**तत्र जातो भवेन्नूनं दुःखदारिद्र्यसंयुतः ।**
**शान्तितः शुभमाप्नोति ग्रहाणां यज्ञमाचरेत् ॥** इति ॥

तात्पर्यमिदं यत् संक्रान्तिदिने यदि जन्म भवति तदा तज्जन्म दुःखदारिद्र्यरोगकरम्भवति। तत्र सूर्यादिवारभेदेन संक्रान्तीनाङ्घोराध्वाङ्क्षाद्याः सप्त संज्ञाः कथिताः। यथा, रविवासरे यदि सङ्क्रान्तिर्भवति तदा घोरासंज्ञिका, सोमवासरे ध्वांक्षी, मङ्गलवासरे महोदरी, बुधवासरे मन्दा, गुरुवासरे मन्दाकिनी, शुक्रवासरे मिश्रा तथा शनिवासरे यदि सङ्क्रान्तिर्भवति तदा सा राक्षसीसंज्ञिका संक्रान्तिर्भवति। अतः संक्रान्तिदिने जातस्य शिशोस्तज्जन्या शान्तिर्विधेया।

6. **ग्रहणजन्मदोषः**[2]

**रवीन्द्वोर्ग्रहणे जातो दारिद्र्यक्लेशरोगवान्।**
**म्रियतेऽपि ततः शान्तिमाचरेद्धितकामुकः ॥**

---

[1] बृहत्पारशरहोराशास्त्रम्, संक्रान्तिजननदोषशान्त्यध्यायः (अध्याय-91), श्लोकः-1-3
[2] बृहत्पारशरहोराशास्त्रम्, ग्रहणजातदोषशान्त्यध्यायः (अध्याय-92), श्लोकः-1-3

**रवीन्द्वोर्ग्रहणं यत्र नक्षत्रे तदधीशजाम् ।**
**मूर्तिं स्वर्णमयीं, सूर्यरूपं चापि रविग्रहे ॥**
**सुवर्णेन, तथैवेन्दोर्ग्रहणे रजतेन वै ।**
**चन्द्रस्वरूपं रचयेद् राहोः शीशकतस्तथा ॥** इति ॥

अर्थात् पराशरानुसारं सूर्य-चन्द्रग्रहणकाल उत्पन्नो जातको दुःख-दारिद्र्य-रोगयुक्तो भवति। अतो ग्रहणं यस्मिन्नक्षत्रे भवति तस्य नक्षत्रस्य यः स्वामी भवति तस्य सुवर्णमयीं प्रतिमां तथा सूर्यग्रहणे सूर्यस्य सुवर्णमयीं प्रतिमां तथा चन्द्रग्रहणे चन्द्रस्य रजतमयीं प्रतिमां पुनश्च राहोः शीशकमयीं प्रतिमां निर्माय शास्त्रोक्तविधिना शान्तिकर्म समाचरेत्।

एवमेवात्र गर्गेणापि ग्रहणजन्मदोषं प्रतिपादयँल्लिखति, यथा[1]-

**ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते ।**
**व्याधिपीडा च दारिद्र्-यं शोकश्च कलहो भवेत् ।**
**अस्मिन् संजायते यस्तु तस्य मृत्युर्न संशयः ।**
**शान्तिस्तत्र विधातव्या नरेण हितकाम्यया ॥** इति ॥

7. **त्र्यन्यजननदोषः**[2]

**सुतत्रयात्परं कन्या-जन्म वा कन्यकात्रयात् ।**
**अनन्तरं पुत्रजन्म तदारिष्टं कुलद्वये ॥**
**एवं सति ग्रहान् ब्रह्म-विष्णुरुद्राँश्च पूजयेत् ।**
**यथोक्तेन विधानेन शान्तिं कुर्याद् विचक्षणः ॥**
**सूतकान्ते शुभे वाऽह्नि ग्रहाणां यजनं ततः ।** इति ॥

1 सङ्ग्रहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 118
2 बृहत्पाराशरहोराशास्त्रम्, त्र्यन्यजननदोषशान्त्यध्यायः (अध्याय-96), श्लोकः-1-3,

अर्थात् पुत्रत्रयजन्मान्तरं कन्याया जन्म भवेत्, अथवा कन्यात्रयजन्मानन्तरं पुत्रस्य जन्म भवेत्तदा मातृ-पितृवंशेऽनिष्टञ्जायते। शान्त्यर्थं ब्रह्म-विष्णु-महेशानां ग्रहाणाञ्च पूजनन्तथा शास्त्रोक्तविधानेन शान्तिङ्कुर्यात्।
अत्र गर्गेण दोषं स्पष्टयन्नेवं लिखति, यथा[1]-

**सुतत्रये सुता चेत् स्यात्तत्त्रये वा सुतो यदि।**
**मातापित्रोः कुलस्यापि तदारिष्टं महद्भवेत्॥**
**ज्येष्ठनाशो वसोर्हानिर्दुःखं स्यादुत्तरोत्तरम्।**
**तत्र शान्तिं प्रकुर्वीत वित्तशाठ्यविवर्जितः॥** इति॥

8. **प्रसूतिविकृतिदोषः**[2]

**समयाच्चेद्विलम्बेन पूर्वं हि प्रसवो भवेत्।**
**विकलोङ्गोऽधिकाङ्गो वाऽनेकनेत्रशिरोधरः॥**
**नराकारः पशावेवं पश्वाकारस्त्रियामपि।**
**प्रसूतिविकृतिश्चेयं महाविध्वंशकारिणी॥**
**स्त्रियां पशुकुले यस्य प्रसूतिविकृतिर्भवेत्।**
**तस्य वंशे गृहे चापि महोत्पातः प्रजायते॥**
**परिहर्तुं तु तान् दोषान् शान्तिं कुर्याद् विचक्षणः।**
**अथवा तादृशीं नारीं गामश्वां परिवर्जयेत्॥** इति॥

अर्थान्निर्धारितसमयानन्तरमथवा निर्धारितसमयात्पूर्वमेव यदि प्रसवो भवति, अथवा कस्या अपि स्त्रिया गर्भाद् विकलाङ्गजातकस्याधिकाङ्गजातकस्य वा जन्म भवति, अथवा अनेकनेत्रधारिजातकस्यानेकशिरोयुक्तस्य जातकस्य वा जन्म भवति, अथवा पशुगर्भतो नराकारस्य जातकस्य वा स्त्रीगर्भतः पश्वाकारस्य जातकस्य जन्म भवति तदा प्रसूति-विकृतिर्ज्ञातव्या। एषः प्रसूतिविकारो महाविध्वंशकारी भवति। दोषशमनार्थं

[1] सङ्गहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 123-124
[2] बृहत्पारशरहोराशास्त्रम्, प्रसूतिविकृतिशमनाध्यायः (अध्याय-97), श्लोकः 2-5

शास्त्रोक्तविधिना शान्तिः कर्तव्या। अथवा प्रसूतिविकारवत्याः स्त्रियाः, गोः, अश्वस्य वा परित्यागः कर्तव्यः।

एवं हि वयसः अनुरोधोनापि कदाचित् स्त्रियाः गर्भो दोषाय भवति। तत्र पञ्चदशे षोडशे वाऽब्दे (वयसि) गर्भधारणमथवा सिंहस्थे रवौ गोः प्रसवः तथा मकरस्थे रवौ महिष्याः प्रसवो दोषाय भवतीति प्रतिपादयँल्लिखति महर्षिपराशरः[1]-

**जन्मनः षोडशे पञ्चदशे वाब्दे भवेद् यदि।**
**गर्भः स्त्रिया वा प्रसवो न शिवायोपकल्पते॥**
**सिंहस्थेऽर्के प्रसूता गौर्महिषी मकरस्थिते।**
**नश्येत् स्वयं तथा सा तु नाशयेदधिपं निजम्॥**
**विप्राय तादृशीं दद्यादथवा शान्तिमाचरेत्।** इति॥

अर्थाद्गर्भतः पञ्चदशे षोडशे वाब्दे कस्याश्चित् स्त्रिया गर्भः प्रसवो वा भवति तदाऽशुभं जायते। अतस्तच्छान्तिर्विधेया।

पुनश्च सिंहस्थे सूर्ये कस्यापि गौः प्रसूते, किं वा मकरस्थे सूर्ये महिषी प्रसूते तदा तत्स्वामिनो नाशो भवति। एवं परिस्थितौ ताङ्गाम्महिषीं वा ब्राह्मणाय दद्यात्, अथवा तज्जन्यां शान्तिं समाचरेत्।

**9. गण्डान्तजन्मदोषः**

अत्र गण्डशब्दो ग्रन्थिशब्दस्य पर्यायः। अत एव शरीरे ग्रन्थिजन्यो रोगो गण्डशब्देनाख्यायते। यथा गलगण्डरोगः, गण्डमालारोगः, अस्थिगण्ड इत्यादयः। स च ग्रन्थिः शरीरे प्रायस्तत्रैव भवति यत्र सन्धिर्भवति। अतो गण्डशब्दस्थाने ज्योतिषे सन्धिशब्दस्यापि प्रयोगोऽवलोक्यते। अर्थाज्ज्योतिषे गण्डशब्दः सन्धिपदवाचकोऽपि। अत एव मुहूर्तचिन्तामणौ विवाहप्रकरणे गण्डान्तप्रसङ्गे पीयूषधाराकारेण स्पष्टं लिखति **"गण्डान्तं नाम सन्धिविशेषः"।**

---

[1] बृहत्पारशरहोराशास्त्रम्, प्रसूतिविकृतिशमनाध्यायः (अध्याय-97), श्लोकः 6-8

वस्तुतः शरीरे ग्रन्थिस्तत्रैव भवति यत्र शरीरस्य द्वयोर्भागयोस्सन्धिर्भवति। अर्थाच्छरीरे सन्धिस्थानेषु ग्रन्थयो भवन्त्येव। यथा हस्तभुजयोर्मध्ये सन्धिस्थाने ग्रन्थिरस्ति। भुजस्कन्धयोर्मध्ये सन्धिस्थाने ग्रन्थिरस्ति। जानुपादयोर्मध्ये सन्धिस्थाने गुल्फरूपो ग्रन्थिरस्ति।

एवं यथा शरीरे अङ्गानां सन्धिस्थानेषु ग्रन्थयोऽअर्थात् गण्डभागा भवन्ति तथैव तिथि-नक्षत्र-लग्नविशेषाणां सन्धयो गण्डसंज्ञकाः प्रकल्पिताः प्राच्यैः। तत्र गण्डसंज्ञकभागविशेषैः सम्बद्धानि यानि षण्णक्षत्राणि, षट्तिथयः, षड् लग्नानि वा तानि सर्वाण्यपि गण्डसंज्ञकानि। तत्र हि त्रयाणामन्ते केचन भागविशेषा अंशात्मका घट्यात्मका वा गण्डान्तभागाः। तथा तैर्गण्डान्तभागैः सम्बद्धास्तदग्रिमनक्षत्र-तिथिलग्नानामाद्यभागविशेषा अपि गण्डान्तसंज्ञयैवाख्यायते, अन्तभागसम्पृक्तत्वात्। एवं प्राच्यैर्नक्षत्रगण्डान्तं, तिथिगण्डान्तं, लग्नगण्डान्तञ्चेति त्रिविधङ्गण्डान्तम्प्रोक्तम्। तत्र त्रिविधेषु गण्डान्तेषु जन्म दोषकारकम्भवति। महर्षिपराशरेण गण्डान्तत्रितयस्य विचारस्त्रिषु कार्येषु कर्तव्य इत्युक्तम्। तद्यथा[1]-

**गण्डान्तं त्रिविधं प्रोक्तं तिथ्यङ्गर्क्षवशाद् बुधैः।**
**पाणिग्रहादौ जनुषि प्रयाणे च विचिन्तयेत्॥** इति॥

**I. अथ तिथिगण्डान्तम्**[2]

**पूर्णानन्दाभिधानां तु तिथीनां सन्धिषु द्विज।**
**घटीचतुष्टयं विज्ञैस्तिथिगण्डान्तमीरितम्॥** इति॥

अर्थात् तिथिषु पूर्णायास्तथा नन्दायास्सन्धिषु चतस्रश्चतस्रो घट्यस्तिथिगण्डान्तम्भवति। अर्थात् पूर्णिमाया अन्तिमे द्वे घट्यौ तथा प्रतिपदाया आदिमे द्वे घट्यौ, एवमेव दशम्या अन्तिमे द्वे घट्यौ तथा एकादश्या आदिमे द्वे घट्यौ, पुनः

---
[1] बृहत्पाराशरहोराशास्त्रम्,गण्डान्तोद्भवशान्त्यध्यायः (अ.93), श्लोकः 1
[2] बृहत्पाराशरहोराशास्त्रम्, गण्डान्तोद्भवशान्त्यध्यायः (अ.93), श्लोकः 2

पञ्चम्या अन्तिमे द्वे घट्यौ तथा षष्ठ्या आदिमे द्वे घट्यौ, एवं स्थानत्रयेऽपि उभयोस्तिथ्योर्मध्ये चतस्रश्चतस्रो घट्यस्तिथिगण्डान्तम्भवति ।

किन्तु नारदसंहितायामुपर्युक्तयोस्तिथ्योर्मध्ये धटीद्वयात्मकन्तिथिगण्डान्तङ्कथयति । तद्यथा[1]-

**पूर्णानन्दाख्ययोस्तिथ्योः संधिनाडीद्वयं सदा ।**
**गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥** इति ॥

एवमेव नारायणदैवज्ञस्य मते[2]-

सार्पेन्द्रान्तिमभात्ततोऽब्धिघटिकं **पूर्णां ततोऽध्यर्धकम् ॥** इति ॥

स्पष्टतायै सारणी अवलोकनीया-

| तिथिगण्डान्तम् | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| पराशरमते | | | | | | | नारदमते नारायणदैवज्ञमते च | | | | | |
| | | तिथीनाम् अन्तिमाः नाड्यः | तिथीनाम् आद्याः नाड्यः | | | | | | तिथीनाम् अन्तिमाः नाड्यः | तिथीनाम् आद्याः नाड्यः | | |
| पञ्चदश्याः | ⇒ | 2 | 2 | ⇐ | प्रतिपदः | | पञ्चदश्याः | ⇒ | 1 | 1 | ⇐ | प्रतिपदः |
| दशम्याः | ⇒ | 2 | 2 | ⇐ | एकादश्याः | | दशम्याः | ⇒ | 1 | 1 | ⇐ | एकादश्याः |
| पञ्चम्याः | ⇒ | 2 | 2 | ⇐ | षष्ठ्याः | | पञ्चम्याः | ⇒ | 1 | 1 | ⇐ | षष्ठ्याः |

तिथिगण्डान्तस्य परिहारः-

**शाकल्यसंहितानुसारञ्चन्द्रे सबले सति तिथिगण्डान्तजन्यो दोषो नश्यति। तद् यथा**[3]- "**तथैव तिथिगण्डान्तं नास्तीन्दौ बलशालिने**" ॥ इति ।

---

1 नारदसंहिता, 29/38

2 मुहूर्तमार्तण्डः, विवाहप्रकरणम्, श्लो. 19

3 मुहूर्त पारिजात, परिचय प्रकाण्ड, प्रकीर्ण प्रशाखा, पृ. 67

**II.** लग्नगण्डान्तम्[1]-

**मीन-मेषाङ्ग्योः कर्क-सिंहयोरलि-धन्विनोः**
**सन्धावेकघटीतुल्यं लग्नगण्डान्तमुच्यते** ॥ इति ॥

अर्थात् मीन-मेषयोः, कर्क-सिंहयोस्तथा वृश्चिक-धनुषोस्सन्धिष्वेकैका घटी लग्नगण्डान्तम्भवति। मीनस्यान्तेऽर्धघटीतुल्यः कालस्तथा मेषस्यादवर्धघटीतुल्यः कालो लग्नगण्डान्तम्भवति। एवमेव कर्कस्यान्तेऽर्धघटीतुल्यः कालस्तथा सिंहस्यादवर्धघटीतुल्यः कालो लग्नगण्डान्तम्भवति। पुनर्वृश्चिकस्यान्तेऽर्धघटीतुल्यः कालस्तथा धनुष आदौ अर्धघटीतुल्यः कालः, आहत्य उपर्युक्तयोर्द्वयोर्द्वयो राश्योर्मध्य एकैका घटी लग्नगण्डान्तम्भवति।

एवमेव नारायणदैवज्ञोऽपि लिखति, यथा[2]-

**कीटान्त्यालिविरामतः कुघटिकं गण्डान्तमूर्ध्वाधरम्** ॥ इति ॥

किन्तु नारदेन तूपर्युक्तयो राश्योर्मध्येऽर्धघटीमितमेव तिथिगण्डान्तमुक्तम्। तद् यथा[3]-

**कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः।**
**गण्डान्तमन्तरालं स्याद्घटिकार्धं मृतिप्रदम्** ॥ इति ॥

**स्पष्टतायै सारणी अवलोकनीया-**

| लग्नगण्डान्तम् | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| पराशरमते नारायणदैवज्ञमते च | | | | | नारदमते | | | |
| राशीनाम् अन्तिम-पलानि | | राशीनाम् आदिम-पलानि | | | राशीनाम् अन्तिम-पलानि | | राशीनाम् आदिम-पलानि | |
| मीनस्य ⟹ | 30 | 30 | ⟸ मेषस्य | | मीनस्य ⟹ | 15 | 15 | ⟸ मेषस्य |
| कर्कटस्य ⟹ | 30 | 30 | ⟸ सिंहस्य | | कर्कटस्य ⟹ | 15 | 15 | ⟸ सिंहस्य |
| वृश्चिकस्य ⟹ | 30 | 30 | ⟸ धनुषः | | वृश्चिकस्य ⟹ | 15 | 15 | ⟸ धनुषः |

---

[1] बृहत्पारशरहोराशास्त्रम्, गण्डान्तोद्भवशान्त्यध्यायः (अ.93), श्लोकः 4
[2] मुहूर्तमार्तण्डः, विवाहप्रकरणम्, श्लो. 19
[3] नारदसंहिता, 29/39

लग्नगण्डान्तस्य परिहारः-

शाकल्यसंहितानुसारं सबले गुरौ लग्नगण्डान्तदोषः प्रभावहीनो भवति। तद् यथा[1]- "**तथैव लग्नगण्डान्तं नास्ति जीवे बलान्विते**" ॥ इति।

**III. नक्षत्रगण्डान्तम्[2]-**

**एवं नक्षत्रगण्डान्तं घटीयुगमितं बुधैः।**
**रेवतीसार्पशक्रेभ्योऽग्रिमभैः सन्धिषु स्मृतम् ॥**

अर्थाद्रेवत्यश्विनीनक्षत्रयोस्सन्धौ, आश्लेषा-मघानक्षत्रयोस्सन्धौ, तथा ज्येष्ठा-मूलनक्षत्रयोस्सन्धौ चतस्रश्चतस्रो घट्यो नक्षत्रगण्डान्तम्भवति।

अत्र आचार्यो रामदैवज्ञो मुहूर्तचिन्तामणौ विवाहप्रकरणे गण्डान्तदोषं विवेचयँल्लिखति, यथा[3]-

**ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी-**
**पित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम्।**
**कर्काल्यण्डजभान्ततोऽर्धघटिका सिंहाश्वमेषादिगा**
**पूर्णान्ते घटिकात्मकं त्वशुभदं नन्दातिथेश्चादिमम् ॥** इति ॥

अत्रापि श्लोके नक्षत्रगण्डान्तं, लग्नगण्डान्तं तथा तिथि गण्डान्तमिति गण्डान्तत्रितयस्य लक्षणं कथितमाचार्येण।

तत्र प्रथमं नक्षत्रगण्डान्तं कथयति -

ज्येष्ठाया अन्ते, रेवत्या अन्ते तथा आश्लेषाया अन्ते घटिकाद्वयं गण्डान्तं भवति। तथा च मूलस्यादौ, अश्विन्या आदौ तथा मघाया आदौ घटिकाद्वयं गण्डान्तं भवति। एतेन रेवत्यश्विन्योः, आश्लेषामघयोस्तथा ज्येष्ठामूलयोस्सन्धिस्थाने चतस्रश्चतस्रो घटिका अशुभसूचकं नक्षत्रगण्डान्तम्भवतीति फलितार्थः। एवमेव लग्नगण्डान्तमेकघटीमितम्, तथा तिथिगण्डान्तङ्घटिकाद्वयं सर्वमपि महर्षिपराशरोक्तघटिकातुल्यमेवोक्तम्।

---
[1] मुहूर्तपारिजात, परिचयप्रकाण्ड, प्रकीर्णशाखा, पृ. 67
[2] बृहत्पारशरहोराशास्त्रम्, गण्डान्तोद्भवशान्त्यध्यायः (अ.93), श्लोकः 3
[3] मुहुर्तचिन्तामणिः 6/43, पीयूषधाराम्

किं वा नक्षत्रगण्डान्तविवेचनक्रमे पीयूषधाराटीकाकारेण रत्नमालाया वचनं, वसिष्ठस्य च वचनं समुपस्थाय रामाचार्यस्य मतं समर्थितम्। यथा रत्नमालाया वचनम्[1]-

**पौष्णाश्विन्योः सार्पमित्रर्क्षयोश्च**
**यच्च ज्येष्ठामूलयोरन्तराम्।**
**तद्गण्डान्तं स्याच्चतुर्नाडिकं हि**
**यात्राजन्मोद्वाहकालेष्वनिष्टम्॥** इति॥

पुनः वसिष्ठवचनम्[2]-

**यदन्तरालं पितृसार्पयोश्च**
**मूलेन्द्रयोराश्विनपौष्णयोश्च।**
**भसन्धिगण्डान्तमिति त्रयं**
**तद्यामप्रमाणं शुभकर्महन्तृ॥** इति॥

एवं हि नारदवचनं यथा[3]-

**सार्पेन्द्रपौष्णभेष्वन्त्यनाडीयुग्मं तथैव च।**
**तदग्रभेष्वाद्यपादभानां गण्डान्तसंज्ञकाः॥** इति॥

एवमेव नारायणदैवज्ञस्य मते[4] -

**सार्पेन्द्रान्तिमभात्ततोऽब्धिघटिकं** पूर्णां ततोऽब्ध्यर्धकम्॥ इति॥

पुनश्च ग्रन्थान्तरे तु नक्षत्रगण्डान्तं पञ्चदशघटिकाप्रमाणं कथितम्। तद्यथा[5]-

**अश्विनीमघमूलादौ त्रिवेदनवनाडिकाः।**
**रेवतीसार्पशक्रान्ते मासरुद्ररसास्तथा॥** इति॥

---

[1] मुहुर्तचिन्तामणिः 6/43, पीयूषधाराम्

[2] तत्रैव

[3] नारदसंहिता, 29/40

[4] मुहूर्तमार्तण्डः, विवाहप्रकरणम्, श्लो. 19

[5] ज्योतिषचन्द्रिका, जातकप्रकरण, श्लोक-32

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अर्थादश्विन्या आदौ तिस्रो घटिकाः, मघाया आदौ चतस्रो घटिकास्तथा मूलस्यादौ नव घटिका नक्षत्रगण्डान्तम्भवति। पुना रेवत्या अन्ते द्वादशघटिकाः, आश्लेषाया अन्त एकादशघटिकास्तथा ज्येष्ठाया अन्ते षड्घटिका नक्षत्रगण्डान्तम्भवति।

स्पष्टतायै सारणी अवलोकनीया-

| नक्षत्रगण्डान्तम् | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| | गण्डान्तघट्यः | | | गण्डान्तघट्यः | | | गण्डान्तघट्यः | | | आहत्य गण्डान्त घट्यः |
| नक्षत्राणि | रेवत्यन्ते | अश्विन्यादौ | | आश्लेषान्ते | मघादौ | | ज्येष्ठान्ते | मूलादौ | | |
| पराशरमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| रामाचार्यमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| रत्नमालायाम् | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| वसिष्ठमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| पराशरमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| नारदमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| नारायणदैवज्ञमते | 2 | 2 | | 2 | 2 | | 2 | 2 | | 4 |
| ग्रन्थान्तरे | 12 | 3 | | 6 | 6 | | 5 | 9 | | ----- |

नक्षत्रगण्डान्तस्य परिहारः[1] -

नक्षत्रगण्डान्तदोषो विवाह-यात्रादिमाङ्गलिककार्येषु त्याज्यो भवति। किन्तु नक्षत्रशान्त्या नक्षत्रगण्डान्तदोषस्य शमनं भवति।

त्रिविधगण्डान्तपरिहारः-

i. अभिजिन्मुहूर्ते कश्चिदपि गण्डान्तदोषः प्रभावी न भवति। यथा वसिष्ठस्य वचनम्[2]-

"**गण्डान्तदोषमखिलं मुहूर्तोऽभिजिदाह्वयः।**
**हन्ति यद्वन्मृगं व्याधः पक्षिसङ्घमिवाखिलम्॥**" इति।

---

[1] मुहूर्तपारिजात, परिचयप्रकाण्ड, प्रकीर्णशाखा, पृ. 67

[2] मुहूर्त पारिजातः, परिचय प्रकाण्डः, प्रकीर्ण प्रशाखा, पृ. 67
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

ii. केन्द्रगताश्शुभग्रहा भवन्ति अथवैकादशे चन्द्रो भवति तदा समस्तगण्डान्तदोषा नश्यन्ति। यथा उक्तञ्ज्योतिर्निबन्धे[1]-

**तिथ्यादीनां सन्धिदोषं तथा गण्डान्तसंज्ञितम्।**
**हन्ति लाभगतश्चन्द्रः केन्द्रगा वा शुभग्रहाः॥** इति।

10. <u>अभुक्तमूलविचारः-</u>

एवं हि ज्योतिषशास्त्रे गण्डान्तत्रितयमशुभजनकङ्कथितमेव, ज्येष्ठामुलयोर्मध्यगत-गण्डान्तन्तु अभुक्तमूलसंज्ञकमुक्त्वा महाऽशुभप्रदङ्कथितं महर्षिपराशरेण। यथा[2]-

**गण्डान्तत्रितयं जन्म-यात्रादौ मृतिदं तथा।**
**शाक्रमूलभयोः सन्धौ शरा नागाश्च नाडिकाः॥**
**क्रमादभुक्तमूलाख्या महाविघ्नप्रदायकाः।**
**तस्मात्तत्कालजातानां शान्तिं कुर्याद्विचक्षणः॥** इति॥

अत्र ज्येष्ठामुलयोस्सन्धौ (5+8 = 13) त्रयोदशघटिका महाविघ्नकरा अभुक्तमूलसंज्ञका भवन्तीति विशेषमुक्तम्। अर्थाज्ज्येष्ठाया अन्ते पञ्च घट्यस्तथा मूलस्यादावष्टौ घट्यः, आहत्य त्रयोदशघटिका अभुक्तमूलसंज्ञका इति पराशरस्य मतम्।

किन्तु अत्र महर्षिपराशरेण अभुक्तमूलस्य यल्लक्षमुक्तन्न तथा नारदस्य नैव च वसिष्ठस्य, नैव हि बृहस्पतेर्मतम्। यथा रामाचार्यस्त्रयाणामपि मतान्येकेनैव श्लोकेन प्रतिपादयँल्लिखति[3]-

**अभुक्तमूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हि नारदः।**
**वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकम्॥**

i. अत्र नारदस्य मते ज्येष्ठाया अन्ते घटिकाचतुष्टयन्तथा मूलस्यादौ घटिकाचतुष्टयम्, आहत्याष्टौ घटिका अभुक्तमूलम्भवति। पीयुषधाराटीका-कारेणात्रोपलक्षणत्वादाश्लेषान्तिमघटीचतुष्टयम्मघादिघटीचतुष्टयञ्चाभुक्तमूलाख्यः

1 तत्रैव, मुहूर्त पारिजातः, परिचय प्रकाण्डः, प्रकीर्ण प्रशाखा, पृ. 67
2 बृहत्पाराशरहोराशास्त्रम्, 93/5-6
3 मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 53

कालः कथितः। तत्रैव तेन प्रसङ्गेऽस्मिन् महर्षिनारदस्यापि वचनमुपन्यस्तम्, यथा[1] -

**यो ज्येष्ठामुलयोरन्तरालप्रहरजः शिशुः।**
**अभुक्तमूलजः सार्पमघानक्षत्रयोरपि॥** इति॥

ii. किन्तु वसिष्ठस्य मते ज्येष्ठाया अन्तिमैका घटी तथा मूलस्यादिमे द्वे घट्यौ, आहत्य घटीत्रयम् अभुक्तमूलम्भवति।अत्रापि पीयूषधाराटीकाकारो वसिष्ठस्य वचनमुपस्थापितम्, यथा[2]-

**ज्येष्ठान्त्यपादघटिकामितमेव केचिन्**
**मूलं ह्यभूक्तमपरे पुनरामनन्ति।**
**मूलाद्यपादघटिकाद्वितयेन सार्धं-**
**मष्टौ समाः परिहरेदिह जन्मभाजम्॥** इति॥

iii. ततश्चाचार्यरामदैवज्ञेन बृहस्पतेर्मतं लिखितं यज्ज्येष्ठाया अन्ते अर्धघटिकामितः कालस्तथा मूलस्यादवर्धघटिकामितः कालः, आहत्यैकघटीमितः कालोऽभुक्त-मूलम्भवतीति। तत्रापि पीयूषधाराटीकाकारो गुरोर्वचनं समुपस्थापितम्, यथा[3]-

**ज्येष्ठान्त्यघटिकार्धं च मूलादौ घटिकार्धकम्।**
**तयोरन्तर्गता नाड़ी ह्यभुक्तमूलमुच्यते॥**

एवमभुक्तमूलस्य मतत्रयमुक्त्वा चतुर्थमपि मतं समुपस्थापितमाचार्यरामदैवज्ञेन, यथा[4]-

**अथोचुरन्ये प्रथमाष्टघट्यो**
**मूलस्य शाक्रान्तिमपञ्चनाड्यः।**
**जातं शिशुं तत्र परित्यजेद्वा**
**मुखं पिताऽस्याष्टसमा न पश्येत्॥** इति॥

---

[1] मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 53, पीयूषधाराटीका
[2] तत्रैव, मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 53, पीयूषधाराटीका
[3] तत्रैव, मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 53, पीयूषधाराटीका
[4] मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 54,

अर्थादभुक्तमूलस्य चतुर्थम्मतं यज्येष्ठाया अन्तिमाः पञ्च घट्यस्तथा मूलस्यादिमा अष्टौ घट्यः, आहत्य त्रयोदश घटिका अभुक्तमूलं भवतीति।

वस्तुतो दैवज्ञरामाचार्योक्तमन्यमतमेव महर्षिपराशरस्य मतेन साम्यम्भजते। किन्त्वभुक्तमूलस्योपर्युक्तेषु चतुर्षु भेदेषु को भेदः साधीयानित्यत्र पीयूषधाराटीकाकारस्य गोविन्ददैवज्ञस्य मते महर्षिनारदस्य पक्षः साधीयान्। तत्कथमित्यत्र तस्य युक्तिर्यन्नारदस्य मतं बहूनां मुनीनां मतैस्सह साम्यम्भजते। यथा तत्रैव कश्यपवचनं लिखति गोविन्ददैवज्ञः पीयूषधारायाम्[1]-

**ज्येष्ठामुलयोरन्तरालयामोद्भवः शिशुः।**
**अभुक्तमूलजः सोप्याश्लेषापितृभयोरपि॥** इति॥

अत्र ध्यातव्यमिदमप्यस्ति यत् पीयूषधाराकारारेणास्मिन् प्रसङ्गेऽपि वसिष्ठस्य वचनानन्तरं समुपस्थापितम्। तत्र प्रहरप्रमाणम् अभुक्तमूलं भवतीति कथितमस्ति। तद् यथा[2]-

**भुजङ्गपौरन्दरपौष्णभानां तदग्रभानां च यदन्तरालम्।**
**अभुक्तमूलं प्रहरप्रमाणं त्यजेत्सुतं तत्रभवां सुताञ्च॥** इति॥

वस्तुतोऽत्र वसिष्ठस्योभयोरपि वचनयोरवलोकनेनेदन्ध्वनितम्भवति यत् पूर्वोक्तश्लोके वसिष्ठः "केचिदपरे" इत्युक्त्वा नहि स्वकीयस्य, किं वा केषाञ्चिदन्येषाम्मतमस्तीत्युक्तम्। अर्थात् पूर्वप्रतिपादितं वसिष्ठवचनोक्तं मतं नहि साक्षाद् वसिष्ठस्य, अपि तु केषाञ्चिदन्येषाम्मतम्। किन्त्वनन्तरोक्तवसिष्ठवचने तस्य स्वकीयं मतमस्ति। तत्र ज्येष्ठामूलयोर्मध्ये तथाऽऽश्लेषामघयोर्मध्ये प्रहरसम्मितः कालः, अर्थात् अष्टौ घट्योऽभुक्तमूलम्भवति।

एतेषामुपर्युक्तानां सर्वेषामप्यभुक्तमूललक्षणजन्यमतानान्दिग्दर्शनमधस्तात् सारणीमध्ये द्रष्टुं शक्यते।

---

[1] मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 54, पीयूषधारायाम्
[2] मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 54, पीयूषधारायाम्

| अभुक्तमूलघट्यः | | | |
|---|---|---|---|
| | ज्येष्ठान्ते घट्यः | मूलादौ घट्यः | आहत्य घट्यः |
| पराशरमते | 5 | 8 | 13 |
| नारदमते | 4 | 4 | 8 |
| कश्यपमतम् | 4 | 4 | 8 |
| वसिष्ठमतम् | 4 | 4 | 8 |
| वसिष्ठोक्तम् मतान्तरम् | 1 | 2 | 3 |
| बृहस्पतिमतम् | $\frac{1}{2}$ | $\frac{1}{2}$ | 1 |

अत्र ह्यभुक्तमूलजातस्य शिशोः परित्यागः कर्तव्य इति शास्त्रादेशः। चेत्यागो न सम्भवस्स्यात्तदाऽष्टौ वर्षाणि यावदभुक्तमूलोत्पन्नस्य बालकस्य कन्यकाया वा पिता मुखन्न पश्येदिति शास्त्रादेशः। यथा च्यवनमुनेर्मतं समुपस्थापयत्याचार्यो गोविन्ददैवज्ञः पीयूषधारायाम्[1]-

**अभुक्तमूलभे भवं परित्जेच्च बालकं**
**समाष्टकं पिताऽथवा न तन्मुखं विलोकयेत्॥** इति॥

एतेनेदम्फलितम्भवति यदष्टवर्षानन्तरमभुक्तमूलजन्यो दोषः स्वतो नश्यति-इति।

चेदष्टौ वर्षाणि यावच्छिशोरनवलोकनमपि न सम्भवन्तदा शान्तिः कर्तव्या। शान्त्यनन्तरमभुक्तमूलजन्यो दोषो नाशमुपयाति। यथोक्तमपि महर्षिपराशरेण[2]-

**क्रमादभुक्तमूलाख्या महाविघ्नप्रदायकाः।**
**तस्मात् तत्कालजातानां शान्तिं कुर्याद् विचक्षणः॥** इति॥

एवमेव नारदेनाप्युक्तम्, यथा[3]-

---

1 तत्रैव, मुहुर्तचिन्तामणिः,नक्षत्रप्रकरणम्, श्लो. 54, पीयूषधारायाम्
2 बृहत्पाराशरहोराशास्त्रम्, 93/6
3 सङ्घहशिरोमणिः, चतुर्दशी प्रभा, श्लो.83

**अभुक्तमूलजं पुत्रपुत्रीमपि परित्यजेत् ।**
**अथवाष्टाब्दकं तातस्तन्मुखं न विलोकयेत् ॥** इति ॥

तच्च शान्तिविधानं विस्तरभियाऽत्र नोल्लिख्यते। तस्य विस्तरं वर्णनं ग्रन्थान्तरे बृहत्पाराशरे वा द्रष्टव्यम्।

11. **मूलाश्लेषाजातस्य चरणवशेन शुभाशुभफलम्-**

मूलाश्लेषानक्षत्रयोर्गणना नक्षत्रगण्डान्तविचारे तथा अभुक्तमूलविचार उभयत्र भवतीति पूर्वविवेचनया स्पष्टमेव। इदानीमनयोर्नक्षत्रयोश्चरणवशेनापि शुभाशुभत्त्वम्भवतीति विचार्यते। तदत्र मुहूर्तचिन्तामणौ लिखति रामाचार्यः[1]-

**आद्ये पिता नाशमुपैति मूले पादे द्वितीये जननी तृतीये ।**
**धनं चतुर्थोऽस्य शुभोऽथ शान्त्या सर्वत्र सत्स्यादहिभे विलोमम् ॥**

अर्थान्मूलनक्षत्रस्य प्रथमे चरणे यदि जन्म भवति तदा पितुर्नाशः, द्वितीयचरणे मातृनाशः, तृतीयचरणे धननाशस्तथा चतुर्थचरणे जन्म भवति तदा शुभं भवति। किन्त्वाश्लेषानक्षत्र एतद्विपरीतम्भवति। अर्थादाश्लेषानक्षत्रस्य चतुर्थचरणे यदि जन्म भवति तदा पितुर्नाशः, तृतीयचरणे मातृनाशः, द्वितीयचरणे धननाशस्तथा आश्लेषानक्षत्रस्य प्रथमचरणे जन्म भवति तदा शुभम्भवति।

एवमेव व्यासेनाप्युक्तम्, यथा[2]-

**मूलाद्यंशे पितुर्नाशो द्वितीये मातुरेव च ।**
**तृतीये धनधान्यादिनाशस्तुर्ये धनागमः ॥** इति ॥

मरीचिना तु पूर्वापरार्धेन फलमाह, यथा[3]-

**अश्विनीमघमूलानां पूर्वार्धे बाध्यते पिता ।**
**पूषाहिशक्रपश्चार्धे जननी बाध्यते पिता ॥** इति ॥

---

[1] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.55
[2] सङ्ग्रहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 84
[3] सङ्ग्रहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 85

वसिष्ठस्तु दिनरात्रिभेदेन मूलस्य फलमाह, यथा[1]-

**मूलाद्यपादो दिवसे यदि स्या-**
**त्तज्जः पितुर्नाशनकारणं स्यात्।**
**द्वितीयपादो यदि रात्रिभागे**
**तदुद्भवो मातृविनाशकः स्यात्।।**
**मूलाद्यपदो यदि रात्रिभागे**
**तदात्मनो नास्ति पुनर्विनाशः।**
**द्वितीयपादो दिनगो यदि स्या-**
**न्न मातुरल्पोऽस्ति तदास्ति दोषः॥** इति॥

नारदसंहितायां तु एवमुक्तम्, यथा[2]-

**दिवाजातस्तु पितरं रात्रौ तु जननीं तथा।**
**आत्मानं सन्ध्ययोर्हन्ति नास्ति गण्डो निरामयः॥** इति॥

एतस्यायम्भावः- दिवा जातो मूलोत्पन्नो बालकः पितरं हन्ति, रात्रौ जातो मूलोत्पन्नो बालको मातरं हन्ति तथा सन्ध्ययोर्जातो मूलोत्पन्नो बालको निजस्य हानिं करोति। एतेन नारदसंहिताया वचनेनेदम्फलितम्भवति यन्मूलनक्षत्रस्य कस्मिँश्चिदपि भागे जातकस्य जन्म भवति तदा दोषो भवत्येवेति।

प्रसङ्गेऽस्मिञ्जयार्णवे तु मूलनक्षत्रं वृक्षरूपम्पुरुषरूपञ्च प्रकल्प्य शुभाशुभफलङ्कथितम्। तद्यथा मूलवृक्षे घटीविन्यासस्तत्फलञ्च[3] -

**मूलं स्तम्भस्त्वचा शाखा पत्रं पुष्पं फलं शिखा।**
**मुनयोऽष्टौ दिशो रुद्राः सूर्याः पञ्चाब्धयोऽग्नयः॥**
**मूले तु 7 मूलनाशः स्यात् स्तम्भे 8 वंशविनाशनम्।**
**त्वचि 10 मातुर्भवेत्क्लेशः शखायां 11 मातुलस्तथा॥**

[1] सङ्ग्रहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 86
[2] सङ्ग्रहशिरोमणिः, चतुर्दशी प्रभा, श्लो. 88
[3] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.55 पीयूषधारायाम्

**पत्रे 12 राज्यं विजानीयात् पुष्पे 5 मन्त्रिपदं स्मृतम् ।**
फले 4 च विपुला लक्ष्मीः शिखाया 3 मल्पजीवितम् ॥इति ॥

स्पष्टतायै मूलवृक्षज्ञानचक्रमवलोकनीयम्-

| वृक्षाङ्गम् | मूलम् | स्तम्भः | त्वचा | शाखा | पत्रम् | पुष्पम् | फलम् | शिखा |
|---|---|---|---|---|---|---|---|---|
| घटी | 7 | 8 | 10 | 11 | 12 | 5 | 4 | 3 |
| फलम् | मूलनाशः (सर्वनाशः) | वंशनाशः | मातृक्लेशः | मातुलकष्टम् | राज्यलाभः | मंत्रीपदम् | विपुलधनाप्तिः | अल्पायुः |
| | | 36 घट्यः (अशुभम्) | | | 21 घट्यः (शुभम्) | | | 3 घट्यः (नेष्टम्) |

तत्रैव मूलपुरुषे घटीविन्यासस्तत्फलञ्च-

**मूलस्य घटिकान्यासो मूर्ध्नि पञ्च 5 नृपो भवेत् ।**
**मुखे सप्त 7 मृतिः पित्रोः, स्कन्धे वेदा 4 महाबलः ॥**
**बाह्वोरष्टौ 8 बली पाण्योस्तिस्रो 3 हस्तान्वितो भवेत् ।**
**हृदि खेटा 9 भूपमन्त्री नाभौ द्वौ 2 ब्रह्मविद्भवेद् ।**
**गुह्ये दशा 10 तिकामी स्याज्जानुनोः षण् 6 महामतिः ॥**
**पादयोः षण् 6 मतिस्तस्येत्युक्तवान् कमलासनः ॥** इति ॥

स्पष्टतायै मूलपुरुषचक्रमवलोकनीयम्-

| स्थानम् | शीर्षम् | मुखम् | स्कन्धः | बाहू | हस्तौ | हृदयम् | नाभिः | गुह्यम् | जानुनी | पादौ |
|---|---|---|---|---|---|---|---|---|---|---|
| घटी | 5 | 7 | 4 | 8 | 3 | 9 | 2 | 10 | 6 | 6 |
| फलम् | नृपत्वम् | मातृपितृमृत्युः | महाबली | बलम् | हस्तिलाभः | राजमन्त्री | ब्रह्मज्ञानी | अतिकामी | महामतिमान् | मतिमान् |

केचित्तु कन्यायाः कृते पृथगेव मूलाङ्गविभागन्तत्फलञ्चामनन्ति। तद्यथा पीयूषधैरायामेव[1]-

**चतस्रो 4 नाडिकाः शीर्षे कुर्वन्ति पशुनाशनम्।**
**मुखे षड् 6 धनहानिश्च कण्ठे पञ्च 5 धनागमः॥**
**कौटिल्यं हृदये पञ्च 5 बाह्वोर्वित्तागमं च तत्।**
**वेदाः 4 पाण्योर्दयाधर्मं वेदा 4 गुह्येऽति कामिनि॥**
**ज्येष्ठमातुलनाशश्च जंघयोर्युग 4 नाडिकाः।**
**ज्येष्ठभ्रातृविनाशश्च चतस्रो 4 जानुयुग्मके॥**
**पादयोर्दशनाड्यश्च 10 तत्र वैधव्यमादिशेत्।**
**इति मूलजकन्यायाः फलमीरितमीदृशम्॥** इति॥

अत्र पीयूषधाराटीकाकार एवं स्पष्टयति भावं, यथा - शीर्षे चतस्रो 4 घटिकाः, मुखे षट् 6, कण्ठे पञ्च 5, हृदये पञ्च 5, बाह्वोर्बाहुद्वये पञ्च पञ्चेति 5/5 कल्प्यावीप्सा। पाण्योर्मणिबन्धादधोभागयोश्चतस्रः चतस्रः4/4 इत्यत्रापि वीप्सा कल्प्या। गुह्ये चतस्रः 4 जंघयोर्जंघाद्वये द्वे द्वे 2/2 एवं चतस्रः जानुद्वये द्वे द्वे 2/2 एवं चतस्रः पादयोः पादद्वये पञ्च पञ्चेत्येवं 5/5 दश एवं मिलित्वा षष्टिघटिकाः 60 भवन्ति।

स्पष्टतायै सारणी अवलोकनीया-

| स्थानम् | शीर्षम् | मुखम् | कण्ठः | हृदयम् | बाहू | पाणी | गुह्यम् | जंघे | जानुनी | पादौ |
|---|---|---|---|---|---|---|---|---|---|---|
| घटी | 4 | 6 | 5 | 5 | 10 | 8 | 4 | 4 | 4 | 10 |
| फलम् | पशु नाशः | धन हानिः | धनाप्तिः | कुटि लता | धना गमः | दया | कामिनी | ज्येष्ठमातुल नाशः | ज्येष्ठभ्रातृ हानिः | वैधव्यम् |

पुनश्च तत्रैव आश्लेषाजातयोस्स्त्रीपुंसोरङ्गविभागेन फलं लिखति पीयूषधाराटीकाकारो यथा[2]-

**मूर्ध्नि पञ्च 5 सुपुत्राप्तिर्मुखे सप्त 7 पितृक्षयः।**
**नेत्रे द्वे 2 जननीनाशो ग्रीवायां लम्पटस्त्रिषु 3 ॥**

---
[1] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.55 पीयूषधारायाम्
[2] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.55 पीयूषधारायाम्

**स्कन्धे वेदा 4 गुरौ भक्तिर्हस्तेऽष्टौ 8 च बली भवेत् ।**
**हृद्येकादशभि 11 श्चात्मघाती संजायते नरः ॥**
**श्रीमान्नाभौ भ्रमः षड्भि 6 र्गुदे  नन्दै 9 स्तपोधनः ।**
**पादे पञ्च 5 धनं हन्ति सार्पादेतत्फलं क्रमात् ॥** इति ॥

स्पष्टतायै सारणी अवलोकनीया-

| स्थानम् | मूर्धा | मुखम् | नेत्रम् | ग्रीवा | स्कन्धः | हस्तौ | हृदयम् | नाभिः | गुदा | पादौ |
|---|---|---|---|---|---|---|---|---|---|---|
| घटी | 5 | 7 | 2 | 3 | 4 | 8 | 11 | 6 | 9 | 5 |
| फलम् | राज्याप्तिः | पितृहानिः | मातृनाशः | लम्पटः | गुरुभक्तिः | बली | आत्मघातः | श्रीमान् | तपस्वी | धननाशः |

एवं हि मूलवृक्षमिव आश्लेषावृक्षमपि प्रकल्प्य तत्र जातस्य शिशोरशुभाशुभफलविचारो दृश्यते शास्त्रे । तद् यथा[1]-

**फलं पुष्पं दलं शाखा त्वग्लता कन्द एव च ।**
**सार्पवल्यां दशा 10 क्षां 5 क 9**
**स्वर 7 विश्वा 13  र्क 12 सागराः 4 ॥**
**नाडिकास्तद्भवे बाले फलं ज्ञेयं यथाक्रमम् ।**
**श्रीः श्री राजभयं हानिर्मातृपित्रात्मसंक्षयः ॥**
**भवन्येव न सन्देहो ऽनिष्टे शान्तिः शुभावहा ॥** इति ॥

स्पष्टतायै आश्लेषा-वृक्ष-सारणी अवलोकनीया-

| विभागः | फलम् | पुष्पम् | दलम् | शाखा | त्वक् | लता | मूलम् |
|---|---|---|---|---|---|---|---|
| घटी | 10 | 5 | 9 | 7 | 13 | 12 | 4 |
| फलम् | श्रीः | श्रीः | राजभयम् | हानिः | मातृनाशः | पितृनाशः | स्वनाशः |

[1] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.55 पीयूषधारायाम्

उपर्यक्तेषु मूलवृक्ष-आश्लेषावृक्षादिनक्षत्रविभागेषु प्रतिपादितानि घट्यात्मकमानानि नक्षत्रस्य षष्टिघटिकात्मकत्वे ज्ञेयानि। नक्षत्रमानस्य न्यूनाधिकत्वे तु त्रैराशिकेन स्वयं तेषां मानानि ज्ञेयानि।

एवमुपर्युक्तस्य मूलदोषस्य कदाचित् परिहारोऽपि भवतीति शास्त्रसम्मतिः। तदत्र मुर्तचिन्तामणौ लिखति आचार्यः रामदैवज्ञो यथा[1]-

**स्वर्गे शुचिप्रोष्ठपदेषु माघे भूमौ नभःकार्तिकचैत्रपौषे।**
**मूलं ह्यधस्तात्तु तपस्यमार्गवैसाखशुक्रेष्वशुभं च तत्र॥**

शुचिः = आषाढः, प्रौष्ठपदः = भाद्रपदः, इषः = आश्विनः, नभः = श्रावणः, तपस्यः = फाल्गुनः, शुक्रः = ज्येष्ठा।

अर्थात् आषाढ-भाद्रपद-आश्विन-माघमासेषु मूलस्य स्वर्गे वासः भवति, श्रावण-कार्तिक-चैत्र-पौषेषु तस्य भूमौ वासो भवति तथा फाल्गुन-मार्गशीर्ष-वैशाख-ज्येष्ठमासेषु मूलं पाताललोके तिष्ठति। मूलस्य यत्र वासो भवति तत्रैव तस्य अशुभम्फलमपि भवति।

अत्र पीयूषधाराटीकाकारः सप्रमाणं भावं स्पष्टयँल्लिखति यत्[2]- "**द्रव्याद्यभावेन शान्तिकं कर्तुमशक्नुवतः पुंसः स्वर्गपातालनिवासित्वेन मूलस्यारिष्टदोषस्तथा न प्रभवेत्। यदा तु भूमावेव निवासस्तदा दोषनिवारणं नैव स्यादित्यशक्तेनापि शान्तिकं विधेयम्। नैतावता प्रागुक्ते विषये शान्त्यभाव एव किन्तु यथाशक्ति तत्रापि शान्तिकं विधेयम्। शक्तेन तु सर्वत्रैव विधेयम्**। तदुक्तं ज्यौतिषार्णवे[3]-

**मार्गफाल्गुनवैशाखज्येष्ठे मूलं रसातले।**
**माघाश्विननभस्येषु शुचौ मूलं सुरालये॥**
**पौषश्रावणचैत्रेषु कार्तिके भूमिसंस्थितम्।**
**भूमिष्ठं दोषबहुलं स्वल्पमन्यत्रसंश्रितम्॥** इति॥

---

[1] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.56
[2] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.56 पीयूषधारायाम्
[3] तत्रैव, मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.56 पीयूषधारायाम्

प्रसंगेऽस्मिन् ज्योतिषरत्ने सङ्क्रान्तिपरत्वेनापि मूलनिवासोऽभिहितः । तद् यथा[1]-

**वृषालिसिंहेषु घटे च मूलं दिवि स्थितं, युग्मतुलाङ्गनान्त्ये ।**
**पातालगं, मेषधनुःकुलीरनक्रेषु मृत्याविति संस्मरन्ति ॥**
**स्वर्गे मूले भवेद्राज्यं पाताले च धनागमः ।**
**मृत्युलोके यदा मूलं तदा शून्यं समादिशेत्** ॥ इति ॥

अत्र मेषार्के, धनुरर्के, कुलीरार्के, तथा मकरार्के मूलवासः मृत्युलोके कथितः। अर्थात् मेष-धनुः-कर्क-मकरराशिषु यदा भवति सूर्यस्तदा मूलं मृत्युलोके तिष्ठति। एतेषु चतुर्षु राशिषु स्थितेषु सूर्येषु मूलनक्षत्रोत्पन्नस्य जातकस्य मूलशान्तिरवश्यमेव कार्या।

एवं ह्यभुक्तमूलविषयेऽथवा मूलविषय आचार्याणान्नैकमत्यमिति पूर्वविवेचनया स्पष्टमेव। अतस्तत्र विद्भिर्देशकालानुगुणं विवेकेन निर्णयः कर्तव्य इति दिक् ॥

**सहायकग्रन्थविवरणम्-**

| क्र.सं. | ग्रन्थनाम | लेखकः | सम्पादकः | प्रकाशकः/ वर्षम् |
|---|---|---|---|---|
| 1 | बृहत्पारशरहोराशास्त्रम् | महर्षिपराशरः | प. देवचन्द्र झा | चौखम्भा संस्कृत संस्थान, वाराणसी / 1990 ई. |
| 2 | सङ्ग्रहशिरोमणिः | श्री सरयूप्रसाद द्विवेदी | आ.कमलाकान्तशुक्लः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी/ 1996 ई. |
| 3 | नारदसंहिता | महर्षिनारदः | आ.रामजन्म मिश्रः | चौखम्भा संस्कृत संस्थान, वाराणसी / 1984 ई. |
| 4 | मुहूर्तमार्तण्डः | नारायणदैवज्ञः | पं.कपिलेश्वर शास्त्री | चौखम्भा संस्कृत संस्थान, वाराणसी / 1991 ई. |
| 5 | मुहूर्तपारिजात | पं. सोहनलाल व्यासः, | पं.सीताराम झा | चौखम्बा विद्याभवन, वाराणसी / 1988 ई. |


[1] मुहुर्तचिन्तामणिः, नक्षत्रप्रकरणम्, श्लो.56 पीयूषधारायाम्

| | | | | |
|---|---|---|---|---|
| 6 | मुहुर्तचिन्तामणिः | रामदैवज्ञः | आ.विन्ध्येश्वरी प्रसाद द्विवेदी | चौखम्बा सुरभारती प्रकाशन, वाराणसी, / 2014 ई. |
| 7 | ज्योतिषचन्द्रिका | पं. रेवती रमण झा | दै.चन्द्रशेखर झा | प.रेवतीरमण झा, ग्राम-मधुपिर, पत्रा-कमतौल (दरभंगा) / सं.1995 |

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**
महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# अयनांशविमर्शः

डॉ. पुनीतागुप्ता*

ज्योतिषशास्त्रे कस्यापि दृश्यपदार्थस्य साधनं ज्ञानञ्चायनाशं विना नैव भवति, अतो सिद्धान्तस्य दृश्यत्वप्रसंगे अस्य ज्ञानमावश्यकमिति। जातकपद्धतेः प्रौढमनोरमाटीकायां दिवाकरदैवज्ञेन प्रोक्तं **यदयनांशसंस्कृतमहाः क्रान्त्यादिसाधनार्थमेव स्पष्टाः भवेयुर्न तिथ्यादिसाधनार्थं फलादेशार्थञ्च।**[1] प्रसङ्गेऽस्मिन् अयनस्यंशा अयनांशाः भवन्ति। अयनांशशब्देन नक्षत्रसापेक्षत्वेन संपातस्य चलनांशस्यावबोधो भवति। अयनांशस्य खगोलशास्त्रे महत्वपूर्णं स्थानं विद्यते। अयनांशो नाम क्रान्तिपातस्य चलनेनोत्पन्नांशाः। पातोनाम नाडी- क्रान्तिवृत्तयोः सम्पातः, क्रान्त्यभावे यावन् ग्रहश्चक्रशुद्धः स क्रान्तिपातः। नाडीक्रान्तिवलययोः संपातः क्रान्तिपातः कथ्यते। अस्य भ्रमणं नैव भवतीति न कथयितुं शक्यते। अत्र द्विविधं मतं तावदुपलभ्यते पूर्णचक्रात्मकं भ्रमणं ३६० अंशात्मकं तथा दोलात्मकभ्रमणं १०८ अंशात्मकं दोलनं च। सूर्यसिद्धान्तीयमतप्रतिपादनावसरेऽपि भास्करेण क्रान्तिपातस्य विलोमागतिः स्वीकृता। यथा-

**विषुवत्क्रान्तिवलययोः संपातः क्रान्तिपातः स्यात् ।**
**तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे ॥**
**अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्।**
**तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६९ ॥**[2]

खगोलीयपरिभाषानुसारेण नाडी-क्रान्तिवृत्तयोः सृष्ट्यादिकाले यत्र सम्पातः स निरयणमेषादिः, तदानीमयनांशाभावात्, कालान्तरेण स बिन्दुः वेधेन चलरूपः सिद्धः, अतः सृष्ट्यादिकालिकवर्तमानकालिकनाडी-क्रान्तिवृत्तयोः सम्पातयोर्यदन्तरं त एवायनांशाः। गोलीयरेखागणितस्य नियमानुसारेण गोले कयोरपि महद्वृत्तयोः सम्पातः स्थानद्वये भवति अतो गोलपृष्ठस्थितयोः नाडी-क्रान्तिवृत्तयोरपि प्राच्यां प्रतीच्यां च

---

* सहायिकाचार्या, ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

स्थानद्वये संयोगो भवति अतो विषुव-भवृत्तयोस्सम्पातरूपबिन्दू क्रमशः विषुव-शरत्सम्पाताख्यौ भवतः कुत्रचिदयं ग्रहरूपेणापि स्वीकृतोऽस्ति ।

**अयनांशसाधनम् -**

वर्तमागसूर्यसिद्धान्ते अयनस्य त्रिंशत्कृत्यो (30×20) युगभगणा निर्दिष्टाः । यथोक्तं-

**त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते ।**
**तद्गुणाद्भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ॥**
**तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः ।**
**तत्संस्कृताद्ग्रहात् क्रान्तिच्छायाचरदलादिकम् ॥**[3]

सृष्ट्यादौ नाडीक्रान्तिवलययोः सम्पातो यत्रासीत् स निरयणमेषादिः। तदानीमयनांशाभावात् । ततोऽत्यल्पगत्या पूर्वाभिमुखं सप्तविंशतिभागान् गत्वा ततः परावृतः स सम्पातस्तयैव गत्या प्रत्यङ्मुखं चलन्त्स्वस्थानमागत्य ततोऽपि पश्चिमं सप्तविंशतिभागान् याति ततः पुनरपि परावृतस्तत्तुल्ययैव प्राग्गत्या स्वस्थानं यदाऽऽयाति तावदष्टोत्तरशतांश-चलनं भवति, तच्चैकं परिलम्बनमेको भगणो वा तत्सम्पातबिन्दोर्भवति। तस्य चलनमाचार्यैः (प्राचीनैः) वेधेन विज्ञाय ततोऽनुपातेनैकस्मिन्महायुगे ४३२०००० सौरवर्षात्मके तद्गतिः ६०० भगणतुल्या पठिता। अतोऽनुपातेनेष्टाहर्गणेऽयनभगणादिः। यथा - एकस्मिन् महायुगे सौरवर्षाणि = ४३२०००० मितानि पाठपठितानि। अयनभगणाः = ३०x२० = ६००

अतोऽनुपातः -

युगसावनदिवसैः षड्शतानि अयनभगणास्तदाभीष्ट दिवसैः (अहर्गणैः) किमिति- = एकदिवससम्बन्धि अयनगतिः

अस्य भुजांशा = भु.

एकस्मिन् भगणे अयनगतिः = (२७$^{o}$ + २७$^{o}$) + (२७$^{o}$+ २७$^{o}$)

= ४ (२७$^{o}$) = १०८ अंशाः।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

पुनरनुपात: - यदि भांशैरयनस्य चलनं १०८ अंशमिनि तदा अभीष्ट भुजांशैः किमिति -

= (३६ अनेनापवर्तिते जातम्) =

= अभीष्टाहेऽयनयलनांशाः

मेषारम्भानुसारी स्थानेऽभिजित् सम्बद्धविचार: -

अत्र यदि मूलरूपेण विचार्यते तदा प्रतिभाति यन्निरयणमेषादितः मीनान्तं यावत्तथा निरयनाश्विन्यादित: रेवत्यन्तं यावत् ध्रुवकवशात् शरवशात् नियताङ्काः स्व-स्व काले विभिन्नाचार्यैः प्रदत्ताः। अभिजिद्भागसंस्कारं विनैव विसंगतिः न स्यात्। यतः संस्कारं विना हि चित्रा भार्धान्तरे तिष्ठति। अन्यथा तत्रापि विसंगतिः स्यात्। यतः सूर्यसिद्धान्तोक्तभोगः निरयणाख्यप्रतिपादकः। वर्त्तमान-भोगेनान्तरमयनांशः स्यादिति। यतः वसन्तविषुवत् क्रान्तिवृत्ते विलोमेन भ्रमत्यतः सप्तविंशतिनक्षत्रपुञ्जेषु सम्पातगतत्वमिति कालान्तरेण भवत्येव।[4]

**वराहमिहिरोक्त रेवतीयोगतारायाः वर्त्तमानस्थिति: -**

प्राचीनसौरे वाराहप्रतिपादित-अश्विन्यादिस्तथा चित्रायाः स्थितिः बृहत्संहितोक्तप्रमाणेन नक्षत्रयोगतारासम्बन्धेन रेवती योगतारायाः निर्णयो भवति। यथा चन्द्रवारध्याये-

**षडनागतानि पौष्णात् द्वादशरौद्राच्च मध्ययोगीनि ।**
**ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते ॥**[5]

अर्थात् रेवत्याग्रहवत्यदनन्तथा आत दश अर्थात् आर्द्रादि-अनुराधान्तं ज्येष्ठाद्यानि नवनक्षत्राणि उत्तरभाद्रान्तं नक्षत्रचक्रस्य त्रयो विभागाः पूर्वाधारेण चन्द्रगुतिवशात् कृताः।

प्रथमे ६ द्वितीये १२ तृतीये ९ नक्षत्राणि । एषूपर्युक्त विधानेन चन्द्रः योगमेति। अशात्मक परिकल्पनया ६°/१२°/९° प्रमाणेन आरम्भस्थानात् योगतारास्थानं मन्यते। अर्थात् रेवत्यादिषडक्षणां योगतारा विभागारम्भात् ६° अन्तरेण तदासन्ने विद्यन्ते। आर्द्रादि द्वादशेषु विभागारम्भात् योगतारा १२° अन्तरेण तथा ज्येष्ठादिषु ९° अन्तरेण च। अत्र
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

प्रमाणेन विश्लेष्यते तथापि रेवतीनक्षत्रपुञ्जे बहुतारकत्वात् चित्रापक्षीयविचारो नक्षत्राणां रूपमश्विन्यौ व्याप्तमिति वैदिकप्रमाणं सम्यक् विभाति।

**अभिजितगणनया: परम्परागतसम्बन्धः -**

वराहोक्त"प्रमाणेन अभिजिनक्षत्रयोगतारा-उत्तराषाढ-योगतारास्थानीयपद्धतिमध्ये उत्तराषाढानक्षत्रस्थानेऽभिनितः पूर्णभोगः ४°/ १३ उल्लेखात् पुनर्वस्वादि गणना तात्कालिक धर्मकर्मकालबोधकनिरयगणना अश्विन्यादिगणना अश्विन्यादिगणना तथा सायणगणना ऋतुचक्रबोधक-विषुवदिवसस्य च प्राचीनत्वं प्रतिपादयति।[6]

विषुवतः पूर्वेऽभिजितन्नक्षत्रं सूर्योदयत्-विषुवान् शरतसं पातादभिजितन्नक्षत्रं ४° वर्तते। अदिति (पुनर्वसु) मध्ये सम्पतविषुवदिवसे शरतसम्पत्- अभिजितपद्धतिः मान्यः। ऋग्वेद: - १०/७२/५ प्रमाणेन गणनसम्बन्धेऽभिजित् वेदाङ्ग- कालिकृत्तिकादिगणना नामनिर्देशेन स्फुटत्यमेति ।[7]

**अयनांशाभावकाल: -**

वेदोपनिषदादिनामध्ययेन स्पष्टतया प्रतिभाति यदयनबिन्दोः परिभ्रमणस्य ज्ञानं भारतीयान् वैदिकालादेवासीत् परन्तु परीक्षणविधिसहितसाधनस्य स्पष्टोल्लेखः वराहमिहिरस्य कालात् सप्ताश्विसागर- (४२७) मितशकादेव दृश्यते।[8]

नक्षत्रचक्रस्य मेषादित्वेन स्थितत्वात् सोऽयनांशाभावकालः। आर्यभट्टीयस्य रचनाकाले ४२१ मितशके आर्यभटेन भगणादिं मेषारम्भबिन्दुरूपेण स्वीकृत्यायनचलनं न प्रतिपादितं, कल्प्यते तत् काले शून्यानां आसीत्। ४२७ शकात् पूर्ववर्तिग्रन्थेषु अस्य चर्चा नोपलभ्यते परन्तु विभिन्नसिद्धान्तप्रन्थेष्वयनांशमानं दृष्टा त्रैराशिकानुपातेन भारतीयज्योतिषग्रन्थानां सहाय्येन च विभिन्नाचार्याणां मतेन यो ह्ययनांशाभावकालो सिद्ध्यति सोऽत्रोपस्थाप्यते-

| | |
|---|---|
| पञ्चसिद्धान्तिकार्या वर्तमान सूर्यसिद्धान्ते सिद्धान्ततत्त्वविवेके च | - ४२७ शक: |
| करणप्रकाशे करणकुतुहले च | - ४४५ शक: |
| मुञ्जालमतेन | - ४३४ शक: |
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

| | |
|---|---|
| करणकमलमार्तण्डे ग्रहलाघवे च | - ४४४ शकः |
| भास्वतीकरणग्रन्थे | - ४५० शकः |
| द्वितीयार्यसिद्धान्ते | - १५२७ शकः |
| द्वितीयार्यसिद्धान्तोक्तपराशरमतेन | - ५३२ शकः |

**ज्योतिर्विज्ञाने अर्कसोमयाजिमहोदयेनोल्लिखितं यदयनचलनं प्रथमतो वराहमिहिराचार्येणाविष्कृतम्।** [9] परन्तु वेद-वेदाङ्गेष्वेतद्विषयकं वचनं दृष्ट्वा तन्मतं युक्तियुक्तं न प्रतिभाति तथापि एतद्सत्यमस्ति यत् वराहमिहिरकालेऽस्य ज्ञानविधिः विशद्रुपेण प्राप्यते।

**वैदिककाले नाडी-भवृत्तयोस्सम्पातस्थले कृतिकानक्षत्रस्योल्लेखः प्राप्यते।10** तदनन्तरं वेदाङ्गज्योतिषे महात्मना लगधेन प्रतिपादितं यदयनबिन्दु आश्लेषार्धे धनिष्ठार्थे च सम्प्रति दृश्यते। यथा -

**प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुद्क ।**
**सार्पार्धे दक्षिणार्कस्य माघश्रवणयोः सदा ॥** [11]

बृहत्संहितायामाचार्यवराहमिहिरेणायनचलनविषये पराशरादीनां मतमुपस्थापयन् सार्पान्त्यपादद्वयाद्दक्षिणायनं धनिष्ठाद्यादुत्तरायणञ्च संसूच्य स्वमतं प्रकाशयन्नुल्लिखितं यत् साम्प्रतं (वराहकाले) कर्कादितो (पुनर्वसुतृतीयपदान्तात्) याम्यायनं मकरादितो (उत्तराषाढाद्वितीयचरणादारभ्य) सौम्यायनं भवतीति । तद्यथा-

**आश्लेषार्द्धाद्दक्षिणमुत्तरयनं रवेर्धनिष्ठाद्यम्।**
**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥**[12]

**अयनांशः -**

**खखाष्टभूम्यून - १८०० शकात्खशैलैः ७० ।**
**खपंचभि ५० र्भागकलादिलब्ध्योः ।**
**यदंतरं तत्सहिता द्विहस्ता २२ ।**
**अष्टौ ८ सुरा ३३ स्तेऽयनभागसंज्ञाः ॥** [13]

शकवर्षात् १८१५ अष्टादशशतवर्षाणि विशोध्य यत् शेषं १५ तस्मात् एकत्र सप्तत्या लब्धं फलमंशादि ०/१२/५१, अन्यत्र पंचाशता लब्धं फलं कलादि ० ।१८, अनयोरंतरं अं. ० ।१२ ।३३, अनेनायनां शक्षेपके अं. २२/८/३३ संयुते सति जाता इष्टवर्षे १८१५ मेषसंक्रमणकाले अयनांशाः २२ ।२१ ।६ ।

**अयनांशगतिः -**

वराहकालादेवायनांशगणनाया आरम्भो दृश्यते परन्तु तत्रायनगतिसम्बन्धिनं वर्णनं नोपलभ्यते। रोमक-सोम-शाकल्य ब्राह्म- वासिष्ठसिद्धान्तेषु महायुगे दोला- भ्रमणेन ६०० अयनभगणाः सन्ति।[14] येनास्य वाषिकी गति: ५४" विकलामिता सिद्ध्यति। वर्तमानसूर्यसिद्धान्तेऽपि ६०० भगणास्तस्य सन्ति येन तत्रापि ५४" विकलैव गतिः सिद्ध्यति। मुञ्जालमतेन कल्पेऽस्य भगणाः १९९६६९ भवन्ति अतस्त्रैराशिकगणितेन गतिः (५९ ।५४ ।२ ।३१ ।१२) = ५९.९००७ विकलामिता। द्वितीयार्यभटपराशरमतेन च ५८१७०९ भगणाः, ४६.३ विकलात्मिका च गतिरस्ति।[15] ग्रहलाघवे मल्लारिणा प्रोक्तं यदयनांशस्य धनत्व ऋणत्वविषये उपलब्धिरेव वासना परं तथापि तेन दोलाभ्रमणं चतुर्विंशत्यंशाः परमायनीशाश्च स्वीकृत्य कलामिता गतिः स्वीकृता, तेषां मते ये ५४" विकलामतानुयायिनः सन्ति ते २७ मितं परमायनांशाः स्वीकुर्वन्ति। करणकुतूहले भास्करेण- "अयनांशाः करणाब्दलिप्ताः युक्ता भवास्तद्युतमध्यमानोः"[16] इत्यादिनास्य कलामिता गतिः प्रदत्ताः। सर्वानन्दकरणग्रन्थे ग्रन्थकारेणाधुनिकविधिना अयनगतिकारणं निरूपयन् ५०.२ विकला गतिः स्वीकृता । यथा-

**पृथिव्याः स्वभ्रमणवशान्निरक्षभागाः क्षिप्ताः स्युर्वहिरुडुपार्कजाच्च तत्र।**

**आकर्षाच्छ्रादि शनैरितः प्रतीच्यां संपातौ द्व्यगुखशरोन्मिता विलिप्ताः।।**

**अयनांशपरीक्षणम् –**

आचार्यवराहमिहिरेण परीक्षणविधिः प्रदर्शनपूर्वकं प्रतिपादितं यत्– रवेरुदयकाले अस्तकाले वा दूरस्थवृक्षादिचिह्नस्थवेधद्वारा वेरुत्तरगमनदर्शने उत्तरायणं, दक्षिणे गमने याम्यायनं वाच्यम् । यथा– **दूरस्थचिह्नवेधादुदयेऽस्त महति** ।[17]

सूर्यसिद्धान्ते प्रोक्तं यत्–विषुवद्द्वये अयनद्वये च वेधायनस्य स्फुटदृक्कुल्यता विधेया परीक्षणार्थं करणद्वाराऽथ च छायाद्वारा रविं प्रसाध्य छायार्कात् करणागते हीने उभयोरन्तरं भचक्रं प्राक् चलितं ज्ञेयमर्थात् सम्पातोऽश्विनीतः पश्चाद् गतो ज्ञेयः । यथोक्तं-

**स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये प्राक् चक्रं करणागते ।**[18]

एतदनुरूपमेव भास्करेण प्रकारो प्रदर्शितः, यस्मिन् दिने सम्यक् प्राच्यां रविरुदितो दृष्टस्तद्विषुवद्दिनम्। तस्मिन् दिने गणितेन स्फुटो रविः कार्यः। तस्य **रवेर्मेषादेश्च यदन्तरं तेऽयनांशाः इत्यनेन स्पष्टीकृतः ।** [19]

## सन्दर्भग्रन्थसूची

1.जा.प., श्लो.सं.1
2. सि.शि.,गो.अ.,गो.ब.अ., श्लो.सं.17,18
3. सू.सि.,त्रि.अ., श्लो.सं.9,10
4. अय.वि.,पृ.सं.119
5. बृ.सं.,चन्द्र.अ., श्लो.सं.7
6. ओरा.ग्र.,पृ.सं.88/89
7. ऋक्.10/72/5, भा.ज्यो. पृ.सं.53,54
8. बृ.सं.,पञ्च. ग्र.
9. भा.ज्यो.वि., पृ.सं.137
10. श.ब्रा.,2/1/2,3
11. वेदा. ज्यो.
12. बृ.सं., आदि.अ., श्लो.सं.1,2
13. केत.ग्रह., स्प.अ.,श्लो.सं.6
14. रो.सि., स्प.अ.,श्लो.सं.3
15. ब्र.सि., अ.2,श्लो.सं.1
16. (क)सो.सि., स्प.अ.,श्लो.सं.31
(ख) भा.ज्यो.वि., पृ.सं.440
(ग) कर.कु., स्प.अ.,श्लो.सं.17
17. बृ. सं, आदि.अ.,श्लो.सं. 3
18. सू.सि. श्लो.सं.11
19. सि.शि. गणि, 16,12 वासनाभाष्ये

❑❑❑

महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# संस्कृत-विज्ञान-वैभवम्

प्रो. बनमाली बिश्वालः*

## संस्कृते विद्यावैभवम्

भारतीयाः समाः विद्याः पूर्वर्षिभिर्विचिन्तिताः ।
अक्षुण्णास्तास्तथैवाद्य संस्कृते तु सुरक्षिताः ।।
पारम्परिकविद्यानामुपविद्याः भवन्ति याः ।
दृष्टाः प्रोक्ताश्च तास्सर्वाः सन्त्येव संस्कृते पुनः ।।
वेदोपनिषदां भाषा पुराणानां तथैव च ।
भाषा संस्कृतमेवास्ति संस्कृति-परिपोषकम् ।।
भारतीय-दर्शनस्य भाषैव संस्कृतं महत् ।
ज्ञान-विज्ञानयोर्भाषा भाषेयं साहित्यस्य वै ।।
विद्यावैभवमत्रत्यं भारतीयञ्च प्रायशः ।
शास्त्र-साहित्य-रूपेण संस्कृतेऽस्ति सुरक्षितम् ।।
शासनाच्छास्त्रमित्याहुः भाषा च भाषणात् पुनः ।
शास्त्ररूपेण विख्यातं भाषारूपेण संस्कृतम् ।।
शास्त्रस्य विविधाः पक्षाः संस्कृतेऽत्र समाहिताः ।
क्वचित्प्रकाशितास्ते च क्वचित्ते चाप्रकाशिताः ।।

## संस्कृत-शास्त्रपरम्परा

शास्त्रपरम्परा चात्र संस्कृतेऽस्ति सुरक्षिता ।
प्राच्यार्वाचीनयोश्चात्र सेतुभूतञ्च संस्कृतम् ।।
वेदवेदाङ्गविद्यास्ताः धर्मदर्शनसङ्गताः ।
अमरत्वं भजन्त्येते संस्कृतस्य प्रभावतः ।।

---

* अधिष्ठाता - शैक्षिकवृत्तम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

## संस्कृतेचतुर्वर्ग-शास्त्राणि

धर्मार्थकाममोक्षाश्च पुरुषार्थाः भवन्ति वै ।
एकैकमधिकृत्यात्र शास्त्रमेकं विनिश्चितम् ।।
संस्कृते भारतीयञ्च धर्मशास्त्रं प्रतिष्ठितम् ।
दायभागोदायादाश्चभवन्त्येतेन निर्णीताः ।।
मनुश्च स्मृतिकारोस्ति याज्ञवल्क्य-पराशराः ।
तेषाञ्च स्मृतिग्रन्थेषु धर्मशास्त्रं सुरक्षितम् ।।
भारतीयमर्थशास्त्रं कौटिल्येन प्रवर्तितम् ।
वात्सायनेन प्रोक्तञ्च कामशास्त्रं प्रसिद्ध्यति ।।
दर्शनैर्मोक्षशास्त्रञ्च सर्वथा प्रतिपादितम् ।
आस्तिकं दर्शनञ्चात्र षड्धा विभाजितं पुनः ।।
कृतवान् कपिलस्सांख्यं योगं पतञ्जलिः पुनः ।
गौतमो न्यायशास्त्रञ्च कणादश्च वैशेषिकम् ।।
जौमिनिश्चैव मीमांसां वेदान्तं वादरायणः ।
चार्वाक-बौद्ध-जैनाश्च स्वदर्शनञ्च संस्कृते ।।

## आर्ष-विज्ञानानि

दिशति त्रिविधं ज्ञानं भारतीया परम्परा ।
मूलं परम्परायाश्च संस्कृतेऽस्ति प्रतिष्ठितम् ।।
प्रथमञ्च भवेज्ज्ञानं विज्ञानं द्वितीयं मतम् ।
तृतीयञ्चास्ति सञ्ज्ञानं सर्वं समुदितं महत् ।।
ज्ञाने च साङ्ख्ययोगौ स्तः न्याय-वैशेषिके पुनः ।
वेदान्तश्चाथ मीमांसा सर्वाणि दर्शनानि वै ।।
विज्ञाने लोकशास्त्राणि सर्वाण्येव भवन्ति हि ।
ज्योतिषा शिल्पशास्त्रेण चायुर्वेदोऽपि सम्भवेत् ।।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

अन्तर्भवन्ति संञ्ज्ञाने व्यवहारादयः समे।
तत्र च धर्मशास्त्रस्य चान्तर्भावो भवेत् क्वचित्।।
युगमद्यतनीयञ्च वैज्ञानिकं निगद्यते।
विज्ञान-प्रगतिश्चाद्य नभस्स्पृशति सर्वथा।।
प्रभावयति विज्ञानं सद्यो मानव-जीवनम्।
आर्षं भवतु विज्ञानमथवाधुनिकं पुनः।।
सर्वज्ञानमयो वेदः इति लोकैस्तु कथ्यते।
द्रष्टा ऋषिस्तु मन्त्राणां प्रणेता न भवेत् पुनः।।
प्राचीनो मन्यते वेदो विश्वे लिखित-वस्तुषु।
सन्ति विज्ञान-तत्त्वानि तत्र प्रचुरमात्रया।।
न केवलं वेदाः किन्तु संस्कृत-वाङ्मयं पुनः।
समृद्धयति विज्ञानं सर्वविधं न संशयः।।
व्यजानन् पूर्वजास्सर्वे त्वाचार्याश्च महर्षयः।
विज्ञानं सर्वविधञ्च गणितं ज्योतिषं तथा।।
खगोलमेव विज्ञानं चिकित्साविज्ञानं तथा।
भौतिकी-विज्ञानं चैव विज्ञानं च रसायनम्।।
वनस्पतीय-विज्ञानं यन्त्र-विज्ञानमेव च।
एवं भूगर्भ-विज्ञानं जीव-विज्ञानमेव च।।
आधुनिके च विज्ञाने चमत्कारा नवा नवाः।
किन्तु प्रायो न जानन्ति बहवस्तु पुरातनाः।।
विज्ञानानि च नैकानि चाधुनिकानि संस्कृते।
सर्वेषामेव तेषान्तु परिचयस्सुदुष्करः।।
अतस्तेष्वेवमुख्यानि प्राचीनानि च कानिचित्।
नामग्रहणपूर्वकमुल्लिख्यन्ते समासतः।।
चिकित्साख्यञ्च विज्ञानमायुर्वेदो निगद्यते।

चरक-सुश्रुतावत्र द्वावाचार्यौ प्रसिद्ध्यतः ।।
गाणितिकी च सा विद्या संस्कृतेऽस्ति प्रवर्तिता ।
गणितस्य विधास्सर्वास्संस्कृतेऽस्ति सुचिन्तिताः ।।
ज्यामित्या ज्योतिषञ्चात्र परिमितिश्च सांख्यिकी ।
रेखागणितमप्यत्र संस्कृतेन पुरस्कृतम् ।।
मूलभूता दशसंख्याः संस्कृतसम्मताः पुनः ।
विश्वाय शून्यमप्यत्र संस्कृतेन समर्पितम् ।।

**आर्ष-वैज्ञानिकाः**

एतेषां विज्ञानानाञ्च सन्ति ये च प्रवर्तकाः ।
ऋषयस्ते समे त्वत्रचार्ष-वैज्ञानिका मताः ।।

**आर्यभट्टः**

आचार्यश्चार्यभट्टश्च प्रमुखस्तेषु मन्यते ।
यस्य खगोलविज्ञाने योगदानं स्मृतं महत् ।।
एवं तस्य गणितेऽपि योगदानं विशिष्यते ।
विश्वाय शून्यसिद्धान्तं प्रदत्तवान् स्वमेधया ।।
ज्ञातवानार्यभट्टस्तु त्रीणि शास्त्राणि सर्वथा ।
कालक्रियाञ्च गोलञ्च गणितञ्च विशेषतः ।।

**भास्कराचार्यः**

द्वितीयोभास्कराचार्यःलीलावतीं प्रणीतवान् ।
गणितं लोकमान्यञ्च यत्रास्ति प्रतिपादितम् ।।
जगाद शङ्कुयन्त्रञ्च सिद्धान्तानां शिरोमणौ ।
यस्य खगोलविज्ञाने चोपयोगो महान् मतः ।।

**नागार्जुनः**

रसायने च विज्ञानेनागार्जुनः प्रसिद्ध्यति ।
तस्य रसार्णवो ग्रन्थः प्रसङ्गेऽस्मिन् विशिष्यते ।।
प्राचीने रसशास्त्रे धातुनिर्माणपद्धतिः ।
नागार्जुनस्य विशिष्य योगदानञ्च मन्यते ।।

**भरद्वाजः**

भरद्वाजोमहर्षिस्तु महान् वैज्ञानिको मतः ।
वैमानिके च विज्ञाने तद्योगदानमुत्तमम् ।।
पुष्पकाख्यं विमानञ्च रामायणेस्ति वर्णितम् ।
कुवेराच्च बलान्नीत्वा रावणो यत् प्रयुक्तवान् ।।

**खगोलविज्ञानम् (Astronomy)**

तेषु खगोलविज्ञानं वैदिकं नास्ति संशयः ।
आर्यभट्टाच्च पूर्वं हि वेदेष्वपि सुचर्चितम् ।।
संहिता तैत्तिरीया तु तन्नाम्नारण्यकं पुनः ।
सूर्यं विश्वस्य चाधारं स्वीकुरुतस्तु सर्वथा ।।
किन्त्वत्र चार्यभट्टस्य योगदानं महीयते ।
येन चाविष्कृतं पृथ्वी स्वकीयाक्षे प्रवर्तते ।।
रहस्यं ज्ञातवान् सोऽपि सूर्य-चन्द्रोपरागयोः ।
ग्रन्थे तु गोलपादे स तथ्यमाविष्चकार वै ।।
छादयति शशी सूर्यं भूच्छाया शशिनं पुनः ।
एवं प्रसिद्धयति लोके ग्रहणं सूर्य-चन्द्रयोः ।।
वराहमिहिरस्यापि खगोलेनुभवो महान् ।
यस्य खगोलविज्ञाने त्ववदानं महत् स्मृतम् ।।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

### गणितम् (Mathematics)

गणिते चार्यभट्टस्ययोगदानं महत्तमम् ।
परं व्याख्यायते तच्च मया त्वत्र समासतः ।।
गणितीयञ्च शून्यन्तु चार्यभट्टेन चिन्तितम् ।
एवमुद्भाविता तेन दशमलाख्यपद्धतिः ।।
परिणाहश्च वृत्तस्य यश्चास्त्यासन्नपूर्वकः ।(value of PI)
उद्भावितोऽस्ति सर्वादौ चार्यभट्टेन धीमता ।।
अक्षराङ्कपद्धतिश्च प्रसिद्धार्यभट्टस्य वै ।
स्वरव्यञ्जनवर्णाश्च संख्याः बोधयितुं क्षमाः ।।

### ज्यामितिशास्त्रम् (Geometry)

एवं ज्यामितिशास्त्रञ्च प्राचीनं भारते पुनः ।
यथा बौधायनस्यात्र शूल्वसूत्रं प्रसिद्ध्यति ।।
वर्णयति च त्रिभूजं तथा चतुरसं पुनः ।
एवमन्ये विषयाश्च ज्यामितेस्सन्ति वर्णिताः ।।

### भौतिकी-विज्ञानम्(Physics)

निमेषार्धेन सूर्यस्य गतिर्भवति यावती ।
ऋग्वेदस्य मतं तत्र प्रसिद्ध्यति विशेषतः ।।
योजनानां सहस्रं द्वे द्वे शते द्वे च योजने । ( योजनानि = माइल)
निमेषार्धेन सूर्यस्तु क्रमते हि मतं ध्रुवम् ।।
उपनिषत्सु सर्वासु तैत्तिरीये विशेषतः । (ब्रह्मानन्दवल्ली, अनुवाकम्-)
जगत्सृष्टि-प्रक्रिया च क्रमान्निरूपिता पुनः ।।
खमात्मा जनयत्यत्र चाकाशो वायुमेव हि ।
वायुरग्निं तथा चाग्निर्जलं जनयति क्वचित् ।।
भुवं जनयति वारि क्रमः सृष्टेश्च शाश्वतः ।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

स्वीक्रियते क्रमोप्येषः काले चाधुनिके पुनः ।।
प्रसिद्ध्यति कणादस्य वैशेषिकञ्च दर्शनम् । (ई.पू. – शतकम्)
परमाणुसिद्धान्तश्च तत्र विश्लेषितो महान् ।।
कारणानामभावाच्च कार्याभावो न संशयः ।
अभावादेव कार्याणां कारणाभाव ईष्यते ।।
भौतिक-नियमा नैके काणादेनापि निर्मिताः ।
भौतिकानपि सिद्धान्तानवगच्छति शाश्वतान् ।।
तेन न्यूटनात् पूर्वं गतेश्च नियमत्रयम् ।
वैशेषिके च सूत्रे प्रोक्तं वेग-प्रसङ्गतः ।।
अगस्त्यसंहितायाञ्च विज्ञानं भौतिकं पुनः ।
सुष्ठूपलभ्यते तत्र विद्युदुत्पत्ति-वर्णनम् ।।
संहिता च बृहत्पूर्वा संस्कृते या प्रसिद्ध्यति । (अ. )
इन्द्रधनुस्स्वरूपञ्च तत्र निरूप्यते क्वचित् ।।
गुरुत्वाकर्षणज्ञानं पतञ्जलेश्चावर्तत ।
बहुत्र वर्णितं यत्तु सूत्र-व्याख्या-प्रसङ्गतः ।।

### रसायन-विज्ञानम् (Chemistry)

रसायनञ्च यच्छास्त्रमाधुनिकं तु सर्वथा ।
संस्कृते तच्च विज्ञानं महत् पुरातनं मतम् ।।
तदाधुनिक-विज्ञानं प्राचीनं वैदिकं मतम् ।
प्रामुख्येनैव किञ्चित्तु प्रसङ्गतो विचार्यते ।।
रसार्णवे च रसानां वैशिष्ट्यं प्रतिपादितम् ।
लौहस्य षड्विधं प्रोक्तं तच्छ्वरूपं निरूपितम् ।।
सुवर्णं रजतञ्चैव ताम्रेण तीक्ष्णमेव च ।
षड्विधेष्वेव लौहेषु वङ्गं भुजङ्गमं पुनः ।।

वाग्भट्टस्य महर्षेश्च रसतन्त्र-समुच्चये। (.-)
तीर्यक्पातनयन्त्रस्य संरचनास्ति वर्णिता।।
षड्विधं लवणं तत्र सम्यक्च प्रतिपादितम्।
सामुद्रं सैन्धवञ्चैव बिडं सौवर्चमेव च।।
रोमकं चुल्लिका चेति लवणानि षडेव हि।
एतेषां लवणानाञ्च वैशिष्ट्यं प्रतिपादितम्।।

**वास्तुशास्त्रम् (Science of Archtecture)**

एवं षष्ठशताब्दीयं मयमतं प्रसिद्ध्यति।
यच्च दानवराजस्य वास्तुशास्त्रं मयस्यल वै।।(.)
यज्ञमण्डपनिर्माणे वास्तुज्ञानमपेक्ष्यते।
गृहनगरनिर्माणे तज्ज्ञानमुपकारकम्।।

**योग-विज्ञानम् (Yogic Science)**

महनीय-प्रभावोऽत्र योगायुर्वेदयोः पुनः।
शरीरन्तु भवेदाद्यं ततश्च धर्मसाधनम्।।
यथा पतञ्जलेः ख्यातं योगशास्त्रं पुरातनम्।
ततः हिरण्यगर्भः प्राग् योगवेत्ता प्रसिद्ध्यति।।
अद्य योगगुरूणाञ्च प्रभावो दृश्यते च यः।
मूले तस्य सर्वथा वै योगः पातञ्जलः स्मृतः।।
समाजे रामदेवस्य प्रभावो दृश्यते महान्।
तस्य प्रभावमूलेऽपि योगः पातञ्जलः पुनः।।
योगस्तु द्विविधः प्रोक्तः हठ-राजाभिधः क्वचित्।
तयोश्च राजयोगस्य वैशिष्ट्यं बहुधा श्रुतम्।।
अष्टाङ्गानि च योगस्य योगसूत्रे पतञ्जलेः।
प्राणायामः प्रधानाङ्गं ध्यानमासनमेव च।।

आसनानि बहून्येव प्रायश्शताधिकानि च ।
किन्तु सूर्यनमस्कारे द्वादशान्यासनानि वै ।।

**आयुर्विज्ञानम् (Medical Science)**

आयुर्विद्या प्रदत्ताऽस्ति विश्वाय संस्कृतेन वै ।
प्राचीनैव न सा विद्या वैज्ञानिक्यपि सर्वथा ।।
आविष्काराश्च यावन्तः आयुर्विज्ञानसम्मताः ।
एवं शल्यचिकित्साऽपि सुश्रुतेन पुरस्कृता ।।
अष्टावङ्गानिसन्त्येव चायुर्वेदे विशेषतः ।
चरकस्य मतञ्चैतत् सर्वथास्ति प्रमाणितम् ।।
एकंकायचिकित्सास्ति शालाक्यं चापरं मतम् ।
शल्यापहर्तृकञ्चान्यत् विषगरवैरोधिकम् ।। (विषगरवैरोधिकप्रशमनम्)
एवञ्च भूतविद्यापि कौमारभृत्यकं पुनः ।
वाजीकरणमेवान्यत् तथा चास्ति रसायनम् ।।
आचार्य-सुश्रतेनात्र कृता सुश्रतसंहिता ।
तत्र चतुर्विधा रोगा ह्येवमेव निरूपिताः ।।
रोगश्चागन्तुकः कश्चित् शारीरो मानसस्तथा ।
एवं स्वाभाविकश्चेति रोगास्सन्ति चतुर्विधाः ।।
प्लास्टिक-सर्जरी-नाम्ना च विद्या चाधुनिकी मता ।
सा च नासा-प्रसङ्गेस्ति प्रयुक्ता सुश्रुतेन वै ।।
नलिका-शिशु-जन्मापि वेदेऽस्ति प्रतिपादितम् ।(**Test tube baby**)
ऋग्वेदे तु प्रसङ्गोस्ति तादृशो नात्र संशयः ।।
जनयामासतुः कुम्भे मित्रावरुण-संज्ञकौ ।
अगस्त्यञ्च वसिष्ठञ्च प्रक्रियया विशिष्टया ।।

### वनस्पति-विज्ञानम् (Botany)

वनस्पत्याख्य-विज्ञानं वैदिकं नात्र संशयः ।
महाभारते तस्यापि वर्णनञ्चोपलभ्यते ।। (ई.पू.) शान्तिपर्व (-)
एवञ्च जीवविज्ञानं श्रीमद्भागवते क्वचित् । (श्रीमद्भागवतम् - ..-)
अजीवादेव जीवस्तु श्रेष्ठस्स्वीक्रियते पुनः ।।
वराहमिहिरस्यास्ति बृहत्पूर्वा च संहिता । (ई.)
वर्णनं लभ्यते तत्र वृक्षान् कदा प्ररोपयेत् ।।
शिशिरेऽजातशाखांश्च जातशाखान् हिमागमे ।
वर्षागमे च सुस्कन्धान् वृक्षान् कृषको रोपयेत् ।।
वृक्षायुर्वेद-नाम्न्येव ग्रन्थे पराशरस्य वै ।
विविध-वृक्षरोगैश्च चिकित्साऽपि निरूप्यते ।।
एवं वृक्ष-प्रकाराश्चचत्वारस्सन्ति वर्णिताः ।
द्रुमः कश्चित् प्रकारोऽस्ति गुल्मो लता वनस्पतिः ।।

### भूगर्भशास्त्रम्

अत्याधुनिकविद्याश्च संस्कृतेऽपि सुरक्षिताः ।
भूगर्भशास्त्रमप्यस्ति शास्त्रेष्वेव पुरातनम् ।।
भुवश्चान्तरिको भागः संस्कृतेऽप्यस्ति वर्णितः ।
क्वचित् वैदिक-शास्त्रे च क्वचित् पौराणिके पुनः ।।

### कृषिविज्ञानम् (Agriculture)

एवं चकृषिविज्ञानं भारतीयं प्रसिद्ध्यति ।
वैदिके वाङ्मये चर्चा कृषेरपि च दृश्यते ।।
कृषिपराशराख्यञ्च ग्रन्थरत्नं महीयते ।
कृषिविज्ञान-सम्बद्धंयत्रतथ्यं निरूपितम् ।।

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**क्रीडा-विज्ञानम् (Sports Science)**

प्राप्यते संस्कृते चात्र द्यूतक्रीडादिवर्णनम् ।
अक्षश्च चतुरङ्गञ्च संस्कृते वर्णितं क्वचित् ।।
महादेवस्तु पार्वत्या चक्रीड द्युतमेव हि ।
वने कष्टमवाप्तवान् द्युतक्रीडावशो नलः ।।
तस्य दुष्परिणामोपि महाभारतवर्णितः ।
द्युते च हृतवान् पत्नीं धर्मराजो युधिष्ठिरः ।।

**सङ्गीत-शास्त्रम् (Musicology)**

सङ्गीते संस्कृतेनापि योगदानं कृतं महत् ।
शिवात् सङ्गीतशास्त्रञ्च नारदस्तु ह्यवाप्तवान् ।।
एवं सप्तस्वराः दत्ताः विश्वाय शास्त्रसम्मताः ।
रत्नाकरे च सङ्गीतेदामोदरेण धीमता ।।
षड्ज-ऋषभ-गान्धाराः मध्यम-पञ्चमौ तथा ।
निषाद-धैवताख्यौ च स्वरौ तत्र व्यशिष्यताम् ।।

**भाषावैज्ञानिक-शास्त्रम् (Linguistics)**

भाषावैज्ञानिके शास्त्रे संस्कृतस्य स्थितिर्दृढा ।
मूलं यूरोप-भाषाणां संस्कृतं मन्यते पुनः ।।
विद्वद्भिर्लिखितं नैकं भाषाशास्त्रञ्च संस्कृते ।
यथा पल्सुले-वर्यस्य यूभातः संस्कृतं प्रति ।।

❑❑❑
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# व्याकरणनये लिङ्गविमर्शः

**डा. मधुकेश्वरभट्टः***

परैः अनवगतार्थं बुभुत्सया शब्दप्रयोगः क्रियते लोके। साधुशब्दाः एव अभीप्सितम् अर्थं बोधयितुं समर्था भवन्ति। शब्दाः केचन स्त्रीलिङ्गकाः, केचन पुंलिङ्गकाः, केचन नपुंसकलिङ्गकाश्च वर्तन्ते। लोके पुंस्यर्थे स्त्रीलिङ्गस्य, स्त्रीरूपार्थे पुंलिङ्गस्य च शब्दस्य प्रयोगो दृश्यते। लौकिकलिङ्गाश्रयणे तु खट्वादिषु शब्देषु नपुंसकेलिङ्गे विधीयमानानि शास्त्रीयकार्याणि प्रवर्तेरन्। अतः किमिदं लिङ्गम्, लिङ्गम् अर्थनिष्ठम् आहोस्वित् श्ब्दनिष्ठमिति सन्देहो जागर्ति। व्याकरणनयानुसुरेण लिङ्गविचारः अत्र क्रियते। **स्त्रियाम्**[1] इति सूत्रे अयं विचारः कृतः। लोके तावत् पदार्थं दृष्ट्वा इयं स्त्री, अयं पुमान्, इदं नपुसंकम् इति व्यवहारः क्रियते। तद्यथा -

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥**[2] इति

इति लक्षणलक्षितमवयवसंस्थानविशेषात्मकं लौकिकं स्त्रीपुंसयोः लिङ्गम्। यल्लोके दृष्ट्वैतदवसीयत, व्यञ्जकम्=स्तनकेशादि, व्यङ्ग्यं स्त्रीत्वम् इति। स्तनकेशं च प्रसिद्धत्वादन्यस्यापि स्त्रीप्रतिपत्तिनिमित्तस्य कुमार्यादिगतस्योपलक्षणम्। लोमशत्वं च पुंविज्ञानहेतोः कुमारादिगतस्य। तदनेन स्त्रीत्वादीनां स्तनाद्युपव्यञ्जनानां गोत्वादिवत्सामान्यविशेषत्वं लौकिकं लिङ्गम्। यथोक्तं हरिणा-

**हस्तिन्यां वडवायां च स्त्रीति बुद्धेः समन्वयः।**
**अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ॥**[3] इति

उभयोरन्तरं नाम उभयोः=स्त्रीपुंसयोः, अन्तरशब्दः सदृशवाचि, तयोरभावे=स्त्रीपुंसयोरभावे तन्नपुंसकमित्यर्थः। एवं तर्हि तदुभयं समुदितं यत्र तन्नपुंसकं प्राप्नोति। अयमभिप्रायः उभयोरपि स्त्रीपुंसयोर्यदन्तरं सदृशं स्तनलोमाद्युभयव्यञ्जनं तन्नपुंसकमित्यर्थः। यदि तदभावे नपुंसकमित्येतदुच्यते ततोऽव्ययानां तिङन्तानाञ्चैव

---

* सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

नपुंसकत्वं स्यात्। तथाप्युभयोरन्तरं यत् इत्येतावदुच्यते एवमपि कुक्कुटमयूर्यौ इत्येवमादीनां लिङ्गसमुदायवतां समुदायानां नपुंसकत्वं प्रसज्येत। तस्मादुभयोरन्तरं यत् तदभाव इति च द्वयमप्युक्तम्। तदेवं यत्र स्त्री न पुमान् लिङ्गवच्च वस्तु तन्नपुंसकमित्युच्यते।

किन्तु शास्त्रे एतादृशलौकिकस्त्रीग्रहणे खट्वादिषु शब्देषु स्त्रीलिङ्गत्वेपि लोकप्रसिद्धस्य स्तनकेशत्वाभावात् इयं खट्वा स्त्री इति लोके व्यवहाराऽभावात् शास्त्रीयकार्याणि न स्युः। एवं भ्रकूंसादिषु स्तनकेशसम्बन्धसत्त्वेन शास्त्रीयकार्याणि प्रवर्तेरन्। किञ्च यथा अवयवसंस्थानव्यङ्ग्यं गोत्वं सर्वास्वपि गोव्यक्तिषु वर्तते तथा गोत्वादिवत्स्त्रीत्वं नाम सामान्यम् इति चेत् न, खट्वाशिंशपानगर्यादिषु अवयवसंस्थानस्य भिन्नत्वात्। अपि च यदि अयं पुमान् दृष्ट्वैतदवसीयते, तदा खरकुटीः पश्य अत्र खरकुटीशब्दस्य नापितगृहवाचकत्वेन तस्य लोमनखादिसंकीर्णत्वेन पुंसत्वात् **तस्माच्छसो नः पुंसि**[4] इत्यनेन नत्वप्रसङ्गः इति महाभाष्ये सन्देहमुद्भाव्य पूर्वपक्षरुपेण समाधानं दीयते यत् खट्वावृक्षयोःलिङ्गं मृगतृष्णावत् द्रष्टव्यम्। यथोक्तम् - असत्तु मृगतृष्णावत्[5] इति। मृगतृष्णारुपा मरुमरीचिका असत्येन जलरुपेण प्रतिभासते तथा खट्वावृक्षावसता स्त्री (बुद्धौ तु सदिति) स्त्रीपुंसत्वेन प्रतिभासते। ननु असत्तु मृगतृष्णावत् इत्युक्तिरयुक्ता। यतः मरुमरीचिकायां जलसादृश्येन तत्स्मरणम्भवति नत्वसज्जलन्तत्र अनुभूयते। खट्वावृक्षादौ तु लिङ्गसदृशस्य कस्यचन दर्शनाभावेन लिङ्गस्मरणमशक्यमेव। अतः मृगतृष्णेत्यादिदृष्टान्तोक्तिरयुक्तत्वात् दृष्टान्तान्तरमाह - गन्धर्वनगरं यथा। यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते तद्वत् खट्वावृक्षादौ स्त्रीत्वम्[6]। यथा गन्धर्वनगरम् अन्तरिक्षे नोपलभ्यते तत्सदृशवस्त्वन्तरस्यापि ग्रहणं न भवति तथापि तत्स्मर्यते तद्वत् अविद्यमानभावानाम् अचिन्त्यनिमित्तसामर्थ्यात् खट्वादिषु स्त्रीत्वादेः उपलब्धिः भवति। ननु गन्धर्वनगराणि दूरतो दृश्यमानानि वस्तुतः नोपलभ्यन्ते इत्येतन्न युक्तम्। अनादौ संसारे तादृशस्य पूर्वानुभूतगन्धर्वनगरस्यापि सम्भवसत्त्वेन पूर्वानुभूतस्य गन्धर्वनगरस्य स्मरणमेव तत्रेति। अतः दृष्टान्तान्तरमाह – **आदित्यगतिवत्सन्न**[7]। यथा आदित्यगतिः सत्यपि प्रत्यक्षेण न दृश्यते किञ्च देशान्तरप्राप्त्यानुमीयते तथा खट्वावृक्षयोः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

सदपि लिङ्गं सूक्ष्मत्वात् प्रत्यक्षेण अशक्यं ग्रहीतुं तत्कृतकार्यदर्शनात् अनुमीयते। ननु केन खटवावृक्षयोः सल्लिङ्गं नोपलभ्यत इत्यत्र भाष्यकारैः षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति इति उक्तम् - **अतिसन्निकर्षात्,अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात् , इन्द्रियदौर्बल्यात्, अतिप्रमादात्**[8] इति ।अतः स्त्रीनिमित्तकटाबादिकार्याणि शब्देषु दृष्ट्वा स्त्रीत्वं, पुन्निमित्तकनत्वादिकार्याणि शब्देषु दृष्ट्वा पुमान् इति अनुमानं क्रियते। ननु खट्वावृक्षादौ स्त्रीप्रत्ययादिदर्शनेन लिङ्गस्यानुमानं भवतीत्याग्रहेपि एकस्मिन् द्रव्ये लौकिकलिङ्गद्वयासम्भवेनानुमानस्यासम्भवेन यथा तटः, तटी, तटम् इत्यत्र सर्वाणि लिङ्गानि दृष्टवा अयं पुमान् तटः, इयं स्त्री तटी, इदं नपुंसकं तटम् इति कः निश्चेतुं शक्ष्यति। अतः वैयाकरणैः लौकिकलिङ्गस्वीकारे तटाद्यचेतनेषु शब्देषु अव्याप्तिः, तत्र कस्यापि लिङ्गस्याभावात्। तथा च दारादिशब्देषु अतिव्याप्तिः, तत्र लौकिकस्य स्त्रीत्वस्य विद्यमानत्वेन पुंस्त्वमनुपपन्नम्. अतः व्याकरणशास्त्रे लौकिकलिङ्गम् आश्रयितुं न शक्यम् इत्युक्त्वा सिद्धान्तभाष्येण लिङ्गस्य स्वरुपम् एवम्प्रकारेणोक्तम् -

**संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः।**
**संस्त्याने स्त्यायतेर्ड्रट स्त्री सूतेः सप् प्रसवे पुमान् ॥**[9]

अत्र कारिकायां स्त्रीपुमान्शब्दानां निष्पत्तिः प्रतिपादिता वर्तते। संस्त्याने अर्थे स्त्यैधातोः ड्रटप्रत्यये स्त्रीशब्दः निष्पन्नः, अपचयस्वभावः इत्यर्थः। प्रसवार्थे सूधातोः औणादिकमसुन्प्रत्यये उपचयात्मकं पुंसत्वम्, तद् यत्रास्ति स पुमान् इति पुमान्शब्दः। उपचयापचयरहिता यावस्था तदात्मिका स्थितिर्नपुंसकत्वम्, तद् यत्रास्ति तन्नपुंसकमिति। लोकेपि तावत् स्त्यायतेरेव स्त्री, सूतेश्च पुमान् इति। यथोक्तं भाष्ये - **अधिकरणसाधना लोके स्त्री - स्त्यायत्यस्याङ्गर्भ इति। कर्तृसाधनश्च पुमान् - सूते पुमानिति**[10]। संस्त्यानं स्त्री, प्रवृतिश्च पुमान्। यद्यपि लोकेपि स्त्रीपुंशब्दौ स्त्यायतिसूतिभ्यामेव व्युत्पन्नौ तथापि स्त्यायतिसङ्घातरुपं प्राप्नोत्यस्यां गर्भ इति अधिकरणसाधनः स्त्रीशब्दः। सूते अपत्यं जनयतीति पुमानिति कर्तृसाधनः पुंशब्दः। अत्र भावसाधनौ स्त्रीपुंशब्दौ। यथोक्तं हरिणा-

**आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।**
**धर्मा मूर्त्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ॥** [11]

अत्रापि आविर्भावः - उपचयः पुंस्त्वम्, तिरोभावः - अपचयः स्त्रीत्वम्, अन्तरालस्थितिर्नपुंसकत्वमित्यर्थः। अतः कैयटेनापि संस्त्यानं – **तिरोभावः, प्रवृत्तिराविर्भावः, साम्यावस्था स्थितिः**[12] इत्युक्तम्। अतः गुणानां सत्वरजस्तमसां तिरोभावः स्त्री, तेषां गुणानामाविर्भावश्च पुमान् एवं च गुणानामाधिक्ये पुमान्, गुणानां न्यूनतायां स्त्री, साम्ये च नपुंसकमिति फलति। सत्त्वरजस्तमांसि गुणाः तत्परिणामरुपास्तदभिन्ना एव शब्दादयः पञ्चगुणाः। सूक्ष्माणां सत्त्वादीनामप्रत्यक्षत्वात् न शब्दव्यवहारगोचरत्वम्, तथापि तत्परिणामानां शब्दस्पर्शरुपरसगन्धानां तिरोभावाविर्भावसाम्यावस्थाः शब्दगोचराः। तथा च प्रवृत्तिरुपः तत्परिणामो नित्यः। तदुक्तं भाष्ये **"प्रवृत्तिः खल्वपि नित्या। न हि कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते , वर्धते वा यावदनेन वर्धितव्यम् , अपायेन वा युज्यते"**[13]। यथोक्तं हरिणा –

प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते।
**आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते ॥**
**प्रवृत्तिमन्तः सर्वेर्थास्तिसृभिश्च प्रवृत्तिभिः।**
**सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः ॥**
**यश्चाप्रवृत्तिधर्मार्थश्चितिरुपेण गृह्यते ।**
**अनुयातीव सोन्येषां प्रवृत्तीर्विष्वगाश्रयः॥**
**तेनास्य चितिरुपं च चितिकालश्च भिद्यते।**
**तस्य स्वरुपभेदस्तु न कश्चिदपि विद्यते ॥**
**अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते ।**
**प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनम्॥**[14]

तदेवं सर्वपदार्थव्यापित्वादुपचयान्तरालावस्थास्त्रीणि लिङ्गानि। अत्रापि दर्शने संस्त्यानादेस्त्रयस्य सर्वत्र भावादेकैकं वस्तु स्त्री, पुमान् नपुंसकञ्च प्रसज्येत्। न ह्यस्ति नियमः - यः शब्दो यत्रार्थे पर्यवस्यति तत्र विद्यमानः सर्व एवाकारस्तेन

शब्देनाभिधातव्य इति, किन्तु य आकारो भिधीयते तेन सत्ता भवितव्यमित्येतावत्। तदुक्तं हरिणा–

**सन्निधाने पदार्थानां किञ्चिदेव प्रवर्तकम् ।**
**यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ॥**[15]

अयम्भावः यथा तक्षणच्छेदनाद्यनेकक्रियासंनिधानेपि तक्षणमाश्रित्य तक्षायमिति व्यवह्रियते तथा शब्दशक्तिवैचित्र्यात् लिङ्गविशेषरूपं तत्तदर्थे तत्तच्छब्दप्रयोगनियामकम्। कुत्रचित् शब्दशक्त्या कस्यचिद्धर्मस्यापचयमेवाह। शब्दान्तरप्रयोगात्तु धर्मान्तरस्योपचयः प्रतीयते। वृत्तिकारस्तु विदिताभिप्रायो दर्शनान्तरमाश्रित्याह – "**सामान्यविशेषाः स्त्रीत्वादयो गोत्वादयो इव बहुप्रकारा व्यक्तयः**''। सामान्यानि विशेषाश्चेति। व्यज्यन्ते सामान्यविशेषा आभिरिति व्यक्तयः - आश्रयाः। सामान्यानि च तानि तुल्यजातीयपदार्थसाधारणत्वाद्, विशेषाश्च परस्परतो विजातीयेभ्यश्च व्यावर्त्यन्त इति सामान्यविशेषाः। यथैव गोत्वादयस्तुल्यजातीयेषु सर्वेषु वर्तन्ते विजातीयेभ्यस्तु व्यावर्तन्ते, तथा स्त्रीत्वादयो, न सर्वः सर्वस्येति। तत्र चेतनेषु स्तनादिमती व्यक्तिः स्त्रीत्वस्य व्यञ्जिका, लोमशत्वादिमती पुंस्त्वस्य, उभयव्यञ्जना नपुंसकत्वस्य । अचेतनेषु कथम्, न हि तत्र किञ्चिदपि लिङ्गं व्यज्यते ? तथा चेतनेप्यर्थव्यक्तिवस्त्वादिशब्दानां भिन्नलिङ्गानामनुपपत्तिः, दारशब्दस्य च पुल्लिङ्गस्य भार्यायामनुपपत्तिः? अतः वृत्तिकारेणोक्तम् - क्वचिदाश्रयविशेषाभावादुपदेशव्यङ्ग्या एव भवन्ति, यथा ब्राह्मणत्वादयः। तदभिव्यञ्जनसमर्थ आश्रयविशेषेषु अचेतनेषु सर्वत्रोपदेशादेवाभिव्यक्तिः। यथोक्तम्–

**भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः ।**
**यद्यद्धर्मेङ्गतामेति लिङ्गं तत्तत्प्रचक्षते ॥**[16]

अयम्भावः - भावतत्त्वविदः-ब्रह्मतत्त्वसाक्षात्कारवन्तः शब्दार्थेषु व्यवस्थिताः येषां शब्दानां यल्लिङ्गमुपादाय शिष्टाः साधुत्वावगमपूर्वकं धर्मजनकत्वबुद्ध्या प्रयोगं कुर्वन्ति तेषां तदेव लिङ्गमिति नियमः। उपदेशः पुनर्लिङ्गानुशासनात् विज्ञातव्यम्। अपि च लिङ्गस्य प्रतिपादने शिष्टलोकात् तस्य लिङ्गस्य व्यवस्था अनुगन्तव्या तथा लिङ्गस्य प्रतिपादनं लोकतो भवतीत्यर्थः।

तच्चेदं लिङ्गमर्थनिष्टमेव। **एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम् अवयवान्यत्वाच्च**[17] इति भाष्योक्तेः ईदृशमवस्थात्रयं केवलान्वयि, अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु इति त्रिविधव्यवहारस्य पदार्थमात्रे सत्वात्। एकस्मिन्नेव अर्थे पुष्यः तारका नक्षत्रम् इति शब्दनानात्वदर्शनात्, कुटीकुटीरादौ रेफाद्यवयवोपजनने लिङ्गभेददर्शनाच्च स्तनकेशाद्यतिरिक्तमेव लिङ्गमित्यर्थः इति कैयटः। तत्र कश्चिद् शब्दः एक लिङ्गविशिष्ट एवार्थे प्रयोज्यः, कश्चित्तु द्विलिङ्गे, कश्चित्तु त्रिलिङ्गे इति लिङ्गानुशासनादितो निर्णेयम्। अत्र टिघुभादिसंज्ञावल्लघुसंज्ञामकृत्वा महासंज्ञाकरणसामर्थ्यात् सति संभवे स्तनकेशवतीत्यादिलौकिकं लिङ्गमप्यत्र आश्रीयते। अन्यथा पशुना यजेत इत्यत्र स्त्रीव्यक्तावपि सत्वाद्युपचयात्मकपुंस्त्वाद्यनपायात् आङो नास्त्रियाम्18 इति नाभावस्य अविरोधात् स्त्रीपशुरप्यालभ्येत। किञ्च वार्तिककारः - "**लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य**[19]" इति। व्याकरणं लोकानुगामि वर्तते। अतः लिङ्गव्यवस्थायां लोकोपि प्रमाणम्। शास्त्रीयव्यवस्थां विनापि लोकव्यवहारेण लिङ्गपरिचयः सुलभः।

**पादटिप्पणी**

1. अष्टा 4.1.3
2. म.भा. 4.अ. 1 पा 1आ.पृ.सं. 19
3. वा.प.का. 2 श्लोक.सं. 05
4. अष्टा. 6.1.103
5. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 21
6. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 21-22
7. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 22
8. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 23
9. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 25
10. म.भा. 4.अ. 1 पा 1आ.पृ.सं. 25
11. वा.प.का. 3 श्लोक.सं. 13
12. म.भा. 4.अ. 1 पा 1आ., प्रदीपव्याख्यानम्, पृ.सं. 25
13. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 27
14. वा.प.का.3 श्लोक.सं. 321-325

15. वा.प.का. 3 श्लोक.सं. 20
16. वा.प.का. 3 श्लोक.सं. 21
17. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 29
18. अष्टा. 7. 3.120
19. म.भा. 4.अ. 1 पा 1आ. पृ.सं. 29

आकरग्रन्थाः

1. व्याकरणमहाभाष्यम्, प्रदीपोद्योतसहितम्, संपादकः - गुरुप्रसादशास्त्री, प्रकाशकः - राष्ट्रियसंस्कृतसंस्थानम् पुनर्मुद्रितसंस्करणम्-2006
2. Vakyapadeeya 3 - kanda, with the commentary Prakeerna Prakash, Edited by L.A Ravi Varma, University of Travancore
3. अष्टाध्यायी - संपादकः आचार्य पं. सत्यनारायणशास्त्री खण्डूडी, प्रकाशकः कृष्णदास अकादमी, वाराणसी -1985
4. वैयाकरणसिद्धान्तकौमुदी - संपादकौ - गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द विद्याभास्करः , प्रकाशकः- मोतिलाल बनारसीदास, पुनर्मुद्रणम् -2011

❑ ❑ ❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# स्वातन्त्र्यसङ्ग्रामे संस्कृतनाटकानां योगदानम्

**डा. राघवेन्द्रभट्टः***

साहित्यं समाजस्य राष्ट्रस्य वा प्रतिबिम्बं वर्तते। अतः विभिन्ने काले रचितासु रचनासु समाजस्य स्थितिः परिशील्यते। काव्येषु दृष्येषु श्रव्येषु वा वर्णिते वस्तुनि समानेऽपि तत्तत्कालस्य सामाजिकीं स्थितिं प्रकाशयन्ति तानि काव्यानि। भासकृते अभिषेकनाटके भवभूतिकृते महावीरचरिते च विद्यमानं सामाजिकं चित्रणं भिद्यते। शक्तिभद्रस्य आश्चर्यचूडामणौ मुरारेः अनर्घराघवे च वैलक्षण्यं दृश्यते। देशकालादिप्रभावः विलक्षणतया तस्यां तस्यां रचनायां लक्ष्यते। तथाभूतानि काव्यानि चिरस्थायीनि भवन्ति।

बहूनि दृश्यानि श्रव्यानि च काव्यानि राष्ट्रस्य गुणान् दोषांश्च निरूपयन्ति । राष्ट्रस्य समाजस्य वा समस्यानां समाधानाय सन्देशस्य प्रसाराय उचिते कर्मणि जागर्यायै च अस्ति संस्कृतनाटकानां योगदानम्।

भारतस्योपरि विविधेषु कालघट्टेषु विभिन्नानां वैदेशिकानाम् आक्रमणं सञ्जातम्। तेषु यवनानां आङ्ग्लेयानाञ्च आक्रमणं साहित्यरचनादृष्ट्या महत्त्वं भजते। वैदिशिकानामाक्रमणवशात् दास्यमापन्नाः भारतीयाः ततो मोक्षाय विविधानुपायान् आरेभिरे। महान्तमान्दोलनं चक्रिरे। पञ्चदशशतकाद्विंशशतकं यावत् स्वाधीनताप्राप्त्यर्थं देशभक्तैः ग्रामे ग्रामे नानातन्त्राणि व्यरच्यन्त। तत्र संस्कृतभाषामाध्यमेनापि अनेके उपायाः अन्वतिष्ठन्त। देशे चतुःशतं संस्कृतपत्रिका आसन्निति ज्ञायते यत्र देशभक्तिपरा लेखाः प्राकाश्यं नीयन्ते स्म। मन्दिरेषु धार्मिकसभासु च भाषणानि संस्कृतभाषयापि भवन्ति स्म। सङ्घटनार्थं प्राचीनानि संस्कृतनाटकानि प्रदर्श्यन्ते स्म। शास्त्रग्रन्थाः काव्यानि नाटकानि च बहुसंख्यया लिखितानि। वैदेशिकान् निर्वासयितुं महान् लेखनयज्ञः एव तदा अन्वतिष्ठत इति वक्तुं शक्यते। एवं नैकेषु उपक्रमेषु अतितमं प्रभावमजनयत् देशभक्तिपराणां संस्कृतनाटकानां रचना तेषां मञ्चनञ्च।

---

* साहित्यविभागाध्यक्षः, केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः, शृङ्गेरी, कर्नाटकराज्यम्
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

भारते अष्टादशे शतके कोलकत्तायां मुम्बय्यां च स्वातन्त्र्यजागर्यायै रङ्गभूमिः कार्यमकरोत्। ततः ग्रामे ग्रामे रङ्गमञ्चाः विस्तारं गता आसन् येषु नृत्यनाटकानि गीतनाटकानि च भारतीयभाषासु प्रयोज्यन्ते स्म । संस्कृतनाटकानामपि प्रयोगाः भवन्ति स्म। स्वतन्त्रतान्दोलनस्य रङ्गभूमेरपि भूमिका प्रभावम् अवर्धयत्।

प्रादेशिकभाषासु नैकासु वर्तमानासु विरलतया प्रयोगपथे स्थितया संस्कृतभाषया नाटकानां रचनया प्रदर्शनेन वा किं प्रयोजनम्? इति प्रश्नः तस्मिन्नपि काले आसीदिति ज्ञायते

तत्र पुल्लेलश्रीरामचन्द्रुडुवर्यस्य सुसंहतभारतम् इति नाटके नटसूत्रधारयोः संवादे एवं विचारः लभ्यते।

**नटः** – अहो आन्ध्रहिन्दीभाषामुखाः देशभाषाः विविधखण्डप्राप्ताम् आङ्ग्लभाषां वा अनादृत्य कथमिदं कतिपयजनमात्रज्ञेयं संस्कृतरूपकं प्रयोक्तुमुद्युज्यते भवता?

**सूत्रधारः** - भाव! अविचारितरमणीयं खलु ते वचनम्। आङ्ग्लभाषा किल आङ्ग्लानामेव भाषा। संस्कृतभाषासत्कारश्च आन्ध्रभाषादीनां भारतीयभाषाणामपि समादरः एव। मातुः सम्मानः आत्मनः अवमानः इति को वा अमूढः चिन्तयति।

अपि च

**आसेतोराहिमाद्रेः प्रथितगुणगणैः पूजिता या सुधीभिः।**
**श्रुत्वा शीर्षाण्यधून्वन् प्रसृतरसभरां याम् मुदा ते विदेह्याः॥**
**आनन्दानां बहूनामिहपरजननेष्वद्भुतानां खनिर्या**
**तस्या गीर्वाणवाण्याः द्दतनवजनुषा भाषया को विरोधः॥**

**नटः** - आर्य! न खलु वदामि संस्कृतभाषया साकमस्ति कोऽपि विरोधः देशीयभाषाणामिति। को वा न जानाति सर्वा एवैताः संस्कृतवाणीदत्तहस्तावलम्बा एवेति, परन्तु एतावदेवोच्यते मया यदेषा न सर्वजनसुज्ञेयेति ।

**सूत्रधारः** - (विहस्य) अचिन्तितमिदमुच्यते सर्वजनसुज्ञेयाभिर्भवितव्यं सर्वभाषाभिरिति। किं सर्वजनसुज्ञेयैव वा आङ्ग्लभाषा यैषा चिरमध्यारोपिता भारतीयानां शिरसि नाद्याप्यवतरणस्य वार्तामपि स्मरति। नापि वा दुर्ज्ञेया संस्कृतभाषा

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

देशभाषाभिज्ञानां या किल ओतप्रोतरूपा सर्वासु भाषासु। अपि च भिन्नभिन्नभाषावेषादीनां भारतीयानां एकतायाः प्रतीकं संस्कृतभाषा।

हरिदाससिद्धान्तवागीशः मिवारप्रतापे प्रस्तावनायां सूत्रधारमुखात् संस्कृतभाषाया अमरताविषये स्पष्टयति -

**वेदादि-शास्त्र-निचय-स्फुट-दिव्यमूर्तिः,**
**सा वाक् किमन्यवचनादमरा म्रियेत ॥**
**मध्याह्नसूर्यकरणो हि यदि ब्रवीति,**
**रात्रिः किलेयमिति हन्त स एव मूढः** ॥ इति।

अर्वाचीननाटकानां प्रदर्शनस्य रसास्वादमात्रं उद्देश्यं नासीत् तेन सह सङ्घटना, देशभक्त्युद्दीपनञ्च आसीत्। अतः नाटकानां प्रयोगः उत्सवावसरे अन्यत्र वा जनबहुले स्थाने क्रियते स्म। आङ्ग्लेयानां शासनकाले भारतीयैः देशभक्तकविभिर्लिखितेषु काव्येषु प्रायेण इदं स्पष्टं भवति। मञ्चनं दीपावलीसमये, नवरात्रोत्सवे अन्यस्मिन् उत्सवे वा अयोज्यते स्म। तत्र एकं उदाहरणम्। पण्डितमथुराप्रसाददीक्षितस्य वीरपृथ्वीराजनाटके सूत्रधारस्य वचनं - अलमतिविस्तरेण, अहो विद्वद्भिराज्ञप्तोऽहं श्रीदुर्गाभगवतीमहोत्सवे समागतान् इमान् विदुषो राज्ञोऽपरांश्च प्रसादयितुम् इति ।

आरती मिनोचा नवनाटक इत्यादिप्रयोगाः प्राचुर्येण भवन्ति स्म इति उल्लेखं कृतवती । यवनानाम् शासनकाले संस्कृतनाटकानां प्रयोगप्रम्परा ईषत् ह्रासतां गता इति तु सत्यमेव। अथापि आङ्लेयानां दास्यात् मोचनं प्राप्तुं भारतीयैः संस्कृतनाटकानां प्रयोगपरम्परा पुनरुज्जीविता अभवत्।

विंशशतकस्य प्रारम्भभागे भारते राजकीयरङ्गभूमिः (Political theatre) प्रसिद्धिं प्रापत्। रष्यातः युरोप् अमेरिका खण्डयोः संक्रान्तिं प्राप्य ततः भारतेऽपि प्रचुरप्रचारं प्राप्नोत्। ब्रिटिश् अधिकारिभिः कलकत्तायां महाराष्ट्रे (कंसवधः) अन्यत्र च नाटकप्रदर्शनं निषिद्धम्। यद्यपि तैरेव आङ्ग्लेयैः आदौ रञ्जनाय रङ्गप्रयोगाः प्रोत्साहिताः आसन्। किन्तु अयमुपक्रमः तेषामेव प्रतिकूलः अभवत्।

आङ्ग्लेयशासनं प्रशंस्यापि संस्कृतसाहित्यं निजविस्तृतिं प्राप। लक्ष्मणसूरेः दिल्लीसाम्राज्यम् इति नाटके लार्ड् हाडिलेन देहल्यां कृतः जार्जस्य राज्याभिषेकः कथावस्तु वर्तते। किन्तु नैकानि नाटकानि आङ्ग्लेयप्रशासनविरोधे सफलानि अभवन्। तत्र हरिदाससिद्धान्तवागीशः, पं. मथुराप्रसाददीक्षितः, (भारतविजयम्, वीरपृथ्वीराजनाटकम्, वीरप्रतापनाटकम्,) मूलशङ्करमाणिकलालयाज्ञिकः (प्रतापविजयम्, संयोगितास्वयंवरम्, छत्रपतिसाम्राज्यम्) पञ्चाननतर्कः(अमरमङ्गलम्) इत्यादयः प्रसिद्धाः कवयः नाटककाराः आङ्ग्लेयानुत्पाटयितुं दृश्यबन्धमेव अस्त्रीकृतवन्तः इति तेषु कालघट्टेषु रचितानां रूपकाणां कथावस्तुना स्पष्टं भवति।

**हरिदाससिद्धान्तवागीशः** - पञ्चदशवर्षीय एवासौ कंसवध-प्रभृतीनां ग्रन्थानां प्रणयनेन लब्धादरोऽभवत्। कवेरस्य मिवारप्रतापं, शिवाजीचरितं, वङ्गीयप्रतापञ्चेति सुप्रसिद्धानि ऐतिहासिकानि नाटकानि। अस्य हिन्दुत्वाभिमानं प्ररोचकमथ च याथार्थ्यं दृश्यते यथा -

**हिन्दूरेव हि हिन्दूनां विकृतः कुरुते क्षतिम्।**
**मुद्गरीकृतलौहं हि लौहं दलति शाश्वतम् ॥**

एवं मिवारप्रतापस्य पञ्चमेऽङ्केऽपि -

'हिन्दुभिरेव हिन्दूनां हिंसया संवृत्तोऽयं सर्वनाशो भारतस्य' इत्यपि लिखितम्।

मिवारप्रतापं नाम नाटकं १९४४ तमे वर्षे विरचितम् । अस्य प्रथमोऽभिनयो १९४५ वर्षे कोलकातानगरे स्टाररङ्गमञ्चे समभूत्।

**शिवाजीचरितम्** शिवाजीचरितस्य प्रथमाभिनयः स्वाधीनतादिवस-यात्रावसरे समभूत्। सूत्रधारो ब्रवीति यद् भारतवासिनां हृदयेषु देशप्रेमदीपनार्थमेव वयमभिनेतुमभिलषामः। शिवाजीचरितं १९४५ वर्षे विरचितम्। रचनेयं कालानुकूला।

**वङ्गीयप्रतापम्** १९१७ तमे वर्षे विरचितम्। इदं प्रथमं कवेः गृहे प्रयुक्तम्। वर्षत्रयानन्तरं कोलकातानगरे मिनर्वा-रङ्गालये नाटकमिदं द्वितीयवारं सोल्लासतयोदयनसमितिद्वाराभिनीतम्। अत्र शङ्करचक्रवर्तिनः देशाभिमानः कविना आविष्कृतः।

**मिवारप्रतापम्** - १९४७ तमेवर्षे कलकत्तातः प्रकाशितम्। षडङ्कात्मकेऽस्मिन् मुगलस्य अक्बरस्य दुष्कृत्यं विरुद्ध्य तेन सह महाराणाप्रतापेन कृतः घोरः सङ्घर्षः मुख्यं कथावस्तु विद्यते। स्वदेशप्रेमभावस्य जागर्यायै मनोज्ञाः दृश्यबन्धाः कविना उपनिबद्धाः। मातृभूमेः रक्षायै सैनिकसहितेन राज्ञा कृता सरलभोजनं सरलजीवनं इति प्रतिज्ञा जनेषु 'देशरक्षा आद्यं कर्म' इति भावमजनयत्। अधिकसेनाबलोपेतेन अकबरेण राणाप्रतापः अल्पसेनाबलकारणेन पराभूतोऽपि देशाभिमानं न अत्यजत्। वने स्थित्वा तृणैः निर्मितां रोटिकां भुक्त्वैव पुनः युद्धसन्नाहमकरोत्।

**हिन्दुस्थाने यवनवसतिर्नोचिता भारतेऽस्मिन्**
**नीहारौघस्थितिरिव शरद्व्योम्नि नक्षत्रदीप्ते।**
**तस्मादस्मान्निजनिजधिया यात यूयं स्वदेशान्**
**अस्रस्रोत: स्रवतु न खलु च्छिन्नभिन्नाच्छरीरात् ॥**

एतादृशवचनानि स्वाभिमानं जागरयन्ति।

**मूलशङ्कर माणिकलाल् याज्ञिकः** – छत्रपतिसाम्राज्यम् इति अनेन लिखिते नाटके दश अङ्काः सन्ति। १९२९ तमे वत्सरे इदं प्रकाशितम्। इदम् औरङ्गजेबप्रभृतीन् विदेशीयमुगलशासकान् विरुद्ध्य देशप्रेम प्रकाशयति।

पण्डितमथुराप्रसाददीक्षितः वीरपृथ्वीराजनाटकम् इति नाटकमलिखत्। यद्यपि नाटकमिदं स्वातन्त्र्योत्तरकाले प्रकाशितम्। अस्य रचना तु पूर्वमेव अभवत्। पृथ्वीराजचौहाणस्य वीरचरितं अस्य कथावस्तु। गोरीमहम्मदस्य वधं कृत्वा शत्रुभ्यः निजमारणम् अनिच्छन् पृथ्वीराजः स्वयमेव चन्दवरदायिनः हस्तात् छुरिकाप्रहारं कारयित्वा म्रियते। दुःखान्तमिदं नाटकम्।

एतानि नाटकानि परिशीलयामश्चेत् कवयः कथावस्तुचयने भारतस्य अखण्डतां एकतां च चिन्तितवन्तः इति ज्ञायते। यतः भारतीयेषु राजसु अन्तःकलहः, वैदेशिकानाम् वञ्चना, देशीयस्य राज्ञः भारतीयं राजानं वञ्चयित्वा वैदेशिकस्य शत्रोः साहाय्याचरणम् इत्यादिभिः चरितैः समाविष्टानि नाटकानि रचितवन्तः। पण्डितमथुराप्रसाददीक्षितेन लिखिते वीरपृथ्वीराजनाटके महम्मदगोरी प्रतिनायकः

पृथ्वीराजस्य वञ्चनामेव अकरोत्। यथा तस्य स्ववचोव्याघातः 'यावज्जीवं विधास्येऽहं सौहार्दं साधु सङ्गतम्। कुरानसाक्षिकमिदं प्रतिजाने क्षमस्व माम्॥ ' इति वचनम्। अतः अन्ते - अरे रे यवनापसद अस्मच्चरणचुम्बक! प्राणभिक्षुक! स्वधर्मग्रन्थस्य कुरानस्य शपथं कृत्वापि न लज्जसे? इति गोरीमहम्मदेन बद्धः पृथ्वीराजः कथयति। अथापि एष मां क्रूरं पश्यतीति अस्य चक्षुषी निष्कास्येताम् इति गोरी आज्ञापयति। अत्र यवनैः भारतीयेषु कृतं विद्रोहं साम्प्रतिकः भारतीयसमाजः जानातु येन ब्रिटिष् शासकानामपि दौरात्म्यं ज्ञातुं शक्नुवन्ति, ततो जागर्यां प्राप्नुवन्ति इति कवेः कथावस्तुचयनस्य उद्देश्यं स्पष्टं प्रतीयते। कनौजराजः जयचन्द्रः स्वार्थसाधकद्वेषवशात् पृथ्वीराजस्य वैरं विस्तारयति। गोरीमहम्मदेन सह मैत्रीं भजते। किन्तु गोरिणा एव हतो भवति।

**वीरप्रतापम्**

सप्तस्वङ्केषु संविभक्तं वीरप्रतापं नाम नाटकं १९३५ ख्रीष्टाब्दे विरचितम्। प्रतापः स्वजनकस्य ज्येष्ठपुत्र आसीत्। तथापि पिता तस्य राज्याभिषेकं नैच्छत् । सर्वेषां सामन्तानां सत्प्रयासेन प्रतापस्य राज्याभिषेको जातः। सिंहासनारूढेन प्रतापेन सपद्येव मातृभूमेः स्वातन्त्र्यार्थं प्रतिज्ञा कृता -

**यावन्मे धमनीमुखेषु रुधिर क्लेदोऽपि सन्तिष्ठते।**
**मांसं वास्थनि तिष्ठति क्वचिदपि प्राणाः शरीरे स्थिताः॥**
**तावन्म्लेच्छपतेः कथञ्चिदपि न प्राप्स्याम्यहं निम्नताम्।**
**स्वातन्त्र्यस्य पदं समस्तवसुधां नेतुं यतिष्ये भृशम्॥**

नाटकेऽस्मिन्नेकोक्तीनां प्रयोगो बाहुल्येन प्राप्यते। भारतीयस्वातन्त्र्य-सङ्ग्रामावसरे युवकानां प्रोत्साहनार्थं भारतमातुश्च बन्धनविमुक्त्यर्थमेव अस्य रचना विहिता। भाषा कोमलकान्तपदावलिभिः संवलिता अस्ति।

**भारतविजयम्**

भारतविजयस्य प्रणयनं १९१४ ख्रीष्टाब्दे सञ्जातम्। अस्य सर्वप्रथमाभिनयो १९३७ ख्रीष्टाब्दे सोलनस्य राजसभायाः प्रीत्यर्थं समभूत्। आङ्ग्लानां भारतप्रवेश-प्रशासन-भ्रष्टाचार-दुर्नीति-कुकृत्य-दमन-लुण्ठनसम्बन्धिनीनां घटनानां वर्णनं लभ्यतेऽस्मिन् नाटके।

पञ्चमाङ्कतो भारतस्य स्वातन्त्र्यसङ्ग्रामस्य वर्णनं महत्त्वपूर्णं वर्तते । षष्ठेऽङ्के कांग्रेस-दलस्य स्थापना दृश्यते। ततो वङ्गभङ्गो जातः। तन्निरसनार्थं देशप्रेमिणो घोरक्रान्तिं चक्रुः। १९१४ तः १९१८ ख्रीष्टाब्दपर्यन्तं जायमाने विश्वयुद्धे भारतवासिभिः इङ्गलैण्ड-देशस्य महती सहायता कृता। तथापि आङ्गलशासनम् अत्याचारान्निवृत्तो न बभूव। एतत्परिणामस्वरूपेण वर्धमानो राजद्रोहः पराकाष्ठां गतः। गान्धीमहोदयस्य नेतृत्वे देशोऽयं स्वतन्त्रो जातः इति स्वातन्त्र्यकथा उपनिबद्धा अत्र।

स्वातन्त्र्योत्तरभारतेऽपि देशभक्तिपरक-संस्कृतनाटकरचनापरम्परा अनुवृत्ता वर्तते। यथा-

**जग्गुवकुलभूषणः** – मैरेयपारम्यम् गान्धीजितत्त्वम् अहिंसां प्रतिपादयति। नीर्पाजे भीमभट्टः- काश्मीरसन्धानसमुद्यमः।

**यतीन्द्रविमलचौधरी** (कदूर् खिल् ग्रामः, बांग्लादेशः) - भारतहृदयारविन्दम्, मिलनतीर्थभारतम्, भारतविवेकम् देशबन्धुदेशप्रियम्।

**के एस् नागराजन्** - यत्र गान्धीविजयम् सृष्टिकर्ता कष्यपब्रह्मा गान्धीरूपेण जनिं प्राप। किञ्चात्र सत्यं अहिंसां च मुख्यतया प्रतिपादिता।

**रमा चौधरी** - देशदीपम्, भारतपथिकम् (राजाराममोहनरायमुद्दिश्य)

**एस् बि वेलंकर्**- स्वातन्त्र्यलक्ष्मीः(रेडियोनाटकम्)।

**श्रीधरभास्करवर्णेकर्-** शिवराज्याभिषेकम्, विवेकानन्दविजयम् गजाननबालकृष्ण पलसुले-समानमस्तु वो मनः, धन्योऽहं धन्योऽहम् (सावर्कर् जीवनाधारितम्।

**पुल्लेलरामचन्द्रुडुः** – सुसंहतभारतम्। एवं कानिचन अत्र उल्लिखितानि। अन्यान्यपि वर्तन्ते।

स्वाराज्यं प्राप्तवतां भारतीयानाम् आत्मविस्मृतिः मा भूत् इति सन्देशं ददति एतानि नाटकानि। अतः स्वातन्त्र्यसङ्ग्रामसम्बद्धानि नाटकानि यदुद्देशेन रचितानि तस्य पूर्णतया साफल्यम् अध्ययनेन काले काले तेषां विमर्शेन प्रचारेण प्रस्तुत्या च भवेत्।

❑❑❑

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# शाब्दिकदृष्ट्या लक्षणाविवेचनम्

विद्यावाचस्पतिः डा. सदानन्द झा*

**प्रमुखशब्दाः- व्याकरणदर्शनम्, लक्षणावृत्तिः, वाक्यपदीयम्, शब्दस्य प्रामाण्यम् ।**

शोधसारः - जानन्त्येव शास्त्ररसिकाः शब्दशास्त्रस्य द्विधा परम्परा विद्यते। एका प्रक्रिया मूला अपरा च व्याकरणदर्शनमूला। व्याकरणदर्शनपरम्परायां लक्षणायाः स्थानमतीवमहत्वपूर्णमत्र न कश्चन संशयपंककलङ्कलेशः। पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः। सा च वृत्तिस्त्रिधा शक्तिर्लक्षणाव्यञ्जना चेति। यद्यपिवैयाकरणाः लक्षणावृत्तिं नोररी कुर्वन्ति मुक्तकण्ठस्तथापि अप्रसिद्धाशक्तिं स्वीकृत्य कामपि वृत्तिं मन्यन्त एव। सा लक्षणा दार्शनिकमते शक्यसम्बन्धरूपा, मीमांसकानां मते ज्ञाप्यसम्बन्धरूपा, वैयाकराणानां मते शक्यतावच्छेदकारोपरूपा संस्थापिता वर्तते। एतद्विषये महाभाष्यं वाक्यपदीय-काशिकान्यायदर्शन-न्यायवार्त्तिक-मीमांसासूत्र-तत्वचिन्तामणि-वेदान्त-परिभाषा-तर्कप्रकाश-न्यायसिद्धान्तमुक्तावली-व्यप्रकाश-ध्वन्यालोक-रसमहार्णव-रस-गङ्गाधर-वैयाकरण-भूषणसार-सिद्धान्तकौमुदी-लघुमञ्जूषा-परमलघुमञ्जूषा-समासशक्ति-दीपिका-साहित्यमीमांसा-प्रभृतिभ्यो ग्रन्थेभ्यो प्रकृतानुगुणं सारमादाय प्रणीतोऽयं शोधनिबन्धः लक्षणाविमर्शाख्यः यत्रान्ते शाब्दिकसम्मतं मतं संस्थापितम्।

= = = =

आप्तोपदेशरूपस्य शब्दस्य प्रामाण्यं स्वीकृतमास्ते[1]। तत्र शब्दस्य प्रामाण्ये स्थिते येन केनापि शब्देन यस्य कस्याप्यर्थस्य भानं कस्मान्न जायते? इत्यादिशङ्कासमाधानाय शिष्टानुभवसिद्धः कार्यकारणभावो जागर्तितराम्- शाब्दबोधं प्रति वृत्तिज्ञानं हेतुरिति। एतस्यैव विशिष्टं परिष्कृतं स्वरूपं तत्रभवता नागेशभट्टेन प्रदर्शितम्[2]- तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित-वृत्तिविशिष्टज्ञानं हेतुरिति। वैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रयपदविषयकत्वोभय-

---

* प्राचार्यः, ज.ना.ब्र.आदर्श संस्कृतमहाविद्यालयः, (केन्द्रीयसंस्कृतविश्वविद्यालयाधीनः) लगमा, दरभङ्गा, बिहारः
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

सम्बन्धेन। सकलघटशाब्दबोधाय सकलघटार्थबोधाय च तद्धर्मावच्छिन्नेति। वृत्तिज्ञानशून्यस्य शाब्दबोधवारणाय वृत्तिज्ञानस्य हेतुता प्रदर्शिता। विशेष्यविशेषण-भाववैपरीत्यज्ञाने विपरीतबोधसम्भावनावारणाय तद्धर्मावच्छिन्ननिरूपितेति कथनम्। एवमेव वैशिष्ट्यज्ञानेन विस्मृतवृत्तिकस्य तत्पदमजानतश्च न शाब्दबोधो भवति। इत्थं च शब्दतो बोधे वृत्तिज्ञानमेव कारणम्। सा च वृत्तिः शाब्दबोधोपयिकः सम्बन्धः। तस्याः त्रैविध्यं प्रसिद्ध्यति - शक्तिर्लक्षणा व्यञ्जना चेति।

तत्र प्राधान्येन प्रथमोपात्ता पदपदार्थसम्बन्धरूपा शक्तिः कौण्डभट्टमतेन बोधकतारूपा[3], नागेशमतेन च वाच्यवाचकभावा[4] स्वीकृता। एनामेव साहित्यिका अभिधां कथयन्ति या मुख्यार्थरूपा साक्षादर्थबोधिका भवति। लक्षणा तु शक्त्युपजीविका व्यञ्जनोपजीव्या मध्यानायिकास्वरूपा द्वितीया वृत्तिरस्ति। शक्त्या उपस्थितार्थस्य यत्र अन्वयः संगतो न भवति, सत्यप्यन्वये वा तात्पर्यं नोपपद्यते तत्र वाक्यार्थसंगतये लक्षणैव समर्था भवति। यथा - 'गङ्गायां घोषः' इत्यत्र गङ्गायाः शक्यार्थे प्रवाहे आभीरपल्लीस्वरूपस्य घोषस्यावस्थानासम्भवाद् गङ्गासम्बद्धतीरे लक्षणा क्रियते। तथा च तीरे घोषाधिकरणमन्वितं भवति। एतल्लक्षणायाः प्रयोजनं व्यंग्यार्थस्य शैत्यपावनत्वातिशयादिप्रतीतिरेव।

प्रस्तुते शोधनिबन्धे लक्षणावृत्तिविवेचनक्रमे न्याय-मीमांसा–वेदान्त–व्याकरण-साहित्यशास्त्रीयपण्डितानां मनोविनोदजनितखण्डन-मण्डनप्रदर्शनपुरस्परं वैयाकरण-मतस्पष्टीकरणं लक्ष्यमस्ति।

1. सर्वप्रथमं लक्षणावृत्तिवैशिष्ट्यं प्रतिपादयद्भिर्नैयायिकैर्यदुक्तं तन्निरूप्यते- योऽर्थो लक्षणया प्रतिपत्तुं शक्यते तत्र लक्षणैव, न तु शक्तिरूपेया[5] भगवदिच्छायाः शक्तित्वेन तत्कल्पनायां तदीयविषयताविशेषाणां कल्पनीयतया गौरवात्। लक्षणा तु स्वशक्यसम्बन्धभूता स्वस्वामिसंयोगादिरूपा क्लृप्तैव। तथा च स्वशक्यसम्बन्धो लक्षणा इति गङ्गेशोपाध्याया लक्षणालक्षणमाहुः[6]। तत्र स्वं= प्रस्तुतः शब्दः, तस्य शक्यः = शक्त्या उपस्थितोऽर्थः, यथा गङ्गापदस्य प्रवाहोऽर्थः, तत्सम्बन्धः सामीप्यं तटे वर्तते।

ततश्चात्र प्रवाहतीरयोः सामीप्यसम्बन्ध एव लक्षणेति फलति। एवमेव गौर्वाहीक इत्यत्र गोपदस्य सादृश्यसम्बन्धो वाहीकेन सह वर्तते, तेनात्र सादृश्यसम्बन्ध एव लक्षणा, गोसदृशो जडो वाहीक इत्यर्थः। इत्थं च गोपदमेव गोपदार्थस्य वाचकं, जाड्यादिलक्षकं च। अर्थात् लक्षणावृत्तिः पदाश्रिता भवति। गोकुलनाथोपाध्यायस्तु[7] मुख्यार्थमेव लक्षकं मनुते, न तु शब्दम्, तथा च तेन-

**मुख्यार्थो लक्षकस्तस्य श्रुतार्थं प्रत्ययोग्यता।**
**लक्ष्ये रूढिर्व्यञ्जनं वा सहकारीति तान्त्रिकाः।**

इति रसमहार्णवग्रन्थे उक्तम्। तदनुसारेण कस्यापि पदस्य मुख्यार्थ एव लक्षको भवति। यतो हि वाच्यार्थं प्रति वाक्यार्थः अयोग्यो भवति। अतः तद्योग्यतासम्पादनाय लक्षणा करणीया भवति। लक्ष्यार्थप्रतिपादने रूढिः प्रयोजनादिव्यञ्जनं च सहकारिकारणं भवति।

लक्षणाया द्वैविध्यमस्ति- (1) गौणी - सादृश्यसम्बन्धेन, यथा- गौर्वाहीकः, सिंहो माणवकः। (2) शुद्धा - सादृश्येतरसम्बन्धेन, यथा - गङ्गायां घोषः, आयुर्घृतम् = आयुर्निमित्तमित्यर्थः। प्रकारान्तरेण लक्षणा द्विविधा - (1) जहत्स्वार्था- स्वार्थत्यागपूर्वकं लक्ष्यार्थबोधिका- गङ्गायां घोषः, अत्र गङ्गापदं स्वार्थं प्रवाहं त्यक्त्वा तीरं बोधयति। (2) अजहत्स्वार्था - स्वार्थमत्यजन्ती एवान्यार्थं बोधयति- यथा- 'काकेभ्यो दधि रक्ष्यताम्' - इत्यत्र काकसहितस्य सर्वदध्युपघातकस्य ग्रहणं जायते। इत्येव भेदद्वयं क्रमशः लक्षणलक्षणा उपादानलक्षणेति व्यवह्रियते, इदं च शुद्धायाः एव भेदद्वयमिति सर्वे आमनन्ति। किन्तु गोकुलनाथोपाध्यायाः[8] गौणीलक्षणाया अपि उपादानत्वं लक्षणलक्षणात्वं च निरूपयन्ति। 'लम्बकर्णमानय' इत्यत्र लम्बकर्णशब्दः स्वार्थं परित्यज्य तद्विशिष्टं पुरूषं लक्षयति तेनेयं लक्षणलक्षणा, अथ च स पुरूषो यत्रोपस्थितो भवति तत्र कर्णोऽपि उपतिष्ठत इतीयम् उपादानलक्षणाप्यस्ति। अतएवात्र गोकुलनाथोपाध्यायैर्लक्षणायाः स्वोद्भावितो नवीनो भेदः स्वीकृतः लक्षणोपादानलक्षणेति। वैयाकरणास्तु समासद्वारैव सर्वार्थबोधेनात्र लक्षणां नैव स्वीकुर्वन्ति।

नैयायिकानुसारेण अन्वयानुपपत्तिप्रतिसन्धानं लक्षणाया बीजम्। 'गङ्गायां घोष' इत्यत्र गङ्गापदशक्यार्थे प्रवाहे घोषावस्थानासम्भवाद् गङ्गापदे स्वशक्यसम्बन्धरूपा लक्षणाश्रीयते। तेन तत्सामीप्यसम्बन्धेन तीरार्थसम्प्रत्ययेऽन्वयसंगतिर्भवति। वस्तुतः 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र अन्वयोपपत्तावपि तात्पर्यानुपपत्तितः लक्षणा स्वीक्रियते, तेन तात्पर्यानुपपत्तिप्रतिसन्धानं लक्षणाबीजमिति सर्वैः स्वीक्रियते। तथा च न्यायसिद्धान्तमुक्तावल्यामुक्तम्- "लक्षणा शक्त्यसम्बन्धस्तात्पर्यानुपपत्तितः''।

2. वेदान्तिनां मते[9] 'तत्त्वमसि' इति महावाक्ये तत्पदेन सर्वज्ञ आत्मा, त्वम्पदेन च अल्पज्ञो जीवोऽभिप्रेतः। तथा च उभयोः सामानाधिकरण्यानुपपत्तिरापतति। एतत्समाधानाय तत्पदार्थे लक्षणया सर्वज्ञत्वस्य त्यागः, तथा त्वम्पदार्थेऽल्पज्ञत्वस्य त्यागः क्रियते। तथा चात्र भागत्यागलक्षणाद्वारा शुद्धचैतन्यद्वयस्याभेदान्वयो भवति। एतन्मते पदे वाक्ये वा लक्षणा स्वीक्रियते। भागत्यागलक्षणामेव जहदजहल्लक्षणां कथयन्ति वृद्धाः।

3. मीमांसकमते स्वबोध्यसम्बन्धो लक्षणा[10] इति। तथा च लक्षणा न पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिः। 'गभीरायां नद्यां घोष' इत्यत्र 'गभीरायां नद्याम्' इति पदद्वयस्य तीरे लक्षणा। शक्यार्थः एकस्य पदस्य भवति यतो हि शक्तिः पदनिष्ठैव, न तु पदसमुदायनिष्ठा। अतः पदसमुदाये लक्षणां स्वीकर्तुमत्र लक्षणे शक्यशब्दस्य स्थाने बोध्यशब्दः स्थापितः। अत्र यदि नदीपदस्य तीरे लक्षणा क्रियते तर्हि गभीरशब्दस्य अन्वयः नद्यां न सम्भवति, तीरेऽपि अगभीरत्वान्नान्वयः भवति। यदि गभीरपदस्य तीरे लक्षणा क्रियते तर्हि तत्र नदीपदस्य अन्वयो न स्यात् तीरस्य अनदीत्वात्। यदि उभयपदे पृथक् पृथक् लक्षणा मन्यते तर्हि गभीरतीरविषयको वा नदीतीरविषयको वा बोधः स्यात्, गभीरत्वविशिष्टनदीतीरविषयको बोधो न स्यात्। अतः तद्बोधाय विशिष्टसमुदाय एव लक्षणा स्वीक्रियते। तथा च यत्र नैयायिकाः पदे लक्षणामिच्छन्ति तत्र मीमांसका वाक्ये लक्षणां कुर्वन्ति[11]। तल्लक्षणे स्वपदेन वाक्यमभिप्रेतमस्ति।

4. आलङ्कारिकाः व्यञ्जनावृत्तेराश्रयत्वेन लक्षणावृत्तिं यत्नतः पोषयन्ति। ते लक्षणां भक्तिशब्देनापि व्यवहरन्ति। तथा च ध्वन्यालोके-

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।**[12]

अर्थात् लक्षणा वृत्तिः = भक्तिः अस्ति, परन्तु तया ध्वनिर्न गतार्थो भवति रूपभेदादेव। ध्वनेः प्रतीयमानत्वं लक्षणायाश्च शक्तिसम्बन्धत्वमिति। लक्षणालक्षणमुक्तं काव्यप्रकाशे[13]-

**मुख्यार्थबाधे तद्योगे रूढ़ितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपितक्रिया।।**

तथा च व्यवहितार्थविषयिणी शब्दनिष्ठा वृत्तिर्लक्षणेति स्पष्टं लक्षणमित्थं भवति– मुख्यार्थबाधपूर्व - मुख्यार्थतावच्छेदकावच्छिन्नभिन्नार्थज्ञानजनकः शब्दव्यापारो लक्षणेति फलितार्थः। अत्र लक्षणायाः हेतुत्रयं स्वीक्रियते-

(1) मुख्यार्थबाधः, (2) मुख्यार्थयोगः, (3) रूढिप्रयोजनान्यतरत्वञ्चेति। तत्र रूढिः प्रसिद्धिः यथा- 'कलिङ्गः साहसिकः' इत्यत्र देशवाचककलिङ्गशब्दस्य तद्देशस्थपुरूषार्थप्रतिपादकता रूढिमूलास्ति। गङ्गायां घोष इत्यत्र गङ्गापदस्य सामीप्ये तीरे लक्षणा, तत्र हेतुः शैत्यपावनत्वादिरूपं प्रयोजनम्।

काव्यप्रकाशानुसारेण लक्षणा षड्विधा[14] - तत्र गौणी द्विविधा, शुद्ध लक्षणा चतुर्था इति। तत्र क्रमेणोदाहरणानि-

1. गौणी साध्यवसाना - गौरयम् इति वाहीकविषये कथनम्।
2. गौणी सारोपा - गौर्वाहीकः।
3. शुद्धा सारोपा - आयुर्घृतम्।
4. शुद्धा साध्यवसाना - आयुरेवेदम् इति घृतविषये कथनम्।
5. शुद्धा उपादानलक्षणा - कुन्ताः प्रविशन्ति।
6. शुद्धा लक्षणलक्षणा - गङ्गायां घोषः।

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

विश्वनाथानुसारेण[15] लक्षणायाः षोडशभेदाः भवन्ति। तेषु केचनासम्भाविनः केचन च चमत्कृतिशून्यतया उपेक्ष्या इति समामनन्ति।

5. वैयाकरणाः पृथग्वृत्तिरूपेण लक्षणां न स्वीकुर्वन्ति, किन्तु तां शक्तेरन्तरर्गतां कथयन्ति। तथा च अप्रसिद्धा शक्तिरेव लक्षणेति तेषां सिद्धान्तो मञ्जूषायां व्यवस्थापितः[16]। वैयाकरणेषु सर्वप्रथमं महाभाष्यकारः पतञ्जलिः लक्षणाविषये सङ्केतं करोति "पुंयोगादाख्यायाम्''[17] इति सूत्रे-

"चतुर्भिः प्रकारैरेतस्मिन् स इत्येतद् भवति - तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचार्यत् । मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय'' इत्युक्तम्। तथा च अन्यस्मिन् अन्यार्थस्य आरोपो लक्षणेति फलितम्। एषु चतुर्षु प्रकारेष्वेव तादर्थ्यादिति पञ्चमं निवेश्य नागेशः इदं पद्यं प्रस्तुतवान्[18] -

**तात्स्थात् तथैव ताद्धर्म्यात् तत्सामीप्यात्तथैव च।**
**तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः ॥**

अत्र तादर्थ्यस्योदाहरणम्- 'इन्द्रार्था स्थूणा' इन्द्र इति प्रस्तुतम्। तदनन्तरं वाक्यपदीये भर्तृहरिरपि लक्षणायाः संकेतमेव प्रस्तौति[19]-

**यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।**
**तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः॥**

एतेन स्पष्टमस्ति यद् गोशब्दस्य वाहीकोऽर्थोऽप्यस्ति, कथम् ? लक्षणया। प्राचीनवैयाकरणानामेकशक्तिवादो भर्तृहरिणा समर्थितः। अर्थात् शक्तिरेव मुख्यार्थं गौणार्थं च प्रकाशयति। गौणार्थे लक्ष्यार्थे व्यङ्ग्यार्थश्चायातः। तथा च एकैकस्य शब्दस्य स्वार्थवाचकत्वसामर्थ्यं भवति। प्रयोगवशात् ते तेऽर्थाः प्रकाशन्ते। तथा हि -

**सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।**
**प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपवर्ण्यते॥**[20]

अर्थात् शब्दः सर्वशक्तिमान् भवति, प्रसिद्धिमाधारीकृत्य कुत्रचिन्मुख्यार्थं कुत्रचिच्च गौणार्थं प्रकाशयति। अस्याधारेणैव नागेशभट्टेन- शक्तिर्द्विधा प्रसिद्धा अप्रसिद्धा
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

चेत्युक्तम्। अप्रसिद्धायामेव शक्तौ लक्षणाया अन्तर्भावः कृतः, किन्तु व्यञ्जनावृत्तिः स्वतन्त्ररूपेण स्वीकृता।

**एकशक्तिवादस्य चायमभिसन्धिः**[21] - शब्दस्य सर्वार्थप्रतिपादकत्वेऽपि प्रतिभावशादेव तत्र तत्र तेऽर्था ज्ञायन्ते। तत्र यस्य जनस्य यादृशी प्रतिभा भवति स तावत्पर्यन्तमर्थं जानीते। एक एव शब्दः शक्त्या एव मुख्यार्थं, लक्ष्यार्थं, व्यङ्ग्यार्थं च बोधयितुं समर्थो भवति, किन्तु तादृशः प्रतिभावान् अपेक्ष्यते। नागेशस्तु भर्तृहरेरेव पंक्तेराधारेण व्यञ्जनावृत्तिं स्वीकरोति, तथा चाह भर्तृहरिः -

**ग्राह्यग्रहणयोः सिद्धा योग्यता नियता यथा।**
**व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः॥**[22]

तदनन्तरं काशिकाकारः लक्षणाया उल्लेखं चकार- "**यदा तु लक्षणया वर्तते तदा पुरूषेण सामानाधिकरण्यं भवति**''।[23] अत्र न्यासकार आह- 'लक्षणा उपचार' इति। उपचार आरोप एवेति।

नागेशभट्टः स्वकीयेषु वैयाकरणसिद्धान्तमञ्जूषा-लघुमञ्जूषा-परमलघुमञ्जूषासु विशदरूपेण लक्षणाविचारं प्रास्तौत्।

तत्र परमलघुमञ्जूषायां परमतेन लक्षणालक्षणं भेदप्रपञ्चं च विधाय लक्षणावृत्तेः खण्डनं विहितम्। तथा च लक्ष्यार्थस्य अप्रसिद्धार्थरूपेण कथनं विधाय शक्तेरन्तर्गतरूपेणैव लक्षणा स्थापिता। अत्र भाष्यवचनमेव प्रमाणमुपस्थापितम्- "सति तात्पर्ये सर्वे सर्वार्थवाचकाः'' इति। तथा च गङ्गापदं यथैव प्रवाहरूपं मुख्यार्थं बोधयति तथैव तीरूपमप्यर्थं तात्पर्ये सति बोधयति। गौणार्थस्यापि वाचकमेव गङ्गापदमस्ति। तात्पर्यमिदं यत् शक्तिर्द्विधा- प्रसिद्धा अप्रसिद्धा चेति।[24] तत्र प्रथमा मुख्या, अपरा च गौणी। इत्थं शक्त्यैव निर्वाहे लक्षणायाः आवश्यकता नास्ति। एकयैव वृत्त्या निर्वाहे वृत्तिद्वयकल्पना नोचिता। लक्षणावृत्तिः मुख्यार्थबाधमपेक्षत इति अधिकायाससापेक्षतेति सा जघन्या अर्थात् निन्दनीयास्ति। तत्स्वीकारे वृत्तिद्वयस्यावच्छेदकत्वकल्पनमावश्यकमिति गौरवमस्ति। पदस्यानुपूर्वी वृत्तेरवच्छेदक उच्यते।[25]

सर्वार्थवाचकत्वेऽपि तात्पर्याभावादेव घटपदात् पटप्रत्ययो न भवति। तात्पर्यानुगमः कथं स्यादिति विषये नागेशेनोक्तम्[26]- **तात्पर्यं चात्र देवता-महर्षि-लोकवृद्धपरम्परातः अस्मदादिभिर्लब्धमिति।**

नागेशानुसारेण अन्वयाद्यनुपपत्तिपूर्विका लक्षणा पदे एवेति। भट्टोजिदीक्षितस्तु प्रौढमनोरमायां वृत्तित्वेन लक्षणां स्कीकरोति- "**वृत्तिश्च शक्तिलक्षणान्यतररूपा**" इति, एतेन तन्मते व्यञ्जनावृत्तिर्न स्वीकृतास्ति इति गम्यते।

लघुमञ्जूषायां लक्षणाविषये लिखितं यत् - "**अन्वयाद्यनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेन उद्बुद्धशक्तिसंस्कारबोधे लक्षणेति व्यवहार**"[27] इति। अर्थात् अन्वयानुपपत्तिपूर्वकं तात्पर्यानुपपत्तिपूर्वकं वा यत् शक्यसम्बन्धस्मरणं तेन उद्बुद्धो यः संस्कारः स एव लक्षणेति लक्षणालक्षणमुक्तं भवति। एतल्लक्षणे अन्वयाद्यनुपपत्तिकथनने शक्तिस्वरूपात् पार्थक्यं कृतम्, व्यञ्जनायामतिव्याप्तिर्मा भवतु एतदर्थं शक्यत्वेनेति कथितम्। लक्षणमिदं लक्षणावृत्तिस्वीकारे हेतुत्वेन प्रस्तुतमिति प्रतीयते यदत्र नागेशः लक्षणावृत्तिं स्वीकरोतीति। परन्तु अग्रे- "परे तु आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रस्द्धिान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहार" इति ग्रन्थेन शक्त्यैव लक्षणामन्तर्भावयति। अस्यायमाशयः पं. रामप्रसाद त्रिपाठिमहाशयैः प्रकाशितः[28]- आरोपिता यः शक्यतावच्छेदकधर्मः तद्रूपशक्तिसम्बन्धेनैव गङ्गापदस्य वाच्यत्वरूपेण प्रसिद्धव्यक्तितो भिन्नव्यक्तेर्बोधे अथवा व्यक्तिविशेषबोधे 'लक्षणाद्वारा जायमानोऽयं बोध' इति व्यवहारो भवति। यथा गंगायां घोष' इत्यत्र गंगापदस्य वाच्यत्वेन प्रसिद्धार्थः प्रवाहः, तदितरस्तटरूपोऽर्थः तस्य शक्त्यैव बोधे जनाः लक्षणया बोधो जात इति कथयन्ति।

तात्पर्यमिदं यद् गङ्गापदे एव प्रवाहार्थवाचकता तीरार्थवाचकता च वर्तेते। तत्र आद्या प्रसिद्धा, अपरा स अप्रसिद्धा। प्रसिद्धानेकार्थस्थले एव नानार्थकता भवतीति, नात्र नानार्थकत्वं कथयितुं शक्यते। इत्थमारोपितार्थप्रतिपादिका लक्षणा भवतीति फलितम्।

अत्रेदमपि ज्ञातव्यं भवति यत् यथा परमलघुमञ्जूषायां 'यत्तु तन्न' इत्येवं रूपेण लक्षणावृत्तेः खण्डनं कृतं, न तथा लघुमञ्जूषायां बृहन्मञ्जूषायां वा।

वैयाकरणसिद्धान्तमञ्जूषायां[29] लक्षणालक्षणमित्थं प्रस्तुतम्- "यस्य पदार्थस्य स्वसम्बन्धिबोधजनकत्वज्ञानाद् बोधः, तत्पदार्थनिरूपिततादृशबोधकत्वं लक्षणा'' इति। इत्थं शक्तितः पार्थक्येन लक्षणोपस्थापिता यत् शक्तिः स्वविषयकबोधजनकत्वज्ञानाद् भवति, लक्षणा तु स्वसम्बन्धिबोधजनकत्वज्ञानादिति। परन्तु 'अपरे तु' इति मतभेदनिरूपणे लक्षणां शक्तेरन्तर्गतां संकेतयति- "गङ्गादिपदजन्यतीराद्यर्थशाब्दबोधे स्वसम्बन्धिप्रवाहादिबोधकत्वज्ञानस्य कारणत्वापेक्षया लाघवेन स्वबोधकत्वज्ञानस्यैव कारणत्वं युक्तमिति''।

लक्षणायाः स्वतन्त्रवृत्तित्वस्वीकारे[30] तत्तच्छाब्दबुद्धित्वावच्छिन्नं प्रति शक्तिजन्योपस्थितिर्लक्षणाजन्योपस्थितिश्च कारणं स्वीकर्तव्यं भवति, तेन कार्यकारणभावद्वयापत्तिः भवति। शक्त्यैव बोध इति पक्षे तु एक एव कार्यकारणभाव इति लाघवं भवति। एवमेव लक्षणाया अतिरिक्तवृत्तित्वे पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च कारणत्वं स्वीकार्यमिति कार्यकारणभावे अतिरिक्तं गौरवं समापतति।

मञ्जूषानुसारेण स्वशक्यतावच्छेदकारोप एव लक्षणा। तेन शक्यतावच्छेदकप्रकारक एव बोधः। अतएव 'गङ्गायां मीनघोषौ' इति द्वन्द्वस्य साधुता भवति। लक्षणावृत्तिवादिमते तु मीनस्य जलत्वावच्छिन्ने घोषस्य च तटत्वावच्छिन्नेऽन्वयेन एकधर्मावच्छिन्नेऽन्वयरूपसाहित्याभावेन द्वन्द्वस्यासाधुता स्यात्। शक्तिवादिमते तु गङ्गात्वेनैव तटबोधादेकधर्मावच्छिन्नेऽन्वयसम्भवेन नासाधुतेति। अत एव शक्त्यैव कार्यनिर्वाहे लक्षणावृत्तिर्न स्वीकार्या। यत्कार्यं लक्षणा करोति तदेव अप्रसिद्धा शक्तिः करोति। अतएव अप्रसिद्धशक्तिस्थले एव लक्षणाव्यवहारं कुर्वन्ति सामान्यजनाः। तात्पर्यमिदं यत् 'गङ्गायां घोषः' इत्यत्र तटे गङ्गार्थप्रवाहस्य आरोपो भवति, 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र सर्वदध्युपघातके काकस्य आरोपो भवति।[31] इत्थम् तत्र आरोपिता शक्तिः अप्रसिद्ध भवत्येवेति।

सारांशरूपेण वक्तुं शक्यते यत् सर्वस्मिन् शब्दे प्रसिद्धा अप्रसिद्धा च शक्तिर्वर्तते। अप्रसिद्धा शक्तिरेव लक्षणाशब्देन व्यवह्रियते । प्रसिद्धत्वं च प्रचुरप्रयोगविषयत्वम्। अप्रसिद्धत्वम् शक्यारोपितत्वम्। प्रसिद्धत्वज्ञानं च व्याकरण-कोश-व्यवहार-शिष्टप्रयोग-व्याख्यादितो भवति। तत्सम्बद्धार्थोऽप्रसिद्धः। स च शक्त्यैव प्रतिपाद्यो भवतीति तदर्थं लक्षणावृत्तिर्न स्वीकार्या। इमाम् अप्रसिद्धां शक्तिमेव यदि लक्षणां कथयन्ति तर्हि तदनुमोदनं वैयाकरणैः क्रियते किन्तु नैव् शक्तिभिन्नवृत्तिरूपेणेति।

**टिप्पण्यः**

1. परमलघुमञ्जूषा - आरम्भे।
2. परमलघुमञ्जूषा - शक्तिनिरूपणे।
3. वै. भूषणसारः - शक्ति.।
4. परमलघुमञ्जूषा- शक्ति.।
5. समासशक्तिदीपिका - महावैयाकरण- दीनबन्धुझाः, सम्पादक प्रो. शशिनाथ झा । प्रकाशन - कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय ।
6. तत्त्वचिन्तामणिः- शब्दा.।
7. रसमहार्णवः- पृ.-6
8. सारस्वतसुषमा- विनयानन्द झा, पृ.- 126
9. वेदान्तपरिभाषा- पृ.- 27
10. परमलघुमञ्जूषा- लक्षणा.।
11. संस्कृतव्याकरणदर्शन - भीमसिंह वेदालंकार।
12. ध्वन्यालोकः- पृ. 17
13. काव्यप्रकाशः- द्वि. उ.।
14. काव्यप्रकाशः- द्वि. उ.।
15. साहित्यदर्पणः- द्वि. प.।
16. परमलघुमञ्जूषा- लक्षणा.।
17. महाभाष्यम्- 4.1.48
18. परमलघुमञ्जूषा- लक्षणा.।
19. वाक्यपदीयं वाक्यकाण्डम्- का. 254
20. वाक्यपदीयं वाक्यकाण्डम्- का. 255
21. त्रिवेणिका- आशाधरभट्टः।
22. वाक्यपदीयम्- वाक्यकाण्डम्।
23. काशिकावृत्तिः - 5.2.4
24. परमलघुमञ्जूषा - लक्षणा.।
25. परमलघुमञ्जूषावंशीव्याख्या- पं. वंशीधर मिश्रः।
26. परमलघुमञ्जूषा- लक्षणा.।
27. वै. सिद्धान्तलघुमञ्जूषा- लक्षणा.।
28. वै. सिद्धान्तलघुमञ्जूषा- पृ. 221
29. वैयाकरणसिद्धान्तमञ्जूषा- पृ. 15
30. वैयाकरणसिद्धान्तमञ्जूषाविमर्शः- डॉ. भवेन्द्र झाः, पृ.- 62
31. वै. सिद्धान्तलघुमञ्जूषा- पृ.- 217

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

## सन्दर्भग्रन्थसूची


1. परमलघुमञ्जूषा महामहोपाध्याय नागेशभट्टः, सम्पादकः - आचार्य लोकमणि दाहालः,चौखम्बासुरभारती प्रकाशन वाराणसी,2009
2. वैयाकरणभूषणसार कौण्डभट्टः दर्पण व्याख्या सहिता सम्पादकः- डा. चन्द्रिका प्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन दिल्ली, 1989
3. रसमहार्णवः म. म. गोकुलनाथ, सम्पादक - पं. धर्मनाथ झा, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर दरभंगा, 2007
4. सारस्वत सुषमा लेखक: विनयानन्द झा प्रकाशन- मंगरौनी मधुबनी
5. समासशक्तिदीपिका - महावैयाकरण पं. दीनबन्धु झा,व्याख्याकार - डा. सदानन्द झा, सम्पादकः - डा. शशिनाथ झा, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा,2001
6. तत्वचिन्तामणिः म. म. गंगेशोपाध्याय चौखम्बासुरभारती प्रकाशन वाराणसी
7. काव्यप्रकाश: आचार्यमम्मटः, व्याख्याकार - डा. सत्यव्रतसिंह, चौखम्बा विद्याभवन,वाराणसी,2007
8. वेदान्त परिभाषा - व्याख्याकार- डा. गजाननशास्त्री मुसलगावकर, चौखम्बा विद्याभवन, वाराणसी, 1983
9. संस्कृतव्याकरण दर्शन- भीमसिंह वेदालंकार, पेनमेन प्रकाशन,दिल्ली
10. साहित्यदर्पण: - आचार्य विश्वनाथ कविराः रामाचरण तर्क वागीश भट्टाचार्य,सम्पादक श्री दुर्गाप्रसाद द्विवेदी, मेहरचन्द्र लछमनदास,दिल्ली,1982
11. ध्वन्यालोक आनन्दवर्धनः, लोचन संस्कृत व्याख्याः अभिनवगुप्त, सम्पादक- आचार्य जगन्नाथ पाठकः, चौखम्बा विद्याभवन,वाराणसी, 1965
12. महाभाष्यम् - महर्षि पतंजलि चतुर्थोध्यायः-व्याख्याकार सम्पादक- पं हरिनारायण तिवारी, चौखम्बा विद्याभवन वाराणसी,2009
13. वाक्यपदीयम् (ब्रह्मकांडम्) श्रीभर्तृहरिविरचितं, सम्पादक व्याख्याकार पण्डित रामगोविन्द शुक्ल, चौखम्बा विद्याभवन, वाराणसी
14. वाक्यपदीयम् श्रीभर्तृहरिविरचितं, अंबाकर्त्री व्याख्या, श्री को० अ० सुब्रह्मण्य अय्यर, चौखम्बा विद्याभवन, वाराणसी
15. त्रिवेणिकाः - आशाधरभट्टः ।
16. काशिकावृत्तिः वामनजयादित्य व्याख्याकार हरदत्त, पदमंजरी, जितेन्द्र बुद्धिकृत न्यास व्याख्या सहिता सम्पादकः प्रो. नारायण मिश्र, रत्ना प्रकाशन वाराणसी, 1985
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

17. परमलघुमञ्जूषावंशीव्याख्या - म. म. नागेशभट्टः,व्याख्याकार - पं. वंशीधर मिश्र,गया,बिहार
18. वै. सिद्धान्तलघुमञ्जूषा - लक्षणा, म. म. नागेश भट्ट,व्याख्याकारः दुर्बलाचार्यकृत कुंजिका बालभट्टकृत कला, रामप्रसाद त्रिपाठि कृता सरला सहिता, सम्पादकः पं. रामप्रसाद त्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी,1997
19. वैयाकरणसिद्धान्तमञ्जूषा विमर्शः – डॉ० भवेन्द्र झाः,दिल्ली।

❑❑❑

**महस्विन्याः विशेषसञ्चिका - उत्कर्षदीपिका**

**महस्विनी - विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452) , वर्षम् : २०२३**

# विंशकं ज्ञानं ज्ञानसाधनम्

डा. गणेश ति. पण्डितः*

## पीठिका

'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति गीतास्थं श्लोकवाक्यं सर्वैः श्रुतचरमेव। मनुष्यलोके ज्ञानस्य सर्वोत्कृष्टं पवित्रं च स्थानं वरीवर्ति। परं ज्ञानप्राप्तिः सुलभसाध्या नास्ति। ज्ञानमपि लौकिकम् आध्यात्मिकं चेति द्वैविध्यम् ऋच्छति। तत्र आध्यात्मिकज्ञानस्य सर्वोत्कृष्टं स्थानं कल्पितम् अस्ति भारतीयज्ञानप्रणाल्याम्। भगवद्गीतायां ज्ञानस्य ज्ञानसाधनानां च विषये विस्तरेण प्रोक्तं वर्तते। गीतायाः क्षेत्रक्षेत्रज्ञविभागयोगाख्ये त्रयोदशे अध्याये अमानित्वादितत्त्वज्ञानार्थदर्शनान्तं यत् विंशतिसङ्ख्यात्मकं प्रोक्तं तत् ज्ञानसाधनमिति सुस्पष्टम्। केवलम् एकेन साधनेन क्रियासिद्धिः न सम्भवति। अतः साधनसमुच्चयग्रहणदृष्ट्या 'विंशकं ज्ञानं ज्ञानसाधनम्' इति स्पष्टम् उल्लिखितम् अस्ति। इह लोके परलोके च इमानि ज्ञानसाधनानि मानवान् बहुधा उपकुर्वन्ति। अतोऽत्र शोधलेखे विंशतिसङ्ख्यात्मकानि ज्ञानसाधनानि कानीति सोदाहरणं सप्रमाणं च निरूप्यन्ते।

**कुञ्चिकापदानि -**

1. अमानित्वम् Humility/ Humbleness
2. अदम्भित्वम् Unpretentiousness
3. अहिंसा Harmlessness
4. क्षमा Forgiveness
5. आर्जवम् Rectitude
6. आचार्योपासनम् Service of the Teacher
7. बाह्याभ्यन्तरशुचिः Purity
8. स्थिरता Steadfastness
9. आत्मविनिग्रहः Self-control

* सहायकनिदेशकः, कार्यक्रमप्रकाशनविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

10. इन्द्रियार्थेषु वैराग्यम् Indifference to the objects of the senses
11. अनहंकारः Absence of egoism
12. जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् Reflection on the evil in birth, death, old age, sickness and pain
13. असक्तिः Non attachment
14. पुत्रदारगृहादिषु अनभिष्वङ्गः Non identification of the self with son , wife, home and rest.
15. इष्टानिष्टोपपत्तिषु नित्यत्वं समचित्तत्वम् Constant even mindedness on the attainment of the desirable and undesirable
16. अव्यभिचारिणी भक्तिः Unswerving devotion
17. विविक्तदेशसेवित्वम् An inclination for solitary places
18. जनसंसदि अरतिः An aversion for mundane society
19. अध्यात्मज्ञाननित्यत्वम् Constancy in spiritual knowledge
20. तत्त्वज्ञानार्थदर्शनम् Philosophical pursuit of the absolute truth

अथ विंशतेः समूहः विंशकम् इति गद्यते। एकैकमपि ज्ञानसाधनं अत्यन्तं लाभदमेव विद्यते। ज्ञानसाधनानि इमानि भारतीयज्ञानपरम्परायाः द्वारोद्घाटनसाधनानि सन्ति। क्रमशः यथा -

### 1. अमानित्वम् Humility/ Humbleness

मानिनः भावः मानित्वम्। विद्यमानैः अविद्यमानैर्वा गुणैरात्मनः श्लाघित्वं मानित्वमिति चोच्यते। तदभावः अमानित्वम्। 'कोन्योऽस्ति सदृशो मया ' इति मानित्वभावेन मानवः बहून् दोषान् समाचरति। रावणदुर्योधनादयः मानित्वभावापरित्यागादेव मृताः । यथोक्तं राजतरङ्गिण्याम् -

**तिर्यग्भ्यस्त्रिजगज्जयी परिभवं लङ्केश्वरो लब्धवा-**
**न्व्यापाशेषनृपोत्तमः कुरुपतिः पादाहतिं मूर्धनि ।**
**इत्यन्ते बहुमानहृत्परिभवः सर्वस्य सामान्यव-**
**त्तत्को नाम भवेन्महानहमिति ध्यायन्धृताहंक्रियः ॥** इति ०८/३३५

मानित्वभावत्यागेन मानवः ज्ञानावप्तौ विद्यमानं प्रथमं सोपानम् अधिरोढुं प्रभवति ।

**2. अदम्भित्वम् Unpretentiousness**

लाभपूजाख्यात्यर्थं स्वधर्मस्य प्रकटीकरणं दम्भित्वम् । तदभावः दम्भराहित्यमेव अदम्भित्वम् इति निगद्यते । दम्भः ज्ञानमार्गे बाधको भवतीत्यतः सः वर्ज्य एव । कलियुगे दम्भिनाम् अभावो नास्ति इति नीलकण्ठदीक्षितेन तेषां जीवनशैली सदृष्टान्तं निरूपिता । यथा -

**आमध्याह्नं नदीवासः समाजे देवतार्चनम् ।**
**सततं शुचिवेषश्चेत्येत्तदम्भस्य जीवितम्** ॥ ९१ ॥ इति ।

**3. अहिंसा Harmlessness**

कायेन वाचा मनसा वा प्राणिनां पीडनमेव हिंसा इत्युच्यते । उूर्ध्वलोकप्रवेशाय अहिंसा राजमार्गवत् कार्यं करोति । यथोक्तं पद्मपुराणे -

**अहिंसानिर्मलं धर्मं सेवन्ते ये विपश्चितः ।**
**तेषामेवोर्ध्वगमनं यान्ति तिर्यगधोन्यथा** ॥ ४/४१

परपीडावर्जनमेव अहिंसा । पापाय परपीडनम् इत्यपि बहुत्र प्रोक्तम् । अतः अहिंसा अपि एकम् उत्कृष्टं ज्ञानसाधनम् अस्ति ।

**4. क्षान्तिः / क्षमा Forgiveness**

परेण अपकृतेऽपि चित्तस्य निर्विकारत्वं क्षान्तिः इति गद्यते । क्षमाशीलः सहिष्णुर्वा जनः ज्ञानावप्तौ सफलो भवति नान्यथा । यथोक्तं वाल्मीकिरामायणे -

**यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ।**
**यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते** ॥ ५/५५/०६

**5.आर्जवम् Rectitude**

आर्जवं नाम ऋजुभावः अवक्रता । वक्रता कुटिलता वा बाधिका भवतीत्यतः ज्ञानोन्मुखः मानवः आर्जवम् आश्रयेत् । किञ्च

क्षमया दयया प्रेम्णा सूनृतेनार्जवेन च ।
वशीकुर्याज्जगत् सर्वं विनयेन च सेवया ॥

इति सुभाषितसङ्ग्रहेऽपि उक्तमस्ति।

**6. आचार्योपासनम् Service of the Teacher**

आचरति आचरयति इति आचार्यः। आचिनोति च शास्त्राणि आचारे स्थापयत्यपि। स्वयम् आचरते यस्मात् तस्मात् आचार्य उच्यते।। इति पुराणोक्तिः। आचार्यः गुरुरित्यपि कथ्यते। तादृशस्य सद्गुरोः सेवां कारं कारं मानवः भुक्तिं मुक्तिं च विन्दति। ज्ञानसाधनोपदेष्टा गुरुः। तस्य शुश्रूषां कृत्वा साफल्यं प्राप्तुं शक्यते इत्यतःआचार्योपासनम् एकं प्रबलं साधनम् अस्ति।

**7. शौचम् Purity**

बाह्याभ्यन्तरशुचित्वं शौचम् । तत्र बाह्यं मृज्जलादिना आभ्यन्तरं रागादिमलक्षालनम्। आन्तरिकी शुद्धिः नाम भावशुद्धिः। यथोक्तं स्कन्दपुराणे -

चित्तं विशोधयेत्तस्मात्किमन्यैर्बाह्यशोधनैः।
भावतः संविशुद्धात्मा स्वर्गं मोक्षं च विन्दति॥ ४२/६३

**8. स्थैर्यम् Steadfastness**

स्थिरता स्थिरभावो वा । सन्मार्गे प्रवृत्तस्य तदेकनिष्ठा स्थैर्यम् इति उच्यते। मोक्षसाधने प्रवृत्तस्य विघ्नसद्भावेऽपि तदगणनम् एव स्थैर्यम् इति नीलकण्ठयतेः मतम्।

**9. आत्मविनिग्रहः Self-control**

देहेन्द्रियादिप्रचारसङ्कोचः आत्मविनिग्रहः इति गद्यते। शाङ्करभाष्ये ' आत्मनः अपकारकस्य आत्मशब्दवाच्यस्य कार्यकारणसङ्घातस्य विनिग्रहः स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्गे एव निरोधः आत्मविनिग्रहः ' इति उल्लिखितम् अस्ति।

**10. इन्द्रियार्थेषु वैराग्यम् Indifference to the objects of the senses**

शब्दादिविषयेषु दृष्टादृष्टेषु भोगेषु च विरागभावो वैराग्यम् इति कथ्यते। साधनमार्गे इन्द्रियार्थेषु संसक्तिः नापेक्ष्यते इति फलितम्।

**11. अनहंकारः Absence of egoism**

अनहंकारः नाम दर्पराहित्यम् इति अर्थः । इह लोके परत्र च अहङ्कारः बाधकः एव। उक्तञ्च स्कन्दपुराणे -

**यावद्भावा ह्यनेकाश्च इन्द्रियार्थस्तथैव च ।**

**यावच्च ममताभावस्तावदीशो हि दुर्लभः ॥ 8/65**

**12. जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् Reflection on the evil in birth, death, old age, sickness and pain**

जन्म च मृत्युः च जरा च व्याधयः च दुःखानि च तेषु जन्मादिदुःखान्तेषु प्रत्येकं दोषानुदर्शनम्; जन्मनि गर्भवासयोनिद्वारा निस्सरणं दोषः , तस्य अनुदर्शनम् आलोचनम्। एवमेव मृत्यौ दोषानुदर्शनम्। तथा च जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति । तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनम्। अध्यात्माधिभूताधिदैवनिमित्तेषु दुःखेषु दोषदर्शनम् इत्यपि। अथवा दुःखानि एव दोषः दुःखदोषः तस्य जन्मादिषु पूर्ववत् अनुदर्शनम्। किञ्च दुःखं जन्म दुःखं मृत्युः दुःखं जरा दुःखं व्याधयः। दुःखनिमित्तत्वात् जन्मादयः दुःखम्, न पुनः स्वरूपेण एव दुःखम् इति आकलनीयम्।

**13. असक्तिः Non attachment**

सङ्गनिमित्तेषु विषयेषु प्रीतिमात्रं सक्तिः। सङ्गाभावः असक्तिः इति उच्यते। पुत्रादौ ममतामात्रं सक्तिः इत्यपि कथ्यते। असक्तिः साधिका वर्तते।

**14. पुत्रदारगृहादिषु अनभिष्वङ्गः Non identification of the self with son, wife, home and rest.**

पुत्रादीनां सुखे दुःखे च अहमेव सुखी दुःखी चेत्यध्यासातिरेकभावः, अभिष्वङ्गः नाम अन्यस्मिन् अहम्बुद्धिः तदभावः अनभिष्वङ्गः इति मन्तव्यम्।

**15. इष्टानिष्टोपपत्तिषु नित्यत्वं समचित्तत्वम् Constant even mindedness on the attainment of the desirable and undesirable**

इष्टप्राप्तौ हर्षाभावः अनिष्टप्राप्तौ विषादाभावः स्यात् इति भावः । हर्षविषादराहित्यम् इति तात्पर्यम् ।

**16. अव्यभिचारिणी भक्तिः Unswerving devotion**

न अन्यो भगवतो वासुदेवात् परः अस्ति सः एव नः गतिः इति न व्यभिचरणशीला श्रद्धा यस्य वर्तते तदीया भक्तिः अव्यभिचारिणी भक्तिः इति निगद्यते। सामान्यजनस्यापि अव्यभिचारिण्या भक्त्या भगवान् अपि तुष्टो भवति। यथोक्तं लिङ्गपुराणे-

**अयोग्यस्यापि भगवान् भक्तस्य परमेश्वरः।**

**प्रसीदति न सन्देहो निगृह्य विविधं तमः॥ (१०/११)**

**17. विविक्तदेशसेवित्वम् An inclination for solitary places**

विविक्तः स्वभावतः संस्कारेण वा अशुच्यादिभिः रहितः अरण्यनदीपुलिनदेवगृहादिभिः विविक्तो देशः, तं सेवितुं शीलम् अस्य इति विविक्तदेशसेवी, तद्भावः विविक्तदेशसेवित्वम् इति गद्यते । विविक्तदेशः शुद्धः चित्तप्रसादकरश्च भवति इत्यतः साधनापथे वर्तमानः विविक्तदेशसेवी स्यादेवेति भावः।

**18. जनसंसदि अरतिः An aversion for mundane society**

जनानां प्राकृतानां संस्कारशून्यानाम् अविनीतानां संसत् जनसंसदित्युच्यते। संस्कारवतां विनीतानां च संसत् इष्टैव। यतः तस्याः ज्ञानोपकारकत्वात्। एवञ्च प्राकृतसंसदि अरतिं संस्कृतसंसदि रतिं च धरेत् जिज्ञासुरिति भावः ।

**19. अध्यात्मज्ञाननित्यत्वम् Constancy in spiritual knowledge**

आत्मानम् अधिकृत्य वर्तमानम् अध्यात्मज्ञानं तस्मिन् नित्यत्वं नित्यभावः स्यात् इति अभिप्रायः। अध्यात्मशास्त्रजे ज्ञाने निष्ठावहत्वमेव अध्यात्मज्ञाननित्यत्वम् इति तात्पर्यम् अत्र। अध्यात्मलक्षणं योगबिन्दौ सूक्तमेव। तद्यथा -

**औचित्यात् वृत्तमुक्तस्य वचनात् तत्त्वचिन्तनम्।**

**मैत्र्यादिसारमत्यन्तमध्यात्मं तद्विदो विदुः।। (३५८)**

**20. तत्त्वज्ञानार्थदर्शनम् Philosophical pursuit of the absolute truth**

तत्त्वज्ञानस्य अर्थः प्रयोजनम् अविद्यानिवृत्तिः आनन्दावाप्तिश्च तयोः दर्शनं तत्त्वज्ञानार्थदर्शनम्। सांसारिकप्रपञ्चात् निवृत्ताः तत्त्वज्ञानिनः लोकेऽत्र दुःखमेव अनुभवति। यथोक्तं वीरवर्धमानचरिते -

**सुखदुःखोभयं भाति संसारेऽत्र जडात्मनाम्।**
**अन्वहं केवलं दुःखं ज्ञानिनां च मतेर्बलात्॥** ११/२४

प्राप्ते तत्त्वज्ञाने परान् अपि तारयितुं प्रभवति तत्त्वज्ञः। यथोक्तं ज्ञानसारे -

**ज्ञानी क्रियापरः शान्तो भावितात्मा जितेन्द्रियः।**
**स्वयं तीर्णो भवाम्बोधेः परांस्तारयितुं क्षमः ॥** इति

भगवद्गीतायां अधोलिखिताः श्लोकाः ज्ञानसाधनानि कानीति निरूपयन्ति। एतानि साधनानि मोक्षज्ञानसाधनानि भवन्ति मुमुक्षूणाम्। संसारिणामपि लाभाय एव कल्पन्ते। ज्ञानसाधनसमुच्चयसम्बद्धाः गीतास्थाः श्लोकाः यथा -

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ८ ॥**
**इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ९ ॥**
**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।**
**नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ १० ॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।**
**विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ ११ ॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।**
**एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ १२ ॥**

एवम् अत्र उल्लिखितं विंशकं ज्ञानं ज्ञानसाधनम् इति फलितम्।

### परिशीलितग्रन्थसूची


1. श्रीमद्भगवद्गीता - शाङ्करीविवृतिः, 2020, प्रीति शुक्ल - देवानन्द शुक्ल, एपेक्स बुक पब्लिशर्स, विजय नगर, दिल्ली
2. विश्व संस्कृत सूक्ति कोश, 2006, महोपाध्याय ललित प्रभा सागर, नवभारत प्रकाशन, जोधपुर
3. महाभारत - 1990, सं - वागीश शास्त्री , भुवन वाणी ट्रस्ट, लखनऊ
4. वाल्मीकि रामायण - 2000, गीता प्रेस, गोरखपुर
5. राष्ट्रीय शिक्षा नीति - 2020, मानव संसाधन विकास मंत्रालय, भारत सरकार


❑ ❑ ❑

# वाल्मिकीयरामायणानुगुणं करुणरससमीक्षणम्

डा. दीपिका दीक्षित*

प्रमुखशब्दाः - **रसः, रामायणम्, लोकानुकीर्तनम्, नाट्यशास्त्रम्, अभिनवगुप्तपादाः**

शोधसारः - रसस्य प्राधान्यं काव्यशास्त्रेषु सहजतया दृग्गोचरी भवति। ध्वन्यालोककारेण आनन्दवर्द्धनेनापि रसध्वनिरेव प्राधान्येन स्वीकृतः। स स्पष्टतया समुद्घोषयति 'न हि रसादृते कश्चिदर्थः प्रवर्त्तते'। काव्यप्रकाशकारः वाग्देवतावतारः आचार्यमम्मटोऽपि एवमेव आशयं प्रस्तौति। एवमेव साहित्यदर्पणकारो विश्वनाथः 'वाक्यं रसात्मकं काव्यम्' इत्युक्त्वा काव्यलक्षणं विशदीकुर्वन् प्रसङ्गानुगुणं स्वयमेव वक्ति- 'रसस्वरूपं निरूपयिष्यामः' इति। तत्रैव स स्पष्टीकरोति यत् 'रस एवात्मा साररूपतया जीवनाधायको यस्य। तेन बिना तस्य काव्यत्वाभावस्य प्रतिपादित्वात्'। ननु अत्र जिज्ञासा समुत्पद्यते यत् कोऽयं रसः? एवं समुदिते प्रश्ने, उत्तरमायाति, 'रस्यते इति रसः'। आचार्याः अष्टौ रसाः आमनन्ति यथा हि- श्रृङ्गारहास्यकरूण-रौद्रवीरभयानकवीभत्सोऽद्भुताश्च। शान्तोऽपि नवमो रस इति आचार्यविश्वनाथ-मम्मटप्रभृतिभिः कैश्चित् आचार्यैः स्वीक्रियते। एतेषां विषयवस्तूनां विश्लेषणपूर्वकं एतेषां मानवीयभावानामाधुनिकमनोविज्ञान सन्दर्भे कथं प्रयोगः स्यादित्येवविमर्शविषयः अत्र शोधपत्रे।

= = = =

संस्कृतवाङ्मस्य द्विधा विभागः प्राप्यते- वैदिको लौकिकश्च। उभयत्र साहित्ये लोकस्य अनुकीर्तनं संदृश्यते। तत्र विशिष्य लौकिकसाहित्ये वाल्मीकिरामायणादारभ्य मानवीयभावानां निदर्शनं समग्रतया विविधेषु काव्यग्रन्थेषु दृश्यते। आचार्यभरतेन स्वकीये नाट्यशास्त्रनामाख्ये प्रबन्धे मानवीयभावानां वर्गीकरणं 'अष्टौ स्थायिभावाः इति' कथनद्वारा

---

* सम्पादक-मण्डल-सदस्या - जाह्नवी - ई - शोधपत्रिकायाः, प्राक्तन- शोधच्छात्रा-केन्द्रीय-संस्कृत-विश्वविद्यालय-लखनऊ-परिसरस्य

प्रस्तौति। एतेषां भावानां, विभावादीनाम् अपि च रसानां व्याख्यानं परवर्तिकाव्यशास्त्रेषु मिलति तथा च एतेषाम् उदाहरणानि विविधकाव्येषु प्राप्यन्ते।

इत्थं रसस्य प्राधान्यं काव्यशास्त्रेषु सहजतया दृग्गोचरी भवति। ध्वन्यालोककारेण आनन्दवर्द्धनेनापि रसध्वनिरेव प्राधान्येन स्वीकृतः। स स्पष्टतया समुद्घोषयति 'न हि रसादृते कश्चिदर्थः प्रवर्त्तते'। काव्यप्रकाशकारः वाग्देवतावतारः आचार्यमम्मटोऽपि एवमेव आशयं प्रस्तौति। एवमेव साहित्यदर्पणकारो विश्वनाथः 'वाक्यं रसात्मकं काव्यम्' इत्युक्त्वा काव्यलक्षणं विशदीकुर्वन् प्रसङ्गानुगुणं स्वयमेव वक्ति- 'रसस्वरूपं निरूपयिष्यामः' इति। तत्रैव स स्पष्टीकरोति यत् 'रस एवात्मा साररूपतया जीवनाधायको यस्य। तेन बिना तस्य काव्यत्वाभावस्य प्रतिपादित्वात्'। आचार्यः कुन्तकः अपि रसमहत्त्वख्यापयन् निगदति-

**निरन्तरं रसोद्गारगर्भा सौन्दर्यनिर्भराः।**
**गिरः कवीनां जीवन्ति न कथामात्राश्रिताः॥**

ननु अत्र जिज्ञासा समुत्पद्यते यत् कोऽयं रसः? एवं समुदिते प्रश्ने, उत्तरमायाति, 'रस्यते इति रसः'। आचार्याः अष्टौ रसाः आमनन्ति यथा हि- श्रृङ्गारहास्यकरूणरौद्रवीरभयानकवीभत्सोऽद्भुताश्च। शान्तोऽपि नवमो रस इति आचार्यविश्वनाथ-मम्मटप्रभृतिभिः कैश्चित् आचार्यैः स्वीक्रियते।

एतेषु रसेषु करूणः अन्यतमः इति महाकविभवभूतिः अङ्गीकरोति। उत्तररामचरिते महाकविभवभूतिर्निगदति -

**अनिर्भिन्नो गम्भीरत्वादन्तर्गूढघनव्यथा।**
**पुटपाकप्रतीकाशो रामस्य करूणो रसः॥**

अतः पूर्वं रामायणे हि करूणो रसः स्वयमादिकविना सूत्रितः- 'शोकः श्लोकत्वमागतः इति। निर्व्यूढश्च स एव सीतावियोगपर्यन्तं स्वप्रवन्धमुपरचयता।

**काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**

अस्य करूणरसस्य स्थायीभावः शोकः। आचार्यः विश्वनाथः करुणस्य लक्षणमित्थं करोति- 'इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्' इति। एवमेव नाट्यशास्त्र-दशरूपक-काव्यप्रकाश-साहित्यदर्पण-प्रभृतिषु ग्रन्थेषु करूणरसस्य लक्षणं स्पष्टरूपेण प्राप्यते। आचार्यभरतमुनिना स्वकीये प्रबन्धे नाट्यशास्त्रे करुणरससन्दर्भे व्याख्यानं क्रियते - "अथ करुणो नाम शोकस्थायिभावप्रभवः। स च शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाश-वधबन्धविद्रवोपघातव्यसनसंयोगादिभिर्विभावैः समुपजायते। तस्याश्रुपातपरिदेवनमुखशोषणवैवर्ण्यस्रस्तगात्रतानिश्श्वास स्मृति-लोपादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्य निर्वेदग्लानिचिन्तौत्सुक्यावेग-भ्रममोहश्रमभयविषाददैन्यव्याधिजडतोन्मादापस्मारत्रासालस्यमरणस्तम्भवेपथुवैवर्ण्याश्रुस्वरभेदादयः। अत्रार्ये भवतः -

**इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवाद्वापि ।**
**एभिर्भावविशेषैः करुणो नाम संभवति ॥**
**सस्वनरुदितैर्मोहागमैश्च परिदेवतैर्विलपितैश्च ।**
**अभिनेयः करुणरसो देहायासाभिघातैश्च ॥**

यथा पूर्वं वर्णितं करूणरस एव सर्वातिशयीति महाकविभवभूतिः स्वीकरोति। स आभणति उत्तररामचरिते -

**एको रसः करूण एव निमित्तभेदाद्**
**भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।**
**आवर्तबुद्बुद्तरङ्गमयान्विकारा-**
**नम्भो यथा सलिलमेव तत् समस्तम्॥**

ननु तर्हि करूणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते 'करूणादावपि रसे जायते यत्परं सुखमायाति। सचेतसामनुभवः प्रमाणं तत्र केवलम्।' किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः। नहि कश्चित् सचेतन आत्मनो दुःखाय प्रवर्त्तते। करूणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात् सुखमयत्वमेव। तथा रामायणादीनां भविता दुःखहेतुता। करूणरसस्य दुःखहेतुत्वे करूणरसप्रधान-

रामायणादिप्रबन्धानामपि दुःखहेतुता प्रसङ्गः स्यात्। ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरिति आचार्यः विश्वनाथः निगदति-

**हेतुत्वं शोकहर्षादिर्गतेभ्यो लोकसंश्रयात्।**
**शोकहर्षादयो लोके जायन्तां लौकिकाः॥**
**अलौकिकमविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्।**
**सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः॥**

ये खलु रामवनवासादयो लोके दुःखकारणानि इत्युच्यन्ते ते सर्वे हि काव्यनाट्यसमर्पिता अलौकिक विभावनव्यापारवत्तया काव्यशब्दवाच्यतां विहाय अलौकिकविभावशब्दवाच्यत्वं भजन्ते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोक-हर्षादयो जायन्ते इति लोक एव प्रतिनियमः। काव्ये पुनः 'सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते' इति नियमान्न कश्चिद्दोषः।

अतो रामायणे यो करूणरसः प्रवर्त्तितः सोऽपि अलौकिकविभावादिभ्यः सुखमेव सञ्जायते। श्रीमदभिनवगुप्तपादेन ध्वन्यालोकस्य लोचनटीकायामस्य विस्तरं वर्णनं प्रस्तौति - "स एव तथाभूतविभावतदुत्थाक्रन्दाद्यनुभावचर्वणया हृदयसंवादतन्मयी-भवनक्रमात् आस्वाद्यमानतां प्रतिपन्नः करूणरसरूपतां लौकिकशोकव्यतिरिक्तां स्वचित्तद्रुतिसमास्वाद्यसारां प्रतिपन्नः रसपरिपूर्णो कुम्भोच्छलनवत् चितवृत्तिनिःष्यन्द-स्तभाववाग्विलासादिवच्च समयानपेक्षत्वेऽपि चित्तवृत्तिव्यञ्जकत्वात् इति नयेनाकृतक-तयैवावेशवशात् समुचितशब्दछन्दो वृत्तादिनियन्त्रितश्लोकरूपतां प्राप्तः -

**मा निषाद! प्रतिष्ठां त्वमगमः शाश्वती समाः।**
**यत्क्रौञ्चमिधुनादेकमवधीः काममोहितम्[1] ॥**

रामायणस्य अङ्गीरसः शोक एव। क्रौञ्चस्य द्वन्द्ववियोगेन सहचरीहननुद्भूतेन साहचर्यध्वंशेनोत्थितो यः शोकः स्थायिभावादनन्य स एव न तु मुनेः शोक इति

[1] ध्वन्यालोकः, लोचनटीका, पृ.87

मन्तव्यम्। एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत्। न च दुःखसन्तप्तस्यैषा दशेति ।

एवं चर्वणोचितशोकस्थायिभावात्मक-करुणरसमुच्चलनस्वभावत्वात् सएव काव्यस्यात्मा सारभूतस्वभावोऽपरशाव्दवैलक्षण्यकारकः। शोके हि स्थायिभावे ये विभावानुभावास्तत्समुचिता चित्तवृत्तिश्चर्व्यमाणात्मा रस इत्यौचित्यात्स्थायिनो रसतापत्तिरित्युच्यते। प्राक्स्वसंविदितं परत्रानुमितं च चित्तवृत्तिजातं संस्कारक्रमेण हृदयसंवादमादधानं चर्वणायामुपयुज्यते ।एतदेवोक्तं हृदयदर्पणे-यावत्पूर्णो न चैतेन तावन्नैव वमत्यमुम्[1]ऽ इति।' एवञ्च मुनेः शोक एव श्लोकरूपेण परिणतः। न च मुनेरपितु रामस्य पुटपाकवत् शोकः सकले रामायणे दरीदृश्यते। 'दुःख संवेदनायैव रामे चैतन्यमागतम्[2]'।

न केवलं रामेऽपितु नैकेषु पात्रेषु करूणरसस्य धारा प्रवाहिता वरीवर्ति। एवञ्च सम्पूर्णे रामायणे करूणरस एव प्राधान्येनाभिव्यज्यते। विशेषतः अयोध्याकाण्डे उत्तरकाण्डे च कारूण्यस्य मार्मिकी अभिव्यञ्जना दृश्यते। इतोऽपि अरण्यकाण्ड-किष्किन्धाकाण्ड-युद्धकाण्ड-सुन्दरकाण्डप्रभृतिषु काण्डेष्वपि करूणरसस्य प्रसङ्गः प्राप्यते। नायकं व्यतिरिच्यात्र प्रतिनायकेऽपि शोकस्य सजीवचित्रणमुररीकरोति कविः। कानिचन् उदाहरणानि एवं परिगणयितुं शक्यते। अयोध्याकाण्डे कैकयीवरयाचनां[3] श्रुत्वा दशरथस्य शोकाकुलपरिस्थितौ[4] रामवनगमनावसरे दशरथ-कौसल्याप्रभृतीनां विलाप[5]प्रसङ्गे,

---

[1] ध्वन्यालोकः **1/5**

[2] उत्तरामचरितम् - **1/47**

[3] नवपञ्च च वर्षाणि दण्डकारण्यमाश्रितः॥
चीराजिनधरो धीरो रामो भवतु तापसः।
भरतो भजतामच यौवराज्यमकण्टकम्॥ **(वा.रा.-2/11/26-27)**

[4] तत्रैव - **2/12/4-6, 2/18/13**

[5] तत्रैव **2/20/1-6,20,32-33,52-55**

भरतस्य शोके[1] अपि च उत्तरकाण्डे सीता[2]निर्वासनप्रसङ्गे रामस्य शोके[3], सीताविलापे[4] च, इतोऽपि युद्धकाण्डे लक्ष्मणमूर्च्छा[5]प्रसङ्गे, सीतावियोगे रामविप्रलम्भे[6], तारा[7]विलापे, मन्दोदरी[8]विलापे, च सर्वत्र करूणरसस्य प्रवाहः परिदृश्यत एव। एतादृशः शोको दृश्यत दृश्यत एवात्र सर्वत्र।

एवञ्च वाल्मीकेः शोकः श्लोकस्य प्रभाव एव संलक्ष्यते सम्पूर्णे रामायणे। यस्मिनन्नस्मिन् जगति समस्ता सृष्टिः साधरणीकृता इव प्रतीयते खलु। एवमेव महाकविभवभूतिरपि महत्वं ख्यापयति-'**अपि ग्रावा रोदयत्यपि दलति वज्रस्य हृदयम्**[9]'।

उपर्युक्तविविधोदाहरणप्रस्तुतिपुरस्सरं एवं विश्लेषणं निकषं प्रस्तोतुं शक्यते यत् रामायणे तथा च अन्येषु साहित्येषु वर्णितानां मानवीयभावानां विशिष्य करुणार्द्रभावानामाश्रित्याधुनिकमनोविज्ञानमाश्रयन् यदि शोधः स्यात् तर्हि तत्तदग्रन्थानां मूल्यांकनमाधुनिकपरिप्रेक्ष्ये इतोऽ द्विगुणितं भविष्यतीति निश्चप्रचमिति शम्।

### सन्दर्भग्रन्थसूची

1. काव्यप्रकाश: - चौखम्भाविद्याभवन, वाराणसी 2017
2. साहित्यदर्पण: - चौखम्बा सुरभारती प्रकाशन, वाराणसी 2013
3. सरस्वतीकण्ठाभरणम् - निर्णयसागरमुद्रणालय, मुम्बई, 1934

---

[1] **वा.रा. 2/114/2-28**

[2] **तत्रैव - 7/43/21**

[3] **वाष्पपूर्णे च नयने दृष्टवा रामस्य धीमतः।
हतशोभं तथा पद्मं मुख्य वीक्ष्य च तस्य ते॥ (तत्रैव -7/44/16)**

[4] **मार्मिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण।
धात्रा यस्यास्तथा मेडयं दुःखमूर्ति प्रदृश्यते॥ (तत्रैव 7-48/3)**

[5] **तत्रैव -6/10/6, 6/101/7-8, 16-19**

[6] **तत्रैव -6/32/3-4**

[7] **तत्रैव - 4/23/1-30**

[8] **तत्रैव - 6/111/2-90**

[9] **तत्रैव - 1/28**

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

4. काव्यशास्त्र का इतिहास , भारतीय विद्याभवन दिल्ली
5. संस्कृतसाहित्य का इतिहास , वाचस्पति गैरोला ,चौखम्बा विद्याभवन, वाराणसी
6. उपाध्याय, बलदेव. संस्कृत वाङ्मय का बृहद् इतिहास. लखनऊ : उत्तर प्रदेश संस्कृत संस्थान, २००६.
7. उत्तरामचरितम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन, 1995.
8. दशरूपकम्, वाराणसी : चौखम्बा विद्याभवन, 1973
9. डा. कृष्णकुमार, ध्वन्यालोकः, मेरठ : साहित्य भण्डार, 2008.
10. वाल्मीकिरामायणम्, गोरखपुर : गीताप्रेस, 2006
11. साहित्यदर्पणः, वाराणसी : मोतीलाल बनारसीदास, 2009.

❑ ❑ ❑
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~